UNIVERSAL
LIBRARY
OU_184090
UNIVERSAL
LIBRARY

GANADARPANA

EDITED

BY

RAMATARANA SHIROMONY

HEAD PANDIT

OF THE

KANDEE SCHOOL

SIXTH EDITION.

गणादर्पणः ।

पाणिनीयधातुसहितसकलधातुरूपात्मकः ।

कान्दिस्थराजकीय-विद्यालयाध्यापकेन

श्रीयुक्त रामतारण-शिरोमणिना

प्रणीतः ।

षष्ठसंस्करणम् ।

कलिकातानगर्यां

घोष-यन्त्रे मुद्रितः ।

सन १३२० ।

প্রকাশক—শ্রীরামকিঙ্কর বন্দ্যোপাধ্যায়
কান্দি।
প্রিণ্টার—শ্রীমন্মথনাথ ঘোষ
৩৮ নং শিবনারায়ণ দাসের লেন, ঘোষ-প্রেস—কলিকাতা।

প্রথমবারের বিজ্ঞাপন।

এক্ষণে সংস্কৃত ভাষার উন্নতি সাধনার্থ সহৃদয় নব্য সম্প্রদায় বদ্ধপরিকর হইয়াছেন—ইহা অতিশয় সৌভাগ্যের বিষয়। আহা! কিছুকাল পূর্ব্বে এই ভাষার যে কি দুরবস্থা ঘটিয়াছিল, তাহা স্মরণ করিতে হইলে হৃদয় বিদীর্ণ হয়। সে যাহা হউক, বর্ত্তমান সময়ে এ ভাষার অসাধারণ চমৎকারিত্ব দেশীয় বিদেশীয় জনগণের হৃদয়ে দৃঢ়লগ্ন হইয়াছে, অতএব অল্পকাল-মধ্যেই যে ইহার পুনরুন্নতি আমাদের নয়নগোচর হইবে, তাহার সন্দেহ নাই। কিন্তু অগ্রে ইহার কণ্টকাবৃত বর্ত্ম সুপরিষ্কৃত করিতে না পারিলে কেহই ইহার মধুর মুখ নিরীক্ষণ করিতে সমর্থ হইবেন না।

ধাতুগহন এত জটিল যে, মহামহোপাধ্যায়গণকেও এ গহনে স্খলিতপদ হইতে দেখা গিয়া থাকে; অল্পমতি বালকগণের ত কথাই নাই। অতএব দুর্ব্বোধ ধাতুকদম্ব যাহাতে সুগম করিতে পারা যায়, সে বিষয়ে সকলের যত্ন করা কর্ত্তব্য। আমি যথাসাধ্য চেষ্টা ও পরিশ্রম স্বীকার করিয়া সকল ধাতুর অর্থ ও রূপ সংগৃহীত করিয়া এই পুস্তক মুদ্রিত ও প্রচারিত করিলাম। কিন্তু কি পর্য্যন্ত কৃতকার্য্য হইয়াছি, তাহা বিজ্ঞ পাঠকগণই কলিতে পারেন অজ্ঞতাবশতঃ আপনি কিছুই স্থির করিতে পারিলাম না।

গ্রন্থ-সংক্ষেপ-করণার্থ আমরা নিম্নলিখিত নিয়মে ধাতুর রূপ প্রদর্শন করিয়াছি।

১। ভ্বাদি, দিবাদি, তুদাদি ও চুরাদিগণীয় ধাতুর লট্‌বিভক্তিতে যে কার্য্য হয়, লোট্ লিঙ্ ও লঙ্ বিভক্তিতেও সেইরূপ কার্য্য হয়, এজন্য আমরা তত্তদ্গণীয়স্থলে লটের প্রথম পুরুষের একবচনের পদমাত্র দিয়াছি।

২। অদাদি হ্বাদি প্রভৃতি গণীয় ধাতুর পকারেৎ সার্ব্বধাতুক-বিভক্তিমাত্রেই প্রায় একরূপ কার্য্য হইয়া থাকে, এবং পিৎ ভিন্ন সার্ব্বধাতুক-বিভক্তিমাত্রেই প্রায় একরূপ কার্য্য হয়। এই নিমিত্ত আমরা লট্ লোট্ ও লঙের তাবৎ পদ না লিখিয়া কেবল সেই সকল পদ লিখিলাম, যদ্দ্বারা অবশিষ্ট সমস্ত পদও কল্পিত হইতে পারে।

৩। লিটের প্রথম পুরুষের দ্বিবচনে যে যে কার্য্য হয় আর সমস্ত বিভক্তিতেও সেইরূপ কার্য্য হইয়া থাকে, কেবল পরস্মৈপদের একবচনে রূপান্তর হয়। এই নিমিত্ত আমরা প্রথম পুরুষের একবচন ও দ্বিবচনের পদমাত্র দিলাম। এবং লিটের ব্যঞ্জনাদি বিভক্তিতে সকল ধাতুর উত্তর ইট্ হয়। যে যে স্থলে ইটের নিষেধ অথবা বিকল্পে বিধি আছে, সে সমস্ত পদ প্রদর্শিত হইয়াছে।

৪। লুট্ লৃট্ লৃঙ্ বিভক্তিতে প্রায় একই কার্য্য, এই নিমিত্ত তাহাদের এক একটী পদ প্রদর্শিত হইয়াছে।

৫। আশীর্লিঙ্ বিভক্তিতে যে যে স্থলে কার্য্যবিশেষ আছে—তত্তৎপদমাত্র দিয়াছি।

৬। লুঙ্ বিভক্তিতে প্রায় সকল ধাতুর প্রথম পুরুষের রূপ প্রদর্শিত হইয়াছে। দ্বিবচনে যে যে কার্য্য হয়, অন্যান্য বিভক্তিতেও সেইরূপ কার্য্য হয়। অতএব দ্বিবচনান্তপদের সদৃশ অন্যান্য পদ কল্পিত হইবে। সনন্তাদি পদের ভূরিপ্রয়োগ দেখা যায় না, এজন্য একটীমাত্র পদ প্রদত্ত হইয়াছে।

কান্দী বিদ্যালয়। খ্রীঃ ১৮৬৭।

শ্রীরামতারণশর্ম্মণঃ।

দ্বিতীয়বারের বিজ্ঞাপন।

প্রথমবারে গণদর্পণে ধাতু সকল অন্ত্য অকারাদি বর্ণ অনুসারে প্রবিষ্ট হইয়াছিল; কিন্তু তাহাতে ঝটিতি ধাতু বাহির করা সকলের পক্ষে অতি সহজ হইত না; এই হেতু এবার ধাতু সকল আদ্য অকারাদিক্রমে সন্নিবেশিত করা হইয়াছে। বিশেষ, এস্থলে ইহা বলা বাহুল্য যে, গত বার অপেক্ষা এবার সমধিক পরিশ্রম স্বীকার করা হইয়াছে। স্থানে স্থানে সংক্ষিপ্ত বিচার ও স্থানে স্থানে আবশ্যকমত বহুবিধ প্রমাণ প্রয়োগ দিতেও ত্রুটি করা হয় নাই। (শোধনকার্য্যও পূর্ব্বাপেক্ষা প্রশংসনীয় হইয়াছে।) এই সমুদায় বিশেষ কারণে এবার গ্রন্থের আয়তন বৃদ্ধি হইয়াছে। এমন কি পূর্ব্বাপেক্ষা প্রায় চার পাঁচ ফরমা অধিক হইয়া পড়িয়াছে। সুতরাং এবার ইহার মূল্যও কিঞ্চিৎ অধিক পরিমাণে নির্দ্দেশ করিতে বাধ্য হইয়াছি। গতবার ১।০ এক টাকা চারি আনা ছিল; এবার ১৷৷০ এক টাকা আট আনা মাত্র নির্দ্ধারিত হইল।

কান্দী বিদ্যালয়। ১২৮৩ সাল।

শ্রীরামতারণশর্ম্মণঃ।

তৃতীয়বারের বিজ্ঞাপন।

এই সংস্করণে কবিরহস্য ও ধাতুপ্রদীপ হইতে প্রমাণ সংগ্রহ করিয়া ইহার অন্তর্নিবিষ্ট করিয়াছি। পূর্ব্বাপেক্ষা ইহা বিশেষরূপে সংশোধিত হইয়াছে।

কান্দী-বিদ্যালয়। ১৮৮৭ সাল।

শ্রীরামতারণশর্ম্মণঃ।

पाणिनीया विभक्तयः ।

तिप् तस् झि । सिप् थस् थ । मिप् वस् मस् ॥
त आताम् झ । थास् आथाम् ध्वम् । इट् वहि महिङ् ॥

पा ३, ४, ७८ ।

आदिष्टा विभक्तयः ।

लट् लट्

परस्मैपदम्

प्रथमपुरुषः			मध्यमपुरुषः			उत्तमपुरुषः		
ए०	द्वि०	ब०	ए०	द्वि०	ब०	ए०	द्वि०	ब०
तिप्	तस्	अन्ति ।	सिप्	थस्	थ ।	मिप्	वस्	मस् ।

आत्मनेपदम्

ते	आते	अन्ते ।	से	आथे	ध्वे ।	ए	वहे	महे ।

लोट्

परस्मैपदम्

तुप्	ताम्	अन्तु ।	हि	तम्	त ।	आनिप्	आवप्	आमप् ।

आत्मनेपदम्

ताम्	आताम्	अन्ताम् ।	स्व	आथाम्	ध्वम् ।	ऐप्	आवहैप्	आमहैप् ।

लिङ्

परस्मैपदम्

यात्	याताम्	युस् ।	यास्	यातम्	यात ।	याम्	याव	याम ।

आत्मनेपदम्

ईत	ईयाताम्	ईरन् ।	ईथास्	ईयाथाम्	ईध्वम् ।	ईय	ईवहि	ईमहि ।

लङ् लुङ् लृङ्

परस्मैपदम्

प्रथमपुरुषः			मध्यमपुरुषः			उत्तमपुरुषः		
ए०	द्वि०	ब०	ए०	द्वि०	ब०	ए०	द्वि०	ब०
दिप्	ताम्	अन्।	सिप्	तम्	त।	पम्	व	म।

आत्मनेपदम्

त	आताम्	अन्त।	थास्	आथाम्	ध्वम्।	इ	वहि	महि।

लिट्

परस्मैपदम्

णल्	अतुस्	उस्।	थल्	अथुस्	अ।	णल्	व	म।

आत्मनेपदम्

ए	आते	इरे।	से	आथे	ध्वे।	ए	वहे	महे।

लुट्

परस्मैपदम्

ता	तारौ	तारस्।	तासि	तास्थस्	तास्थ।	तास्मि	तास्वस्	तास्मस्।

आत्मनेपदम्

ता	तारौ	तारस्।	तासे	तासाथे	ताध्वे।	ताहे	तास्वहे	तास्महे।

आशीर्लिङ्

परस्मैपदम्

यात्	यास्ताम्	यासुस्।	यास्	यास्तम्	यास्त।	यासम्	यास्व	यास्म।

आत्मनेपदम्

सीष्ट सीयास्ताम् सीरन्। सीष्ठास् सीयास्थाम् सीध्वम्। सीय सीवहि सीमहिङ्।

गणदर्पणः ।

भ्वाद्यदादौ जुहोत्यादि-दिवादौ स्वादिरेव च ।
तुदादिश्च रुधादिश्च तनक्रयादिचुरादयः ॥

(अ)

अक्—भ्वा प ।

कुटिलगतिः । वक्रगतिः । लट् अकति । लिट् आक । आकतुः । लुट् अकिता । लुङ् आकीत् । आकिष्टाम् । णिच् अकयति । घटादिः ।

अच्—अचू, भ्वा, प ।

१ व्याप्तिः । २ संहतिः, वो । लट् अक्ति, अक्नोति पा ३, १, ७५ । लङ् आक्त, आक्नोत् । लिट् आनक्ष । आनक्षतुः । आनक्षिथ आनष्ठ पा ७, २, ४३ । लुट् अक्षिता, अष्टा । लृट् अक्षिष्यति, अक्ष्यति । लुङ् आक्षीत् । आक्षिष्टाम्, आष्टाम् । आक्षिषुः, आक्षुः । इडभावपक्षे वृद्धिः । मा भवानाक्षीत् । सन् अचिक्षिषति. अचिक्षति । णिच् अक्षयति । आचिक्षत् । अक्षित्वा, अष्ट्वा । क्त अष्टः । क्तिन् अष्टिः । अक्षि, अक्षम्, अष्टौ । सम्—प्राप्तिः ।

अग्—(अक) भ्वा, प ।

वक्रगतिः । अगति । आग । अगिता । णिच् अगयति । घटादिः ।

अघ—चु, प । अदन्तः ।

पापकरणम् । लट् अघयति ।

अङ्क्—अकि, भ्वा, आ ।

१ अङ्कनम् । चिह्नीकरणम् । २ गतिः वो । लट् अङ्कते । अङ्कते पुण्यतीर्थेषु वृषयुग्मानि शक्तितः । अङ्कयत्यरिसैन्यानि युधि पृष्ठेषु सायकैः ॥ कवि १६० । लिट् आनङ्के । लुट् अङ्किता । लुङ् आङ्किष्ट । सन् अञ्चिकिषते । अङ्क—चु, प । अदन्तः । १ गतिः । २ लक्षणम् । अङ्कयति । अङ्कापयति । अङ्कयामास वस्त्रान्, भारत । अकि, वो । अङ्क्यते । अङ्कति । अङ्कनम् । अङ्कितः । अङ्कः "नाङ्का राज्ञा ललाटे स्युः" मनुः ८, २५० ।

अङ्ग्—अगि, भ्वा, प । गतिः ।

लट् अङ्गति । लिट् आनङ्ग । अङ्ग (अङ्ग) चु, प । अदन्तः । १ गतिः । २ अङ्गनम् । अङ्गयति । अङ्गापयति, वो । अङ्गम् । अङ्गना ।

अञ्च—अधि, भ्वा, आ ।

१ गतिः । गमनारम्भः । २ आक्षेपः । निन्दा । ३ आरम्भः, वो । लट् । अञ्चते लिट् आनञ्चे । लुट् अञ्चिता । लुङ् आञ्चिष्ट । अञ्चः ।

अचु (अनचु)

अज्—भ्वा, प । १ गतिः ।

२ क्षेपणम् । लट् अजति । लिट् विवाय, पा २, ४, ५६ । विव्यतुः । विवयिथ, विवेथ, आजिथ, की ४० । विवाय, विवय । विव्यिव । लुट् वेता, अजिता । लृट् वेष्यति, अजिष्यति । आशिषि वीयात् । लुङ्

अवैषीत्। अवेष्टाम्। अवेषुः। पक्षे आजीत्। आजिष्टाम्। आजिषुः। सन् विवीषति। यङ् वेवीयते। अस्य यङ्लुग् नास्ति, कौ २१९। णिच् वाययति। प्रवायकः। प्रवयणीयम्। प्रवीतः। प्रवयनः, प्राजनः, पा २,४,५७। संवीतिः। ममजः, समाजः। व्यजः। वातमजः। अजिरम्।

अञ्च्—अनच्, भ्वा, प।

१ गतिः। २ पूजनम्। अनच्, अचु, अचि, भ्वा, उ। १ गतिः। २ याचनम्। ३ अभ्यक्तार्थशब्दः, वो। लट् अञ्चति। ०ते, स्वतन्त्रा कथमञ्चसि, भ ४, २२। अचु, अचति। ०ते। लिट् आनञ्च। आनञ्चे। राममानञ्चुर्यन्त्रिया मृगाः, भ १४, ८९। लुट् अञ्चिता। लृट् अञ्चिष्यति। ०ते। आञ्चिषि, अञ्चात्, पा ६,४,३०। गतौ तु अञ्चात्, पा ६, ४, २४। लुङ् आञ्चीत्। आञ्चिष्टाम्। आञ्चिषुः। आञ्चिष्ट। आञ्चिषाताम्। आञ्चिषत। कर्मणि, अच्यते। अचि, अञ्चाते। सन् अञ्चिचिषति। ०ते। णिच् अञ्चयति। अनच्, चु, प। विशेषणम्। अञ्चयति। अञ्चति। मुदमञ्चय, गीतगो १०, ११। (उ) अञ्चित्वा, पा ७,२,५३। अङ्क्ता पूजायाम्। अन्यत्र अङ्क्ता। अक्तः, अञ्चितः, अञ्चितविक्रमः, र ९, २४। उच्चैरञ्चितलाङ्गूलः शिरोऽञ्चित्वेव संवहन्, भ ९,४०। प्राङ्, सध्यङ्। पूजायां प्राञ्चा, प्राङ्भ्याम्। अव—अधोगतौ अवाङ्। उद्—उद्गतिः। उदञ्चिताक्षः, भ १, २१। उदक्तमुदकं कूपात्, पा ७,२,५३। सम्, समक्तौ शकुनेः पादौ, पा ८,२,४८। नि—व्यग्भावः। न्यञ्चत्यदञ्चत्यपि, मञ्जरी, ३,८१

अञ्ज्—अनजू, रु, प।

१ व्यक्तिः। प्रकाशः। २ मर्षणम्। ३ म्रक्षणं, वो। ४ कान्तिः। ५ गतिः। लट् अनक्ति। अङ्क्तः। अञ्जन्ति। लोट् अनक्तु। अङ्ग्धि। अनजानि। लिङ् अञ्ज्यात्। लङ् आनक्। आङ्क्ताम्। आञ्जन्। लिट् आनञ्ज। आनञ्जिथ, आनङ्क्थ। लुट् अञ्जिता, अङ्क्ता। लृट् अञ्जिष्यति, अङ्क्ष्यति। लुङ् आञ्जीत्। आञ्जिष्टाम्। आञ्जिषुः पा ७, २, ७१। सन् अञ्जिजिषति, पा ७, २, ७४। णिच् अञ्जयति। आञ्जिजत्। मानाञ्जौ रागसोर्मायाः, भ ९, ४९। अञ्जयन्तौ खलु नेत्रे, मनुः ४,४४। अजि, चु, प, दीप्तिः। अञ्जयति। अञ्जित्वा, अङ्क्ता, अक्ता, पा ६,४,३२। अक्तः। अभि—अभ्यङ्क्तः। वि—व्यक्तिः, अकिञ्चनत्वं मखजं व्यनक्ति, रघु ५, १९। व्यनक्ति यच्छरीरस्थं लक्षणं सार्वभौमताम्। व्यञ्जयन्ति च गोदानं यज्ञेषु याज्ञिका द्विजाः॥ कवि २२८। भुजङ्गा व्यज्यन्ते मणिभिः फणस्थैः, र १३,१२। अभिवि—अभिव्यक्तिः, तां प्रत्यभिव्यक्तमनोरथानाम्, र ६,१२। १९, २३।

अट्—भ्वा, प। गतिः।

भ्रमणम्। लट् अटति। लिट् आट। आटतुः। आश्रमानाट, भ ४,१२। लुट् अटिता। लृट् अटिष्यति। लुङ् आटीत्। आटिष्टाम्। आटिषुः। कपिराटीद् गहनाद् गहनम्, भ ८,४२। सन् अटिटिषति। यङ् अटाट्यते, पा ७,४,८२। अटाट्यमानोऽरण्यानीम्, भ ४,२। णिच् आटयति। आटिटत्। परि—पर्य्यटनम्। तीर्थानि पर्य्यटस्व, भारत। अट्, चु प (अट्ट)।

अट्ट्—अट्ट, अत्ट्, अट्ट्। भ्वा, आ। १ अतिक्रमः। २ हिंसा। लट् अट्टते। लिट् आनट्टे। लुट् अट्टिता। लुङ् आट्टिष्ट। सन् अट्टिटिषते। अटिट्टिषते। "अतिट्टिषते"। अट्ट—चु, प। अनादरः। अट्टयति। आट्टिटत्। अट्—आटयतीति रमानाथः। क्विप् अट् 'अत्'।

अठ्—भ्वा, आ। (अण्ठ्)।

अड्—भ्वा, प। उद्यमः।

लट् अडति। लिट् आड। आडतुः। लुट् अडिता। लुङ् आडीत्।

अड्ड्—अट्ड्, भ्वा, प।

१ अभियोगः। समन्तात् योगः। २ निर्वाहः, वो। लट् अड्डति। लिट् आनड्ड। लुट् अड्डिता। लुङ् आड्डीत्। सन् अडिड्डिषति। अड्डिडिषति, वो। णिच् अड्डयति। आड्डिडत्। क्विप् अत्।

अण्—भ्वा, प। शब्दः।

दि, आ। प्राणनम्। जीवनम्। लट् अणति। अण्यते, न प्राण्यते पुरं तस्य प्रतिकूलं करोति यः। कवि १७२। लिट् आण। आणे। लुट् अणिता। लुङ् आणीत्। आणिष्ट। सन् अणिणिषति। ०ते। णिच् आणयति। अन्, अन्यते इत्येके। आणकः।

अण्ठ्—अठि, अठ, भ्वा, आ।

गतिः। लट् अण्ठते। लिट् आनण्ठे। लुट् अण्ठिता। लुङ् आण्ठिष्ट। सन् अण्ठिठिषते। णिच् अण्ठयति। आण्ठिठत्। अठते इति काशिका। अठति, वो।

अत्—भ्वा, प। भ्रमणम्। सततगमनम्। लट् अतति। लिट् आत। आततुः। लुट् अतिता। लृट् अतिष्यति। लुङ् आतीत्। मा भवानतीत्। आतिष्टाम्। आतिः, ख्यातिः, पदातिः, अतसी।

अद्—अदा, प। भक्षणम्।

लट् अत्ति। अत्तः। अदन्ति, किमदन्ति मृङ्गाः, विदग्धमु। हि अद्धि। लिङ् अद्यात्। लङ् आदत्, पा ७,३,१००। आत्ताम्। आदन्। आदः। लिट् जघास, पा २,४,४०। जक्षतुः। जघसिथ। पक्षे, आद। आदतुः। आदिथ, पा ७,२,६६। अस्त्रैरादिथ शस्त्राणि, भ ८,४८। लुट् अत्ता। लृट् अत्स्यति, नरानत्स्यन्ति, भ १६,३२। लुङ् अघसत्, पा २,४,३७। क्षुध्यन्नोऽप्यघसन् व्यालास्त्वामपालां कथं न वा, भ ५, ६६। कर्मणि, अद्यते। अनेनात्स्यामहे वयम्, भ ७,८२। सन् जिघत्सति। णिच् आदयति। ०ते। जग्ध्वा। जग्धः। अन्नमिति संक्षिप्तसारम्। अग्नरः। घासः। अत्तुं माहेन्द्रियं भागम्, भ ५,११। नि—निवसः, न्यादः।

अन्—अदा, प। अन्, (अण्) दि, आ। प्राणनं, जीवनम्। लट् अनिति, पा ७,२,७६। अनितः। अनन्ति। दि, अन्यते। हि, अनिहि। लिङ् अन्यात्। लङ् आनीत्, आनत्। आनिताम्। आनन्। लिट् आन। आने। लुट् अनिता। लृट् अनिष्यति। ०ते। लुङ् आनीत्। आनिष्टाम्। आनिषुः। आनिष्ट। सन् अनिनिषति। ०ते। णिच् आनयति। आनिनत्—न अन्नम्। प्र—श्वासत्यागः, जीवनम्। प्राणिति। परापाणिति, पा ८,४,१८। अपमृत्युं परित्यज्य सुखं प्राणिति यत्प्रजा। कवि १७२। प्राणिषति, पा ८, ४, २१। प्राणिषत्।

प्राणिवस्तव मानार्थम्, भ ४, ३८। प्राणोद्गमौलीच्च लोचने, भ १५, १०२। प्राणनम्। प्राणनम्। "प्राणोऽपानः समानश्चोदानव्यानौ च वायवः" इत्यमरः।

अन्त्-अन्द्-ईन्त्—अति, अदि, ईति। भ्वा, प। वर्णनम्। लट् अन्तति। अन्दति। ईन्तति। लिट् आनन्त। अति, अदि, इदि, विदि, गडि पञ्चैते न तिङ्विषया इति काश्यपादयः। अन्ये तु तिङमपीच्छन्ति। अन्तः। अन्तकः। अन्दुकः। अन्दूः।

अन्ध—चु, प। अदन्तः।

१ दृष्टिरहितीभावः। २ उपसंहारः। अन्धयति। आन्धत्। अन्धितः।

अभ्र्—भ्वा, प। गतिः।

लट् अभ्रति। लिट् आनभ्र। आनभ्रतुः। वनेष्वानभ्र निर्भयः, भ ४, ११। लुट् अभ्रिता। लुङ् आभ्रीत्। मा भवानभ्रीत्। सन् अबिभ्रिषति। णिच् अभ्रयति। आबिभ्रत्। अभ्रम्।

अम्—भ्वा, प। १ गतिः।

२ शब्दः। ३ सम्भक्तिः, सेवा। लट् अमति, अमन्ति व्याधस्योऽप्येनम्, कवि १८०। लिट् आम। आमतुः। लुट् अमिता। लृट् अमिष्यति। लुङ् आमीत्। आमिष्टाम्। णिच् आमयति। अम, चु, प, रोगः, अमयति, आमयन्ति यम्, कवि १८० आमतः। आन्तः। अभ्यमितः, अभ्यान्तः, पा ७, २, २८। अभ्यमी। अमः।

अम्ब—अबि, भ्वा, आ। शब्दः। लट् अम्बते। लिट् आनम्बे। लुट् अम्बिता। लुङ् अम्बिष्ट। अम्ब्, भ्वा, प। गतिः। अम्बति, वो।

अय्—भ्वा, आ। गतिः।

लट् अयते। लिट् अयाञ्चक्रे, पा ३, १, ३७। लुट् अयिता। लृट् अयिष्यते। आशिषि अयिषीढ्वम्, अयिषीध्वम्। लुङ् आयिष्ट। आयिषाताम्। आयिषत। आयिढ्वम्, आयिध्वम्, पा ८, ३, ७८। सन् अयियिषते। णिच् आययति। आयः। प्र—परा—पलायनम्। प्लायते। पलायते, पा ८, २, १९। दुरितञ्च पलायते, कवि २५९। पलायाञ्चक्रे, मा ५, १०६। तमादाय पलायिष्ट, भ १५, ५६। पलायितः। निर्—निलयते। दुर्—दुनयते। उदयति वितनोरंशुरश्मिरज्जौ, मा ४, २०। अय गताविति स्वरितेतं केचिदिच्छन्ति, मल्लो। वस्तुतस्तु इ गतावित्यस्य रूपम्।

अर्क्—चु, प। १ स्तुतिः।

२ तपनम्। अर्कयति। अर्कः।

अर्घ्—भ्वा, प। १ हिंसा।

२ क्षयः। ३ पूजनम्, वो। अर्घति। अर्घः।

अर्चनम्। पूजा। लट् अर्चति। ०ते, वो। लिट् आनर्च। लुट् अर्चिता। लृट् अर्चिष्यति। लुङ् आर्चीत्। आर्चिष्टाम्। आर्चिषुः। आर्चीद् द्विजातीन्, भ १, १५। सन् अर्चिचिषति। चु, प, पूजा, अर्चयति। अर्चति। युजादिषु पाठफलं कर्त्रभिप्राये क्रियाफले आत्मनेपदार्थमिति प्रदीपः। भक्त्याऽर्चयति यो विप्रान् गुरून् देवांस्तथार्चति। अर्चन्ते चरणौ यस्य, कवि १२६। आर्चिचत्। दूरस्थो नार्चयेद् गुरुम्, मनुः २, २, २। अर्चयित्वा फलैरर्च्यौ, भ ६, ७०। अर्चा।

अर्चना। अर्चितः। अभि—आशीर्भिरभ्यर्च्य, भ १, २४। प्र—प्रानर्चुरर्चा जगदर्चनीयम्, भ २, २०। सम्—सामन्यांश्च समर्चयन्, भ ४, ९।

अर्ज्—भ्वा, प। अर्जनम्।

उपार्जनम्। लट् अर्जति। यदघमर्जति, नै ५, ८४। सर्वोऽप्यर्जयति द्रव्यमात्मनः प्रीतिहेतवे। अर्जते शाश्वतीं कीर्त्तिं यशश्चार्जति यः स्थिरम्॥ कवि १००। लिट् आनर्ज। आनर्जतुः। आनर्जुर्नृभुजोऽस्त्राणि, भ १४, ३४। लुट् अर्जिता। लुङ् आर्जीत्। आर्जिष्टाम्। आर्जिषुः। सन् अर्जिजिषति। चु, प। १ प्रतियत्नः। संस्कारः। २ उपार्जनम्। अर्जयति। आर्जिजत्। आर्जिजत् स वृक्षम्, भ १५, ४३। परस्वान्यार्जयन्, भ १७, २८। अर्जनम्। अर्जितः। उप—उपार्जनम्। चिरकालोपार्जितः सुहृत्, हितोप।

अर्थ्—चु, आ। अदन्तः।

उपयाच्ञा। याचनम्। अर्थयते। अर्थापयति शास्त्राणि नार्थमर्थयतेऽन्यतः। कवि २६४। आर्त्तथत। तमर्थयाञ्चक्रे योद्धुम्, भ १४, ८८। वैरूप्यं गत्वाऽर्थयस्व धनम्, भारत। अर्थः। अर्थी। अर्थितः। अर्थयितव्यः। अभि—अभ्यर्थना, प्रार्थना। अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ। र ४, ५८। भ ६, ३। प्र—प्रार्थना। तं प्रार्थयाञ्चक्रे प्रियाकर्त्तुम्, भ ४, १९। गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम्। प्रार्थयन्ति शयनोत्थितप्रियाः, इत्यादौ तु प्रार्थनं कुर्वन्तीति प्रार्थनशब्दात् णिच्, क्वौ १९७। सम्—समर्थनम्।

अर्द्—भ्वा, प। १ गतिः।

२ याचनम्। ३ पीड़नम्। लट् अर्दति। अर्दति हिंसतां दर्पमर्दते दुरितोदयम्। यश्चार्दयति दारिद्र्यम्, कवि ११८। शरदनं नार्दति चातकोऽपि, र ५, १७। लिट् आनर्द। आनर्दतुः। लुट् अर्दिता। लृट् अर्दिष्यति। लुङ् आर्दीत्। आर्दिष्टाम्। आर्दिषुः। रक्षःसहस्राणि म आर्दीत्, भ १२, ५६। सन् अर्दिदिषति। अर्द्, चु, उ। आ, वो हिंसा। अर्दयति। ०ते। अर्दति। ०ते। आर्दिदत्। येनार्दिदद्दैत्यपुरं पिनाकी, भ २, ४२। अर्दनम्। अर्दितः। अति—प्रपीड़नम्। अत्यार्दीद् बालिनः पुत्रम्, भ १५, ११५। अभि—अभ्यर्दितः। सन्निकर्षे, अभ्यर्णः। नि—निपीड़नम्। न्यर्णः। वि—व्यर्णः। सम्—समर्णः, पा ७, २४, २१।

अर्ब्—भ्वा, प। १ गतिः।

२ हिंसा। अर्बति। आनर्ब। अर्बिता। अर्ब, भ्वा, प। हिंसा। अर्बति।

अर्ह्—भ्वा, प। १ पूजा।

२ योग्यता। समर्थीभावः। लट् अर्हति। धर्मान् नो वक्तुमर्हसि, मनुः १, २। सर्वलोकाधिपत्यं वेदशास्त्रविदर्हति, मनुः १२, १००। लिट् आनर्ह। लुट् अर्हिता। लृट् अर्हिष्यति। लुङ् आर्हीत्। आर्हिष्टाम्। आर्हिषुः। सन् अर्जिहिषति। अर्ह्, चु, प। पूजा। अर्हयति। आर्जिहत्। राजार्जिहत् तम्, भ ११, ७। अर्ह्, चु, प। पूजा। अर्हयति। अर्हति। अर्हा। अर्हणा, अर्हणम्। अर्हत्। पूजार्हः।

अल्—भ्वा, प। अलङ्करणम्।

२ निवारणम्। ३ पर्य्याप्तिः। सामर्थ्यम्। लट् अलति। ०ते, वो। लिट्

आल। लुट् अलिता। लृट् अलिष्यति। लङ् आलीत्। आलिष्टाम्। आलिषुः। मा भवानलीत्। अलम्। अलकः। अली।

अव्,—भ्वा, प। १ रक्षणम्।

२ गतिः। ३ शोभा। ४ प्रीतिः। ५ तृप्तिः। ६ इच्छा। ७ अवगमः। ८ प्रवेशः। ९ श्रवणम्। १० ऐश्वर्य्यम, स्वामित्वम्, सामर्थ्यम्, वो। ११ याचनम्। १२ क्रियम्। अनुष्ठानम्। १३ इच्छा। १४ दीप्तिः। १५ प्राप्तिः। १६ आलिङ्गनम्। १७ हननम्। १८ आदानम्। १९ त्यागः। २० वृद्धिः। इत्येकोनविंशतिरर्थाः लट् अवति। न मामवति सद्वीपा रत्नसूरपि मेदिनी। र १, ६५। लिट् आव। आवतुः। लुट् अविता। लृट् अविष्यति। लुङ् आवीत्। मा भवानवीत्। आविष्टाम्। आविषुः। ऊतिः, ऊती, ऊतिः, अविषः।

अव-धीर—चु, प। अदन्तः।

अवज्ञा। अवधीरयति। अवधीरणा। अवधीरितः। क्त्वा, अवधीर्य्य। हितवचनमवधीर्य्य। हितो। इतीव धारामवधीर्य्य। नै १, ७२। नित्यमवयोगः।

अश्—अशू, स्वा, आ।

१ व्याप्तिः। प्राप्तिः। पूरणम्। आच्छादनम्। २ संघातः। राशीकरणम्। लट् अश्नुते। अश्नुवाते। अश्नुवते। रामादृक्षांसि बिभात्यश्नुवते दिशः, भ ५, २४। अश्नुते च परं तपः, कवि २६६। लिङ् अश्नुवीत। लङ् आश्नुत। आश्नुवाताम्। आश्नुवत। लिट् आनशे, पा ७, ४, ७२। आनशिषे। आनशे। आनशिध्वे, आनशिढ्वे। खपाटैः खमानशे, भ २, ३०। क्रीयन्त्यामानशिरे, र ७, २१। लुट् अशिता, अष्टा। लृट् अशिष्यते, अक्ष्यते। आशिषि, अशिषीष्ट, अक्षीष्ट। लुङ् आशिष्ट, आक्षाताम्, आक्षाताम्। आशिषत, आक्षत। सन् अशिशिषते, पा ७, २, ७४। यङ् अशाश्यते कौ २०६। णिच् आशयति। आशिशत। अशित्वा, अष्ट्वा। अष्टः। वि—व्याप्तिः। धोषो व्यानशे दिशः, भ १४, ९६। व्यश्नुवाना दिशः प्रापुर्वनम्, भ ९, ४। ते तं व्याशिषत, भ १५, ४३।

अश्—क्रिया, । भोजनम्।

लट् अश्नाति। अश्नीतः। अश्नन्ति। अश्नाति शुचिमाहारम्, कवि २२६। देवता मांसानि अश्नन्ति, भ ५, १४। ६, ४४। लिङ् अश्नीयात्। हि अशान। लङ् आश्नात्। आश्नीताम्। आश्नन्। लिट् आश। आशतुः। लुट् अशिता। लुङ् आशीत्। आशिष्टाम्। आशिषुः। सन् अशिशिषति। यङ् अशाश्यते। णिच् आशयति, पा १, ३, ८१। अतिथिं पूर्वमाशयेत्, मनुः, ३, ९१। उप—उपभोगः। प्राप्तिः। स्वर्गलोकमुपाश्नीयाम्, रामा। न फलं तदुपाश्नाति, भारत। प्र—भोजनम्। प्राश्नुतोच्छिष्टम्, भ १, १३। प्राशीत्, भ १५, २९। सम्—भोजनम्। अन्नं समश्नीयात्, मनुः ६, १९।

अंश (अंस)।

अस्—अष, भ्वा, उ। १ गतिः।

२ दीप्तिः। ३ आदानम्। लट् असति। ०ते। असति। लिट् आस। आसे। लावण्य उत्पाद्य इवास यत्रः (दिदीपे) कु १, ३५। लुट् असिता। अभि—अभ्यासः। वेदमेवाभ्यसेत्, मनुः ४, १४७। नि—निक्षेपः। न्यसेत् पादम् मनुः ६, ४६। सम्, नि—संन्यासः। वेदान्तं

श्रुत्वा संन्यसेत्, मनुः ६, ८४। विनि—विन्यासः। विन्यसेत् पूर्वं भूमौ, मनुः ३, २२६।

अस्—अदा, प। सत्ता।

विद्यमानता। स्थितिः। लट् अस्ति। स्तः। सन्ति, पा ६, ४, १११। अस्त्युत्तरस्यां दिशि देवतात्मा, कु १।१। अस्ति बालोति वानरः, भ ६, ८८। असि, पा ७, ४, ५०। लिङ् स्यात्। लोट् अस्तु। हि एधि, पा ६, ४, ११८। एधि कामकरस्त्वं मे, भ २०, ६। लङ् आसीत्, पा ७, ३, ९६। आस्ताम्। आसन्। आसीदिदं तमोभूतम्, मनुः १, ५। लिट् बभूव, पा २, ४, ५२। इवास यत्नः, कु १। तिङन्तप्रतिरूपमव्ययम्। लुट् भविता। लट् भविष्यति। लुङ् अभूत्। सन् बुभूषति। यङ् बोभूयते। व्यति—व्यतिस्ते। व्यतिसे। व्यतिहे, पा ७, ४५०, ५२। अन्यो व्यतिस्ते तु ममापि धर्मः, भ २, ३५। अभि—अभिष्यात्, पा ८, ३, ८७। यदत्र ममाभिष्यात् तद्दीयताम्, पा १, ४, ९१। प्रादुः—प्रादुर्भावः। प्रादुःष्यात्। प्रादुरास ताड़का, र ११, १५।

अस्—असु, दि, प। सोपसर्गः (उ)।

क्षेपणम्। अपनोदनम्। लट् अस्यति। लिट् आस। आसतुः। अस्त्राण्यासुः परस्परम्, भ १४, ७७। क्षीणामास श्रमम्, नलोदयः ४, ३३। लट् असिता। लृट् असिष्यति। लुङ् आस्यत्, पा ७, ४, १७। तस्मिन्नास्यदिषीकास्त्रम्, र १२, २३। सन् असिसिषति। णिच् आसयति। आसिसत्। (उ) असित्वा, अस्त्वा। अस्तः। अस्यमानं मद्दागदाः, भ ५, ८१। पा ३, २, १२९। अपसारणम्। त्यागः। अपास्यति। °ते। किमित्यपास्याभरणानि, कु ५, ४४। सुरानपास्य तं निषेविरे, मा १, ४४। यदि समरमपास्य नास्ति मृत्योर्भयम्, हितोप। अभि—अभ्यासः। क्षेपणम्। अभ्यस्यति व्रतम्, र १३, ६७। अभ्यस्यन्ति तटाघातम्, कु २, ५०। मृगकुलं रोमन्थमभ्यस्यतु, शकु। वेदं सदाभ्यस्येत्, मनुः २, १६६। अभ्यस्यतो बाणान्, भारत। नि—निक्षेपः। त्यागः। अयोग्ये न महिधो न्यस्यति भारम्, भ १, २२। भ्रातरि न्यस्य मां यातः, भ ५, ८२। जीवितं न्यस्य यमक्षयं व्रजेत्, रामा। न्यस्तशस्त्रः, भारत। विनि—विन्यासः। विभागविन्यस्तमहार्घरत्नम्, भ ३, ३। निर्—निरसनम्। अपसारणम्। वाणेन रक्षः प्रधनान्निरास्यत्, भ, २, ३६; १, १२, १५, ३५। यशांसि सर्वेषुभृतां निरास्यत्, भ १, ३। परि—क्षेपणम्। पतनम्। घटं पर्यस्येत् पदा, मनुः ११, १८४। पर्यस्ताः पृथिव्यामश्रुविन्दवः, र १०, ७५। अनेन पर्यासयताश्रुविन्दून्, र ६, २८। विपरि—विपर्यासः। विपर्ययः। प्र—प्रक्षेपः। कुम्भं प्रास्येयुर्जलाशये, मनुः ११, १८५। वि—अपनयनम्। विभागः। व्यस्यदुन्यां शिशिरैः पयोभिः, भ ३, ४०। चतुर्धा व्यस्य प्रसवः, र १०, ८४। व्यस्य वेदान्, भारत। सम्—संक्षेपः। समासः।

अंस—अंश—चु, प। अदन्तौ।

विभागः। अंसयति। अंसापयति। अंशयति। अंशापयति। अंस्, चु, प। समाधातः। अंसयति। अंसः, अंशः। अंशुः। अंशी। अंशितः। वि—विश्लेषः। व्यंसयामास तत् सैन्यम्, भारत।

अंह्—अंहि, भ्वा, आ। गतिः।

लट् अंहते। लिट् आनंहे। आनंहिरेऽद्रिं प्रति, भ ३, ४६। लुट् अंहिता। लृट् अंहिष्यते। लुङ् आंहिष्ट। आंहिषातां रघुव्याघ्रौ शरभङ्गाश्रमम्, भ ४, ४। सन् अञ्जिहिषते। प्राच्यमञ्जिहिषाञ्चक्रे, भ ४, ११। णिच् अंहयति। आञ्जिहत्। तमाञ्जिहन्मेथिलयज्ञभूमिम्, भ २, ४०। अंहि (अजि) चु, प। दीप्तिः। अंहयति। अंहः।

(आ)

आञ्छ्—आञ्छि, भ्वा, प।

आयामः। दैर्घ्यम्। लट् आञ्छति। आञ्छति शत्रूणां धूलिपङ्क्तिः, कवि २१६। लिट् आनञ्छ। (आञ्छ इति न्यासकारः)। लुट् आञ्छिता। लुङ् आञ्छीत्। सन् आञ्चिच्छिषति, पा ६, १, ३। णिच् आञ्छयति।

आन्दोल—चु, प। अदन्तः। दोलनम्।

आन्दोलयति। हिन्दोलयति। हिल्लोलयति।

आप्—आप्ऌ, स्वा, प।

व्याप्तिः। प्राप्तिः। लट् आप्नोति। आप्नुतः। आप्नुवन्ति। आप्नोति हेष्वतां लोकात्, भारत। लिङ् आप्नुयात्। स्वर्गफलमाप्नुयात्, भारत। लङ् आप्नोत्। आप्नुताम्। आप्नुवन्। यम्, आप्नवम्। लिट् आप। आपतुः। शत्रवोमापतुर्वने, भ ६, ५९। आपुरर्णां फलम्, र २, ११। लुट् आप्ता। लृट् आप्स्यति। लुङ् आपत्। आपताम्। कर्मणि, मया समाप्यथाः शरणं भवेषु, वयं त्वयाप्याः कहि धर्मवृद्धेः, भ १, २१। सन् ईप्सति, गा ७, ४, ५५। ईप्सितं सागरं विद्धि, र १, ८०। णिच् आपयति। आपिपत्। आप्ऌ, चु, प। लम्भनम्। प्रापणम्। आपयति। आपति। आपते इति कश्चित्। यः प्रापयति सर्वत्र सम्मानं मनुराजवत्। प्रापति प्रत्यहं तेजः कीर्त्या प्राप्नोति रोदसी॥ कवि ६६। अभि—शुद्धिमभीप्सता, मनुः ५, १३६। नान्यदत्तमभीप्सामि स्थानम्, भारत। अव—प्राप्तिः। लाभः। सिंहादवाप दिपदम्, र १८, ३५। इह कीर्त्तिमवाप्नोति, मनुः २, ९। परि—पर्य्याप्तिः, र १५, १८। प्र—प्राप्तिः। गतिः। प्रापदाश्रमम्, र १, ४९। जटायुः प्राप रावणम्, भ ५, ९६। एष गजः प्राप्तः, शक्रु। सम्प्राप्तिः। संप्राप्य तीरं तमसापगायाः, भ ३, २९। संप्राप्नुवन्ति दुःखानि तासु योनिषु, मनुः १२, ७४। वि—व्याप्तिः। खं व्यापदृषोऽरुणा, भ १४, २२; ७, ५६। गिरिर्व्याप्तः क्रव्याद्भिः, भ ६, ३९। सम्—प्राप्तिः। सिद्धिं समाप्नुयात्, भारत। णिच् समापिः। व्रतशेषं समापयेत्, मनुः ११, १५८। चन्दनेनाङ्गरागं समापय्य, र १७, २४। समाप्य मान्यञ्च विधिं दिलीपः, र २, २३।

आस्—अदा, आ। १ सत्ता। २ वासः।

३ उपवेशनम्। ४ स्थितिः। लट् आस्ते। आसाते। आसते। तस्य पुत्र आस्ते सोमश्रवा नाम, भारत। मम पश्चादागच्छन् आस्ते, हितोप। लोट् आस्ताम्। आसने भगवानास्ताम्, रामा। सुखमास्स्व, रामा। लिङ् आसीत। किमासीत व्रजेत किम्, भगवद्गीता २,५४। लङ् आस्त। लिट् आसाञ्चक्रे, पा ३, १, ३७। आश्रमे कश्चिदृषिरासाञ्चक्रे, भारत। भयादासाञ्चक्रिरे, भ ५, ८५। लुट् आसिता। लृट् आसिष्यते। लुङ् आसिष्ट। आसिषाताम्। आसिषत।

आसिष्महि वयं वने, ४, ६। इहासिष्ट, भ ६, १२; ३,२१। सन् आसिसिषते पा १, ३, ६२। णिच् आसयति। आसिसत्। आसीनः। आसितः। आसनम्। अधि—उपवेशनम्। अधिवासः। अधिष्ठानम्। पीठमध्यास्ते, पा १, ४, ४६। रथमध्यास्त, र १२, ८५। पर्णशालामध्यास्य, र १, ८६। कुलपतिः शौनकोऽग्निशरणमध्यास्त, भारत। सन् अध्यासिसिषमाणो वियन्मध्यम् (आरोदुमिच्छन्), भ ८, ३८। तमध्यासयन्नासनम्, भ २, ४६। अनु—पश्चादुपवेशनम्। उपसेवा। उपासना। नगेन्द्रकन्या स्थाणुमन्वास्त, कु ३, १७। अन्वासितमरुन्धत्या, र १, ५६। तामन्वास्य, र २, २४। उद्—उदासीनता। उपेक्षा। विधाय दैवं सामर्षं नरोऽरौ य उदासते, मा २, ४२। उप—उपासना। अवस्थितिः। अनुष्ठानम्। मामुपास्ते हरिः, भ ५, २४। उपासाञ्चक्रिरे द्रष्टुम् (उपगताः), भ ५, १०७। परलोकमुपास्महे, भ ७, ८६। सन्ध्यामुपासते ये तु, स्मृतिः। अग्निहोत्रमुपासते, मनुः ११, ४२। पर्य्युप—सेवा। भुजङ्गाः पर्य्युपासते, कु २, ३८। सम्—उपवेशनम्। पूर्वां सन्ध्यां तिष्ठन् पश्चिमान्तु समासीनः, मनुः २, १०१।

(इ)

इ—भ्वा, प। गतिः।

लट् अयति। लिट् इयाय। ईयतुः। ईयुः, कौ ५३। इयथिथ, इयेथ। इयाय, इयय। लुट् एता। आशिषि, ईयात्। लुङ् ऐषीत्। उद्—उदयः। उदयति वितनोर्द्वरश्मिरस्त्री, मा ४, २०। अयमुदयति मुद्राभञ्जनः पद्मिनीनाम्।

इ—इण्, अदा, प। गतिः।

प्राप्तिः। लट् एति। इतः। यन्ति, पा ६, ४, ८१। हि इहि। लिङ् इयात्। लङ् ऐत्। ऐताम्। आयन्। लिट् इयाय। ईयतुः। ईयुः, पा ७, ४, ६८। इयथिथ, इयेथ। ईयिव। लुट् एता। लृट् एष्यति। लृङ् ऐष्यत्। आशिषि, ईयात्। निरियात्, पा ८, ४, २४। समियादिति प्रयोगस्तु भौवादिकस्य। लुङ् अगात्, पा २, ४, ४५, ७७। अगाताम्। अगुः। कर्मणि ईयते। ऐयत। एता, आयिता। एष्यते, आयिष्यते। एषीष्ट, आयिसीष्ट। अगायि। अगासत, अगायिषत। अभ्ययोध्यमगात्, भ २, ४८। ० निकेतम्, भ ३,४०। ० समाजम्, र ५, ७६। सन् जिगमिषति, पा ३, ४, ४७। बोधने तु, अर्थान् प्रतिषिषति। णिच् गमयति, पा २, ४, ४६। बोधने तु प्रत्याययति। इत्वा। ० इत्य। इतः। अयनम्। अति—अत्ययः। अतिक्रमः। अतीत्य हि गुणान्, हितोप। अतीतः। व्यति—अतिक्रमः। यं यं व्यतीयाय सा, र ६, ६७, ५२। तस्य दिनानि व्यतीयुः, र २, २५। व्यतीतः। व्यत्ययः। अनु—अनुगमनम्। अन्वयः। भर्त्रेति श्रुतमन्वेति, दायभागः ८७। अन्वितः। समन्वितः। अप—अपगमः। क्षयः। धर्मोऽपैति पादशः, मनुः १, ८२। स्वपिति यावदयं निकटे जनः, स्वपिमि तावदहं किमपैति ते। अपेतः। व्यप—व्यपगमः। निवृत्तिः। पुत्रं ददतः स्वधा व्यपैति, मनुः ९, १४२। व्यपेतभीः। अभि—प्राप्तिः। ततोऽभ्यगाद् गाधिसुतः क्षितीन्द्रम्, भ १, ४७। अव—ज्ञानम्। भवानपोदमवैति, र ३, ५६। कस्तन्नावैति कारणम्, भ ५, ८७।

आ—आगमनम्। प्राप्तिः। अत्तुं माहेन्द्रियं भागमेति दुश्चवनः, भ ५, ११। ऐति रामम्, भ २, ५०। उद्—उदयः। उद्गमनम्। उद्भवः। उद्योगः। क्रमानोरुदियाय धूमः, र ७, २६। उद्यन्निव तमोपहः ६, ११०। उद्यन् प्रभावेण स राजा राज्ञां बभूव, र १७, ७७। न प्रभातरत्नं ज्योतिरुदेति वसुधातलात्, शकु। उदितः। अभ्युद्—उदयः। अभ्युदयः। उन्नतिः। अभ्युदियात् सूर्यः, मनुः २, २२०। अभ्युदितः। उप—अभिगमनम्। प्राप्तिः। लक्ष्मीः पुरुषसिंहमुपैति, हितोप। सेनापत्यमुपेत्य वः, कु २,६१। ०स्त्रियम्, ६,१२६। उपेतः। उपायः। अभ्युप—उपस्थितिः। स्वीकारः। यच्चेतसा न गणितं तदिहाभ्युपैति, महाना। अभ्युपेत्य। अभ्युपेतः। अभ्युपायः। प्रति—प्रतीतिः। प्रतिगमनम्। सैकतेषु कलहंसमालाः प्रतीयिरे निनादैः, भ २, १८। प्रतीयाय गुरोः सकाशम्, र ५, ३५। प्रतीतः। प्रत्ययः।

इ—इक्, अदा, प। स्मरणम्।

अयं नित्यमधिपूर्वः। लट् अध्येति। यदध्येति तदवयम्, कवि, २, ४७। अधीतः। अधीयन्ति। ससीतयो राघवयोरधीयन्, भ ३, १८। अधियन्तीति केचित्, कौ ११९। शेषं इणवत्।

इ—इङ्, अदा, आ। अध्ययनम्।

नित्यमधियोगः। लट् अधीते। अधीयाते। अधीयते। यत्किञ्चिदप्यधीतेऽमौ, कवि २४७। लिङ् अधीयीत। लङ् अध्यैत। अध्यैयाताम्। अध्यैयत। अध्यैयि। अध्यैवहि। लिट् अधिजगे, पा २, ४, ४९। अधिजगिषे। लुट् अध्येता। लृट् अध्येष्यते। लृङ् अध्यैष्यत, अध्यगीष्यत, पा २, ४, ५०। आशिषि, अध्येषीष्ट। अध्येषीढ्वम्, पा ८, ३, ७८। लुङ् अध्यैष्ट, अध्यगीष्ट, पा २, ४, ५०। अध्यैषाताम्, अध्यगीषाताम्। अध्यैषत, अध्यगीषत। अध्यैढ्वम्, अध्यगीढ्वं, पा ८, ३, ७८। सोऽध्यैष्ट वेदान्, भ १, २। कर्मणि, वेदोऽध्यगायि, भ १, १६। सन् अधिजिगांसते, पा २, ४, ४८। णिच् अध्यापयति, पा ५, १, ४८, ७, ३, ३६। अध्यापिपत्, अध्यजीगपत्। अध्यापिपयिषति, अधिजिगापयिषति, पा २, ४, ५१। अधीयानः। अधीतः। अधीत्य। अध्ययनम्। अध्यापना। अध्यापितः। अध्यापिपद् गाधिसुतः क्षितीन्द्रम् विद्याम्, भ २, २१। नीतिमध्यापितस्य, कु ३, ६।

इख्—इङ्ख्—इङ्खि, भ्वा, प।

गमनम्। लट् एखति। इङ्खति। लिट् इयेख। इङ्खाञ्चकार। लुङ् ऐखीत्। ऐङ्खीत्। प्र—उक्तिः। प्रेङ्खत् क्षुभिता क्षितिः, भ १७, १८।

इङ्ग्—इगि, (अगि), भ्वा, प।

गमनम्। इङ्गति। इङ्गाञ्चकार। ऐङ्गीत्। इङ्गितम्।

इट्—भ्वा, प। गमनम्।

एटति। इयेट। ईटतुः। एटिता।

इन्—नु, चु, प।

विनाशः। यः प्रेषणत्वाज्जनोऽयम्, कवि १८। नायमन्यत्र दृश्यते।

इन्द्—इदि, भ्वा, प।

परमैश्वर्यम्। लट् इन्दति। लिट् इन्दाञ्चकार। लुट् इन्दिता। लुङ् ऐन्दीत्। सन् इन्दिदिषति। इन्द्रः। इन्दिरा।

इन्ध्—जिइन्धी, रु, आ।

दीप्तिः। लट् इन्धे, पा ६, ४, २३।

इन्धाते। इन्धते। इन्त्से। इन्धे युष्मेषु यत्तेजः, कवि २६५। लिङ् इन्धीत। स्व, इनत्स्व। इन्धै। लङ् ऐन्ध। ऐन्धाताम्। ऐन्धत। लिट् इन्धाञ्चक्रे। छन्दसि नलोपः। समीधे, पा १, २, ६। लुट् इन्धिता। लृट् इन्धिष्यते। लुङ् ऐन्धिष्ट। ऐन्धिषाताम्। ऐन्धिषत। सन् इन्दिधिषते। णिच् इन्धयति। ऐन्दिधत्। (त्रि ई) इद्धः। इद्धबोधः, भ १, ५। इन्धनम्। सम्—प्रज्वलनम्। असमिध्य च पावकम्, मनुः २, १८७। समिन्धानोऽस्त्रकौशलम् (वर्द्धयन्), भ ६, ३७।

इन्व—इवि, भ्वा, प। १ व्याप्तिः।

२ प्रीणनम्। इन्वति। इन्वाञ्चकार। इन्विता। ऐन्वीत्।

इल्—तु, प। क्षयः।

निद्रा। २ क्षेपणम्। लट् इलति। लिट् इयेल। ईलतुः। लुट् एलिता। लृट् एलिष्यति। लुङ् ऐलीत्। इल्, चु, प। प्रेरणम्। एलयति। ऐलिलत्।

इष्—इषु, तु, प। इच्छा।

आकाङ्क्षा। लट् इच्छति, पा ३, ७७। इच्छामि संवर्द्धितमात्मजया ते। कु ३, ३। लङ् ऐच्छत्। लिट् इयेष। ईषतुः। इयेषिथ। लुट् एषिता, एष्टा, पा ७, २, ४८। लृट् एषिष्यति। आशिषि, इष्यात्। लुङ् ऐषीत्। ऐषिष्टाम्। ऐषिषुः। मधूनि नैषीत, भ ३, २०। कर्म्मणि, इष्यते। सन् एषिषिषति, कौ २००। णिच् एषयति। ऐषिषत्। (क्त) एषित्वा, इष्ट्वा। इष्टः। इच्छा। इच्छन्। इच्छुः। अनु—अभिलाषः। निरूपणम्। अन्वेषणम्। राज्ञतो धनमन्विच्छेत्, मनुः ४, ३३। अन्वेषयामि सुमुखीं विमुखो विधाता, महाना ४, ५०। प्रति—ग्रहणम्। स्वीकारः। ततः प्रतीच्छ प्रहरेति भाषिणी, नै ०, ६८। गदां प्रतीयेष, भ १४, ३६। आज्ञां प्रतीषुः, भ ३, ४३। प्रेषः। प्रेष्यः, कौ ४५। निकृष्टस्य प्रवर्त्तनं प्रेषणम्, आज्ञा। समानस्य अधिकस्य वा प्रवर्त्तना अध्येषणा, प्रार्थना।

इष्—टि, प। गमनम्।

इष्यति। इयेष। एषिता। ऐषीत्। क्त इषितः। एषितुं (ज्ञातुम्), भ ५, ८२। अनु—अन्वेषणम्। न रत्नमन्विष्यति मृग्यते हि तत्, कु ५, ४५। प्र—णिच् प्रेषणम्। क्षेपणम्। प्रेषिषत् प्रासम्, भ, १५, ७७। प्रेषितः।

इष्—क्रया, प। आभीक्ष्ण्यम्।

पुनःपुनः करणम्। लट् इष्णाति। लिङ् इष्णीयात्। लङ् ऐष्णात्। ऐष्णीताम्। लिट् इयेष। लुट् एषिता। वार्त्तिककारमते, एषिता, एष्टा। लुङ् ऐषीत्। ऐषीः पुनर्जन्मजयाय यत्नम्, भ १, १८। इच्छति ब्राह्मणैः सङ्गमन्विष्यति सतां गतिम्। इष्णाति धर्मकार्य्येषु यः सदोन्नतिमीप्सते। कवि १६।

(ई)

ईङ्—(इ) भ्वा, प। गतिः।

लट् अयति। लिट् अयाञ्चकार, कौ ४५। लुट् एता। लङ् ऐषीत्। ऐष्टाम्। उद्—उदयः। उदयति।

ईड्—(वो) अदा, प। गतिः।

२ इच्छा। ३ व्याप्तिः। ४ क्षेपणम्। ५ भोजनम्। ६ गर्भग्रहणम्। लट् एति।

ईतः। ईयन्ति। लिङ् ईयात्। लिट् अयाञ्चक्रार, कौ ५४। लुट् एता।

ईं—ईङ्, दि, आ। गतिः।

लट् ईयते। लिट् अयाञ्चक्रे, कौ १२५। लुट् एता। लृट् एष्यते। लुङ् ऐष्ट। उदीयमानं दिनादौ, भा १, ४६। रात्रावुदयते चन्द्रो दिवोदयति भास्करः। उदिते यः सर्वदोर्ध्यां नोदीयन्ते च विद्विषः॥ कवि २३।

ईक्ष्—भ्वा, आ। दर्शनम्।

पर्य्यालोचना। लट् ईक्षते। हिताहितं प्रजानां यः प्रेक्षते, कवि २२४। तत्तदवपरिपूर्णमीक्षते, महाना ४, ३७। लिट् ईक्षाञ्चक्रे। लुट् ईक्षिता। लृट् ईक्षिष्यते। लुङ् ऐक्षिष्ट। ऐक्षिषाताम्। ऐक्षिषत। देवदत्ताय ईक्षते (तस्य शुभाशुभं पर्य्यालोचयति), पा १, ४, ३९। ऐक्षिष्ट गोष्ठान्, भ २, १४। ऐक्षिष्महि मुहुः सुप्तान्, भ ६, १४। सन् ईक्षिक्षिषते। णिच् ईक्षयति। ऐक्षिक्षत्। ईक्षमाणः। ईक्षितः। ईक्षणम्। अप—अपेक्षा। त्वामपेक्षते, कु ३, १८। अव—अवेक्षणम्। परिदर्शनम्। आलोचना। तेऽस्य कार्य्याण्यवेक्षेरन्, मनुः ७, ८१। उप—उपेक्षा। निर्—निरीक्षणम्। परि—परीक्षा मया परीक्षितोऽसि, र २, ६२। प्र—प्रेक्षणम्। उत्-प्र—उत्प्रेक्षणम्। सम्भावनम्। वि—दर्शनम्। सम्—परिदर्शनम्। आत्मनश्च परेषाञ्च यः समीक्ष्य बलाबलम्। हितोप।

ईङ्ख्—ईखि, (इख) भ्वा, प।

गतिः। ईङ्खति। ईङ्खाञ्चकार।

ईज्—ईज्ञ्—ईजि, भ्वा, आ।

१ गतिः। २ कुत्सा। निन्दा। ईजते। ईजाञ्चक्रे। ईजिता। ऐजिष्ट। ईज्ञते, वो।

ईड्—अदा, आ। स्तुतिः।

लट् ईष्टे। ईड़ाते। ईड़ते। ईड़िषे। ईड़िध्वे। ईड़िष्व। ईड़िध्वम्, पा ७, २, ३८। ईष्टे त्रिपिष्टपस्थाने यदृग्गुणांश्चारणव्रजः। स्वयं पुलकितो हर्षादिड़ीजा ईड़यत्यपि॥ कवि १५८। लिट् ईड़ाञ्चक्रे। लुट् ईड़िता। लृट् ईड़िष्यते। लुङ् ऐड़िष्ट। ऐड़िषाताम्। ऐड़िषत। ईड़िषे काकुत्स्थम्, भ ८, ५७। सन् ईड़िड़िषते। चु, प। स्तुतिः। ईड़यति। ऐड़िड़त्।

ईन्त्—ईति, भ्वा, प, वो। बन्धनम्। ईन्तति। ईन्ताञ्चकार। (इ) ईन्त्यते।

ईर्—अदा, आ। १ गतिः।

२ कम्पनम्। लट् ईर्त्ते। ईराते। ईरते। ईर्त्ते यत्कीर्त्तिरैन्द्रं पुरमनवरतं प्रेरयत्यन्तरात्मा, यं धर्मं प्रेरति श्रीः, कवि १८। लङ् ऐर्त्त। ऐराताम्। ऐरत। लिट् ईराञ्चक्रे। लुट् ईरिता। लृट् ईरिष्यते। लुङ् ऐरिष्ट। ऐरिषाताम्। ऐरिषत। सन् ईरिरिषते। ईर्, चु प। प्रेरणम्। ईरयति। ईरति। ऐरिरत् समुद्रम्, भ १५, ५२। ईर्य्यमाणो मात्रा, भ १२, ६। ईरणम्। ईरितः। उद्—उक्तिः। उच्चारणम्। उत्क्षेपणम्। प्रकाशः। जयशब्दमुदीरयामासुः, र २, ८। अज्ञानुदीरयामास, र ६, १९। अशोककुसुममुदीरयिष्यति, र ८, ६२। न्यायैस्त्वमिरुदीरणम्, कु २, १२। महिमानमुदीरयन्, कु २, ६। उदीरितः। अभ्युद्—उक्तिः। ऋषिणाभ्युदीरिता, मा १, १८। प्र—णिच् प्रेरणम्। यात्रायै प्रेरयामास तं भरत, र ४, २४। सम्—विक्षेपणम्। कथनम्। समीरयाञ्चकाराथ राज्ञश्च

कविः श्लिलाम्. भ १४, १११। रघुणा समीरितं वचः, र ३, ४३। समीरणः।

ईर्ष्य्—ईर्ष्य्—भ्वा, प। ईर्ष्या।

अशान्तिः। लट् ईर्ष्यति। ईर्ष्यति। देवदत्ताय ईर्ष्यति, पा १, ४, ३७। लिट् ईर्ष्यांचक्रार। लुट् ईर्ष्यिता। लृट् ईर्ष्यिष्यति। लुङ् ऐर्ष्यीत्। सन् ईर्ष्यिषियिषति। ईर्ष्यिषिषति। णिच् ईर्ष्ययति। ऐर्ष्ययत्। ऐर्ष्यिषत्, कौ ८७। ईर्ष्या।

ईश्—अदा, आ। १ ऐश्वर्यम्।

प्रभुता। २ यथेष्टविनियोगः। लट् ईष्टे। ईशाते। ईशते। ईशिषे। ईशिध्वे, पा ७, २, ७७। सर्पिष ईष्टे यथेष्टं विनियुङ्क्ते, पा। धनानामीशते यज्ञाः, भ ८, २०। विषयाणां नेषिषे, भ १८, १५। यदीशिषे त्वं न मयि स्थितेऽपि, भ ३, ५३। ईष्टे हरिणान् ग्रहीतुम् (शक्नोति), र १८, १३। न तत् सोढ़मीशे, र १४, ३८। लिङ् ईशीत। लङ् ऐष्ट। लिट् ईशाञ्चक्रे। लुट् ईशिता। लुङ् ऐशिष्ट। ऐशिषाताम्। ऐशिषत।

ईष्—भ्वा, प। उञ्छवृत्तिः।

ईष, भ्वा, आ। १ गतिः। २ हिंसा। ३ दर्शनम्। ४ दानम्, वो। ईषति। ईषते। यः सदोवतिमीषते, कवि ३६। ईषाञ्चकार। ईषयाञ्चक्रे। ऐषीत्। ऐषिष्ट। ईषा, मनीषा, मनीषिणः। प्रेषः।

ईह्—भ्वा, आ। चेष्टा।

ईहा। इच्छा। लट् ईहते। लिट् ईहाञ्चक्रे। लुट् ईहिता। लृट् ईहिष्यते। लुङ् ऐहिष्ट। ऐहिषाताम्। ऐहिषत। हनुमीहाञ्चक्राते तौ परस्परम्, भ ५, १०६। ऐहिष्ट तं कारयितुं कृतम्, भ १, ११। सन् ईजिहिषते। णिच् ईहयति। ऐजिहत्। सुग्रीवमैजिहत्, भ १५, ५१। ईहा। स्वार्थं समीहते (अनुमन्यते), मा १। ६५।

(उ)

उ—उङ्, भ्वा, आ। शब्दः।

अवते। ऊवे। ओता। ओष्यते। ओष्ट। सन् ऊषिषते। णिच् आवयति।

उक्ष्—भ्वा, प। सेचनम्।

आर्द्रीकरणम्। वर्षणम्। लट् उक्षति। औक्षन् शोणितमश्वोदाः, भ १७, ९। लिट् उक्षाञ्चकार। उक्षाम्यचक्रुर्नगरस्य मार्गान्, भ ३, ५। लट् उक्षिता। लृट् उक्षिष्यति। लुङ् औक्षीत्। अभि—अभ्युक्षणम्। अभ्युक्ष्य। अभ्युक्षितः। प्र—प्रोक्षणम्। प्रोक्षितं भक्षयेन्मांसम्, मनुः ५, २७।

उख्—उङ्—उखि (इख्) भ्वा, प।

गतिः। ओखति। उवोख। ओखिता। औखीत्। उङ्कति। उङ्काञ्चकार। उङ्किता। औङ्कीत्। ओचिखिषति। उपधाकार्यं हित्वात् प्रबलमिति गुणे कृते द्विर्वचनमिति प्रदीपः। उखा।

उच्—दि, प। समवायः।

सङ्गमः। मिश्रणम्, वो। उच्यति। उवोच। ऊचतुः। ओचिता। औचत्। मा मवानुचत्। पुवादिः। उचितम्।

उछ्—उच्छी, भ्वा, प। १ विरामः।

समाप्तिः। २ निवासः, वो। ३ विपाश इति प्रदीपः। प्रायेणायं विपूर्वः। लट् व्युच्छति। सन् व्युचिच्छिषति। (ई)

व्यष्टम्। उच्छी, तु, प। समाप्तिः। वन्धनम्। त्यागः, वो। उच्छति।

उज्झ्—उदृझ, तु, प। त्यागः।

लट् उज्झति। लिट् उज्झाञ्चकार। सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार, र ५।७५। लुङ् औज्झीत्। प्राणानौज्झीत्, भ १५, ८४। उज्झितः।

उच्छ्—उछि, भ्वा, तु, प।

उच्छः। कणश आदानम्। कणिशाद्यर्जनम्। शिलम्, भूमौ पतितानामेकैकस्योपादानम्। लुट् उच्छति। लिट् उच्छाञ्चकार। लट् उच्छिता। सन् उच्चिच्छिषति। णिच् उच्छयति। उच्छन्ती। तुदादेस्तु, उच्छन्ती, उच्छनी। प्र—मार्जनम्। प्रोच्छन्ति प्रचुरैरेषामन्नेन दीनतां प्रजाः, कवि १६२। उच्छिष्टभक्षणवदुच्छिष्टप्रोच्छने इति विवेकः।

उठ्—ऊठ्, भ्वा, प। उपघातः।

लट्। ओठति। लिट् उवोठ। लुट् ओठिता। ऊठति। ऊठाञ्चकार। ऊठिता।

उध्रस् (ध्रस्) क्षया, चु, प।

उच्छृत्तिः। उध्रसाति। उध्रसाञ्चकार। उध्रासयति।

उन्द्—उन्दी, रु, प। क्लेदनम्।

आर्द्रीभावः। लट् उनत्ति। उन्तः। उन्दन्ति। लिङ् उन्द्यात्। लङ् औनत्। औन्ताम्। औन्दन्। औनदम्। लिट् उन्दाञ्चकार। लुट् उन्दिता। लृट् उन्दिष्यति। लुङ् औन्दीत्। औन्दिष्टाम्। औन्दिषुः। सन् उन्दिदिषति। णिच् उन्दयति। औन्दिदत्। (इ) उन्नम्, उत्तम्. पा ८, २, ५६।

उभ्—उम्—उनभ्, तु, प।

पूरणम्। लट उभति। लिट् उबोभ। जभतुः। लुट् ओभिता। लुङ् औभीत्। उम्भति। उम्भाञ्चकार। उम्भिता। औम्भीत्। तमीम्भीत्तीव्रैः शिलीमुखैः, भ १७, ८८।

उब्ज्—तु, प। आर्जवम्।

सारल्यम्। लट् उब्जति। लिट् उब्जाञ्चकार। लुट् उब्जिता। लृट् उब्जिष्यति। लुङ् औब्जीत्। सन् उब्जिजिषति। णिच् उब्जयति। औब्जिजत्। नि—कौटिल्यम्। न्युब्जः।

उर्द्—भ्वा, आ। १ मानम्।

परिमाणम्। २ क्रीड़ा। ३ आस्वादः, वो। लट् ऊर्दते, पा ८, २, ७८। लिट् ऊर्दाञ्चक्रे। लुट् ऊर्दिता। लृट् ऊर्दिष्यते। लुङ् और्दिष्ट। और्दिषाताम्। और्दिषत। सन् ऊर्दिदिषते। णिच् ऊर्दयति। और्दिदत्।

उर्व्—उर्वी, भ्वा, प। हननम्।

ऊर्वति। ऊर्वाञ्चकार। (ई) ऊर्णम्। ऊः।

उष्—उषु, वो। भ्वा, प।

१ दाहः। २ हननम्, वो। लट् ओषति। लिट् ओषाञ्चकार। उवोष, पा ३, १, ३८। ओषाञ्चक्रतुः। ऊषतुः। उवोषिथ। ओषाञ्चकार कामाग्निर्दग्धवक्त्रमहर्निशम् भ ६, १। लुट् ओषिता। लृट् ओषिष्यति। लुङ् औषीत्। औषिष्टाम्। औषिषुः। सन् ओषिषिषति। णिच् ओषयति। (उ) ओषित्वा, उष्ट्वा, वो। ओषः। ऊषा, बहुलवचनाद् दीर्घः।

उह्—ऊहिर्, भ्वा, प। वधः।

अर्दनम्, वो। ओहति। उवोह। ओहिता। (इर्) ओहत्। औहीत्।

(ऊ)

ऊठ्—(उठ्)।

ऊन—चु, प। अदन्तः। परिहाणम्।

ऊनयति। औनानत्। ऊनितः।

ऊय्—ऊयी, भ्वा, आ।

तन्तुसन्तानः। सीवनम्। लट् ऊयते। भक्तिचित्राणि वस्त्राणि व्यूयन्ते यस्य कौतुकात्, कवि २१३। लिट् ऊयाञ्चक्रे। लुट् ऊयिता। लृट् ऊयिष्यते। लुङ् औयिष्ट। सन् ऊयियिषते। (ईं) ऊतम्।

ऊर्ज्—चु, प। १बलम्। २प्राणनम्।

ऊर्जयति। और्जिजत्। ऊर्जितम्।

ऊर्ण्—ऊर्णुञ्, अदा, उ।

आच्छादनम्। लट् ऊर्णोति। ऊर्णोति, पा ७, ३, ९०। ऊर्णुवते। लिङ् ऊर्णुयात्। ऊर्णुवीत। लङ् और्णोत्, पा ७, ३, ९१। और्णुत। लिट् ऊर्णुनाव। णुर्ऊनुविथ, ऊर्णुनविथ, पा १, २, ३। ऊर्णुनुवे। लुट् ऊर्णविता, ऊर्णुविता। लृट् ऊर्णविष्यति। ०ते। ऊर्णुविष्यति। ०ते। आशिषि, ऊर्णूयात्। ऊर्णविषीष्ट, ऊर्णुविषीष्ट। लुङ् और्णवीत्। और्णावीत्, पा ७, २, ६। और्णुवीत्। और्णविष्टाम्। और्णाविष्टाम्। और्णुविष्टाम्। और्णविष्ट। और्णुविष्ट। सन् ऊर्णूनूषति। ०ते, पा ७, २, ४९। ऊर्णुनविषति। ०ते। ऊर्णुनुविषति। ०ते। यङ् ऊर्णोनूयते। ऊर्णोनवीति। ऊर्णोनोति। णिच् ऊर्णावयति। और्णुनवत्। ऊर्णुनाव अस्त्रोघैरनीकिनीम्, भ १४, १०३। दृष्टोर्णुवानान् ककुभो बलौघान्, भ ३, ४७। प्र—आच्छादनम्। देहाः प्रौर्णाविषुर्भुवम्। दिशः प्रौर्णविषुः, भ ९, १०। शत्रून् शरवर्षेण प्रौर्णावीत्, भ १५, ११९। प्रोर्णवन्तं दिशो वाणैः, भ ५, ५६। प्रोर्णोति शोकस्तिमिरं मे, भ १८, २८। अस्त्रौघैः प्रोर्णुनूयते विद्विषः, भ १७, ७५।

ऊष्—भ्वा, प। रोगः।

ऊषति। ऊषाञ्चकार। औषीत्। ऊषरम्।

ऊह्—भ्वा, आ। वितर्कः।

अध्याहारः। सम्भावनम्। लट् ऊहते। लिट् ऊहाञ्चक्रे। ऊहाञ्चक्रे जयं न च, भ १४, ७२। लुट् ऊहिता। लृट् ऊहिष्यते। आशिषि, ऊहिषीष्ट। लुङ् औहिष्ट। औहिषाताम्। औहिषत। औहिष्ट तान् वीतविरुद्धबुद्धीन्, भ ३, ४८। सन् ऊजिहिषते। णिच् ऊहयति। औजिहत्। तावौजिहतां जनम्, भ २, ४१। ऊहितः। ऊहनम्। ऊह्यम्। अप—अपनोदनम्। उपसर्गादात्मनेपदं वेति वक्तव्यम्, कौ २४७। अपोहहाणवर्षं तद्भल्लैः, भ १७, ८३। तानपोहीत, भ १५, ११९। एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः, मनुः ११, १०३, १०८। उत्सवमपोहदुत्सवः, र १९, ५। व्यप—विनाशः। आदित्यस्तमो व्यपोहति, भारत। ब्रह्महत्यां व्यपोहति, मनुः ११, ८१। प्रति—विघातः। प्रत्यूहेष्वग्निषु क्रियाः, मनुः ५, ४८। प्रतिवाचमर्हं प्रत्यूह्य, नै ९, १०१। वि—रचना। विन्यासः। एतान् व्यूहेन व्यूह्य योधयेत्, मनुः ७, १९१। व्यूढम्। सम्—समुह्यते। समुह्य गतः, पा ७, ४, २३। आशिषि, ब्रह्म समुह्यात्। अग्निं समुह्यात्। समूढः। समूहः।

(ऋ)

ऋ—भ्वा, प। १ गतिः। २ प्रापणम्।

लट् ऋच्छति। तमृच्छन्ति सप्तदः, भ १८, ५। चण्डालपुक्कसानाञ्च ब्रह्महा योनिमृच्छति, मनुः १२, ५५। लङ् आर्च्छत्, पा ७, ३, ७८। लिट् आर। आरतुः, पा ७, ४, ११। आरिथ, पा ७, २, ६६। लुट् अर्त्ता। लृट् अरिष्यति, पा ७, २, ७०। आशिषि, अर्थात्, पा ७, ४, २९। लुङ् आर्षीत्। आर्ष्टाम्, कौ ९७। सन् अरिरिषति, पा ७, २, ७४। यङ् अरार्ष्यते, पा ७, ४, ३०। अरर्त्ति। अरिरर्त्ति। अररीति। अरिरीति। अर्क्तः। अरिक्तः। वने किमरार्य्यसे, भ ४, २१। णिच् अर्पयति, पा, ७, ३, ३६। अपथे पदमर्पयन्ति, र ६, ७५। आर्पिपत्। तां नार्पिपः, भ १५, १६। अर्पितः, भ ८, ११८। ऋतः। आर्त्तः। अनु—अनुसरणम्। सम्—आ, समृच्छते, पा १, ३, २९। मा समृत। मा समृषाताम्।

ऋ—हा, प। गतिः।

लट् इयर्त्ति। इयृतः। इयृति यस्य कीर्त्तिरियर्त्ति द्याम्, कवि ४५। आनिए इयृराणि। लिङ् इयृयात्। लङ् ऐयः। ऐयृताम्। ऐयरुः। लिट् आर। आरतुः। आरिथ। लुङ् आरत्, पा ३,१,५६। सीतां जिघांसू तावारताम्, भ ६, २८। समारन्त ममाभीष्टाः, भ ८, १६। मा समरत। मा समरिताम्। मा समरन्त।

ऋच्—तु, प। स्तुतिः।

ऋचति। आनर्च। आर्चीत्। ऋक्।

ऋच्छ्—तु, प। १ गतिः।

२ इन्द्रियप्रलयः। ३ मूर्त्तिः। ४ काठिन्यम्। ५ भावः। लट् ऋच्छति। लुङ् आर्च्छत्। लिट् आनर्च्छ। आनर्च्छतुः, पा ७, ४, ११। लुट् ऋच्छिता। लृङ् आर्च्छीत्। सन् ऋरिच्छिषति। णिच् ऋच्छयति। ऋच्छ्, भ्वा। अर्च्छतीति केचित्। सम्—आ, समृच्छते, पा १, ३, २९।

ऋज्—भ्वा, आ। १ गतिः। २ स्थितिः। ३ अर्जनम्। ४ ऊर्जनम्। लट् अर्जते। लिट् आनृजे। लुट् अर्जिता। लृट् अर्जिष्यते। लुङ् आर्जिष्ट। आर्जिषाताम्। आर्जिषत। सन् अर्जिजिषते। णिच् अर्जयति।

ऋञ्ज्—ऋजि, भ्वा, आ। भर्जनम्।

पाकविशेषः। लट् ऋञ्जते। लिट् ऋञ्जाञ्चक्रे (आनृञ्जे)। लुट् ऋञ्जिता। लुङ् आर्ञ्जिष्ट। सन् ऋञ्जिजिषते। णिच् ऋञ्जयति।

ऋण्—ऋणु, तना, उ। गतिः।

अर्णोति। अर्णुते। ऋणोति। ऋणुते, कौ १६१। ऋणोति धरणीं कृत्स्नाम्, कवि ४५। लिट् आनर्ण। आनृणे। लुट् अर्णिता। लृट् अर्णिष्यति। °ते। लुङ् आर्णीत्। आर्णिष्टाम्। आर्णिष्ट। आर्त्त। आर्णिष्ठाः। आर्थाः। सन् अर्णिनिषति। °ते। (उ) ऋत्वा, अर्णित्वा। ऋतम्। ऋणम्।

ऋत्—भ्वा, प। सौत्रधातुः।

१ जुगुप्सा। घृणा। २ कृपा। लट् ऋतीयते, पा ३, १, २९। लिट् ऋतीयाञ्चक्रे। ईयङ्भावपक्षे, आनर्त्त। आनृततुः। लुट् अर्त्तितासि। ऋतीयितासे। लृट् आर्त्तिष्यति। ऋतीयिष्यते। लुङ् आर्त्तीत्। आर्त्तीयिष्ट। ऋतित्वा।

ऋध्—ऋधु, दि, स्वा, प। वृद्धिः। लट् ऋध्यति। ऋध्नोति। ऋध्नोति धीः

सदा यस्य ऋध्यति श्रीश्च भूतले, कवि २४६। लिट् आनर्ध। आनृधतः। लुट् अर्द्धिता। लृट् अर्द्धिष्यति। लुङ् आर्द्धत्। स्वा, आर्द्धीत्। आर्द्धिष्टाम्। सन् आर्दिधिषति, पा ७, २, ४९। ईर्त्सति, पा ७, ४, ५५। अर्दिधिषुर्यशः कीर्त्तिमीर्त्सुं वृत्तैरताड़यत्, भ ९, ३२। णिच् अर्दयति। आर्दिधत्। (उ) अर्दित्वा, ऋत्वा। ऋद्धः। ऋद्धिः। सम्—समृद्धिः। तपोवनं समृद्धशाखम्, भ २, २४।

ऋफ्—ऋम्फ्—"रिम्फ्"—तु, प।

हिंसा। लट् ऋफति। लिट् आनर्फ। लुट् अर्फिता। लुङ् आर्फीत्। लृट् ऋम्फति। ऋम्फाञ्चकार। ऋम्फिता। रिम्फति।

ऋष्—ऋषी, तु, प। गतिः।

ऋषति। आनर्ष। आनृषतुः। अर्षिता। अर्षिष्यति। आर्षीत्। अर्षित्वा। (ई) ऋष्टः। ऋषिः।

ऋ—क्रया, प। गतिः।

लट् ऋणाति। यस्य कीर्त्तिर्ऋणाति फणिनां पुरम्, कवि ४५। लिङ् ऋणीयात्। लङ् आर्णात्। लिट् अराञ्चकार। लुट् अरिता, अरीता। लृट् अरिष्यति, अरीष्यति। लुङ् आरीत्। आरिष्टाम्। ॠ, ईर्णः। उदीर्णः।

(ए)

एज्—एज़, भ्वा, प। कम्पनम्।

भ्वा, आ। दीप्तिः। लट् एजति। ०ते। एजते राजचिह्नैर्यः एजयत्यखिलं जगत्, कवि २६९। लङ् ऐजत्। ०त। लिट् एजाञ्चकार। एजाञ्चक्रे। लुट् एजिता। लुङ् ऐजीत्। ऐजिष्ट। सन् एजिजिषति। ०ते। णिच् एजयति। ऐजिजत्। प्र—प्रेजते, पा ६, १, ८४। जनमेजयः। अङ्गमेजयः।

एठ्—भ्वा, आ। विशाधा। शाठ्यम्।

एठते। एठाञ्चक्रे। एठिता। ऐठिष्ट। सन् एटिठिषते। णिच् एठयति। ऐटिठत्।

एध्—भ्वा, आ। वृद्धिः।

लट् एधते। एधते यः श्रियाधिकम्, कवि २६८। अधर्मेणैधते, मनुः ४, १, ४। लिट् एधाञ्चक्रे। लुट् ऐधिता। लृट् एधिष्यते। लुङ् ऐधिष्ट। ऐधिषाताम्। ऐधिषत। सन् एदिधिषते। णिच् एधयति। ऐदिधत्। किं नैदिधः स्वपराक्रमम्, भ १५, १९। मा भवानैदिधत्, प्रदीपः। आशीर्भिरैधयामासुरम्बिकाम्, कु ६, ९०। क्षत्रानुः समैधितस्तदीयैर्भूतैः, भ १२, २०। प्र—प्रैधते। उपैधते, पा ६, १, ८९।

एष्—एषृ, भ्वा, आ। गतिः।

एषते। एषाञ्चक्रे। एषिता। ऐषिष्ट। अन्वेषते। अध्येषते।

(ओ)

ओख्—ओख़, भ्वा, प। १ शोषणम्। स्नेहरहितीभावः। २ अलमर्थः। भूषणम्। ३ सामर्थ्यम्। ४ निवारणम्। लट् ओखति। लिट् ओखाञ्चकार। लुट् ओखिता। लुङ् औखीत्। सन् ओचिखिषति। णिच् ओखयति। औचिखत्। मा भवानोचिखत्। प्र—प्रोखति।

ओज—चु, प। वो। अदन्तः।

१ बलम्। २ तेजः। ओजयति।

ओण्—ओण़, भ्वा, प। अपनयनम्। ओणति। ओणाञ्चकार। ओणिता।

औणीत्। ओणयति। औणिणत्। मा भवानोणिणत्। क्तनिप् अवावा।

ओलञ्ज्—ओलजि, भ्वा, प। वो।

उत्क्षेपः। ओलञ्जति। ओलजतीत्यन्ये। ओलण्ड्—ओलडि, चु, प। उत्क्षेपः। ओलण्डयति। ओलण्डति। ओलण्डयति। लण्डति इत्येके।

(क)

कक्—भ्वा, आ। १ लौल्यम्।

चञ्चलीभावः। २ गर्वः। इच्छा, वो। लट् ककते। लिट् चकके। लुट् कक्षिता। लुङ् अककिष्ट। काकयति। काकः।

कक्ख्—कक्ख, भ्वा, प। वो।

हसनम्। कक्खति। कक्खति।

कख्—कखे, भ्वा, प। हसनम्।

कखति। चकाख। चकखतुः। कखिता। (ए) अकखीत् पा ७, २, ५। णिच् कखयति। घटादिः।

कग्—कगे, भ्वा, प।

गमनादयो बहवोऽर्थाः। नानार्थोऽयम्। कगति। चकाग। चकगतुः। कगिता। (ए) अकगीत्। णिच् कगयति। घटादिः।

कङ्क्—काङ्कि, भ्वा, आ। गतिः।

काङ्कते। चकाङ्के। काङ्किता। अकाङ्किष्ट।

कच्—भ्वा, आ। १ बन्धनम्।

२ दीप्तिः, वो। लट् कचते। लिट् चकचे। लुट् कचिता। लुङ् अकचिष्ट। आ—वक्त्रमाचकचे, भ १४, ९४। कच्, भ्वा, प, वो। शब्दः। कचति। काचः। विकचः। काचः।

कज्—भ्वा, प। मदः।

कजति। कज मदे इति कश्चित्।

कञ्च्—काञ्च, कचि, काचि, भ्वा, आ।

१ दीप्तिः। २ बन्धनम्। कञ्चते। चकञ्चे। कञ्चिता। काञ्चते। चकाञ्चे। काञ्ची। काञ्चनम्।

कट्—कटी (इट) भ्वा, प। गतिः।

कटे, भ्वा, प। १ वर्षणम्। २ आवरणम्। कटति। चकाट। चकटतुः। कटिता। अकटीत्, अकाटीत्। (ए) अकटीत्, पा ७, २, ५। प्र—णिच्, व्यक्तिः। प्रकटयति। प्रकटितः। प्रकटनम्। (ई) (कट्टः)। कटि, कण्टति इति कश्चित्। कण्टकः। कट्, अकाठीत्, वो। कटः। कटकम्। कटी।

कठ्—भ्वा, प। क्लच्छजीवनम्।

कठति। चकाठ। कठिता। अकठीत्, अकाठीत्। कठितः। कठिनम्।

कड्—भ्वा, प। १ मदः।

मत्तीभावः। २ भक्षणम्, वो। कडति। चकाड। कडिता। अकडीत्। अकाडीत्।

कड्ड्—कड्ड, भ्वा, प। कर्कशीभावः। कड्डति। चकड्ड। कड्डिता। क्विप् कत्। कज्जलः।

कण्—(अण) भ्वा, प। शब्दः।

आर्त्तनादः, वो। कण, भ्वा, प। गतिः। लट् कणति। लिट् चकाण। चकणतुः। लुट् कणिता। लट् कणिष्यति। लुङ् अकणीत्, अकाणीत्। सन् चिकणिषति। णिच् काणयति। गतौ कणयति, घटादिः। कण, चु, प। निमीलनम्। काणयति। अचीकणत्। अचकाणत्, कौ १७७। कण, (क्वण) चु, आ। सङ्कोचः। काणयते। कणः। कणिका।

कण्ठ्—(कट्)।

कण्ठ्—कठि, भ्वा, आ।

शोकः। आध्यानम्। उत्कण्ठा। लट् कण्ठते। लिट् चकण्ठे। लुट् कण्ठिता। लृट् कण्ठिष्यते। लुङ् अकण्ठिष्ट। कठि, चु, प। शोकः। कण्ठयति। कण्ठति। कण्ठः। उद्—उत्कण्ठा। नोत्कण्ठिष्यताऽत्यर्थम्, भ ५, ७२। उत्कण्ठयन्ति पथिकान् जलदाः स्वनन्तः, घटकर्परः। उत्कण्ठितः। वेतसीतरुतले चेतः समुत्कण्ठते। नोत्कण्ठते परद्रव्ये नोत्कण्ठति परस्त्रियम्। यस्योत्कण्ठयति श्लाघ्ये धर्म एव मनः सदा॥ कवि ८८।

कण्ड्—कडि (कड़) भ्वा, प।

कडि, भ्वा, आ। मदः। हर्षः। कण्डति। °ते। चकण्ड। °ण्डे। कण्डिता। अकण्डीत्। अकण्डिष्ट। कडि, चु, प। भेदनम्। वितुषीकरणम्। २ रक्षणम्, वो। कण्डयति। स्वर्गङ्गामुशलेन शालय इव त्वत्कीर्त्तयः कण्डिताः, महाना ६, ६०। कण्डनी।

कत्र्—कर्त्र्—कर्त्त्, चु, प। अदन्ताः।

शैथिल्यम्। कत्रयति। कर्त्रयति। कर्त्तयति।

कत्थ्—कन्थ्—भ्वा, आ। श्लाघा।

प्रशंसा। लट् कत्थते। यः स्वप्नेनापि नात्मीयं गुणं कुत्रापि कत्थते। कत्थयत्यादिराजानां चरितानि सहस्रशः॥ कवि २२७। लिट् चकत्थे। लुट् कत्थिता। लृट् कत्थिष्यते। क्त्वा कत्थित्वा न कः, भ १६, ४। लुङ् अकत्थिष्ट। वि—विकत्थनम्। श्लाघा। विकत्थी। कत्थनः।

कथ—चु, प। अदन्तः।

कथनम्। वर्णनम्। कथयति। कथयाञ्चक्रिरे गुणान्, भारत। अचकथत्। शाकटायनमते कथापयति। कथयित्वा। °कथय्य, पा ६, ४, ५६। कथितः। सूत! अकथितोऽपि श्रायत एवायमाभोगस्तपोवनस्य, शकु १, ५६। कथा। कथनम्। कथकः। सम् वर्णना। मिथोभाषणम्।

कन्—कनी, भ्वा, प। १ दीप्तिः।

२ कान्तिः। ३ गतिः। लट् कनति। लिट् चकान। चकनतुः। लुट् कनिता। लृट् कनिष्यति। लुङ् अकनीत्, अकानीत्। (ई) कान्तः, पा ६, ४, १५। कनकम्।

कन्थ्—(कत्थ्)।

कन्द्—कदि, भ्वा, प। १ आह्वानम्।

२ रोदनम्। लट् कन्दति। लिट् चकन्द। लुट् कन्दिता। लुङ् अकन्दीत्। कन्दः। कन्दरः। कन्दरा। कन्दलः। कन्दली।

कन्द्—कद्—कदि, भ्वा, आ।

१ वैक्लव्यम्। विवशता। २ वैकल्यम्। कन्दते। चकन्दे। कन्दिता। कदते। चकदे। कदिता। णिच् कदयति। घटादिः।

कब्—कल्ब, भ्वा, आ। १ वर्णः।

शुक्लादिकरणम्। २ स्तुतिः। कबते। चकबे, वो।

कम्—कमु, भ्वा, आ। १ कान्तिः।

२ अभिलाषः। इच्छा। स्पृहा। लट् कामयते, पा ३, १, ३०। अधन्यं कामयेत का, भ ८, ८१। लिट् कामयाञ्चक्रे, चकमे। निष्कृष्टमर्थं चकमे कुवेरात्, र ५, २६। कामयाञ्चक्रिरे कान्ताः, भ १४, ५३। लुट् कामयिता, कमिता। लृट् कामयिष्यते, कमिष्यते।

लुङ् अचीकमत्, अचकमत। णिङ् भावपक्षे न दीर्घसन्वद्भावौ। सन् चिकामयिषते, चिकमिषते। यङ् चङ्क्रम्यते। चङ्क्रन्ति। णिच् कामयति। (उ) कमित्वा, कान्त्वा, कामयित्वा। कान्तः। कम्रः। कामुकः। कामी। कमिता। कमनः। कामः। प्रकमनीयम्।

कम्प्—कपि, भ्वा, आ। चलनम्। कम्पनम्। लट् कम्पते। लिट् चकम्पे। चकम्पे प्राग्ज्योतिषेश्वरः, र ४, ८। लुट् कम्पिता। लृट् कम्पिष्यते। लुङ् अकम्पिष्ट। अकम्पिषाताम्। अकम्पिषत। भूरकम्पिष्ट, भ १५, ७०। सन् चिकम्पिषते। यङ् चङ्क्रम्यते। चङ्क्रम्यति। णिच्—कम्पयति। अचकम्पत्। कम्पः। कम्पतः। कम्पनम्। कम्रः। कम्पनः। अनु—अनुकम्पा। कृपा। अनुचकम्पिरे सुरा वायुना, मा १, ६१। रतिमन्वकम्पयत्, कु ४।३९। समनु—अनुग्रहः। समनुकम्पा सपत्नपरिग्रहान्, र ९,१४। उद्—प्रकम्पनम्। उत्कम्पते सा, गीतगो, ४, १९। प्र—प्राचकम्पदुदन्वन्तम्, भ १५, २३। वि—प्रकम्पनम्। रावणश्रियमपि व्यकम्पयत्, र ११, १९। उपतापाङ्गविकारयोः, विकम्पितः। अन्यत्र विकम्पितः।

कम्ब्—भ्वा, प। १ हिंसा। २ गतिः, वो। कम्बति। खम्ब्, खम्बति। गम्ब्, गम्बति। घम्ब्, घम्बति। चम्ब्, चम्बति।

कर्ज्—भ्वा, प। १ व्ययनम्। २ पीडनम्, वो। कर्जति। चकर्ज।

कर्ण—(छिद्र) अदन्तः। चु, प। भेदनम्। कर्णयति। आ—श्रवणम्। आकर्णयामास न वेदनादान्। भ ३। २७।

कर्त्—कर्तृ (कत्र)। अदन्ताः।

कर्द्—भ्वा, प। कुत्सितशब्दः। कुत्सितकुत्सितशब्दः। कर्दति। कर्दमः।

कर्व्—भ्वा, प। गतिः। कर्वति। खर्व्, खर्वति। गर्व्, गर्वति। घर्व्, घर्वति। चर्व्, चर्वति। तर्व्, तर्वति।

कल्—भ्वा, आ। १ शब्दः। २ संख्यानम्। गणना। लट् कलते। लिट् चकले। लुट् कलिता। लुङ् अकलिष्ट। कल्, चु, प। क्षेपणम्। प्रेरणम्। कालयति। बालत्वरसाश्च या गावः कौलयामास ता अपि, भारत। निष्कलन्ते मुखाद् यस्य नाश्लीलपरुषा गिरः। उत्कालयति यो यशः, कवि ७०।

कल—चु, प। अदन्तः। १ गतिः। २ संख्यानम्। गणना। कलिः कामधेनुः। कलयति। अचकलत्। विहगाः कलयन्त्यनेकलयम्, मा ४, ३६। कलयेदमानमनसम्, मा ९, ५८। कलयामि मणिभूषणं बहुदूषणम्, गीतगो ७, ७। गरलमिव कलयति मलयसमीरम्, गीतगो ४, ३। यदैनां छायाद्वितीयां कलयाञ्चकार, नै ३, १२। स्खेच्छनिवहनिधने कलयसि करवालम्, गीतगो १, १४। कलय वलयश्रेणीं पाणौ, गीतगो १२, २६। मरकत-शकल कलित-कलधौत-लिपेः, गीतगो ८, ४। मधुपकुलकलितरावः, गीतगो ११, १९। आ—बोधः। बन्धनम्। खिन्नमसूचया हृदयं तवाकलयामि, गीतगो ३, ७। सुवर्णसूत्राकलिताधराम्बराम्, मा १, ६। जघनस्थलीपरिसरे रसना-कलापगुणेन मकरध्वजद्विरदमाकलयत्, मा ९, ४५। परि—ज्ञानम्। स्त्रीलोकः परिकलयाञ्च-

कार तुच्यम्, मा ८, ६। सम्—सङ्कलनम्। व्यव—व्यवकलनम्।

कक्ष्—भ्वा, आ। १ अव्यक्तशब्दः।

२ अशब्दः। तूष्णीम्भावः। ३ कूजनम्, वो। कक्षते। चकक्षे। कक्षिता। कक्षोलः।

कव्—(कव्)।

कर्व्—भ्वा, प। गर्वः।

कर्वति। खर्व्, खर्वति। गर्व्, गर्वति।

कश्—भ्वा, प। शब्दः।

कशति। चकाश। कशिता।

कष्—भ्वा, प। हिंसा।

कषति। चकाष। कषिता। अकषीत्, अकाषीत्। समूलकाषं चकषुः, भ ३, ४८। (परीक्षा) क्षुदहेम कषन्निव कषपाषाणनिभे नभस्तले, नै २, ६८। खष्, खषति। जष्, जषति। जेषतुः। सर्वङ्कषः। कषः। निकषः। कष्टम्। पत्काषी।

कस्—भ्वा, प। गतिः।

लट् कसति। लिट् चकास। चकसतुः। लुट् कसिता। लुङ् अकसीत्, अकासीत्। सन् चिकसिषति। यङ् चनीकस्यते, पा ७, ४, ८४। चनीकस्ति। णिच् कासयति। अचीकसत्। कासः। वि—विकासः। यस्य लक्ष्मीर्विकसति प्रजाधर्मेण रक्षितुः, कवि २३२। विकसद्भिरास्यकमलैः, मा ८, ४७। कोपकुसुमं व्यचीकसत्, मा १५, १२। विकसितोत्पला, भ, ८, ६२। प्रवि—प्रकाशः। प्रविकसति सूर्य्ये, मा ११, ६३। विकासी। विकस्वरः। कशतीत्यर्थे। विकश्वरः। विकशितम्। निर्, णिच् निःसारणम्। निरकासयद्रविमपेतवसम्, मा ८, १०।

कांस्—कस्—कश्, अदा, आ।

१ गतिः। २ शासनम्। शातनमिति कश्चित्। लट् कंस्ते। कंसाते। कंसते। लिट् चकंसे। लुट् कंसिष्यते। लुङ् अकंसिष्ट। अकंसिषाताम्। अकंसिषत। कस्ते। चकसे। कसिता। तालव्यान्तोऽपि। कष्टे। कक्षे। कड्ढ्वे। चकश्रे। कक्ष्यिते। कांस्यम्।

कस्—भ्वा, प। गतिः।

लट् काङ्क्षति। मधुव्रतः काङ्क्षति वक्त्रीम्। सा, द। लिट चकाङ्क्ष। लुट् काङ्क्षिता। लुङ् अकाङ्क्षीत्। सन् चिकाङ्क्षिषति। यङ् चाकाङ्क्ष्यते। चाकांष्टि। णिच् काङ्क्षयति। अचकाङ्क्षत्। आ—आकाङ्क्षा। प्रत्याख्यसन्तं रिपुमाचकाङ्क्ष, र ७, ४७। नाकाङ्क्षति परस्त्रियम्, कवि १६४।

काश्—(कश्)।

काश्—काश्, भ्वा, दि, आ।

दीप्तिः। प्रकाशः। काशते। काश्यते। भ्वादौ दन्त्यान्तोऽपि। कासते। लिट् चकाशे। कासाञ्चक्रे पा १, १, ३५। कासाञ्चक्रे पुरा सौधैः, भ ८, ३८। लुट् काशिता। लृट् काशिष्यते। लुङ् अकाशिष्ट। अकाशिषाताम्। अकाशिषत। चकाशिरे तत्र लता विलोलाः, भ २, २५। तया दुहित्रा सवितुश्चकाशे, कु, १, २४। र ७, २१, २४। सन् चिकाशिषते। यङ् चाकाश्यते। चाकाष्टि। णिच् काशयति। अचकाशत्। प्र—प्रकाशः। प्रकाशते यथा व्योम्नि चन्द्रः, प्रकाश्यते तथा भूमौ प्रजानां नयनोत्सवः, कवि १५३। विश्वामित्राश्रम एष प्रकाशते, भारत। प्रकाशयन्ति निगूढनीयम्, भ १४, ३१। प्रकाशयति लोकं रविः, गीता १३, ३३। वि—विकाशः। विकाशन्ते च भूयांसो गुणाः, कवि २३२। आकाशम्।

कास्—कास्, भ्वा, आ।

कुत्सितशब्दः। शोभार्थस्तु उक्तः। लट् कासते। लिट् कासाञ्चक्रे, पा ३, १, ३५। लुट् कासिता। लृट् कासिष्यते। लुङ् अकासिष्ट। असौतो रावणः कासाञ्चक्रे (कुत्सितमभिहितवान्), भ, ५, १०५। सन् चिकासिषते। यङ् चाकास्यते। चाकास्ति। णिच् कासयति। (ऋ) अचकासत्। कासः।

किट्—भ्वा, प। १ त्रासः।

२ भीषणम् वो। किट् (इट्) भ्वा, प। गतिः। केटति। केटिता।

कित्—भ्वा, प, आ, आभरणमते।

१ व्याधिप्रतिकारः। रोगनिर्णयः। २ निग्रहः। ३ अपनयनम्। ४ नाशनम्। ५ संशयः, कौ १०१। लट् चिकित्सति। ०ते। रोगिणम्, पा ३, १, ५। चिकित्सति जगद्व्याधिम्, कवि २५७। लिट् चिकित्साञ्चकार। लुट् चिकित्सिता। लुङ् अचिकित्सीत्। चिकित्सकः। चिकित्सितः। मया न पठिता चण्डी त्वया नापि चिकित्सितम्। वि—संशयः। विचिकित्सा तु संशय इत्यमरः।

कित्—भ्वा, चु, प।

१ निवासः। २ इच्छा, वो। केतति। केतयति। निकेतयति। निकेतनम्।

किल्—तु, प। प्लुत्यम्।

शुक्लीभावः। २ क्रीड़नम्। किलति। किलन्ति बालकाः कामम्, कवि २३३। चिकेल। केलिता। किल्, चु, प, वो। क्षेपणम्। प्रेरणम्। केलयति। केलिः।

किष्क्—चु, आ। हिंसा।

किष्कयते। हिष्क्, हिष्कयते। हिक्कयते।

कीट—चु, प। वर्णः। भ्वा, बन्धः, वो।

कील्—भ्वा, प। बन्धनम्।

कीलति। चिकील। कीलिता। कीलः। कीलकः। कीलितम्। हृदयं मम शरकीलितम् (विद्धम्), गीतगो ७, ४; १२, १४।

कु—कुङ् (ऊङ्) भ्वा, आ।

शब्दः। अव्यक्तशब्द इति प्रदीपः। कु, अदा, प। शब्दः। लट् कवते। कौति। कवीति, अपिगलिः। शोकान्न कौति कुवते न भयान्न कश्चित्। यन्मण्डले जनपदः कवते च सूक्तम्॥ कवि २०। कुतः। कुवन्ति। लिङ् कुयात्। लङ् अकौत्। लिट् चुकाव। चुकुवतुः। चुकुविथ, चुकोथ। चुकुवे। लुट् कोता। लृट् कोष्यति। ०ते। आशिषि, कूयात्। कोषीष्ट। लुङ् अकोषीत्। अकौष्टाम्। अकोषुः। अकोष्ट। सन् चुकुषति। ०ते। यङ् भ्वा, कोकूयते, पा ७, ४, ६३। अदा, चोकूयते। अकोकूयिष्ट मैन्यम्। पलायिष्ट चाकुलम्, भ १५, ११४। चोकवीति। णिच् कावयति। अचूकवत्।

कु—कू—कुङ्—कूङ्, तु, आ।

१ शब्दः। २ आर्त्तनादः, वो। कुवते। चुकुवे। कुता। अकुत, पा ८, २, २७। अकुषाताम्। अकुषत। क्रूरा अकुषत द्विजाः, भ १५, २६। चोकूयते। कू। कुवते। चकुवे। कुविता। अकुविष्ट। आकूतम्।

कुक्—भ्वा, आ। आदानम्।

ग्रहणम्। लट् कोकते। लिट् चुकुके। चुकुकिषे। लुट् कोकिता। सन् चुकुकिषते, चुकोकिषते। कोकः।

कुच्—भ्वा, प। १ तारः।

उच्चशब्दः। २ चिक्कणता। लट् कोचति। कोचति ढक्कति दुर्गादासः।

कोचति काञ्चीं वणिक् इति भट्टमल्लः ।

कुच्—भ्वा, प । १ तारः ।

उच्चशब्दः । २ सम्पर्कः । ३ कौटिल्यम् । ४ प्रतिष्टम्भः । ५ विलेखनम् । कोचति । चुकोच । कोचिता । अकोचीत् । कोचः, पा ३, १, १४० । यस्मिन् समुदिते रात्रि जनः सङ्कोचति स्त्रियौ, कवि १४० ।

कुच्—तु, प । सङ्कोचः ।

कुचति । चुकोच । कुचिता । अकुचीत् । सम्—सङ्कोचः । सङ्कुचति । सङ्कुचितः । णिच् समकोचयदर्भिः । सङ्कुचत्यरिनारीणां मुखं पङ्केरुहद्युति, कवि १४० ।

कुज्—कुजु, भ्वा, प । स्तेयम् ।

अपहरणम् । कोजति । चुकोज । कोजिता । अकोजीत् । (उ) कोजित्वा, कुक्ला । कुक्लः ।

कुञ्च्—क्रुञ्च्—कुन्च—क्रुन्च ।

भ्वा, प । १ कौटिल्यम् । कुटिलीकरणम् । कुटिलीभावः । अल्पीभावः । अल्पीकरणम् । लट् कुञ्चति । लिट् चुकुञ्च । लुट् कुञ्चिता । लृट् कुञ्चिष्यति । आशिषि, कुच्यात् । लुङ् अकुञ्चीत् । सन् चुकुञ्चिषति । यङ् चोकुच्यते । णिच् कुञ्चयति । कुञ्चिनम् । कुञ्चिका । आ—सङ्कोचः । आकुञ्चनम् । आकुञ्चिताग्राङ्गुलिः, र ६, १५ । आकुञ्चितसव्यपादम्, कु ३, ७० । वि—सङ्कोचः । विकुञ्चितललाटभृत्, भारत । क्रुञ्च्, क्रुञ्चति । चुक्रुञ्च । क्रुञ्चिता । क्रुच्यात् । क्रुङ् । क्रुङ्भ्याम् ।

कुञ्ज्—(कूज्) ।

कुट्—तु, प । कौटिल्यम् ।

वक्रीकरणम् । लट् कुटति । लिट् चुकोट । चुकुटतुः । चुकुटिथ । लुट् कुटिता, पा १, २, १ । लृट् कुटिष्यति । लुङ् अकुटीत् । अकुटिष्टाम् । अकुटिषुः । सन् चुकुटिषति । यङ् चोकुट्यते । चोकोट्टि । णिच् कोटयति । अचूकुटत् । कुटित्वा । कोटः । कोटिः । सम्—निकुत्तिः । केचित् संचुकुटुर्भीताः, भ १४, १०५ । संकुटितुम्, भ ७, ९१ । सङ्कुटन्ति भयाक्रान्ताः शत्रवो यस्य दर्शनात्, कवि २३४ ।

कुट्—(त्रुट्) चु, आ । छेदः ।

कोटयते । कुट् (कूट्) ।

कुटुम्ब्—(तम्बि) चु, आ । धारणम् । पोषणम् । पालनम् । कुटुम्बयते ।

कुट्ट्—चु, प । १ छेदनम् ।

२ भर्त्सनम् । ३ पूरणम् । कुट्टयति । अचुकुट्टत् । चु, आ । प्रतापनम् । कुट्टयते ।

कुड्—तु, प । १ बाल्यम् ।

चापल्यम् । २ भोजनम्, वो । कुडति । चुकोड । चुकुडतुः । कुडिता । अकुडीत् ।

कुण्—तु, प । १ शब्दः ।

२ उपक्लृप्तिः । कुणति । चुकोण । कोणः ।

कुण—चु, प । अदन्तः ।

२ आमन्त्रणम् । २ केतनम् । ३ सङ्कोचः । कुणयति ।

कुण्ट्—कुण्ड्—कुटि, कुडि, भ्वा, प ।

विकलीकरणम् । कुण्टति । कुण्डति । कुण्डम् ।

कुण्ठ्—कुठि, भ्वा, प ।

प्रतिघातः । गतिप्रतिघातः । कुण्ठति । चुकुण्ठ । कुण्ठिता । अकुण्ठीत् । कुण्ठितास्त्रीव लक्ष्यते, कु २, २० । कुठि, (गुडि) चु, प । १ वेष्टनम् । २ रक्षणम् । ३ चूर्णीकरणम् । कुण्ठयति । कुण्ठः ।

कुण्ड्—कुडि, भ्वा, आ। दाहः।

कुण्डते। चु, प। रक्षणम्। कुण्डयति। भ्वा, प। वैकल्यम् (कुण्ट)। कुण्डा। कुण्डम्।

कुत्स्—चु, आ। कुत्सा।

अवक्षेपः। कुत्सयते। कुत्सयति, वो। यो न कुत्सयते कुत्सां न च कुत्सति निर्धनम्, कवि २४९। हलायुधमते भ्वादिरपि।

कुथ्—दि, प। पूतीभावः।

दौर्गन्ध्यम्। लट् कुथ्यति। लिट् चुकोथ। चुकुथतुः। लुट् कोथिता। लृट् कोथिष्यति। लुङ् अकोथीत्। कोथित्वा। कुथितः।

कुन्—क्रया, प (कुन्य्)।

'कुद्' चु, प (कुन्द्र)।

कुन्य्—कुथि, भ्वा, प। १ हिंसा।

२ संक्लेशनम्। कुन्य्, कुथ्, क्रया, प। १ संश्लेषणम्। २ संक्लेशः। लट् कुन्यति। कुथ्नाति। कुथ्नीतः। कुथ्नन्ति। न कुथ्नति बुभुक्षार्त्तः श्रोत्रार्त्तस्य न कुन्यति। यस्य राष्ट्रेऽधनाढ्यो वा मृतः कोऽपि न कुथ्यति॥ कवि १२४। लिङ् कुथ्नीयात्। लङ् अकुथ्नात्। लिट् चुकुन्य। चुकोथ। लुट् कुन्यिता। कोथिता। आशिषि, भ्वा, कुन्यात्। क्रया, कुथ्यात्। कुन्यनम्।

कुन्द्र्—कुद्रि, चु, प।

अनृतभाषणम्। असत्यकथनम्। कुन्द्रयति। अचुकुन्दत्। गुद्रि, गुन्द्रयति। कुद, कोदयति इति क्वचित्।

कुप्—दि, प। कोपः। क्रोधः।

लट् कुप्यति। देवदत्ताय कुप्यति, पा १, ४, ३७। यो न कुप्यति विप्राय कुप्यते च महाप्रभुः। प्रकोपयत्यसौ राजा यस्तेन सदृशो जनः॥ कवि १५८। लिट् चुकोप। चुकोप तस्मै स भृशम्, र ३, ५८। लुट् कोपिता। लृट् कोपिष्यति। लुङ् अकुपत्। अकुपताम्। सन् चुकुपिषति। चुकोपिषति। यङ् चोकुप्यते। चोकोप्ति। णिच् कोपयति। कुप, चु, प। दोप्तिः। कोपयति। कोपः। कुपितः। कोपनः। अति, प्र—अतिकोपः। अत्यकुपत्, भ १५, ५५।

कुमार—चु, प। अदन्तः। क्रीड़ा।

कुमारयति। अचकुमारत्। कुमाल इत्येके। कुमालयति। कुमारः।

कुम्ब्—कुवि, भ्वा, चु, प।

आच्छादनम्। कुम्बति। कुम्बयति। कुपि, कुम्पति। कुम्पयति। कुभि, कुम्भति। कुम्भयति। इति काश्यपादयः।

कुर्—तु, प। शब्दः।

कुरति। चुकोर। कोरिता। आशिषि, कुर्यात्। दीर्घनिषेधस्तु करोतेरिव, कौ १५२।

कुर्द्—खुर्द्—गुर्द्—भ्वा, आ।

क्रीड़ा। कूर्दते, पा ८, २, ७८। खूर्दते। गूर्दते। चुकूर्द। कूर्दिता कूर्दिष्यते। अकूर्दिष्ट, भ १५, ४५। चुकूर्दिरे, भ १४, ९, ७७। कूर्दनम्। कूर्दितः। दीर्घत्वमत्र कैश्चिदिष्यते। कुर्दते खुर्दते इति प्रदीपः।

कुल्—भ्वा, प। १ संहतिः।

राशीकरणम्। २ बन्धुभावः। मैत्रीकरणम्। लट् कोलति। लिट् चुकोल। लुट् कोलिता। लुङ् अकोलीत्। कुलितः। आकुलितः। व्याकुलितः। कोलः। कुलम्।

कुश्—दि, प (कुस)। योगः।

कुंश्—कुशि, चु, प, वो। दोप्तिः। कुंशयति। कुंशति।

कुष्—क्रया, । निष्कर्षः ।

बहिष्करणम् । निःसारणम् । लट् कुष्णाति । कुष्णीतः । कुष्णन्ति । हि कुषाण । लिट् चुकोष । लुट् कोषिता । लृट् कोषिष्यति । लुङ् अकोषीत् । अकोषिष्टाम् । अकोषिषुः । अकुष्णात् प्राणान् वनौकसाम्, भ १७, ८० । शिवाः कुष्णन्ति मांसानि, भ १८, १० । कर्मकर्त्तरि, कुष्यति । कुष्यते पाटः स्वयमेव, पा ३, १, ९० । सन् चुकोषिषति, चुकुषिषति, पा १, २, २६ । यङ् चोकुष्यते । चोकोष्टि । णिच् कोषयति । कुषित्वा, पा १, २, ७ । कुषितः । कुषित्वा जगतः सारम्, भ ७, ९५ । निर्—बहिर्निःसारणम् । निष्कोष्टा, निष्कुषिता, पा ७, २, ४६ । निष्कोष्यति, निष्कोषिष्यति । निरकुक्षत् । निरकोषीत् । निष्कोषितव्यान् निष्कोष्टुं प्राणान् दशमुखात्मजात्, भ ९, ३ । कोटनिष्कुषितं धनः, भ ५ ४२ । उपाल्लयोर्निष्कुषितं विहङ्गैर्भुजच्छेदम्, र ७, ५० ।

कुस्—कुश्—दि, प । योगः ।

कुस्यति । कुश्यति । चुकोस । अकुसत् ।

कुंस्—कुसि (कुप्) चु, प ।

दीप्तिः । कुंसयति । कुंसति । क्रंस्, क्रंसयति । क्रंसति, वो ।

कुस्म्—चु, आ । कुत्सितस्मयः ।

कुत्सितहासः । कुस्मयते । अचुकुस्मत् । बुद्धिकरणकदर्शनमिति दुर्गादासः । कुस्मयते जनः (बुद्ध्या पश्यति) कुदृष्टिः । कुस्मयते युवतीं कामुकः । अथवा कुस्मेति प्रातिपदिकं ततो धात्वर्थे णिच्, को १७७ । कुशब्दपूर्वकस्मिधातुरित्यपि कश्चित् ।

कुह—चु, आ । अदन्तः ।

विस्मापनम् । कुहयते । कुहयते कुहकेनेन्द्रजालिको लोकमिति दुर्गादासः ।

कू—तु, आ (कु) । शब्दः ।

कुवते । क्रया, प इति हलायुधः । स्तुतिपुटपरिपेयं क्रौञ्चचक्रं कुनाति, कवि १७ ।

कूज्—कुञ्ज्—कुजि, चन्द्रमते ।

भ्वा, प । अव्यक्तशब्दः । कूजनम् । लट् कूजति । कुञ्जति । लिट् चुकूज । चुकूज कूले कलहंसमण्डली, नै १, २७ । पुंस्कोकिलो यन्मधुरं चुकूज, कु २, ३२ । लुट् कूजिता । लुङ् अकूजीत् । अकूजिष्टाम् । अकूजिषुः । सन् चुकूजिषति । यङ् चोकूज्यते । कोकूक्ति । णिच् कूजयति । कूजितम् । कूजनम् । स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिः, र २, १२ । कोकिलकूजित-कुञ्जकुटीरे, गीतगो १, २८ । उप—चक्रवाकोपकूजिता क्रन्दिनी, भारत । वि—विहगविकूजितवन्दिमङ्गलानि, र ९, ७१ ।

कूट्—चु, आ । १ आप्रदानम् ।

२ अप्रदानम् । ३ अवसादनम् । अप्रसञ्जीभावः । कूटयते । कुट्, कोटयते इति मैत्रेयः । कूट चु, प, अदन्तः । परितापः । आमन्त्रणम् । यः कूटयति ग्रहणां गजघटाः, कवि २३४ ।

कूड्—तु, प (क्रुड्) । सान्द्रता ।

कूण्—चु, आ । सङ्कोचः ।

कूणयते । कण, काणयते । कूण—चु, प, अदन्तः । सङ्कोचः । कूणयति ।

कूल्—भ्वा, प । आवरणम् ।

कूलति । चुकूल । कूलिता । अकू-

लोत्। कूलम्। अनुकूलः। प्रतिकूलः। यस्यामुं प्रतिकूलति, कवि ८७।

कृ—कृञ्, भ्वा, उ, वो। करणम्।

करति। ०ते। चकार। चक्रे।

कृ—कृञ्, स्वा, उ। हिंसा।

कृणोति। कृणुते। कृणोति किरणं शत्रोः, कवि ४४। युद्धे कृणोति शत्रूणां वारणान्, कवि १३७। चकार। निर्—भञ्जनम्। शक्तिर्निरकारि मे (भग्ना), भ १५, ५४। कारणा। कारागृहम्।

कृ—डुकृञ्, तना, उ।

करणम्। विधानम्। अनुष्ठानम्। लट् करोति। कुरुतः, पा ६, ४, १२०। कुर्वन्ति, पा ८, २, ७९। कुर्वः, पा ६, ४, १०८। कुरुते। कुर्वाते। कुर्वते। लिङ् कुर्य्यात्, पा ६, ४, १०९। कुर्वीत। लोट् करोतु। कुरु। करवाणि। लङ् अकरोत्। अकुरुताम्। अकुर्वन्। अकरवम्। अकुरुत। अकुर्वत। अकुर्षि। लिट् चकार। चक्रतुः। चकर्थ। चक्रुव। चक्रे। चक्रुढ्वे। लुट् कर्त्ता। लृट् करिष्यति। ०ते। आशिषि, क्रियात्। कृषीष्ट, पा १, २, १२। कृषीष्ठम्। लुङ् अकार्षीत्। अकार्ष्टाम्। अकार्षुः। अकृत। अकृषाताम्। अकृषत। अकृथाः। अकृढ्वम्। कर्मणि, क्रियते। कारिता। कारिष्यते। अकारि। देवदत्तः घटं करोति। न च स्वं कुरुते कर्म, मनुः १, ५५। पितॄणां कुरुषे कार्य्यम्, भ ६, ६३। यत्नं कुरुत, भ ७, ९३। धनुः सवार्णं कुरु, भ २, ५१। उपाग्नाकुरुतां सख्यम्, भ ६, १०५। ऋषयश्चक्रिरे धर्मम्, मनुः २, १५४। नाकार्षं देवि! विक्रमम्, भ ८, ११३। यदकार्षीत् स रक्षसाम्, भ १५, ९। कर्म व्याधस्यापि विगर्हितं मां घ्नता भवताऽकारि, भ ६, १२९। तैर्हि षोऽकारिषताकुलाः, भ १५, ७६। क्षपीढ्वं कर्त्तुरानन्दम्, भ ९ ७७। सन् चिकीर्षति। ०ते, पा १, २, ९। यङ् चेक्रीयते, पा ७, ४, २७। चर्करीति। चरिकरीति। चरीकरीति। चर्कर्त्ति। चरिकर्त्ति। चरीकर्त्ति, पा ७, ४, ९२। णिच् कारयति। ०ते। अचीकरत्। ०त, पा ३, १, ४८। ७, ४, ९३। कुर्वन्। कुर्वाणः। कृत्यं, कार्य्यम्। कर्त्तव्यम्। करणीयम्। कृत्। कृतः। कारः। करणम्। कृत्वा। ०कृत्य। कर्त्तुम्। उच्चैःकारम्। प्रियङ्करः। अलङ्करिष्णुः। कुम्भकारः। शब्दकारः। सुखकरः। कारकः। कर्त्ता। कारुः। कर्म। कृत्या। क्रिया। इत्यादि। तां राजकृत्वा, भ ७, १३०। तां हस्तेकृत्य (स्वीकृत्य), भ ५, १६; पा १, ४, ७७। पाणीकृत्य। उरसिकृत्य। मनसिकृत्य। जीविकाकृत्य (जीविकामिव कृत्वा)। उपनिषत्कृत्य, पा १, ४, ७९। बुभुजे देवसात् कृत्वा (देवेभ्यो दत्त्वा), भ ४, ९। यमसाच्चक्रतुर्हि षौ, भ ५, ३। अलम्—भूषणम्। अलङ्कृत्य, पा ४, ६४। पत्यानं गताभ्यामलञ्चक्रतुः, र २, ८। आविस्—आविष्करणम्। प्रादुस्—आविष्कारः। पुरस्—पुरस्कारः। पूजा। अग्रतः करणम्। पुरस्कृता वर्त्मनि पार्थिवेन, र २, ३०। पुरस्कृतः सताम्, र ३, ४३। तिरस्—तिरस्कारः। भर्त्सनम् आच्छादनम्। बहिस्—दूरीकरणम्। सत्—आदरः। नमस्—नमस्कारः। मुनिव्रयं नमस्कृत्य, कौ ५१। सजूः—सहार्थः। सजूःकृत्य रतिं वसेत्, भ ५, ७३। अधि—अधिकारः। नैवाध्यकारिषद्धि वेदहस्ते, भ ३, ३४। प्रहसनम्। अधिचक्रे न यं हरिः, भ ८, ३०। पा १, ३, ३३, अनु—अनुकरणम्।

शैलाधिपस्यानुचकार लक्ष्मीम्, भ २, ८। न गुरोरनुकुर्वीत गतिभाषितचेष्टितम्, मनुः २, १९९। अप—अपकारः, भर्त्सनम्। अपचक्रे सीताम्, भ ८, २०। पा १, ३, ३२। कस्यापकरोति किञ्चित्, रामा। आ—णिच्, इङ्गितम्। आह्वानम्। आकारय मुनीन् भोजनाय, रामा। आकारितः। अत्या—अत्याकारोऽधिक्षेपः। गार्गिकया अत्याकृतते, कौ ६५७। अपा—अपसारणम्। शिवा मुजच्छेदमपाचकार, र ७, ४०। स कथं शक्यतेऽस्माभिरपाकर्त्तुं बलादितः, भारत। उदा—भर्त्सनम्। श्येनो वर्त्तिकामुदाकुरुते, पा १, ३, ३२। उपा—संस्कारपूर्वकवेदग्रहणम्। संस्कारपूर्वकपशुहननम्। सौमित्रे गोसहस्रमुपाकुरु, रामा। उपाकृत्य, मनु ४, ९५। निरा—निराकरणम्। तेन भ्राता निराकृतः, भ ६, १००। यौर्भानुगीतांशुनिराकृता, भ ३, ९। व्या—व्याख्या। ग्रन्थानधीत्य व्याकर्त्तुम्, मा २, २६। उद्—हिंसा। उत्कुरुते, पा १, ३, ३२। उप—उपकारः। सेवा। उपकुर्वन्तमत्यर्थम्, भ ८, ९८। हरिमुपकुरुते, पा १, ३, ३२। प्रतियत्नः। एधोदकस्योपस्कुरुते, पा ६, २, १३२। भूषणम्। उपस्कृता कन्या। विकृतम्। उपस्कृतं भुङ्क्ते। समवायः। उपस्कृता ब्राह्मणाः। वाक्याध्याहारः। उपस्कृतं ब्रूते। नि—विनि—निकारः। वञ्चनम्। यो ज्येष्ठो विनिकुर्वीत लोभाद् भ्रातॄन्, मनुः ९, २१३। परा—परिहरणम्। तां हनूमान् पराकुर्वन्नगमत्, भ ८, ५०। परि—परिष्कारः, पा ६, १, १३७। पर्य्यस्करोत्, पा ८, ६, ७१। प्र—अनुष्ठानम्। सम्प्रहारं प्रचक्रतुः, भ २, ३६ प्रकथनम्। गाथाः प्रकुरुते, पा १, ३, ३२। उपयोगः। यत्तं प्रकुरुते साहसिकम्। परदारान् प्रकुरुते। कुलभार्य्यां प्रकुर्वाणः, भ ८, १९। विप्र—पीड़ा। रक्षोविप्रकृतौ, र १०, ७४। त्वया विप्रकृतस्वैद्यः, मा २, ३८। तेन विप्रकृता दिवौकसः, कु २, १। प्रति—प्रतिकारः। प्रतिकुर्य्याद् यथोचितम्, हितोप। वि—विकारः। छात्रा विकुर्वते, पा १, ३, ३५। स्वरान् विकुरुते। चित्तं विकरोति कामः, पा १, ३, ३४। चेतांसि विक्रियन्ते, कु १ ६०। सम्—संस्कारः। संस्करोति, पा ६, १, १३७। सञ्चस्कार। सञ्चस्करिथ। सञ्चस्करिव। संस्क्रियात्। संस्कृषीष्ट। समस्कृत। समस्कृषाताम्। बालो सञ्चस्कार यथाविधि गुरुः, र १५, ३१।

कृड्—तु. प। घनत्वम्।

सान्द्रता। लट् कृडति। लिट् चकर्ड। लुट् कृडिता। लुङ् अकृडीत्। कूड्, कूडति, वो।

कृत्—कृती, तु, प। छेदनम्।

लट् कृन्तति, पा ७, १, ५८। कृन्त्यरिग्रिरांसि सः, कवि १२२। तां द्विधाकृन्तच्छिलीमुखैः, भ १७, ९१। लिट् चकर्त्त। चकृततुः। लुट् कर्त्तिता। लृट् कर्त्तिष्यति। कर्त्स्यति, पा ७, २, ५७। लुङ् अकर्त्तीत्। अकर्त्तिष्टाम्। अकर्त्तिषुः। अकर्त्तीद्दिशान् विद्विषाम्, भ १५, ९७। रणे कर्त्स्यति गात्राणि, भ १६, १५। कोऽन्योऽकर्त्स्यत् प्राणान् सुरद्विषाम्, भ २१, १७। भुजौ चकृततुस्तस्य, भ ६, ४५। सन् चिकर्त्तिषति। चिकृत्सति, पा ७, २, ४७। यङ् चरीकृत्यते। चरीकर्त्ति। चरिकर्त्ति। चर्कर्त्ति। चर्कर्तीति। णिच् कर्त्तयति। अचकर्त्तत्। अचीकृतत्। (ई)

क्तम्। क्तिः। कर्त्तनम्। क्तवतु-मपि। विरहिनिकृन्तनेति जयदेवः। अव—छेदनम्। स्निग्धमस्यावकर्त्तयेत्, मनुः ८, २८१। उत्—उत्कर्त्तनम्। निष्कोषणम्। खण्डयित्वा वहिष्करणम्। उत्कृत्योत्कृत्य गर्भानपि शकलयतः, महाना २, ८,। नि—कुत्सितकर्त्तनम्। छेदनम्। व्यकृन्तंश्चक्रधाराभिः, भ १७, १२। निर्—उत्कर्त्तनम्। अलाबुमध्यान्निष्कृत्य बीजम्, भारत।

कृत्—कृतौ, रु, प। वेष्टनम्।

लट् कृणत्ति। कृन्तः। कृन्तन्ति। यं कृन्तन्ति गुणग्रामाः, कवि १२१। लङ् अकृणत्। अकृन्ताम्। शेषं पूर्ववत्।

कृन्व्—क्वि, भ्वा, प। १ हिंसा। २ करणम्। गमनम्। लट् कृण्वोति। कृण्वतः। कृण्वन्ति, पा ३, १, ८०। लिङ् कृण्यात्। लिट् चकृन्व। चकृन्वतुः। लुट् कृन्विता।

कृप्—(क्लृप्)।

कृप—अदन्तः। चु, प। दुर्बलता। मासौ कृपयति प्रभुः, कवि २२५।

कृप्य—दि, प। तनूकरणम्।

काश्यम्। लट् कृप्यति। लिट् चकर्प्य। चकृप्यतुः। लुट् कर्प्यिता। लृट् कर्प्यिष्यति। लुङ् अकृप्यत्। कृप्यित्वा, कर्प्यित्वा, पा १, २, २५। ता कृप्यः, पा ८, २, ५५। कृप्यति चन्द्रः कृष्णपक्षे इति दुर्गादासः। शोककर्शितः, रामा।

कृष्—क्वा, प। सु, उ। विलेखनम्। आकर्षणम्। प्रापणम्। लट् कर्षति। कृषति। ०ते। कर्षति ग्राह्यं ग्रामम्। ग्राहो जले गजेन्द्रमपि कर्षति, हितोप। सुखं कृषति शालेयमिक्षुक्षेत्रञ्च कर्षति, कवि १८२। लिट् चकर्ष। चकृषे। प्रसह्य सिंहः किल तां चकर्ष, र २, २७। लुट् कर्ष्टा, क्रष्टा। लृट् कर्ष्यति। ०ते। क्रक्ष्यति। ०ते, पा ६, १, ५८। लुङ् अक्राक्षीत्। अक्राष्टाम्। अक्राक्षुः। अकार्क्षीत्। अकार्ष्टाम्। अकार्क्षुः। अकृक्षत्। अकृक्षाताम्। अकृक्षन्। अकृष्ट। अकृक्षाताम्। अकृक्षत। अकृक्षत। अकृक्षाताम्। अकृक्षन्त, कौ २४८। तं हस्ताभ्यामक्राक्षीत्, भ १५, ४७। कर्मणि, क्रक्ष्यते। अकर्षि। सन् चिकृक्षति। ०ते। यङ् चरीकृष्यते। चरीकर्ष्टि। चरीकृष्टि। णिच् कर्षयति। अचकर्षत्। अचीकृषत्। कृष्टः। कृष्टिः। कर्षणम्। अनु, आ, वि—आकर्षणम्। धनुर्व्यकार्क्षीत्, भ २, ५३। अप—अपकर्षः। अपसारणम्। उद्—उत्कर्षः। निर्—निष्कर्षः। निष्कृष्टुमर्थं चकमे कुवेरात्, र ५, २६। प्र—प्रकर्षः। विप्र—विप्रकर्षः।

कॄ—तु, प। क्षेपणम्। आच्छादनम्। व्यापनम्। लट् किरति, पा ७, १, १००। नरि नरि किरति द्राक् शायकान् पुष्पधन्वा। सौमित्रिमकिरद्बाणैः, भ १७, ४२। लिट् चकार। चकरतुः। दिशश्च पुष्पैश्चकरुः, भ ३, ५। चकरिथ। लुट् करिता, करीता, पा ७, २, ३८। करिष्यति, करीष्यति। आशिषि कीर्य्यात्। लुङ् अकारीत्। अकारिष्टाम्। अकारिषुः। अकारिष्टां गिरीन् भ १५, ८०। कर्मणि, कीर्य्यते। सन् चिकरिषति, पा ७, २, ७५। यङ् चेकीर्य्यते। चाकर्त्ति। णिच् कारयति। कीर्णः। कीर्णिः। विकिरः। विष्किरः उत्करो धान्यानाम्, उत्करो रजसाम् अप—आलिख्य विक्षेपणम्। अपखिरसि ब्रुवभो लुप्तः, कुक्कुटो भक्ष्यार्थी, व

आश्रयार्थी, पा ६, १, १४२। अव—आच्छादनम्। वर्षणम्। कपिं वाणैरवाकिरत्, भ ८, ३४। अवाकिरन् तं लाजैः, र ४, २८। आ—व्यापनम्। आकीर्णम्, र, १, ५१। उप, प्रति—छेदनम्। हिंसा। उपस्किरति। प्रतिस्कीर्णम्, पा ६, १, १४०, १४१। उरोविदारं प्रतिचस्करे नखैः, मा १, ४७। उद्—उत्क्षेपणम्। रजोभिस्तुरगोत्कीर्णैः, र १, ४३। पुष्परेणूत्किरैर्वातैः, र १, ३९। समुद्—वेधनम्। मणौ वज्रसमुत्कीर्णे, र १, ४। वि—विक्षेपः। तण्डुलकणान् विकीर्य्य, हितोप। द्रुमान् विचकरुः, भ १४, २५। विनि—निक्षेपः। विनिकीर्य्य माम्, कु ४, ६। प्र—प्रक्षेपः। विस्तारः। वातेन प्रकीर्णास्तवकोच्चयाः, भ ८, ६६। सम्—मिश्रणम्। वर्णाः सङ्कीर्णाः, मनुः १, ११६। क्षत्रिया वैश्याः सङ्कीर्य्यन्ते परस्परम्, भारत।

कॄ—कॄञ्, क्रया, उ। कॄ, क्रया, प। हिंसा। क्रुणाति। क्रुणीते। लिङादौ पूर्ववत्। सनि तु चिकरिषति, चिकीर्षति। कॄ, चु, आ। ज्ञानम्। कारयते। बाणावलिं किरत्याजौ क्रुणाति तुरगान् रणे, कवि ४४। द्वितीयात्तु कर्त्तृगामिफलेऽपि न तङ्।

कॄत्—चु, प। संशब्दनम्।

कीर्त्तनम्। कीर्त्तयति, पा ७, १, १०१। कीर्त्तयन्ति च गोष्ठीषु यद्गुणानप्सरोगणाः, कवि १२२। अचिकीर्त्तत्। अचीकृतत्। भ्रातुरचिकीर्त्तद्विक्रमम्, भ १५, ७२। विप्रसेवैव शूद्रस्य प्रशस्तं कर्म कीर्त्यते, मनुः १०, १२३।

कॢप्—कपू, भ्वा, आ। सामर्थ्यम्। योग्यता। पर्य्याप्तिः। सम्पत्तिः। उद्भूतिः। लट् कल्पते, पा ८, २, १८। प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते, र ८, ४१। सूर्य्यं तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रम्, र ५, १३। योऽर्थिनामीप्सितप्राप्तेः कल्पते कल्पवृक्षवत्। न कल्पयति मिथ्यार्थं शिरः कल्पति विद्विषाम्॥ कवि ८३। लिट् चक्लृपे। चक्लृपिषे। चकल्प्से। चक्लृपे चाश्वकुञ्जरम् (सज्जीकृतम्), भ १४, ८। लुट् कल्प्तासि। कल्प्तासे, कल्पितासे, पा १, ३, ४१; ७, २, ६०। लृट् कल्प्स्यति। कल्प्स्यते, कल्पिष्यते। कल्पिष्यते हरेः प्रीतिः, भ १६, १२। तोषः सीतायास्तस्मिं कल्प्स्यति, भ ८, ४५। लङ् अकल्प्स्यत्। अकल्प्स्यत, अकल्पिष्यत। वितथैव नोऽकल्प्स्यदुद्यतिः, भ १८, ६९। आशिषि, कल्पिषीष्ट, क्लृप्सीष्ट। लुङ् अक्लृपत्। अकल्पिष्ट, अक्लृप्त। अकल्पिषाताम्, अक्लृप्साताम्। अकल्पिषत, अक्लृप्सत। सन् चिक्लृप्सति, चिकल्पिषते, पा १, ३, ८२; ७, २, ५९। यङ् चलीक्लृप्यते। चलीकल्पि। णिच् कल्पयति। क्लृप, चु, प। १ मिश्रणम्। २ चित्रीकरणम्। ३ कल्पनम्। कल्पयति। कल्पति, वो। विन्यासः। रचना। निर्माणम्। निरूपणम्। आसनं कल्पयामास, भारत। किङ्करैः कल्पितम्, भ १२, १२। इदं शास्त्रमकल्पयत्, मनुः १, १०२। न्यायोधर्ममेव वामार्थे कल्पयामासतुः, रामा। तेषां कर्माण्यकल्पयत्, मनुः १, ८७। कल्पितः। कल्पयित्वा। कल्पना। क्लृप्तः। क्लृप्तिः। अनु—अनुकल्पः। अव—सम्भावना। अवकल्पयामि भवान् भुञ्जीत। नावकल्पामिदं ग्लायेत् यत् क्लृप्तेषु

भवानपि, इति भट्टिः। उप—विन्यासः। सम्यक्रता। आयोजनम्। आसनेष्वपक्लप्तेषु, मनुः ३, २०८। अक्षयायोपकल्पते, मनुः ३, २०२। यौवराज्याय रामस्य सर्वमेवोपकल्पताम्, रामा। परि—करणम्। परिकल्पितसान्निध्या, र ४, ६। रिक्थजातं दशधा परिकल्प्य, मनुः ९, १५२। निश्चयः। यं धर्मं परिकल्पयेत्, मनुः १२, ११०। ध्यानलयेन परिकल्प्य भवन्तमतीव दुरापम्, गीतगो ४, ८। प्र—करणम्। अनुष्ठानम्। आयोजनम्। निरूपणम्। प्रकृतैः, भ २, २९। समानांशान् प्रकल्पयेत्, मनुः ९, ११६। प्रकल्प्स्यति तस्यार्थः (सम्पत्स्यते), भ १६, ११। वि—विकल्पः। संशयः। आदिष्टो न विकल्पेत, हितोप। किं तत् कथं वेति विकल्पयन्तः, भ ११, १०। सम्—संकल्पः। मानसक्रिया। इच्छा। संकल्पितेऽर्थे विहतामशक्तिम्, कु ३, ११।

केत—चु, प। अदन्तः।

१ आवणम्। २ निमन्त्रणम्। मन्त्रणा, वो।

केप—केप्, भ्वा, आ। १ कम्पनम्। २ गतिः। केपते। चिकेपे। केपिता।

केल्—केल्, भ्वा, प। चलनम्।

केलति। च्केल्, च्केलति। चेल्, चेलति। वेल्, वेलति। केलः। केला।

केव्—केव्, भ्वा, आ। सेवा।

केवते, वो। क्लेव्, क्लेवते। खेव्, खेवते। गेव्, गेवते।

कै—भ्वा, प। शब्दः।

लट् कायति। लिट् चकौ। चकतुः। लुट् काता। कास्यति। लुङ् अकासीत्। अकासिष्टाम्।

क्रथ्—भ्वा, प, वो। वधः (क्रथ्)।

क्रस्—क्रसु, दि, प। १ ह्वरणम्। कौटिल्यम्। २ दौसिः। लट् क्रस्यति लिट् चक्रास। चक्रसतुः। लृट् क्रसिष्यति। णिच् क्रसयति। घटादिः। (उ) क्रसित्वा, क्रस्त्वा।

क्रंस्—(कुंस्) चु, प। दौसिः।

क्रु—क्रू—(क्रूञ्) क्रया, उ। शब्दः। क्रूय्—क्रूयी, भ्वा, आ। १ शब्दः। २ क्लेदः। दुर्गन्धः, वो। लट् क्रूयते। लिट् चुक्रूये। लुट् क्रूयिता। लुङ् अक्रूयिष्ट। णिच् क्रापयति, पा ७, ३, ३६। अचुक्रूपत्। चेलक्रोपं हृष्टो देवः, ३, ४, ३२। (ई) क्रूतः।

कार्—भ्वा, प। कौटिल्यम्।

कारति। चकार। कारिता। अकारीत्।

क्रथ्—भ्वा, प। हिंसा।

लट् क्रथति। लिट् चक्राथ। लुट् क्रथिता। लुङ् अक्राथीत्, अक्राथीत्। क्लथ्, क्लथति। क्रथ् क्रथति। णिच् क्राथयति। जासिनिप्रहणेति सूत्रे क्राथेति मिश्वेऽपि वृद्धिर्निपात्यते। मिश्वन्तु निपातनात् परत्वात् चिस्मुलोरिति दीर्घे चरितार्थम्। अक्रथि, अक्राथि। क्रथं क्रथम्। क्राथं क्राथम्, कौ ८३। क्लथयति। क्लथयति। क्रथ्, चू, उ, प, वो। पुनः पुनर्हृष्टीकरणम्। क्राथयति।

क्रन्द्—क्रद्—क्रदि, (क्रदि) भ्वा, आ। वैक्लव्यम्। विवशता। वैकल्यम्। क्रन्दते। क्रदते। क्रन्दन्ते कान्दिशीकाश्च यस्य शत्रवः, कवि ७२। क्रदयति घटादिः।

क्रन्द्—क्रदि, (क्रदि) भ्वा, प।

१ आह्वानम्। २ रोदनम्। लट् क्रन्दति। मा पितः क्रन्द मा तात,

भारत। क्रन्दत्यश्रुजलैर्वाग्भिः क्रन्दयन्ति रिपुस्त्रियः, कवि ७२। लिट् चक्रन्द। चक्रन्द क्रोधविह्वला, भ ५, ५। रामेति चक्रन्दुः, भ २४, ४८; ३, २८। लुट् क्रन्दिता। लुङ् अक्रन्दीत, भ १५, ८५। अक्रन्दिष्टाम्। सन् चिक्रन्दिषति। यङ् चाक्रन्द्यते। चाक्रन्ति। णिच् क्रन्दयति। क्रन्दितः। क्रन्दनम्। आ—आह्वानम्। आर्त्तनादः। रोदनम्। घोरसंग्रामः। आक्रन्दिषुः, भ १५, ५०। आक्रदि, चु, प। निरन्तरशब्दः। आक्रन्दयति यन्त्रम्। आक्रन्दः। संक्रन्दनः।

क्रप्—भ्वा, आ। कृपा। दया।

क्रपते। क्रपते कृपणेष्वेव, कवि ३३५। चक्रपे। क्रपिता। णिच् क्रपयति। अचिक्रपत्। अक्रपि, अक्रापि। कृपा, कौ ४५२।

क्रम्—क्रमु, भ्वा, प। पादविक्षेपः।

गमनम्। उत्पतनम्। आक्रमणम्। क्राम्यति। क्रामति, पा ३, १, ७०; ७, ३, ७६। क्रम्यति वो। कृष्णोरगो पदा क्रामसि पुच्छदेशे, भारत। लिट् चक्राम। चक्रमतुः। लुट् क्रमिता। ल्रट् क्रमिष्यति। लुङ् अक्रमीत्। अक्रमिष्टाम्। अक्रमिषुः। अशोकवनिकां लवितुमक्रमीत्, भ ९, २३। अप्रतिबन्धोत्साहस्फीततासु आत्मनेपदम्, पा १, ३, ३८। क्रमते। क्रम्यते। चक्रमे। क्रन्ता, पा ७, २, ३६। क्रंस्यते। अक्रंस्त। अक्रंसाताम्। अक्रंसत। शास्त्रे क्रमते बुद्धिः (न प्रतिहन्यते)। व्याकरणाध्ययनाय क्रमते (उत्सहते)। अस्मिन् क्रमन्ते शास्त्राणि (स्फीतानि भवन्ति), पा १, ३, ३८। सन् चिक्रमिषति। चिक्रंसते। यङ् चङ्क्रम्यते। चङ्क्रन्ति। णिच् क्रमयति। अचिक्रमत्। संक्रामयतीति केचित्। जरामन्यस्मिन् संक्रामय, भारत। क्रमित्वा, क्रान्त्वा, क्रन्त्वा। क्रान्त्वा क्रान्त्वा स्थितं क्वचित्, भ ५, ५१। क्रान्तः। ते क्रान्तास्तेतसि विस्मयेन, र १४, १७। क्रमं बबन्ध क्रमितुम्, भ २, ९। क्रमणम्। कर्त्तव्येव क्रति कमो नेट्। कर्मणि तु प्रक्रमितव्यम्, कौ ३१६। अति—अतिक्रमः। उल्लङ्घनम्। व्यति—व्यतिक्रमः। अनु—अनुक्रमः। अनुसरणम्। अप—अपसरणम्। आ—आक्रमणम्। आक्रमते सूर्य्यः, पा १, ३, ४०। उद्—उद्गमनम्। अतिक्रमः। व्यतिक्रमः। व्युद्—व्युत्क्रमः। व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे, र १३, ७२; भ २२, ३। उप, प्र—आरम्भः। अम्भोनिधेस्तटमुपाक्रंस्त (गन्तुमारब्धवान्), भ ८, २५। असौ प्रक्रमते योद्धुमेकोऽपि बहुभिः सह। नाक्रम्यन्ति तथाप्येनं विक्रान्ता बहवोऽपि ते॥ कवि १८०। निर्—निष्क्रमः। निर्गमनम्। निरचिक्रमदिच्छातो वानरान्, भ ७, ७०। परा—पराक्रमः। खे पराक्रान्तं नूनं सूनुर्नभस्वतः, भ ८, २२। परि—परिक्रमः। वृत्ताद् वृत्तं परिक्रामन्, भ ८, ७०। वि—विक्रमः। जले विक्रममाणाः, भ ८, २४। साधु विक्रमते वाजी। विक्रामति सन्धिः (द्विधा भवति), पा १, ३, ४१। मृगान् विध्यन् विचक्रमे, भ ४, ६। सम्—संक्रमणम्। प्रवेशः। प्राप्तिः। णिच् रसातलं संक्रमिते तुरङ्गे, र १३, ३। भ्रमरसंक्रमितैश्चणहत्तयः, र ९, ५४। अयं पाप इदमकार्य्यं मयि संक्रामयेत्।

क्री—डुक्रीञ्, क्रया, उ। क्रयः।

द्रव्यविनिमयः। ल्रट् क्रीणाति, पा ३, १, ८१। क्रीणीतः, पा ६, ४, ११३

क्रीणन्ति। क्रीणीते। दत्त्वा शस्त्रप्रहारञ्च तेषां क्रीणाति यः स्त्रियम्, कवि १३७। लिङ् क्रीणीयात्। लङ् अक्रीणात्। अक्रीणीताम्। अक्रीणन्। अक्रीणीत। अक्रीणत। लिट् चिक्राय। चिक्रयिथ, चिक्रेथ। चिक्रियिव। चिक्रियिम। चिक्रिये। लुट् क्रेता। क्रेष्यति। ०ते। आशिषि, क्रीयात्। क्रेषीष्ट। लुङ् अक्रैषीत्। अक्रैष्टाम्। अक्रैषुः। अक्रेष्ट। अक्रेषाताम्। अक्रेषत। सन् चिक्रीषति। ०ते। यङ् चेक्रीयते। चेक्रयीति। चेक्रेति। णिच् क्रापयति, पा ६, १, ४८। अचिक्रपत्। क्रीत्वा। ०क्रीय। क्रीतः। क्रयः। परि—क्रयविशेषः। वेतनस्वीकारः। परिक्रीणीते, पा १, ३, १८। शतेन परिक्रीतः, पा १, ४, ४४। सम्भोगाय परिक्रीतः, भ ८, ७८। वि—विक्रयः। विक्रीणीते। अवक्रीणीते।

क्रीड्—क्रीड़, भ्वा, प। विहारः। क्रीड़ा। लट् क्रीड़ति। क्रीड़न्ति स्थविरा अपि, कवि २२३। लिट् चिक्रीड़। चिक्रीड़तुः। लुट् क्रीड़िता। लृट् क्रीड़िष्यति। लुङ् अक्रीड़ीत्। अक्रीड़िष्टाम्। अक्रीड़िषुः। सन् चिक्रीड़िषति। यङ् चेक्रीड्यते। चेक्रीट्टि। णिच् क्रीड़यति। अचिक्रीड़त्। अनु—अनुक्रीड़ते, पा १ ३, २१। आ—आक्रीड़ते। परि—परिक्रीड़ते। परिक्रीड़स्व, भ ८, १०। सम्—संक्रीड़ते। साधु संक्रीड़मानानि, भ ८, १०। कूजने तु, संक्रीड़ति चक्रम्। क्रीड़ा।

क्रुच्—(कुच्) भ्वा, पा। कौटिल्यम्।

क्रुड्—तु, प। निमज्जनम्।

क्रुडति। चुक्रोड़। क्रुडिता। अक्रुडीत्।

क्रुध—दि, प। क्रोधः। रोषः। लट् देवदत्ताय क्रुध्यन्ति, पा १, ४, ३७। सीतायै नाक्रुध्यत्, भ ८, ७५। लिट् चुक्रोध। चुक्रुधतुः। चुक्रोध मारुतिः, भ १४, ८५। लुट् क्रोद्धा। लृट् क्रोत्स्यति। लुङ् अक्रुधत्। दशाननोऽक्रुधत्, भ १५, १८। सन् चुक्रुत्सति। यङ् चोक्रुध्यते। चोक्रोद्धि। णिच् क्रोधयति। अचुक्रुधत्। क्रुद्धः। अभि, अनु, प्रति, परि, सम्—देवदत्तमभिक्रुध्यति, पा, १, ४, ३८। क्रुध्यन्तं न प्रतिक्रुध्येत्, मनुः ६, ४८। संक्रुध्यसि मृषा माम्, भ ८, ७६। शपमानं तं यदुनृपा न प्रचुक्रुधुः, मा।

क्रुन्थ्—क्रा, प, वो। १ श्लेषणम्। २ क्लेशः। क्रुन्थाति। चुक्रुन्थ। क्रुन्थिता।

क्रुश्—भ्वा, प। १ आह्वानम्। २ रोदनम्। लट् क्रोशति। एष क्रोशति दात्यूहः, रामा। क्रोशन्त्यस्तं क्षपि-स्त्रियः, भ ६, १२४। लिट् चुक्रोश। चुक्रुशतुः। चकम्पेऽतीव चुक्रोश, भ १४, ३१। लुट् क्रोष्टा। लृट् क्रोक्ष्यति। लुङ् अक्रुक्षत्। अक्रुक्षताम्। सन् चुक्रुक्षति। यङ् चोक्रुश्यते। चोक्रुशीति, चोक्रोष्टि। णिच् क्रोशयति। अचुक्रुशत्। अनु—दया। किमनुक्रुश्य वैकल्यमुत्पादयसि। आ—रोदनम्। भर्त्सनम्। तं भीतङ्कारमाक्रुश्य, भ ५, ३९। उद्, वि—चित्कारः। रोदनम्। विचुक्रुशुः केचन सास्रमुच्चैः, भ ३, १०। हा हेति च विचुक्रुशे, भ १४, ४२। विक्रोक्ष्यन्ति, भ १६, ३२। व्यक्रुक्षत, भ १५, ४७।

क्रू—क्रूञ्—क्रा, उ। शब्दः। क्रूणाति। क्रूणीते। क्रविता। क्रूञ् वो क्रु इति जैमिनिः। क्रु इति रमानाथः।

क्लथ्—(क्रथ्) भ्वा, प। हिंसा।

क्लन्द्—क्लद्—क्लदि (कदि) भ्वा, प

१ आह्वानम्। २ रोदनम्। क्लद्, क्लदि (कदि) भ्वा, आ। १ वैक्लव्यम्। २ वैकल्यम्। लट् क्लन्दति। ०ते। क्लदते। क्लादयति।

क्लप्—(क्लृप्) चु, प। कथनम्।

क्लम्—क्लमु, दि, प। ग्लानिः।

श्रमः। असामर्थ्यम्। मूर्च्छा। लट् क्लाम्यति। क्लामति, पा ७, ३, ७४, ७५। कायः क्लाम्यति यस्य प्रहरतो रिपून्। क्लामन्ति रिपुसेनाश्च प्लवमाना दिशो दश॥ कवि २३६। लङ्घादाहेन क्लाम्यतु, भ १२, ३८। अक्लाम्यद्व्रणः भ १९, १०२। लिट् चक्लाम। न चक्लाम न विव्यथे, भ ४, १०२; १४, १०१। लुट् क्लमिता। लृट् क्लमिष्यति। लुङ् अक्लमत्। (उ) क्लमित्वा, क्लान्त्वा। क्लान्तः। क्लान्तिः। क्लमः।

क्लव्—भ्वा, आ, वो। भयम्। क्लवते।

क्लिद्—क्लिदू, दि, प। आर्द्रीभावः।

लट् क्लिद्यति, अजस्रमस्रुभिस्तासां क्लिद्यन्ति नयनानि च, कवि १३१। लुठ्यन्ति भूमौ क्लिद्यन्ति, भ १८, ११। लिट् चिक्लेद। चिक्लिदतुः। चिक्लेदिथ, चिक्लेत्थ। चिक्लिदिव, चिक्लिद। लुट् क्लेत्ता, क्लेदिता। लृट् क्लेत्स्यति, क्लेदिष्यति। लुङ् अक्लिदत्। अक्लिदताम्। सन् चिक्लेदिषति, चिक्लिदिषति, चिक्लित्सति। यङ् चेक्लिद्यते। चेक्लेत्ति। णिच् क्लेदयति। अचिक्लिदत्। रक्तैरचिक्लिदद् भूमिम्, भ १५, ४८। क्लेदित्वा, क्लिदित्वा, क्लित्त्वा। क्लिन्नम्, उदकपरिक्लिन्नम्।

क्लिन्द्—क्लिदि, भ्वा, प। उ, वो।

परिदेवनम्। विलापः। शोकः। क्लिन्दति। मृते भर्त्तरि दुःखार्त्ताः क्लिन्दन्ति यदरिस्त्रियः, कवि १३१। आत्मनेपदे शोकार्थः सकर्मकः। क्लिन्दते चैत्रम्। क्लिन्दिता। उभयपदिष्वयं न पठ्यते इति प्रदीपः।

क्लिश्—दि, आ। उ, वो।

क्लेशः। उपतापः। क्लिश्यति। ०ते। क्लिशितः, क्लिष्टः, पा ७, २, ५०।

क्लिशू—क्लिशू, क्र्या, प। पीड़नम्।

विबाधनम्। क्लेशः। लट् क्लिश्नाति। क्लिश्नीतः। क्लिश्नन्ति। नेन्द्रियाणि विरुद्धेषु क्लिश्नाति विषमेषु सः, कवि ९२। स क्लिश्नाति भुवनत्रयम्, कु २, ४०। शक्नुयच्चेन्द्रो न क्लिश्नीतः (क्लेशं नानुभवतः), भ १८, ३१। लिङ् क्लिश्नीयात्। हि क्लिशान। लङ् अक्लिश्नात्। लिट् चिक्लेश। चिक्लिशतुः। चिक्लेशिथ, चिक्लेष्ठ। नृपात्मजौ चिक्लिशतुः, भ ३, ३१। लुट् क्लेशिता, क्लेष्टा। लृट् क्लेशिष्यति, क्लेष्यति। लुङ् अक्लेशीत्, पा ७, २, ४। अक्लिशत् पा ३, १, ४५। अक्लेशिष्टाम्, अक्लिशताम्। अक्लेशिषुः, अक्लिशन्। सन् चिक्लिशिषति, चिक्लेशिषति, चिक्लिशति। यङ् चेक्लिश्यते। चेक्लेष्टि। णिच् क्लेशयति। अचिक्लिशत्। भक्तं मां मातिचिक्लिशः, भ ६, १७। क्लिशित्वा, क्लिष्ट्वा। क्लिशितः, क्लिष्टः। क्लिशितवान्, क्लिष्टवान्, पा ७, २, ५०।

क्लीब्—क्लीव्—क्लीड्—क्लीड्, भ्वा, आ।

अधार्ष्ट्यम्। अप्रगल्भता। लट् क्लीबते। क्लीवते। लिट् चिक्लीवे। लुट् क्लीविता। क्लीवम्।

क्लुङ्—भ्वा, आ। गतिरिति मैत्रः।

क्लेश्—भ्वा, आ। १ अस्फुटकथने।

२ बाधनम्। पीड़नम्। ३ वधः, वो। क्षथनं, प्रदीपः। क्लेशते। क्लेशते न मृषा-वाक्यम्, कवि ८३। चिक्लेशे। क्लेशिता। अक्लेशिष्ट।

क्षण्—(अण्) भ्वा, प। शब्दः।

क्षणति। चक्षाण। क्षणिता। अक्षणीत्, अक्षाणीत्। अक्षाणिषुश्रुतोत्साहाः, भ ८, ११। निक्षाणो निक्षणः क्षाणः क्षणः क्षणनमित्यपि। वीणायाः क्षणिते प्रादेः प्रक्षाणप्रक्षणादय इत्यमरः।

क्षथ्—क्षथे,—भ्वा, प। निष्पाकः।

क्षथ्—(क्षथ्) भ्वा, प। हिंसा। लट् क्षथति। लिट् चक्षाथ। लुट् क्षथिता। लृट् क्षथिष्यति। लुङ् (ए) अक्षथीत्। णिच् क्षाथयति। (हिंसायाम्) कथयति। क्षाथः। क्षथः।

क्षेल्—(क्षेल्) भ्वा, प। गतिः।

क्षञ्ज्—क्षज्—जङ्ज्—क्षजि—

"क्षज्, जक्षि" भ्वा, आ। १ गतिः। २ दानम्। क्षञ्जते। लिट् चक्षञ्जे। लुट् क्षञ्जिता। लुङ् अक्षञ्जिष्ट। सन् चिक्षञ्जिषते। यङ् चाक्षञ्ज्यते। णिच् क्षञ्जयति। अचक्षञ्जत्। कर्मणि, अक्षञ्जि, अक्षाञ्जि, पा ६, ४, ८३। णमुल् क्षञ्जं क्षञ्जम्, क्षाञ्जं क्षाञ्जम्। क्षजते। क्षजयति। घटादिः। क्षजि, चु, प। कृच्छ्रजीवनम्। आतङ्कः, वो। क्षञ्जयति। क्षजते। जङ्क्षते।

क्षण्—क्षणु, तना, उ। हिंसा।

लट् क्षणोति। क्षणुते। लिट् चक्षाण। क्षणुणे। लुट् क्षणिता। लृट् क्षणिष्यति। ते। लुङ् अक्षणीत्, पा ७, २, ७। अक्षणिष्टाम्। अक्षणिषुः। अक्षणिष्ट, अक्षत। अक्षणिष्टाः, अक्षथाः। सन् चिक्षणिषति। ते। यङ् चङ्क्षण्यते। चङ्क्षणिष्ट। उपदेशेऽस्य नकार इति धातुपारायणे व्याख्यातं, तेन यङ्लुकि चङ्क्षन्ति। णिच् क्षाणयति। (उ) क्षणित्वा, क्षत्वा। क्षतः, पा ६, ४, २७। क्षतिः। शोकान्धकारक्षतसर्वचेष्टा, भ २, १९। परिक्षतः। विक्षतः।

क्षप—क्षु, प। अदन्तः।

प्रेरणम्। क्षेपणम्। क्षपयति। पक्षिणौ क्षपयेन्निशाम्, स्मृतिः।

क्षम्—क्षमूष्, भ्वा, आ।

क्षमू, दि, प। सहनम्। मर्षणम्। क्षमा। शक्तिः। लट् क्षमते। क्षाम्यति, पा ७, २, ७४। क्षमते यो दरिद्राणां दुष्टान् न क्षमति प्रभुः। न क्षाम्यति क्षितीशानामपराधकणामपि॥ कवि १६७। लिट् चक्षाम। चक्षमतुः। चक्षमिथ, चक्षन्थ। चक्षणिव, चक्षख, पा ८, २, ६५। चक्षमिम, चक्षण्म। चक्षमे। चक्षमिषे, चक्षंसे। चक्षमिढ्वे, चक्षन्ध्वे। लुट् क्षमिता, क्षन्ता। लृट् क्षमिष्यति। ते। क्षंस्यति। ते। लुङ् अक्षमत्। अक्षमिष्ट, अक्षंस्त। अक्षमिषाताम्, अक्षंसाताम्। अक्षमिषत, अक्षंसत। आशिषि, क्षम्यात्। क्षमिषीष्ट, क्षंसीष्ट। ऋते रवेः क्षालयितुं क्षमेत कः, क्षपातमस्काण्डमलीमसं नभः, मा १, ३८। चक्षमिरे स्त्रीरत्नलाभं न तस्य, र ७, ३४। अक्षंस्त न तत्, भ १५, १५। कामं क्षाम्यतु य क्षमो, मा २, ४३। सन् चिक्षमिषति ते। चिक्षंसति। ते। यङ् चङ्क्ष्यते चङ्क्षन्ति। णिच् क्षमयति। अचिक्षमत्। क्षमित्वा, क्षान्त्वा। क्षान्तः। क्षमितुम्, क्षन्तुम्, तद्वान् क्षन्तुमर्हति क्षान्तिः। क्षमा। अक्षितः क्षाम्यते

क्षान्तिः क्षमूषः क्षमतेः क्षमा, कौ १४२। क्षान्तः। क्षान्तवान्।

क्षम्—क्षपि, चु, प। १ क्षान्तिः। २ कान्तिः। क्षम्पयति। क्षम्पति।

क्षर्—भ्वा, प। १ सञ्चलनम्। २ क्षरणम्। ३ मोचनम्। लट् क्षरति। लिट् चक्षार। चक्षरतुः। लुट् क्षरिता। लृट् क्षरिष्यति। लुङ् अक्षारीत्। अक्षारिष्टाम्। अक्षारिषुः। अक्षारिषुः शराभ्भांसि तस्मिन् रक्तःपयोधराः, भ ८, ८। मदधाराः क्षरन्तु गजेषु, र १३, ७४। सन् चिक्षरिषति। यङ् चाक्षर्य्यते। चाक्षर्त्ति। णिच् क्षारयति। आ—आक्षारितः क्षारितोऽभिशस्ते इत्यमरः। प्र—प्रच्युतिः। खादुल्काः प्रचक्षरुः, भ १४, ८७।

क्षल्—भ्वा, प, वो। १ सञ्चलनम्। २ सञ्चयः। क्षलति। क्षल् चु, प। शौचक्रिया। शोधनम्। क्षालनम्। क्षालयति। क्षालयामि तव पादपङ्कजे, महाना ३, ४५। अचिक्षलत्। क्षालयितुं क्षमेत कः, मा १, ३८। प्र—प्रक्षालनम्। प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्। हस्तौ पादौ मुखं प्रक्षाल्य, मनुः ३, २६४। वि—विक्षालितः, र ५, ४४।

क्षि—क्षा, प। क्षयः।

ऐश्वर्य्यम्, वो। अयमकर्मकः। अन्तर्भावितण्यर्थस्तु सकर्मकः, कौ ५०। क्षयति, क्षयति प्रत्यूहं पापम्, कवि ११२। चिक्षाय। चिक्षियतुः। चिक्षयिथ, चिक्षेथ। चिक्षियिव। चिक्षियिम। क्षेता। क्षीयात्। अक्षैषीत्। क्षीणः, क्षितः।

क्षि—तु, प। १ निवासः। २ गतिः। क्षियति। यशः क्षियति रोदस्योर्यस्य, कवि ११२। चिक्षाय। आसीन्महीक्षितामाद्यः, र १, ११ (महीं क्षियन्ति दूषयन्ति इति महीक्षितः। क्षिधातोरैश्वर्य्यार्थात् क्विप्, मल्लिनाथः)। वोपदेवस्तु भ्वादिगणीयस्यैव ऐश्वर्य्यार्थमाह।

क्षि—स्वा, प। क्षिष् (क्षीष्) क्षया, प।

हिंसा। वधः। लट् क्षिणोति। क्षिणुतः। न तद् यशः शस्त्रभृतां क्षिणोति, र २, ४०। अक्षिणोद् धुर्य्यान्, भ १९, ९९, ९०। धनुरक्षिणोः, र ११, ७१। क्षिष्, क्षिणाति। क्षिणाति दुरितं दृष्ट्वा क्षिणोत्यर्थैश्च दुःस्थितान्, कवि ११०। क्षिणीतः। क्षिणन्ति। क्षिणीयात्। अक्षिणात्। लिट् चिक्षाय। चिक्षियतुः। चिक्षयिथ, चिक्षेथ। चिक्षियिव। लुट् क्षेता। लृट् क्षेष्यति। आशिषि, क्षीयात्। लुङ् अक्षैषीत्। अक्षैष्टाम्। अक्षैषुः। कर्म्मणि, क्षीयते। सन् चिक्षीषति। यङ् चेक्षीयते। चेक्षयीति। चेक्षेति। णिच् क्षाययति। क्षित्वा। ०क्षीय, पा ६, ४, ५८। क्षीणः। प्रक्षीणः। उपक्षीणः, पा ६, ४, ६०। (आक्रोशे) क्षीणायुः क्षितायुर्जाल्मः। (दैन्ये) क्षितः क्षीणोऽयं तपस्वी, पा ६, ४, ६१। क्षितः कामो मया, कौ ३४६। क्षयः। क्षितिः। (ष्) क्षिया। यैर्न क्षयिततमसा (क्षयशब्दाच्चिच्), शकु ४, ४५।

क्षिण्—क्षिणु (क्षणु) तना, उ।

हिंसा। (लट् क्षेणोति, क्षेणुते)। क्षिणोति। क्षिणुते। शत्रूणां नित्यमज्ञा क्षिणुते यः सदुक्तिभिः, कवि ११० लिङ् क्षेणुयात्। लङ् अक्षेणोत्। लि

क्षेणं। लुट् क्षेणिता। लुङ् अक्षेणीत्। अक्षित, अक्षेणिष्ट। क्षिणु, क्षिणोति। यङ्लुकि, चेक्षेन्ति।

क्षिप्—दि, प ; तु, उ। प्रेरणम्।

क्षेपणम्। त्यागः। लट् क्षिप्यति। क्षिपति। ०ते। क्षिपति प्रतिपक्षाणां हृदये योभयं ध्रुवम्। क्षिप्यति श्रोत्रियाणाञ्च निष्कं पुष्कलमालये॥ कवि १८३। अस्त्रं वारुणमक्षिप्यदक्षिपद्रौद्रमिन्द्रजित्, भ १७, ४३। लिट् चिक्षेप। चिक्षिपतुः। चिक्षेपिथ। चिक्षिपे। लुट् क्षेप्ता। लृट् क्षेप्स्यति। ०ते। लुङ् अक्षैप्सीत्। अक्षैप्ताम्। अक्षैप्सुः। अक्षिप्त। अक्षिप्साताम्। अक्षिप्सत। तेनाक्षिप्सतेषवः, भ १५, ६५। सन् चिक्षिप्सति। ०ते। यङ् चेक्षिप्यते। चेक्षेप्ति। णिच् क्षेपयति। अचिक्षिपत्। क्षिप्त्वा। क्षिप्तः। क्षिप्नुः। क्षेपणम्। क्षिपकः। क्षेपं कालम्, महाना ४, ८१। तं क्षिपन् योजनं मृतम्, भ ६, ११५। अति, अभि, प्रति—अभिभवः, पा १, ३, ८०। अभिक्षिपन् रावणः पर्वतश्रियम्. भ ८, ४१। अधि—अधिक्षेपः। निन्दा। भर्त्सनम्। विद्वेषेणाधिक्षिप्तोऽस्मि, शकु ५, ८६। एतैरधिक्षिप्तः, मनुः ४, १८५। अव—कुत्सा। अधोविक्षेपः। आ—आक्षेपः। आकर्षणम्। निन्दा। पराभवः। प्रसाधिकालम्बितमग्रपादमाक्षिप्य, र ७, ७। समा—अपसारणम्। छायाः समाचिक्षिपिरे, भा १६, ४७। उद्—उत्क्षेपः। दूरीकरणम्। उन्नमनम्। शैलानुदक्षेप्सुः, भ १५, ३४। उदक्षिपन् केतून्, भ ३, ३४। नि—निक्षेपः। न्यासः। अर्पणम्। तेन धृः सचिवेषु निचिक्षिपे र १, ३४। तं बन्धुता न्यक्षिपदाशु तेले, भ ३, २३। परि—वेष्टनम्। आवासः। प्राकारेण परिक्षिप्तः, भारत। परिक्षिप्ताः शाखिनोऽलिगायकैः, भ ६, ८४। परिक्षेपौ। प्र—प्रक्षेपः। वि—विक्षेपः। सम्—सङ्क्षेपः। संहारः। सङ्क्षिप्य संरम्भम्, भ २, ५२।

क्षिव्—क्षीव्—क्षिवु, भ्वा, दि ; वो, प।

निरसनम्। क्षेवति। क्षीव्यति।

क्षी—भ्वा, उ, वो। वधः। क्षीङ्, दि, आ।

क्षयः। क्षयति। ०ते। क्षीयते। शरीरकर्षणात् प्राणाः क्षीयन्ते, मनुः ७, ११२। आयुः परं क्षीयते, शान्तिश ५। दिवादिस्तु भ्वाद्यादिवदाकृतिगणः, तेन क्षीयते इत्यादिसिद्धिः, कौ १४४। क्षीष्, क्रया, प। हिंसा। क्षीणाति (क्षिणाति)।

क्षीज्—भ्वा, प। अव्यक्तशब्दः।

हिक्कनम्, वो। क्षीजति। क्षीजिता।

क्षीब्—क्षीव्—क्षीब्ब, क्षीब्ब, भ्वा, आ।

मदः। गर्वः। मत्तीभावः। क्षीबते। क्षीवते। क्त क्षीवः, पा ८, २, ५५। भ ६, ११३।

क्षीव्—क्षेव्—क्षीवु, क्षेवु, भ्वा, प।

निरसनम्। निष्ठीवनम्। क्षीव्, भ्वा, आ, वो। दग्धः। क्षीवति। क्षेवति। क्षीवते। शोकेन क्षीवते सर्वः क्षीवते हर्षगर्वितः, कवि ८५।

क्षु—टुक्षु, अदा, प। शब्दः। क्षुतम्।

लट् क्षौति। क्षुतः। क्षुवन्ति। लिट् चुक्षाव। चुक्षुवतुः। लुट् क्षविता। लृट् क्षविष्यति। लुङ् अक्षावीत्। अक्षाविष्टाम्। चुक्षावाशुभम्, भ १४, ५७। (टु) क्षवथुः। क्षुतम्। क्षविता। चुक्षावयिषति। क्षिप् क्षुत्।

क्षुद्—क्षुदिर्, उ। सम्पेषणम्।

चूर्णनम्। मर्दनम्। लट् क्षुणत्ति। क्षुन्तः। क्षुन्दन्ति। क्षुन्ते। क्षुन्दाते। क्षुन्दते। क्षुणद्धि सर्पान् पाताले, भ ६, ३९। लिङ् क्षुन्द्यात्। क्षुन्दीत। लङ् अक्षुणत्। अक्षुन्ताम्। अक्षुन्दन्। अक्षुन्त। लिट् चुक्षोद। चुक्षुदे। लुट् क्षोत्ता। लृट् क्षोत्स्यति। ०ते। लुङ् (इर्) अक्षुदत्, अक्षौत्सीत्। अक्षुदताम्. अक्षौत्ताम्। अक्षुदन्, अक्षौत्सुः। अक्षुत्त। अक्षुत्साताम्। अक्षुत्सत। ते तमक्षौत्सुः पादैः, भ १५, ४२। सन् चुक्षुत्सति। ०ते। यङ् चोक्षुद्यते। चोक्षोत्ति। णिच् क्षोदयति। अचुक्षुदत्। क्षोदयन्ति मः क्षुद्राः, भ १९, २६। क्त क्षुण्णः। क्षोदः। प्र—चूर्णनम्। तस्य प्रचुक्षोद गदयाङ्गम्, भ १४, ३२, ८७।

क्षुध्—दि, प। बुभुक्षा। क्षुधा।

लट् क्षुध्यति। लिट् चुक्षोध। चुक्षुधतुः। लुट् क्षोद्धा। लृट् क्षोत्स्यति। लुङ् अक्षुधत्। अक्षुधताम्। सन् चुक्षुत्सति। यङ् चोक्षुध्यते। चोक्षोद्धि। णिच् क्षोधयति। अचुक्षुधत्। क्षुध्यन्तोऽप्यघसन् व्याला न त्वाम्, भ ५, ६६। क्षुधित्वा, क्षोधित्वा, पा १, २, २६। क्षुधितः, पा ६, २, ५२। क्षुधा। क्षुध्।

क्षुभ्—भ्वा, आ। दि, क्या, प।

क्षोभः। सञ्चलनम्। विकारः। उद्वेगः। व्यथा। लट् क्षोभते। क्षुभ्यति। फणिपतिः क्षुभ्यति, महाना १, ३०। क्षुभ्नाति, पा ८, ४, ३९। क्षुभ्नीतः। क्षुभ्नन्ति। नाक्षुभ्नाद्राक्षसः, भ १७, ९०। यः क्षुभ्यति रिपुष्वेव क्षोभते नानुजीविषु। मनागपि मनो यस्य न क्षुभ्नाति महाहवे॥ कवि ५६। लिट् चुक्षोभ। चुक्षुभे। रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः, र ४, २१। नार्यश्चक्षुभिरे, भ १४, ६। लुट् क्षोभिता। लृट् क्षोभिष्यति। ०ते। अक्षोभिष्यत्। ०त। अक्षोभिष्यत चेदियम्, भ २२, ६। लुङ् अक्षौभीत्। अक्षौभिष्टाम्। अक्षोभिषुः। दि, अक्षुभत्। भ्वा, अक्षुभत्, अक्षोभिष्ट। असौ नापि चाक्षुभत्, भ १५, ३८। सन् चुक्षुभिषति। ०ते। यङ् चोक्षुभ्यते। चोक्षोब्धि। णिच् क्षोभयति। अचुक्षुभत्। क्षुभितः, क्षुब्धः, पा ९, २, १८। क्षुभितं गणम्, भा १३, १०। क्षोभः। महाह्रद इव क्षुभ्यन्, भ ९, ११८। प्र—सञ्चलनम्। प्राक्षुभन् कुलपर्वताः, भ १५, १५। वि—णिच् विलोडनम्। विक्षोभयन् नागः सरः। सेना विक्षोभिता तैः, भारत। सम्—दुःस्थता। समस्तं सङ्क्षुब्धं त्रैलोक्यम्, चण्डी।

क्षुर्—तु, प। विलेखनम्।

क्षुरति। चुक्षोर। क्षोरिता। अक्षौरीत्।

क्षेव्—(क्षीव्)।

क्षै—भ्वा, प। क्षयः। क्षायति।

क्षायति द्विषतां कुलम्, कवि ११२। चक्षौ। क्षाता। क्षास्यति। अक्षासीत्। क्त क्षामः, पा ८, २, ५३।

क्ष्णु—अदा, प। तीक्ष्णीकरणम्।

लट् क्ष्णौति। क्ष्णुतः। क्ष्णुवन्ति। लिट् चुक्ष्णाव। चुक्ष्णुवतुः। लुट् क्ष्णविता। लुङ् अक्ष्णावीत्। क्त क्ष्णुतम्। प्रचुक्ष्णुवुर्महास्त्राणि, भ १४, ९१। सम्—आ, पा १, ३, ६५। समक्ष्णुवत शस्त्राणि, भ १७, ५५। मंक्षा वान इवोत्कराताम्. भ ८, ४०।

क्ष्माय्—क्ष्मायी, भ्वा, आ। विधूननम्।

कम्पनम्। लट् क्ष्मायते। अक्ष्मायत महो, भ १४, २१; १८, ९३। लिट् चक्ष्माये। चक्ष्माये महो, भ १४, २१। लुट् क्ष्मायिता। लुङ् अक्ष्मायिष्ट। सन् चिक्ष्मायिषते। यङ् चाक्ष्माय्यते। चाक्ष्माति। णिच् क्ष्मापयति। अचिक्ष्मपत्, पा ७, ३, ३८, ८८। क्ष्मामक्ष्मापयतां गतैः, भ १४, ८५। (इ) क्ष्मातः।

क्ष्मील्—(मील्) भ्वा, प। निमेषणम्।

पक्ष्मभिश्चक्षुरावरणम्। क्ष्मीलति।

क्ष्विड्—जिक्ष्विड़ा (जिष्विदा) भ्वा, प।

अव्यक्तशब्दः। कूजनम्। भ्वा, आ, वी। १ स्नेहनम्। २ सेचनम्। क्ष्वेडति। °ते। न क्ष्वेडेत् (अव्यक्तदन्तशब्दात्मकं क्ष्वेडनं न कुर्य्यात्), मनुः ४, ६४। (जिआ) क्ष्विडितं क्ष्विट्टं तेन।

क्ष्विद्—जिक्ष्विदा (जिष्विदा) भ्वा, प।

अव्यक्तशब्दः। कूजनम्। भ्वा, आ। १ स्नेहनम्। २ मोचनम्। २ गात्रनम्। दि, प। १ स्नेहनम्। २ मोचनम्। क्ष्वेदति। °ते। क्ष्विद्यति। चिक्ष्वेद। चिक्ष्विदे। क्ष्वेदिता। (जिआ) क्ष्विण्णः। क्ष्विण्णवान्, पा ७, २, १६। प्र—प्रक्ष्वेदितः, पा १, २, १८। प्रक्ष्वेदिताः परम् (अव्यक्तशब्दं कुर्वाणाः), भ ७, १०३।

क्ष्वेल्—(केल्) भ्वा, प। चलनम्।

(ख)

खक्ख्—भ्वा, प, वो। हास्यम्। खक्खति।

खच्—क्रया, प। भूतप्रादुर्भावः।

अतिक्रान्तोत्पत्तिः। उत्पन्नस्य पुनरुत्पत्तिः। सम्प्रत्युपपत्तिः, वो। पविचीभावः, वो। लट् खचत्याति। खच्यीतः। खचत्यन्ति। लिट् चखाच। चखचतुः। लुट् खचिता। लुङ् अखचीत्, अखाचीत्। खच्, चु, प। अदन्तः। बन्धनम्। खचयति। खचितः।

खज्—भ्वा, प। विलोड़नम्।

मन्थः। खजति। चखाज। खजाका।

खञ्ज्—खजि, भ्वा, प। पाङ्गुल्यम्।

गतिवैकल्यम्। खोटनम्। खञ्जति। चखञ्ज। खञ्जिता। खञ्जः। खञ्जन् प्रभञ्जनजनः, नै १४, १०७।

खट्—भ्वा, प। आकाङ्क्षा।

खटति। चखाट। खटिता। खाटः। खट्वा।

खट्ट्—चु, प। संवरणम्। गोपनम्।

आच्छादनम्। खट्टयति। अचखट्टत्।

खड्—खण्ड्—खडि़ (कडि़) चु, प।

भेदः। भञ्जनम्। खण्डनम्। खाडयति। खण्डयति। खण्डति। अचखण्डच्छक्तिम्, भ १५, ५४। खण्डं खण्डमखण्डयद् बाहुसहस्रम्, महाना २, ४। खण्डयित्वा। खण्डितः। खण्डनम्। परि—विनाशः। जयः। अखण्डमानं परिखण्डयन् शत्रुम्, भ १२, १७। खडि़, भ्वा, आ। मन्थः। विलोडनम्। भञ्जनम्, वो। खण्डते। चखण्डे। खण्डिता। मानं खण्डयति स्त्रीणां खण्डते द्विषतां शिरः, कवि २६३।

खद्—भ्वा, प। १ स्थैर्य्यम्। २ हिंसा। ३ भक्षणम्। खदति। चखाद। खदिता। अखदीत्, अखादीत्। खदिरः।

खन्—खनु, भ्वा, उ। खननम्। अवदारणम्। लट् खनति। °ते। खनितो

जाह्नवीतोरे कूपं खनति दुर्मतिः। लिट् चखान। चखने, पा ६, ४, ४८। लुट् खनिता। लृट् खनिष्यति। ०ते। आशिषि, खायात्। खन्यात्, पा ६, ४, ४३। लुङ् अखनीत्, अखानीत्। अखनिष्ट। कर्मणि, खायते। खन्यते। अखानि। सन्, चिखनिषति। ०ते। यङ् चाखायते। चङ्खन्यते, पा ६, ४, ४३। चङ्खन्ति। चङ्खात:। णिच् खानयति। अचीखनत्। (ङ) खनित्वा, खात्वा। खात: पा ६, ४, ४२। खेयम्। खनित्रम्। खननम्। खनि:। खनक:। उद्—उत्पाटनम्। उन्मूलनम्। उच्चखे, ट्टचम्, भ १४, ८५। उच्चखाते नलेनाक्षिणी तस्य, भ १४, ३२। गिरिमुदखनीत्, भ १५, ५५। वङ्गानुत्खाय तरसा, र ४, ३८। नि—रोपणम्। स्थापनम्। प्रवेश:। तं तौ भुवि निचखनतु:, भ ४, ३। विषादशङ्कुश्च मतौ निचखने, भ ३, ८। तत्र जयस्तम्भान् निचखान, र ४, ३६। भुजे निचखान सायकम्, र १, ५५। निचखान दूरं बाणान् ध्वजिन्या हृदयेषु, भा १७, ३१।

खम्ब्—(कम्ब्) भ्वा, प। १ हिंसा। २ गति:, वो। खम्बति। चखम्ब। खम्बिता।

खर्ज्—भ्वा, प। १ पूजनम्। २ व्यथा। ३ मार्जनम्। ४ कण्डूयनम्। खर्जति। चखर्ज। खर्जिता। खर्जनम्। खर्जु:। खर्जूर:।

खर्द्—भ्वा, प। दन्दशूकक्रिया। दंशन-हिंसनादि:। दन्तकरणक्रिया, दुर्गा। खर्दति। चखर्द। खर्दिता।

खर्ब्—(कर्ब्) भ्वा, प। गति:। दर्प:।

खल्—भ्वा, प। १ सञ्चय:। २ चलनम्, वो। खलति खलो धर्मात्।

खव्—(खच्) क्र्या, प। भूतप्रादुर्भाव:। अतिक्रान्तोत्पत्ति:। सम्यक्थ्युत्पत्ति:, वो। २ पवित्रीभाव:, वो। लट् खौनाति, पा ६, ४, १९। खौनीत:। खौनन्ति। हि खौनीहि। लिट् चखाव। चखवतु:। लुट् खविता। लुङ् अखवीत्, अखावीत्। खवित:।

खष्—(कष्) भ्वा, प। हिंसा।

खाद्—खाट्, भ्वा, प। भक्षणम्। लट् खादति। खादति पृष्ठमांसम्, हितो। लिट् चखाद। चखदतु:। दन्तैरोष्ठं चखाद, भ १४, ८७। लुट् खादिता। लृट् खादिष्यति। लुङ् अखादीत्। अखादिष्टाम्। अखादिषु:। तान्नखादीत्, भ १५, ३५। सन्—चिखादिषति। यङ् चाखाद्यते। चाखात्ति। णिच् खादयति। (ऋ) अचखादत्। वैदेहीं खादयिष्यामि राक्षसी, भ १६, २३। तां ग्रभि: खादयेद्राजा, मनु: ८, ३७१। खादित्वा। खादित:। खाद्यम्। खादनम्। खादक:। मां खादय मृगश्रेष्ठ, स्वार्थे णिच्।

खिट्—(किट्) भ्वा, प। त्रास:। भयोत्पादनम्। खेटति। चिखेट। खेटति, दुर्गा। विनापराधमारण्यान् न खेटति मृगानसौ, कवि १५५।

खिद्—तु, प। परिघात:।

खिद्, दि, रु, आ। दैन्यम्। दीनभाव:। उपतप्तीभाव:। लट् खिन्दति पा ७, भ ५६। खिद्यते। खसुखनिरभिलाष: खिद्यसे लोकहेतो:, शङ्क ५

१७। यस्य तटे भृङ्गावलिर्नाखिद्यत, मा ४, १२। खिद्यते। खिन्दते। खिन्दते। अखिन्दानः खतेजसा, भ ६, ३७। खिद्यते यो न भृत्येषु याचकेषु न खिन्दति। खिद्यते तेषु यैर्द्रव्यं दीयमानं न गृह्यते॥ कवि ६८। लिट् चिखेद। चिखिदे, भ १४, १०८। लुट् खेत्ता। लृट् खेत्स्यति। ०ते। लुङ् अखैत्सीत्। अखैत्ताम्। अखैत्सुः। अखित्त। अखित्साताम्। अखित्सत। सन् चिखित्सति। ०ते। यङ् चेखिद्यते। चेखेत्ति। णिच् खेदयति। अचीखिदत्। खिन्नः। खेदः। अखिन्नं वाजिकुञ्जरम, भ १७, १०। परि—णिच्, परिखेदितविन्ध्यवीरुधः (परिमृदित), भ १०, १८।

खु—खुङ् (उङ्) भ्वा, आ। शब्दः। खवते। चुखुवे। खोता। अखोष्ट।

खुज्—खुजु (कुजु) भ्वा, प। स्तेयम्। खोजति। अखोजीत्। खोजित्वा, खुज्वा।

खुण्ड्—खुडि, भ्वा, आ। खोटनम्। खण्ड्यापारः। खुण्डते। खुडि 'खुड'। खु, प। भेदः। खुण्डयति। खोडयति, वो।

खुर्—तु, प। १ छेदनम्।

२ विलेखनम्, वो। खुरति। खुरिता। खुरः।

खुर्द् (कुर्द्)।

खेट—खेड—चु, प। अदनो। भक्षणम्। खेटयति। खेडयति। अचिखेटत्। खेटयत्यरिवीरांश्च, कवि १५५।

खेल्—खेल्ल (केल्ल) भ्वा, प। १ चलनम्। कम्पनम्। २ गतिः। ३ क्रीडा। खेलति। तस्याः कूले क्षणोऽखेलत्, छन्दोमञ्जरी ४, १। खेलन्ति सज्जना नित्यं खेलयन्ते च योषितः, कवि ६४। चिखेल। चिखेलतुः। खेलिता। अखेलीत्। णिच् खेलयति। (ऋट) अचिखेलत्। खेलितः। खेलनम्। निपीतकालकूटस्य हरस्येवाहिखेलनम्। खेलदनङ्ग—, गीतगो १, २६। खेला।

खेव्—(केव्) भ्वा, आ। सेवा।

खै—भ्वा, प। १ स्थैर्यम्। २ हिंसा। ३ खननम्। ४ खेदः। खायति। चखौ। चखतुः। खाता। अखासीत्।

खोट—खोड—च, प। अदनो। क्षेपणम्, वो। खोटयति। खोडयति। अचुखोटत्। खोटृ (खोर्ट्) भ्वा, प। गत्याघातः। खोटनम्। खोटति खञ्जः, दुर्गा। संखोटति निराश्रयः, कवि १६७।

खोट—खोड—खोल—(खोर)।

ख्या—अदा, प। १ कथनम्।

२ ख्यातिः, वो। लट् ख्याति। लिङ् ख्यायात्। लङ् अख्यात्। अयं सार्वधातुकमात्रविषयः, कौ १२०। लिङादौ तु चक्षिङः ख्याञादेशे तस्यैव प्रयोगः। लिट् चख्यौ। चख्यतुः। लुट् ख्याता। लृट् ख्यास्यति। ०ते। आशिषि, ख्यायात्, ख्येयात्। ख्यासीष्ट। लुङ् अख्यात्। अख्यत, पा ३, १, ५२। कर्मणि, ख्यायते। अख्यायि। तेन सोऽख्यायि राघवस्य, भ १५, ८६। सन् चिख्यासति। ०ते। यङ् चाख्यायते। चाख्याति। चाख्येति। णिच् ख्यापयति। अचिख्यापत्। ख्यातः। ख्यातिः। ख्येयः। ख्यातव्यः। अभि—अभिख्या। शोभा। णिच् ख्यापनम्। तेषां दोषानभिख्याप्य, मनुः ८, २६२। आ—कथनम्।

वर्णनम्। आख्यान् वृत्तमस्मै, भ ३, २९। उपा—वर्णनम्। प्रत्या—निराकरणम्। उपेक्षा। उत्सवः। प्रत्याख्यातः, शकु ६, ३२। व्या—व्याख्या। विवरणम्। इहान्वयमुखेनैव सर्वं व्याख्यायते मया, मल्लिनाथः। प्र, वि—ख्यातिः। सम्—संख्या। गणना। संपूर्वस्य ख्यातेः प्रयोगो नेति न्यासकारः, कौ १२०।

(ग)

गर्ध्—(घर्घ्) भ्वा, प। हसनम्।

गज्—भ्वा, प। १ मदनम्। हर्षः। २ शब्दः। लट् गर्जति। लिट् जगाज। जगजतुः। गम्भीरं जगर्जुर्गजाः, भ १४, ५। लुट् गर्जिता। लृट् गर्जिष्यति। लुङ् अगाजीत्, अगर्जीत्। चु, प। शब्दः। गाजयति।

गञ्ज्—गजि (गुज्) भ्वा, प। शब्दः। गञ्जति। गञ्जिता। गञ्जितम्। गञ्जा। नेत्रे खञ्जनगञ्जने।

गड्—भ्वा, प। सेचनम्। क्षरणम्। गडति। जगाड। गडिता। अगडीत्, अगाडीत्। णिच् गडयति। घटादिः। गड्कः।

गण—अदन्तः। चु, प। संख्यानम्। गणना। ज्ञानम्। गणयति। नामाक्षरं गणय, शकु ६, ९०। लिट् गणयामास। लीलाकमलपत्राणि गणयामास पार्वती, कु ६, ८४। तां भक्तिमेवागणयद्दक्षिणाम्, र ५, २०। सुखमेतावदजस्य गण्यताम्, र ८, ७०। गणयति च मे मूढहृदयम्, शकु ३, २१४। लुङ् अजीगणत्, अजगणत्, पा ७, ४, ९७। अजीगणद्दाशरथं न वाक्यम्, भ २, ५३। स तान् नाजीगणत् सर्वान्, भ १५, ५, ४५। ०गणय्य, ०पा ६, ४, ५६। वि—ज्ञानम्। निश्चयः। अदूरवर्त्तिनीं सिद्धिं विगणय्य, र १, ८८। फलनिष्पत्तिं विगणय्य, भा २, ३५। अव—अवज्ञा। अवगणितः।

गण्ड्—गड़, भ्वा, प। गण्डव्यापारः।

गण्डकम्पनचुम्बनादिः। गण्डति पांशुना कार्ष्ण्यमिति रमानाथः। गण्डति कपोलः पांशुना। केचित्तु, गण्ड इति शब्दस्य व्युत्पत्त्यर्थमेवायं धातुर्मन्तव्यो न त्वस्यान्यत्र प्रयोगः, दुर्गा।

गद्—भ्वा, प। कथनम्।

लट् गदति। वेदान् गदति विस्पष्टम्, कवि २१५। लिट् जगाद। जगदतुः। जगाद मधुरं वचः, भ ७, ८५। लुट् गदिता। लृट् गदिष्यति। लुङ् अगदीत्, अगादीत्। कर्मणि, गद्यते। अगादि। तेनागादि सः, भ ५, ३१। इत्यसौ जगदे तया, भ ५, ५९। सन् जिगदिषति। यङ् जागद्यते। जागत्ति। णिच् गादयति। अजीगदत्। गदितम्। गद्यम्। गदनम्। गदः। नि—कथनम्। वर्णनम्। भूपालसिंहं निजगाद सिंहः, र २, ३३। इति निगदितवन्तं राघवस्तं जगाद, भ ३, ५९। प्रणिगदति, पा ८, ४, १७। प्रणगादीत्तम्, भ ९, ९९। सारङ्गं कतिचिच्च सञ्जगदिरे इति गणकृतानित्यत्वात्, दुर्गा। निगदः। निगादः।

गद—अदन्तः। चु, प। मेघशब्दः, वो। गदयति मेघः। अजगदत्।

गन्ध्—(वस्त्) चु, आ। अर्दनम्। गन्धयते। गन्धनम्। गति-हिंसा-याचनेष्विति रमानाथः।

गम्—गल्, भ्वा, प। १ गमनम्। २ प्राप्तिः। ३ ज्ञानम्। सर्वे गत्यर्थाः प्राप्त्यर्था ज्ञानार्थाश्च। लट् गच्छति, पा

७, ३, ७७। देवदत्तो ग्रामं गच्छति। कालो गच्छति धीमताम्. हितो। गच्छति पुरः शरीरम्, शकु १, २२८। लिट् जगाम। जग्मतुः, पा ६, ४, ८८। जगमिथ, जगन्थ। जगामासौ वनाद्रावणं प्रति, भ ५, ४। पश्चादुमाखां सुमुखो जगाम, कु १, २६। तस्मिन्नपत्ये न जगाम लक्ष्मिम्. कु १, २७। लुट् गन्ता। लृट् गमिष्यति, पा ७, २, ५८। लुङ् अगमत्। अगमताम्। लक्ष्मणं सागमत्, भ ४, ३०। सन् जिगमिषति। यङ् (कौटिल्ये) जङ्गम्यते। जङ्गन्ति। णिच् गमयति। अजीगमत्। (यापनम्) वेलां गमयति, शकु ३, २१। गत्वा। °गत्य °गम्य, पा ६, ४, ३८। गतः, पा ६, ४, ३७। रात्रिर्गता मुञ्च शय्याम्, र ५, ६६। गतिः। गमनम्। गन्तुम्। गम्यम्। गन्तव्यः। गमनीयः। गच्छन्। गामुकः। गत्वरः। अच्छगत्य, पा १, ४, ६८। अस्तङ्गत्य, पा १, ४, ६८। अति—अतिक्रमः। व्यति—व्यतिगच्छन्ति, पा १, ३, १५। अधि—प्राप्तिः। लाभः। ज्ञानम्। अधिगत्य सुस्थिम्, नै २, १। गुरोरनुज्ञामधिगम्य मातः, र २, ६६। उन्नायानधिगच्छन्तः प्रद्रावैर्वसुधाभृताम् (जानन्तः), भ ७, ३७। अनु—अनुसरणम्। सर्वे मन्थरमनुजग्मुः, हितो। मृदङ्गध्वनिमन्वगच्छत्, र १६, १३। अन्तः—प्रवेशः। अप—अपसरणम्। दूरीभावः। व्ययः। तापो नापगतः। प्रातस्क्लेनापजगाम रामः, भ ३, १६। व्यप—विनाशः। अपगमः। अभि—उपगमनम्। प्राप्तिः। अव—ज्ञानम्। निघ्नानं शात्रवान् रामं त्वं कथं नावगच्छसि, भ ५, ८१। अवगम्य कथोक्तं वपुः, कु ४ १२। न भवति महिमा विना विपत्तेरवगमयन्निव पश्यतः पयोधिः, भ १०, ६२। आ—आगमनम्। प्राप्तिः। ज्ञानम्। आजगाम तत्तीर्थं जलं पातुम्। अनङ्गवशमागता। धर्माणामागतागमम्, भारत। (क्षमायां) आगमयस्व तावत् मा त्वरिष्ठा इत्यर्थः, कौ २४२। उपा—प्राप्तिः। परां तुष्टिमुपागता, भारत। प्रत्या—प्रत्यागमनम्। निर्जित्य प्रत्यागच्छत्। समा—आगमनम्। समवायः। उद्—उन्नतिः। शालपोत इवोन्नतः, भारत। प्रत्युद्—प्रत्युन्नतिः। सम्मानार्थं पुरोगमनम्। प्रत्युन्नता पार्थिवधर्मपत्नया, र २, २०। १, ४८। उप—स्वीकारः। सङ्गमः। प्राप्तिः। समीपगमनम्। यं सनातनः पितरमुपागमत् स्वयम्, भ १, १। नोपगच्छेत् स्त्रियमार्त्तवदर्शने, मनुः ४, ४०। अभ्युप—अङ्गीकारः। नि—ज्ञानम्। निर्—निर्गमः। निर्जगाम गृहान्मातुः, भारत। परि—प्राप्तिः। ज्ञानम्। वेष्टनम्। प्रथमपरिगतार्थः, र ७, ७१। प्र—प्रस्थानम्। प्रगमनीयम्। प्रति—प्रतिगमनम्। भवतु प्रतिगच्छामि तावत्, शकु १, २१८। वि—त्यागः। विगतज्वरः, भ ६, ८३। अहो च नो मा व्यगमत्, मनुः ३, २५८। सम्—सङ्गतिः। सङ्गमः। तत्र सङ्गच्छते, पा १, ३, १८। आशिषि, सङ्गंसीष्ट, सङ्गंसीष्ट। लुङ् समगंस्त। समगत, पा १, २, १३। सङ्गच्छ पौलस्त्य स्वैरं माम्, भ ५, ८१। कपिना समगंसत राक्षसाः, भ ८, ६। वधूवरौ सङ्गमयाञ्चकार, र ७, २०।

गर्ब्—(कर्ब्) भ्वा, प। हिंसा।

गतिः, वी। गर्ब्बति।

गर्ज्—भ्वा, प। शब्दः। गर्जनम्।

लट् गर्जति। गर्जति वारिदपटली। यत्प्रजानामुपर्य्युच्चैः पर्जन्योऽपि न गर्जति। गर्जयन्ति कथञ्चान्यैर्भिद्यमानासु तस्कराः॥ कवि २२०। लिट् जगर्ज। जगर्जतुः। रामो जगर्ज, भ ६, ३५। लुट् गर्जिता। लृट् गर्जिष्यति। लुङ् अगर्जीत्। अगर्जिष्टाम्। अगर्जिषुः। कुम्भकर्णोऽगर्जीत्, भ १५, २१। सन् जिगर्जिषति। यङ् जागर्ज्यते। जागर्क्ति। गर्ज्, चु, प। शब्दः। गर्जयति। गर्जनम्। गर्जितम्। गर्जन् हरिः साम्भसि शैलकुञ्जे, भ २, ९।

गर्द्—भ्वा, चु, वो, प। शब्दः।

गर्दति। गर्दयति। जगर्द। गर्दभः।

गर्ध्—चु, प। आकाङ्क्षा। गर्धयति।

गर्ब्—(कर्ब्) भ्वा, प। गतिः।

गर्व्—(कर्व्) भ्वा, प। गर्वः।

गर्वति, नीचो गर्वति सम्पदा, दुर्गा। सर्वो गर्वति विद्याभिः * * विद्याधनसमृद्धोऽपि यो न गर्वयते प्रभुः, कवि ७१। जगर्व। गर्विता। अगर्वीत्। गर्व—चु, आ। अदन्तः। मानः। दर्पः। अहङ्कारः। गर्वयते। अजगर्वत। गर्वापयते धनैर्नीचः, दुर्गा। गर्वः। गर्वितः। गर्वी।

गर्ह्—गल्ह्—भ्वा, आ। कुत्सा।

निन्दा। गर्हा। लट् गर्हते। गल्हते। न तथा गर्हते स्वानं शृगालं नापि गर्हति। गर्हयत्यभ्युपेतार्थत्यागिनं स नरं यथा॥ कवि १०८। अपिच, गर्हते हृदयं स्त्रीणाम्, कवि ३३। लिट् जगर्हे। जगर्हे लक्षणानि सा, भ १४, ५९। लुट् गर्हिता। लृट् गर्हिष्यते। लुङ् अगर्हिष्ट। अगर्हिषाताम्। अगर्हिषत। सन्। जिगर्हिषते। यङ् जागर्ह्यते। जागर्ढि। गर्ह्, चु, प। कुत्सा। गर्हयति। गर्ह्यति, वो। गर्हितम्। गर्हणम्। गर्हा। वि—निन्दा। भर्त्सना। निषेधः। कृत्वा कर्म विगर्हितम्, मनुः ११, २३३। भ ६, १२९। व्रात्या आर्य्यविगर्हिताः, मनुः १, ३९।

गल्—भ्वा, प। १ भक्षणम्।

२ चरणम्। ३ पतनम्। लट् गलति। स्वयं हाराकारा गलति जलधारा कुवलयात्। मुषलाद्यगलत्ततः, भ १७ ८७। लिट् जगाल। जगलतुः। प्रतोदा जगलुः भ १४, ९९। लुट् गलिता। लुङ् अगालीत्। अगालिष्टाम्। सन् जिगलिषति। जागल्यते। जागल्ति। णिच् गालयति। गल्, चु, आ। स्रवणम्। क्षरणम्। गालयते रक्तं क्षतस्य। दुर्गा। गलितम्। गलनम्। विपक्षे गलितादरो, भ ५, ४३। गलितवयसामिच्छाकूणाम्, र ३, ७२। गलितयौवना कामिनी, काव्यप्र। गालितमण्ड ओदनः। अव—भ्रंशः। वलयमवागलत् कराभ्याम्, मा ८, ३३। पर्य्या—निःसरणम्। पर्य्यन्तपर्य्यागलदच्छबिन्दुः भ २, ४। निर्—निःसरणम्। निष्कर्षः। निर्गतिलाम्बुगर्भः शरद्घनः, र ५, १७। इति निर्गलितोऽर्थः। वि—भ्रंशः। मोचनम्। विगलितवसनम्, गीतगो ५, १३। विगलन्मानः, भ ८, ४०। रतिविगलितबन्धे केशपाशे, विक्रमोर्वश्यौ।

गल्भ्—भ्वा, आ। धार्ष्ट्यम्।

प्रगल्भता। गल्भते। जगल्भे। गल्भिता। प्रागभिप्रियतमं प्रजगल्भे, मा १०, १८। अति हि नाम प्रगल्भसे, उत्तर १९२। आजौ प्रगल्भते दोर्भ्यां द्विषां विघट्टयन् घटाः, कवि १५२।

गल्ह्—(गर्ह्) भ्वा, आ। कुत्सा।

गवेष—अदन्तः। चु, प। मार्गणम्।

अन्वेषणम्। अनुसन्धानम्। गवेषयति। गवेषयति सत्क्रियाम्, कवि २४७। गवेषणा। गवेषितम्।

गह्—अदन्तः। चु, प। गहनम्।

दुर्बोधः। गहयति शास्त्रं जड़धीः, दुर्गा।

गा—गाङ्, भ्वा, आ। गतिः।

लट् गाते। गाते, आदादिकोऽयमिति हरदत्तादयः। फले तु न भेदः, कौ ९९। बहुवचने तु भेद एव। भ्वा, गान्ते। अदा, गाते। ए गै। लिङ् गेत। गेयाताम्। लङ् अगात। इ अगै। लिट् जगे। जगिषे। लुट् गाता। लृट् गास्यते। आशिषि, गासीष्ट। लुङ् अगास्त। अगासाताम्। अगासत। सन् जिगासते। यङ् जागायते। जागाति, जागर्गति। णिच् गापयति। अजीगपत्। गातः।

गात्र—(त्रण) अदन्तः। चु, आ।

विचूर्णनम्। शैथिल्यम्, वो। गात्रयते।

गाध्—गाध्ट, ग्धा, आ। १ प्रतिष्ठा।

२ लिप्सा। वाञ्छा। ३ ग्रन्थः। रचना। लट् गाधते। गाधते नार्थमन्यतः, कवि २६८। अगाधत ततो व्योम, भ ८, १। लिट् जगाधे। लुट् गाधिता। गाधितासे नभो भूयः, भ २२, २। लृट् गाधिष्यते। लुङ् अगाधिष्ट। अगाधिषाताम्। अगाधिषत। अजगाधत्। गाधनः।

गाह्—गाह्ल, भ्वा, आ। विलोड़नम्।

प्रवेशः। प्राप्तिः। सेवा। लट् गाहते। गाहते शास्त्रमत्यर्थम्, कवि २६८। मनस्तु मे संशयमेव गाहते, कु ५, ४६। गाहन्तां महिषा निपानसलिलम्, शकु २, ४२। लिट् जगाहे। जगाहिषे, जघाहे। जगाहिध्वे, जगाहिढ्वे, जवाढ्वे। जगतीं गाह इवापगां जगाहे, भा १३, २४। जगाहे द्यां निशाचरः, भ ५, ९४। जगाहिरे मार्गान्, भ २, ५४। लुट् गाहिता, गाढ़ा। लृट् गाहिष्यते, घाक्ष्यते। आशिषि, गाहिषीष्ट, घाक्षीष्ट। लुङ् अगाहिष्ट। अगाहिषाताम्। अगाहिषत। अगाढ़। अघाक्षाताम्। अघाक्षत। अगाढाः। अघाढ्वम्। अघाक्षि। सन् जिगाहिषते, जिघाक्षते। यङ् जागाह्यते। जागाढि। णिच् गाहयति। अजीगहत्। गाहित्वा, गाढ्वा। गाढः। तपस्विगाढ़ा तमसा नदी, र ९, ७२। अव—अवगाहनम्। प्रवेशः। पूर्वापरौ तोयनिधी वगाह्य, कु १, १। गिरिमवगाह्यावहे, भ ६, २९। अवगाहिष्यसे दिशः, भ १६, ३८। वि—अवगाहनम्। निमज्जनम्। स्नानम्। प्रवेशः। विलोड़नम्। गतिः। विगाह्य तमसाम्, र १४, ७६। विगाहितुं यामुनमम्बु, भ ३, ३९। शब्दगुणमात्मनः पदं विमानेन विगाहमानो हरिः, र, १३, १। विगाह्यमानां सरयूं नौभिः, र १४, ३०। सम्—विलोड़नम्। आक्रान्तिः। समगाहिष्ट चाम्बरम्, भ १५, ६९।

गु—गुङ् (ङ्) भ्वा, आ। शब्दः।

अव्यक्तशब्दः। गवते। जुगुवे। गोता। गोष्यते। अगोष्ट। जुगूषते। जोगूयते। जोगोति। गावयति। अजूगवत्। क्त, गुतम्। गुवाकः।

गु—"गू" तु, प। मलत्यागः।

पुरीषोत्सर्गः। गवति। जुगाव। जुगु-

विथ, जुगुथ। गुता। गुथ्यति। अगुथीत्। अगुताम्, पा ८, २, २७। अगुषुः। गू—गुवति। गुविता। अगुवीत्। क्त, गूनः, कौ ३४७। गूथम्।

गुज्—भ्वा, तु, प। शब्दः। कूजनम्।

गोजति। जुगोज। गोजिता। अगोजीत्। तु, गुजति। गुजिता। अगुजीत्।

गुञ्ज्—गुजि, भ्वा, प। अव्यक्तशब्दः।

कूजनम्। लट् गुञ्जति। लिट् जुगुञ्ज। न षट्पदोऽसौ न जुगुञ्ज यः कलम्, भ २, १९। गुञ्जा जुगुञ्जुः, भ १४, २। लुट् गुञ्जिता। लुङ् अगुञ्जीत्। गुञ्जितम्। गुञ्जनम्। गुञ्जा।

गुड्—तु, प। १ रक्षणम्। २ व्याघातः।

वो। गुडति। जुगोड। गुडिता। गुडितः। गुडः। गुडिका।

गुण्ठ्—गुठि, चु, प, वो। वेष्टनम्।

गुण्ठयति। गुण्ठति। अजुगुण्ठत्। अव—अवगुण्ठनम्। आवरणम्। शिरःप्रच्छादनम्। अवगुण्ठितः, मनुः ४, ४९। रत्ना ३, ७१।

गुण्ड्—गुडि, चु, प। १ वेष्टनम्।

२ रक्षणम्। ३ चूर्णीकरणम्। पेषणम्। गुण्डयति। गुण्डति। अजुगुण्डत्। गुण्डितः।

गुण—(कुण) अदन्तः। चु, प।

१ आमन्त्रणम्। २ अभ्यासः। ३ गुणनम्। पूरणम्। इन्तिः पूर्त्तिश्च गुणने इत्यङ्कविदः। गुणयति। गुणितम्। गुण आमन्त्रणे, गुणनिका इति मल्लिनाथः। मा २, ७५

गुद्—(कुर्द) भ्वा, आ। क्रीड़ा।

गोदते। जुगुदे। गोदिता। अगोदिष्ट।

गुध्—भ्वा, आ, वो। क्रीड़ा। दि, प। परिवेष्टनम्। क्रुधा, प। रोषः। कोपः। लट् गोधते। गुध्यति। गुध्नाति। योऽस्मै गुध्नाति तद्दुर्गं तत्क्षणादेव गुध्यति, कवि २६८। लिट् जुगोध। जुगुधे। लुट् गोधिता। लृट् गोधिष्यति। °ते। लुङ् अगोधीत्। अगोधिष्ट। गुधित्वा, पा १, २, ७। गुधितम्।

गुन्द्र—(कुन्द्र) चु, प। मिश्रउक्तिः।

गुप्—गुपू, प। रक्षणम्।

लट् गोपायति, पा ३, १, २८। गोपायति क्ष्मिः श्रियम्, भ १८, २३। लिट् गोपायाञ्चकार, जुगोप। जुगुपतुः। जुगोपिथ, जुगोप्थ। जुगोपात्मानमत्रस्तः, र १, २१। २, ३। लुट् गोप्ता, गोपिता। गोपायिता, पा ३, १, ३१। लृट् गोप्स्यति, गोपिष्यति, गोपायिष्यति। आशिषि, गुप्यात्। गोपाय्यात्। लुङ् अगौप्सीत्। अगौप्ताम्। अगौप्सुः। अगोपीत्। अगोपिष्टाम्। अगोपिषुः। अगोपायीत्। अगोपायिष्टाम्। अगोपायिषुः। यानगोपोऽश्वेषु सः, भ ५, ३७। अगोपिष्टां पुरीं लङ्कामगौप्तां रक्षसां बलम्, भ १५, ११३। सन् जुगुप्सति, जुगुपिषति, जुगोपिषति, जुगोपायिषति। यङ् जोगुप्यते, जोगोप्ति। णिच् गोपयति। अजूगुपत्। गुप्तः। गोप्ता। गोपनम्। गोपायति क्षितिमिमां चतुरब्धिसीमां धीमानधर्मवचनाच्च जुगुप्सते यः। वित्तं न गोपयति यस्तु वनीयकेभ्यो धीरो न गुप्यति महत्यपि कार्य्यजाते॥ कवि ६। प्र, निर्—रक्षणम्। प्रगोपयाञ्चकार पुरम्, भ १४, ८७। निर्जुगोप निशाचरान्, भ ४१, १०६।

गुप्—भ्वा, आ। गोपनम्। अपशब्दः।

निन्दा। जुगुप्सा। गुपेर्निन्दायां सन्।

गोपने तु णिच्, की, १०१। अधर्माज् जुगुप्सते, पा ३, १, ५। लिट् जुगुप्साञ्चक्रे। सा जुगुप्साम्चक्रेऽसून्, भ १४, ५९। लुट् जुगुप्सिता। लृट् जुगुप्सिष्यते। लुङ् अजुगुप्सिष्ट। अजुगुप्सिषाताम्। अजुगुप्सिषत। किं त्वं मामजुगुप्सिष्ठाः, भ १५, १९। सन् जुगुप्सिषते, पा १, ३, ६२। (गोपने णिच्) गापयति। गोपते, वो। किं कार्ष्णीं विजहासि कङ्कणझनत्कारञ्च किं गोपसे। राधाया वचनं नन्दान्तिके गोपतो गोविन्दस्य, गीतगो ६, १२ निजुगोप हर्षमुदितम्, भा ६, ३८ इत्यादौ परस्मैपदमपि। गोपनीयं कमप्यर्थं द्योतयित्वा, दर्पणः। अत्र क्रियापदं गुप्तं बुधैरपि न बुध्यते, विदग्धमुखमण्डनम्। नवनखपदमङ्कं गोपयत्यंशुकेन, दर्पण।

गुप्—दि, प। व्याकुलत्वम्।

गुप्यति। जुगोप। जुगुपतुः। गोपिता। गोपिष्यति। अगुपत। अगुपताम्।

गुप् (कुप्) चु, प। १ दीप्तिः। २ गोपनम्, वो। गोपयति।

गुफ्—गुम्फ्—गुन्फ्, तु, प। ग्रन्थनम्। गुफति। जुगोफ। गोफिता। गुम्फति। जुगुम्फ। गुम्फिता। चगुम्फीत्। गुफित्वा। गुम्फित्वा, पा १, २, २३। गुम्फित्वेव निरस्यन् तरङ्गान्, भ ७, १०५। गुम्फितम्। गुम्फनम्।

गुर्—गुरी, तु, आ। उद्यमनम्।

अवगोरणम्। गुरते। युक्तोऽपि यो नोद्गुरते स्वधर्मवित्, कवि ५१। जुगुरे। गुरिता। गुरिष्यते। अगुरिष्ट। (ई) गूर्णः। गुरणम्। अप—णमुल्, अपगारमपगारम्। अपगोरमपगोरम्, पा ६, १, ५३। अव—ताड़नार्थं दण्डादीनामुद्यमनम्। ताड़नम्। ब्राह्मणायावगूर्य्य वधकाम्यया, मनुः ४, १६५। न द्विजेऽवगुरेत्, मनुः ४, १६१। उद्—उत्क्षेपः। उदगुरिषत द्रुमान्, भ १५, ३४।

गुर्द (कुर्द)।

गुर्द्—गुर्दी, भ्वा, प। उद्यमः।

ताड़नाभिप्रायेण दण्डादेरुद्धीकरणम्। गूर्दति। जुगूर्द। अगूर्दीत्। (ई) गूर्णः।

गुह्—गुह्, भ्वा उ। संवरणम्।

आच्छादनम्। गोपनम्। अपह्नवः। लट् गूहति। °ते, पा ६, ४, ८९। गूहेत् कूर्मं इवाङ्गानि, मनुः ७, १०५। लिट् जुगूह। जुगूहिथ, जुगोढ। जुगूहे। जुगूहिषे, जुघुक्षे। लुट् गूहिता, गोढ़ा। लृट् गूहिष्यति। °ते। घोक्ष्यति। °ते। गूहिष्यामि क्षितिं क्षत्तरद्य गात्रैर्वनौकसाम्, भ १६, ४१। आशिषि, गुह्यात्। गूहिषीष्ट, घुक्षीष्ट। लुङ् अगूहीत्। अगूहिष्टाम्। अगूहिषुः। इड्भावे क्सः। अघुक्षत्। अगूहिष्ट। अगूहिषाताम्। अगूहिषत। पक्षे, अगूढ, अघुक्षत, पा ७, २, ७३। अघुक्षाताम्। अघुक्षन्त। अगूहिष्वहि, अगुह्वहि, अघुक्षावहि। अगूहोच्छायकैर्दिशः, भ १५, ८८। मा घुक्षः पत्युरात्मानम्, भ ६, १६। कर्मणि गुह्यते। अगूहि। सन् जुघुक्षति। °ते, पा ७, २, १३। यङ् जोगुह्यते। जोगोढि। णिच् गूहयति। अजुगुहत्। गूहित्वा, गूढ्वा। गूढः। गुह्यम्, गोह्यम्। गूहनम्। गूहनीयम्। गूहमानः स्वमाहात्म्यम्, भ ८, ४५। उप—उपगूहनम्।

आलिङ्गनम्। गाढमुपजगूहैनम्, भ १४, ५२। मां तरङ्गहस्तैरुपगूहतीव, र १४, ६३। नि—गोपनम्। किं न स्मरसि स्मरन्ती वा निगूहसे, रामा। हिधेव छत्वा हृदयं निगूहतः, भा १४, १२।

गू—(गु) तु, प। मलत्यागः। गुवति।

गूर्—गूरी, दि, आ। १ हिंसा।

२ गतिः। गूर्य्यते। जुगूरे। गूरिता। अगूरिष्ट। गूर, चु, आ। उद्यमः। गूरयते। भग्नेषु नोदगूरयतेऽस्त्रमाहवे। यो गूर्य्यते ओरपि यस्य सम्मुखम्॥ कवि ५१। (ई) गूर्णः। उद्—उत्क्षेपः। उज्जुगूरे शैलम्, भ १४, ५१। अव—अवगोरणम्। ताड़नोद्यमः। अवगूर्य्य त्वब्दशतं सहस्रमभिहत्य च नरकं प्रतिपद्यते, मनुः ११, २०६।

गूर्द्—भ्वा, आ। वो। क्रीड़ा।

गूर्दते। गूर्द, चु, प। निकेतनम्। क्रीड़ा, वो। गूर्दयति।

गॄ—भ्वा, प। सेचनम्।

लट् गरति। जगार। जगृतुः। गर्त्ता। गरिष्यति। ग्रियात्। अगार्षीत्। जिगीर्षति। जेग्रीयते। जगर्त्ति। गारयति। अजीगरत्।

गृज्—गृज्ञ्—गृजि, (गुजा) भ्वा, प।

शब्दः। गर्जति। जगर्ज। गर्जिता। अगर्जीत्। गृज्ञति। जगृज्ञ। गृज्ञनम्।

गृध्—गृधु, दि, प। आकाङ्क्षा।

गृध्यति। न गृध्यति परद्रव्यम्, कवि २५४। जगर्ध। गर्धिता। गर्धिष्यति। अगृधत्। जिगर्धिषति। जरीगृध्यते। जरीगर्द्धि। णिच् गर्धयति। (प्रलम्भने) गर्धयते, पा १. ३. ६८। न च गर्धयते यत राक्षसान्, भ ८, ४२। (उ) गर्द्धित्वा, गृद्ध्वा। गृद्धः। गर्धनः। गृध्नुः।

गृह्—गृह्ण, भ्वा, आ। १ ग्रहणम्।

२ ग्रहणम्। गर्हते। जगृहे। जगृहिषे, जघृक्षे। जगृहिध्वे, जगृहिढ्वे, जघृढ्वे। गर्हिता, गर्द्धा। गर्हिष्यते, घर्क्ष्यते। गर्हिषीष्ट, घृक्षीष्ट। अगर्हिष्ट, अघृक्षत। कविरहस्येऽदन्तोऽयम्। द्विषां गृहयते शिरः, ३२। गृहाः। गृहम्।

गॄ—तु, प। भक्षणम्। क्रया, प। शब्दः। स्तुतिः। उक्तिः। लट् गिरति। गिलति, पा ८, २, २१। गृणाति। गृणीतः। गृण्न्ति। भीताः प्राञ्जलयो गृणन्ति, गीता ११, २१। पौराणिकाश्चेष्टितानि गृणन्ति, अनर्घ १८। गृणाति सुभगं वचः, कवि २१८। लिट् जगार। जगरतुः। जगरिथ, जगलिथ। लुट् गरिता, गलिता, गरीता। लृट् गरिष्यति, गरीष्यति। आशिषि, गीर्य्यात्। लुङ् अगारीत्। अगारिष्टाम्। अगारिषुः। सन् जिगरिषति क्रयादिः, जिगरिषति जिगीर्षति। पा ७।२।४१। (भावगर्हायां यङ्, पा ३, १, २४।) जेगिल्यते, पा ८, २, २०। जागर्त्ति। णिच् गारयति। अजीगरत्। गॄ, "गृ" चु, आ। १ विज्ञानम्। २ विज्ञापनम्, वो। गारयते। कर्म्मणि, गीर्य्यते। गीर्णः। गिलितो वकेनेति गिलशब्दात्क्तिच्। गीर्णिः। अपि—स्तुतिः। वर्णनम्। अव—आ, पा, १, ३, ५१। अवगिरते। अवगिलते। अवगिरमाणाः पिशाचा मांसशोणितम्, भ ८, ३०। गृणातिस्त्ववपूर्वो न प्रयुज्यत इति भाष्यम्, कौ २५२। अनु, प्रति—प्रोत्साहनम्, पा १. ४. ४१। गणदभ्योऽनगणक्षत्रे.

मा १४, १। स तस्य शासनमुज्जगार, र १४, ५३। विक्षेपणाद्रागमिवोद्गिरन्ती चरणौ, कु १, ३३। नि—निगरणम्। निजेगिल्यते, पा ३, १, २४। सम्—प्रतिज्ञा। सङ्गिरते, पा १, ३, ५२। सङ्गिरन्ते गोष्ठीषु स्वामिनो गुणान्, भ ७, ३१। वसूनि देहांश्च निवर्त्तयिष्यन् रामं नृपः सङ्गिरमाण एव, भ ३, ८।

गेप्—गेपृ (क्षेपे) भ्वा, आ। १ कम्पनम्।

२ गतिः। गेपते। (ऋ) अजिगेपत्।

गेव्—(क्षेवृ) भ्वा, आ। सेवा।

गेष्—गेषृ, भ्वा, आ। अनिच्छा।

अन्वेषणम्। अनुसन्धानम्, दुर्गा। गेषते। जिगेषे। गेषिता। अगेषिष्ट। अजिगेषत।

गै—(कै) भ्वा, प। शब्दः।

गानम्। कीर्त्तनम्। लट् गायति। गायेयुः साम सामगाः, भ १९, १३। लिट् जगौ। ब्रह्मपारायणं जगौ, उत्तरचरितम्। जगुः सरागम्, भ ३, ४३। १३, २८। लुट् गाता। लृट् गास्यति। आशिषि, गेयात्, पा ६, ४, ६७। लुङ् अगासीत्। अगासिष्टाम्। अगासिषुः। कर्म्मणि, गीयते, पा ६, ३, ६६। गीयताम्, शकु १, १२। अगायि। सन् जिगासति। यङ् जेगीयते। जागेति, जागाति। णिच् गापयति। अजीगपत्। जयोदाहरणं बाह्वोर्गापयामास किन्नरान्, र ४, ७८। गीत्वा। °गाय, पा ६, ४, ६९। गीतम्। गीतिः। गाथकः। गायनः। गेयोऽयं सान्नाम्। गायकः। गानम्। अनु—शब्दः। अनुजगुरथ दिव्यं दुन्दुभिध्वानम्, भा ३, ३०। अव—निन्दा। उद्—उच्चैर्गानम्। उद्गीयमानं यशो वनदेवताभिः, र २, १२। उद्गायतां किन्नराणाम्, कु १, ८। उप—शब्दः। उपगीयमाना भ्रमरैर्वनराजयः, भारत। भृङ्गकुलैरुपगीतवने कुन्दोमञ्जरी २२, २। नि—पाठः। श्रुतयो निगमेषु निगीताः, मनुः, ९, १९। परि—कीर्त्तनम्। मान्धातृशब्दो लोकेषु परिगीयते, भारत। प्र—शब्दः। ऋष्यमूकमगाद्भृङ्गैः प्रगीतं सामगैरिव, भ ६, ९०। वि—गर्हा। निन्दा। केतक विगीयसे शिवेन, नै १, ५९। मां प्रसूय कथमसु विगीतः, अनर्घ १५।

गोम—अदन्तः। चु, प। लेपनम्।

गोमयति स्थानम्। अजुगोमत्।

गोष्ट्—भ्वा, आ। सङ्घातः।

राशीकरणम्। गोष्टते धान्यं लोकः।

ग्रथ्—ग्रन्थ्—ग्रथि, भ्वा, आ।

१ कौटिल्यम्। वक्रीभावः। २ कुटिलीकरणम्। ग्रन्थते काष्ठं, ग्रन्थते लतां वायुः। जग्रन्थे। ग्रन्थिता। अग्रन्थिष्ट। "ग्रथते"।

ग्रन्थ्—क्रया, प। सन्दर्भः। रचना।

ग्रन्थनम्। लट् ग्रथ्नाति मालाम्। ग्रथ्नीतः। ग्रथ्नन्ति। काचं मणिं काञ्चनमेकसूत्रे ग्रथ्नन्ति मूढाः। लिङ् ग्रथ्नीयात्। लङ् अग्रथ्नात्। अग्रथ्नीताम्। अग्रथ्नन्। यमलोकमिवाग्रथ्नाद्ब्राह्मसैर्हतैः, भ १९, ६९। लिट् जग्रन्थ। जग्रथतुः, जग्रन्थतुः। ग्रेथतुः, को १६७। लुट् ग्रन्थिता। लृट् ग्रन्थिष्यति। आशिषि, ग्रथ्यात्। लुङ् अग्रन्थीत्। सन् जिग्रन्थिषति। यङ् जाग्रथ्यते। जाग्रन्थि। णिच् ग्रन्थयति। ग्रन्थ (ग्रन्थ) चु, प। सन्दर्भः। ग्रन्थयति। ग्रन्थ, चु,

प। बन्धनम्। ग्रन्थनम्। ग्रन्थयति। ग्रन्थति। "ग्रथ" ग्राथयति, ग्रथति। गाथां ग्रन्थयति प्रसन्नललितां श्लोकञ्च यो ग्रन्थति, श्लाघ्यं ग्राथयति स्फुटार्थ-मधुरम्। ग्रथति यः श्लिष्टाक्षरं नाटकम्, कवि १२। ग्रन्थिमुद्ग्रथयितुं दयितेशे, मा १०,६३। कर्मोद्ग्रथं ग्रथितमुद्ग्रथ-यन्ति सन्तः, भाग ४।२२।३७। अयं चु-रादिरित्येके, नेत्यन्ये। वस्तुतस्तु नाम-धातुरयम्। ग्रथित्वा, ग्रन्थित्वा, पा १, २, २३। ग्रथितः। ग्रन्थनम्। ग्रन्थः। ग्रथितमौलिरसौ वनमालया, र ९, ५३। कुसुमैर्ग्रथितां स्रजम्, र ८, ३५। रुचो ग्रन्थत्वेव स्थितं तोयाधम्, भ ७, १०५। उद्—बन्धनम्। लताप्रतानोद्ग्रथितैः स केशैः, र २, ८। सम्—रचना। प्रियेण संग्रथ्य स्रजम्, मा ८, ३७।

ग्रस्—ग्रसु, भ्वा, आ। भक्षणम्।

आक्रमणम्। लट् ग्रसते, यावतो ग्रसते ग्रासान्, मनुः ३, १३३। हि-मांशुमाशु ग्रसते, मा २। ४९। लिट् जग्रसे। जग्रसे कालरात्रीव वानरान्, भ १४, ४३। लृट् ग्रसिष्यते। लुङ् अग्र-सिष्ट। सन् जिग्रसिषते। यङ् जाग्रस्यते। जाग्रस्ति। णिच् ग्रासयति। ग्रस, चु, प। १ ग्रहणम्। २ ग्रासः, वो। ग्रासयति। ग्रसति। ग्रसति तव मुखेन्दुं पूर्णचन्द्रं विहाय। ग्लसु, ग्लसते। (उ) ग्रसित्वा, ग्रस्त्वा। ग्रस्तः। रोगग्रस्तः विपद्ग्रस्तः। ग्रासः। पिण्डग्रः। अभि—आक्रमणम्। सम्—विनाशः। संग्रस्यतेऽसौ पुरुषा-धिपेन, भ १२, ४।

ग्रह्—क्र्या, उ। उपादानम्।

ग्रहणम्। स्वीकारः। धारणम्। प्राप्तिः। अवलम्बनम्। आश्रयः। लट् गृह्णाति, पा ६,१,१६। गृह्णीते। लिङ् गृह्णीयात्, गृह्णीत। न नामापि गृह्णीयात् पत्यौ प्रेते परस्य, मनुः ५,१,५३। शरद्रौद्रं न गृह्णीयात्। न चेत् स मम गृह्णी-याद्वचः, भारत। हि गृहाण। गृहाण ग्रस्तम्, र २, ५१। लङ्, अगृह्णात्। अगृह्णीताम्। अगृह्णन्। अगृहीत। अगृह्णात् तं मत्स्यं पाणिना, भारत। लिट् जग्राह। जग्रहिथ। जगृहे। जग्राह केशेषु तम्, भारत। तपसो मूलमाचारं जगृहुः, १, ११०। लुट् ग्रहीता, पा ७,२,३७। लृट् ग्रहीष्यति। ०ते। आशिषि, गृह्यात्। ग्रहीषीष्ट। लुङ् अग्रहीत्, पा २, ४, ५। अग्रहीष्टाम्। अग्रहीषुः। अग्रहीष्ट। अग्रहीषाताम्। अग्रहीषत। ताभ्यो बलिमग्र-हीत्, र १, १८। गर्भं धृतराष्ट्रादग्रहीत् सा, भारत। प्राणानग्रहीद्विषाम् (नि-गृहीतवान्), भ ९, ९। आयुरग्रहीत्, भ १५, ६३। कर्मणि, गृह्यते। जगृहे। ग्रहीता, ग्राहिता। ग्रहीष्यते, ग्राहि-ष्यते। ग्रहीषीष्ट, ग्राहिषीष्ट। अग्राहि। अग्रहीषत, अग्राहिषत, पा ६, ४, ६२। नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः, मनुः ८, २६। जगृहाते तौ रक्षसा, भ ६, ४४। सन् जिघृक्षति। ०ते, पा ७, २, १२। १, २, ८। यङ् जरीगृह्यते, पा ६, १, १६। जाग्राढि। (जरीगर्ढि जरीगृहीति इति केचित्) जागृढः। जरीगृढ इति कश्चित्। णिच् ग्राहयति। अजिग्रहत्, अजिग्रहत्तं जनको धनुस्तत्, भ २, ४२। अयाचि-तारं न सुतां ग्राहयितुं यशाक, कु १, ५३। इदं शास्त्रं मां ग्राहयामास, मनुः १, ५८। ग्राहयित्वाहमात्मानं ततो दग्ध्वा च तां पुरीम्, भारत। गृहीत्वा। ०गृह्य। गृहीतः। ग्रहः। ग्रहणम्।

ग्रहीतुम्। ग्रहीतव्यः। ग्राह्यः। ग्रहीता। ग्राहो। ग्राहकः। ग्रहन्। पाणि—पाणिग्रहणम्। परिणयः। पाणिं गृह्णातु मे, चण्डी। अनेन पाणौ विधिवद् गृहीते, र ६, ६३। पाद—पाद ग्रहणम्। अभिवादनम्। तयोर्जगृहतुः पादान् राजा राज्ञी च, र १, ५८। अति—अतिक्रम्य ग्रहणम्। चारित्रतोऽतिगृह्यते, पा ५, ४, ४६। अनु—अनुग्रहः। महात्मानोऽनुगृह्णन्ति भजमानानरीनपि, मा २, १०। कुटम्बिनोमनुगृह्णीष्व निवापदत्तिभिः, र ८, ८७। अव—अनादरः। निग्रहः। न महानवग्रह्य साध्यः, मा ५, ४८। अवगृह्यं पदम्, पा ३, १, ११८। अवग्राहः। अवग्रहः। अभि—अपचिकीर्षा। कलहाह्वानम्। उद्—उद्यमः। शक्तिमुद्गृहीत्, भ १५, ५२। णिच्, उपन्यासः। शास्त्रं यत्तवोद्ग्राह्यते पुरः, मा २, ७५। मोज्जग्रहः सुनीतानि, भ १५, २०। उप—परिग्रहः। अव्यवसायिनं प्रमदेव दुष्कृतिं नेच्छत्युपगृहीतुं लक्ष्मीः, हितो। णिच्, उपहारः। उपग्राह्यः। नि—निग्रहः। पीड़नम्। गृह्णाण चापं निग्गहाण ताड़काम्, अनर्घ ४५। निगृहीतधेनुः सिंहः, र २, ३३। अभ्यासनिगृहीतं मनः, र १०, २२। राज्ञां यशांसि निजिगृक्षयिष्यन्, भ १, ४०। परि—परिग्रहः। आदानम्। स्वीकारः। स्वपुरमगात् परिगृह्य रामकान्ताम्, भ ५, १०८। ज्ञानेन परिगृह्य तान्, मनुः २, १५१। प्र—प्रकर्षेण ग्रहणम्। बाहुं प्रगृह्याभ्यद्रवत, भारत। प्रगृह्यन्तामभीषवः, शक्रु १, ३७। प्रति—प्रतिग्रहः। स्वीकारः। लाभः। प्रत्यग्रहीष्टां तावासनादि, भ २, १६। सर्वतः प्रतिगृह्णीयात्, मनुः १०, १०२। विधिवत् प्रतिगृह्य कन्याम्, मनुः ८,९२। तथेति प्रतिजग्राह गुरोरादेशम्, र १, ८२। प्रतिजग्राह कालिङ्गस्तमस्त्रैः, र ४, ४२। प्रतिगृहीतं ब्राह्मणवचः, शक्रु १, ४७। वि—विग्रहः। सम्प्रहारः। यदा विगृह्णाति तदा हृतं यशः, भा १४, २४। विगृह्य नमुचिद्विषा, मा १, ५१। यत्कृतेऽरीन् व्यगृह्णीम, भ १७, २३। बन्धुना विगृहीतः, भ ६, ८६। व्यजिघृक्षत् सुरान्, भ १७, ३९। सम्—संग्रहः।

ग्रह्—ग्रहू, चु, प, वो। ग्रहणम्।

ग्राहयति। गृह्णति। अयं वेट्। ग्रहीता। ग्राढा। अगृह्णीत्। अग्राक्षीत्। ग्लह्, ग्लाहयति। ग्लहति। अग्लहीत्। अग्लाक्षीत्। ग्राहयते इत्येके।

ग्राम—अदन्तः। चु, प। आमन्त्रणम्। आभाषणम्। ग्रामयति। अजग्रामत्। ग्रुच्—ग्रुचु, भ्वा, प। १ स्तेयकरणम्। २ गमनम्, वो। ग्रोचति। जुग्रोच। ग्रोचिता। अग्रुचत्, अग्रोचीत्, पा २, १, ५८। (ड) ग्रोचित्वा, ग्रुक्त्वा। ग्रुक्तः।

ग्लस्—(ग्रसु) भ्वा, आ। भक्षणम्।

ग्लह्—(ग्रह्) भ्वा, आ, वो। ग्रहणम्। ग्लहते। ग्लह्, चु, प, वो। आदानम्।

ग्लुच्—ग्लुचु (ग्रुचु) भ्वा, प। १ चौर्य्यम्। २ गमनम्। ग्लोचति। जुग्लोच। ग्लोचिता। अग्लुचत्, अग्लोचीत्, पा २, १, ५८। बह्वनामग्लुचत् प्राणानग्लोचीच्च रणे यशः, भ १५, ३०। (ड) ग्लोचित्वा, ग्लुक्त्वा। ग्लुक्तः।

ग्लुञ्च्—ग्लुञ्चु, भ्वा, प। गतिः। ग्लुञ्चति। जुग्लुञ्च। ग्लुञ्चिता। अग्लुचत्, अग्लुञ्चीत्, पा १, ३, ५८। अग्

नासिकलोपाभावमिच्छन्ति। अग्लुञ्चदिति प्रदीपः। ग्लुञ्चित्वा, ग्लुक्ता।

ग्लेप्—ग्लेपृ, भ्वा, आ। देन्यम्।

ग्लेपृ (केपृ) भ्वा, आ। १ कम्पनम्। २ गतिः। ग्लेपते। (ऋ) अजिग्लेपत्। ग्लेपितः।

ग्लेव्—ग्लेट्ट (केट्ट) भ्वा, आ। सेवा। ग्लेवते। जिग्लेव। (ऋ) अजिग्लेवत्।

ग्लेष्—ग्लेषृ (गेषृ), भ्वा, आ।

अन्वेषणम्। अनुसन्धानम्, दुर्गा। ग्लेषते, ग्लेषते यः सतां मार्गमिति हलायुधः।

ग्लै—भ्वा, प। हर्षक्षयः। धातुक्षयः।

क्लमः। लट् ग्लायति, न ग्लथति न ग्लायति, मनुः २, ८८। लिट् जग्लौ। जग्लतुः। लुट् ग्लाता। लट् ग्लास्यति। आशिषि, ग्लेयात्, ग्लायात्, पा ६, ४, ६८। लुङ् अग्लासीत्। अग्लासिष्टाम्। अग्लासिषुः। सन् जिग्लासति। यङ् जाग्लायते। जाग्लेति, जाग्लाति। णिच्, (अनुपसर्गस्य) ग्लापयति, ग्लपयति। ग्लपयति कुमुदतीं दिवसः, शकु। (सोपसर्गस्य) प्रग्लापयति। अजिग्लपो वैराणि, भ १५, १८। ग्लपितः। ग्लानः। ग्लास्नुः। ग्लानिः।

(घ)

घघ्—घघ्घ्—गग्घ्—भ्वा, प।

हसनम्। घघति। घग्घति। गग्घति, वो।

घट्—भ्वा, आ। चेष्टा। यत्नः।

लट् घटते। नानभीष्टे घटामहे, भ २०, २४। घटेत सन्ध्यादिषु गुणेषु, भ १२, २६। तथापि पुंविशेषत्वाद् घटतेऽस्य नियन्तृता, पञ्चदशी ६, १०६। भ २२, ३१। लुट् घटिता। लृट् घटिष्यते। न घटिष्ये जीवितुम्, भ १६, २३। लुङ् अघटिष्ट। अघटिषाताम्। अघटिषत। तेन समं योद्धुमघटिष्ट, भ १५, ७१। सन् जिघटिषते। यङ् जाघट्यते। जाघट्टि। णिच् घटयति, पा ६, ४, ८२। अजीघटत्। कर्मणि, घटयिता, घटिता, घाटिता। अघटि, अघाटि। अजीघटत। (नियोगः) मां वक्तुं घटयति, भ १०, ७३। (विधानम्) तद् घटयस्व, भ १२, ५। (योगः) हृदयं तस्य घटयन्नोदमब्रवीत्, भारत। गात्राणि गात्रैर्घटयन्, भ ११, ११। अनेन मेमौ घटयिष्यता, नै १, ४६। घटय जघनमपिधानम्। घटय भुजबन्धनम्। घटय जघने काञ्चीम्, गीतगो ५, १३, १०। ३, १३, २५। अन्यथा घटयिष्यामि, शकु। घटितः। काष्ठघटितवेतालः, हितो। घटनम्। घटना। घटा। घटकः। उत्कण्ठा घटमानषट्पदघटा, दर्पणः। प्र—को विघ्नजनीनेषु कर्मसु प्राघटिष्यत, भ २१, १३। प्रजघटे हृदम, भ १४, ७७। वि—विश्लेषः। भेदः। विजघटे श्लेषैः, भ १४, ६६। मन्त्रिणा पृथिवीपाल चित्तं विघटितं क्वचित् कः सन्धातुमीश्वरः, हितो। दृष्ट्वैव यं विघटते कोषाक्षेपो मृगीदृशाम्। विघाटयति चास्फोटे वैरिणां करिणां घटा, कवि २००। सम्—संघटनम्। योगः।

घट्—(कुप) चु, प। दीप्तिः।

घट, चु, प। १ संघातः। योजना २ वधः। घाटयति कपाटं द्वारि जनः दुर्गा। उद्—उद्घाटनम्। मच्छ्रुष यन्नोद्घाटयामास। द्वारमुद्घाटयामि भारत। कार्यमुद्घाटितं क्वापि मधं

विघटते, द्वितो। कमलवनोद्घाटनं कुर्वते ये। प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिव, भा २, ४६।

घट्—भ्वा, आ। चलनम्।

घट्टते। जघट्टे। घट्टिता। अघट्टिष्ट। अघट्टिषाताम्। अघट्टिषत। घट्ट, चु, प। चलनम्। घट्टयति, घट्टयति मेघो वायुना, दुर्गा। गुञ्जाः करघट्टिताः, भ १४, २। घट्टः। आ—आघातः। आघट्टयामास अग्राङ्गुलिरस्य तूणौ, भा १७, ३८। आघट्टनया नभस्वतः, मा १, १०। उत्—विघातः। अतिक्रमः। उद्घट्टते न कस्यापि धर्मम्। उद्घट्टयति गोष्ठीषु सर्वेषामेव यो गुणान्। कवि १६५। वि—अभिघातः। द्वारं विघट्टयन्, भारत। तदीयमातङ्गघटाविघट्टितैः, भा १, ६४। सम्—सङ्घर्षः। विश्लथं सङ्घट्टयन्नङ्गदमङ्गदेन, र ६, ७३।

घण्—(घृणु), तु, उ। दीप्तिः।

घण्ट्—घटि (कुप) चु, प। दीप्तिः।

घण्टयति। घण्टति। (इ) घण्टयते।

घम्ब्—(कम्ब्), भ्वा, प। हिंसा। गतिः, वो।

घर्व्—(कर्व्) भ्वा, प। गतिः। घर्वति।

घंष्—घषि, (घुषि), भ्वा, आ। अलङ्करणम्। चरणम्, वो। घंषते।

घस्—घस्लृ, भ्वा, प। भक्षणम्।

अयं न सार्वत्रिकः, कौ ७५। लट् घसति। लोट् घसतु। लिङ् घसेत्। लङ् अघसत्। लिटि अस्याप्रयोगः। तत्र (अद्) जघास, पा २, ४, ४०। लुट् घस्ता। लृट् घत्स्यति, पा ७, ४, ४९। लृङ् अघत्स्यत्। आशिषि अस्याप्रयोगः, कौ ७६। लुङ् अघसत्, पा ३, १, ५५। घस्मरः, पा ३, २, १६०।

घंस—घसि, वो। भ्वा, आ।

चरणम्। घंसते। अयं केषिन्न मन्यते, दुर्गा।

घिष्—घुष्—घृष्—घिणि, घुणि, घृणि। भ्वा, आ। ग्रहणम्। घिष्यते। जिघिष्षे। घुष्यते। जुघुष्षे। घृष्यते। नुम् टुत्वञ्च, कौ ५९। घृष्यते न परद्रव्यम्, कवि ६३। जघृष्षे।

घ—घुङ् (उङ्) भ्वा, आ। शब्दः।

घवते।

घुट्—भ्वा, आ। १ परिवर्त्तनम्। गतवतः प्रत्यागमनम्। २ विनिमयः, वो। तु, प। प्रतिघातः। लट् घोटते। घुटति। लिट् जुघोट। जुघुटिथ। जुघुटे। लुट् घोटिता। लृट् घोटिष्यते। लुङ् अघुटत्। अघोटिष्ट। तु घुटिता। घुटिष्यति। अघुटीत्। घोटकः। यस्य व्याघोटते दण्डो नाकृतार्थः कृतस्यन। व्याघुटन्ति विवक्षाश्च यत्सम्मुखमुपागताः। कवि १४६।

घुड्—तु, प, वो। व्याघातः।

घुड़ति। जुघोड़। घुड़िता। अघुड़ीत्।

घुण्—भ्वा, आ। तु, प। भ्रमणम्। घोणते। जुघुणे। घोणिता। अघोणिष्ट। घुणति। जुघोण। घोणिता। अघोणीत्।

घुष्—घुणि (घिणि) भ्वा, आ। ग्रहणम्। घूष्यते। जुघूष्षे। घुषिता।

घुर्—तु, प। १ भीमार्थः। भयानकरसनिमित्तोभावः। २ ध्वनिः। ३ आर्त्तध्वनिः। घुरति व्याघ्रः (मनुष्याणां भयहेतुर्भवति, दुर्गा) जुघोर। घोरिता। अघोरीत्, अघोरीच्च महाघोरम्, भ १५, ६८। जुघुरुर्घोरम्, भ १४, ४०। घोरः।

घुष्—घुषिर्, भ्वा, प। १ विशब्दनम्। प्रतिज्ञानम्। २ शब्दः। ३ वधः, वो। घोषति। नावद्यं घोषति हरि यस्य कथिदुपद्रवम्। घोषयन्ति पुनः सर्वे दीर्घमायुर्ददाश्रितः॥ कवि १४१। जुघोष। जुघुषतुः। घोषिता। घोषिष्यति। (ईर्) अघुषत्। अघोषीत्। घुषिर्—चु, प। १ स्तुतिः। २ विशब्दनम्। कथनम्। आविस्करणम्। नानाशब्दकरणम्, दुर्गा। घोषणा। घोषयति। घोषति। अघुषत्, अघोषीत्। ण्यन्तस्य तु, अजूघुषत्। दुष्यन्त इति घुष्यताम्, शकु ६, १८४। चमूरस्य जयमघोषयत्, र ८, १०। इति घोषयतीव डिण्डिमः, - स्थितो। ज्ञ, घुषितं वाक्यम् (शब्देन प्रकटीकृताभिप्रायम्) घुष्टा रज्जुः। घुष्टौ पादौ, पा ७, २, २३। व्याघुष्टकठिनाङ्गुष्ठः, भ, ५, ५७। आ—घोषणा। सततक्रन्दनम्। आङ्पूर्वो घुषिः क्रन्दसातत्ये इत्याहुः, कौ १७८। आघोषयति। आघोषति शोकार्त्तः (सततं क्रन्दति), दुर्गा। अभिषेच्ये सुतमित्याघोषयन् भूमिपतिः, भ ३, २। उद्—उच्चैर्घुष्टम्। प्रोद्—निनादनम्। क्रन्दिनो प्रोद्घुष्टा क्रौञ्चकुररैः, भारत। वि—घोषणा। विघुष्य इतं चोरैः, मनुः ८, २, ३३। सम्—शब्दः। रामसंघुषितं नैतत्, भ ५, ७५। संघुषितं संघुष्टं वाक्यम्। संघुषितौ संघुष्टौ पादौ, पा ७, २, २८।

घुंष्—घुषि, घसि, घृसि, भ्वा, आ।

कान्तिकरणम्। अलङ्करणम्। घुंषते, घुंषते चन्दनो गात्रम्, दुर्गा। घंसते, पा ७३। घृंसते इति प्रदीपः।

घूर्—घूरी, दि, आ। १ हिंसा। २वयोहानिः। घूर्य्यते। जुघूरे। (ईं) घूर्णः।

घूर्ण्—(घुर्ण्) भ्वा, आ। तु, प, उ, वो। भ्रमणम्। घूर्णति। ०ते। नौर्घूर्णते चपलेव स्त्री। वायुर्घूर्णते भीमः। घूर्णतीव च मे मनः, भारत। घूर्णते शात्रवस्यापि यद्गुणश्रवणाच्छिरः। मित्रोदासीनभूतानां घूर्णतीति किमद्भुतम्॥ कवि २३१। लिट् जुघूर्ण। ०र्णे। जलधिर्जुघूर्ण, राघवपाण्डवीयम्। लुट् घूर्णिता। लृट् घूर्णिष्यति। ०ते। लुङ् अघूर्णीत्। अघूर्णिष्ट। अघूर्णिष्टां क्षतौ, भ १५, १८। घूर्णतो, घूर्णन्तो। घूर्णमानः। घूर्णितः। घूर्णनम्। आ—चक्रवद् भ्रमणम्। आजुघूर्णुर्हरिराक्षसाः, भ १४, ७७।

घृ—(क्ट), भ्वा, प। सेचनम्। घरति। जघार। घर्त्ता। घृ, चु, प। १ सेचनम्। २ आच्छादनम्। ३ प्रस्रवणम्। ४ स्रावणम्। घारयति। अभि—सेकः। मस्तिष्काक्तवसाभिघारितमहामांसाहुतीर्जुह्वताम्, प्रबोधचन्द्रोदयम्। घृतम्। घृणा। घर्मः।

घृण्—घृणु, तना, उ। दीप्तिः। घर्णोति। घर्णुते। (घृणोति। घृणुते)। घृणु, घर्णोति। घर्णुते। घृण, वो, घर्णोति। घर्णुते। (उ) घर्णित्वा, घृत्वा। घृतः। घृणिः।

घृष्—घृणि (घर्णि), भ्वा, आ। ग्रहणम्।

घृष्—घृषु, भ्वा, प। सङ्घर्षः। घर्षणम्। हिंसा इत्येके। घर्षति चन्दनं लोकः दुर्गा। जघर्ष। जघृषतुः। घर्षिता। अघर्षीत्। (उ) घर्षित्वा, घृष्ट्वा। घृष्टः। घर्षणम्। घृष्टं घृष्टं त्यजति न पुनश्चन्दनं चारुगन्धः। उद्—

जङ्घे घर्षणम्। चूडामणिभिरुद्दृष्टपादपीठं मङ्गोचितम्, र १७, १८।

घोर्—घोर्क्ष, भ्वा, प।

गतिचातुर्थ्यम्। घोरति। घोर्क्ष, "घोरति"।

घ्रा—भ्वा, प। आघ्राणम्।

गन्धग्रहणम्। लट् जिघ्रति, पा ९, ३, ७८। दीपनिर्वाणगन्धञ्च न जिघ्रन्ति गतायुषः, स्मृतिः। लिट् जघ्रौ। जघ्रतुः। जघ्रिथ, जघ्राथ। जघ्रिव। लुट् घ्राता। लृट् घ्रास्यति। आशिषि, घ्रायात्, घ्रेयात्, पा ६, ४, ६८। लुङ् अघ्रात्, अघ्रासीत्, पा २, ४, ७८। अघ्रासाम्, अघ्रासिष्टाम्। अघ्रुः, अघ्रासिषुः। सन् जिघ्रासति। यङ् जेघ्रीयते, पा ७, ४, ३१। जाघ्रेति। जाघ्राति। जाघ्रीतः। णिच् घ्रापयति। अजिघ्रपत्, अजिघ्रिपत्, पा ७, ४६। अजिघ्रपन्न्यानोषधीः, भ १५, १०८। घ्रा, घ्राणम्, घ्रातम्, पा ८, २, १६। मनोजिघ्रः सपत्नीजनः, काव्यप्रकाशः। अव, आ, उप—आघ्राणम्। अवजिघ्रेच्च तान् पिण्डान्, मनुः ३, २१८। आघ्राय गन्धम्, रत्ना ३, ५७। आघ्रायि गन्धवहस्तेन, भ २, २०। आजघ्रुर्मूर्ध्नि बालान् चुचुम्बुश्च, भ १४, १२। आमोदमुपजिघ्रन्तो, र १, ४४। मूर्ध्नि तमुपजघ्रौ, र १२, ९०।

(ङ)

ङु—ङुङ् (उङ्), भ्वा, आ। शब्दः।

लट् ङवते। लिट् जुङुवे। लुट् ङोता। लुङ् अङोष्ट। सन् जुङूषते, पा ७, ४, ६२। यङ् जोङूयते।

(च)

चक्—भ्वा, आ, उ, वो। १ व्यक्तिः। २ प्रतिघातः। चकति। °ते। लिट् चचाक। चेके। लुट् चक्किता। लुङ् अचक्किष्ट। णिच् (व्यक्तौ) चकयति, घटादिः। (प्रतिघाते) चाकयति, कौ ८३। क्त, चकितम्। चकोरः।

चकास्—चकास्, अदा, प। दीप्तिः।

लट् चकास्ति। चकास्तः। चकासति, अमरास्चकासति, भ १८, २४। चिराय तस्मिन् कुरवश्चकासति, भा १, १७। लिङ् चकास्यात्। हि चकाधि। चकाशीति केचित्। लङ् अचकात्। अचकाद्, पा ८, २, ७४। लिट् चकासिता। लृट् चकासिष्यति। लुङ् अचकासीत्। अचकासिष्टाम्। अचकासिषुः। सन् चिचकासिषति। णिच्—चकासयति। अचीचकासत्, पा ७, ४, २। अचचकासत्, वो। तं दीप्तिवितानकेन चकासयामासतुः, मा ३, ६। चकासतं चारु चमूरुचर्मणा, मा १, ८।

चक्—चिक्—चुक्—चु, प।

व्यथनम्। चक्कयति। चिक्कयति। चुक्कयति।

चक्ष्, चक्षिङ्, अदा, आ। १ कथनम्।

२ दर्शनम्। लट् चष्टे। चक्षाते। चक्षते। चक्षे। चक्ष्वहे। लिङ् चक्षीत। लङ् अचष्ट। अचक्षाताम्। अचक्षत। लिट् चख्यौ, चकशौ, पा २, ४, ५५। चक्षे, चक्ष्शे, चक्षाते। लुट् ख्याता, क्ष्याता, पा २, ४, ५४। लृट् ख्यास्यति। °ते। क्ष्यास्यति। °ते। आशिषि, ख्यायात्, क्ष्यायात्, क्ष्येयात्। लुङ् अख्यत्, अक्ष्यासीत्। अख्यताम्, अक्ष्यासिष्टाम्। अख्यन्, अक्ष्यासिषुः। अख्यत, अक्ष्यास्त। कर्मणि, ख्यायते। क्ष्यायते। आ—कथनम्। लक्षणम्:

चक्ष, भ ६, २०। जगतामग्रणी भृशमाचचक्षिरे, भा ११, २५। युवमाचक्षाथाम्, भ ६, ८२। न चाचक्षीत कस्यचित्, मनुः ४, ५८। प्रत्या—प्रत्याख्यानम्। अस्वीकारः। गुरुपत्नीति कृत्वाऽहं प्रत्याचक्षे न दोषतः, भारत। व्या—व्याख्या। विवरणम्। मेधातिथिगोविन्दराजौ तु इति व्याचक्षाते, मनुटीका १०, ११३। प्र, परि—कीर्त्तनम्। कथनम्। तं देशं ब्रह्मावर्त्तं प्रचक्षते, मनुः, २, १७। हिरण्यपूर्वं कश्यिपुं प्रचक्षते, मा १, ४२। सम्—वर्ज्जनम्। अस्मिन्नर्थे क्शाञ्ङादेशो न स्यात्। समचक्षिष्ट। सञ्चक्ष्या दुर्जनाः। विचक्षणः। मृचक्षसो राक्षसा इत्यादयोऽपि।

चघ्—स्ना, प। बधः, वो।

चघ्नोति। अयं वैदिक इति कश्चित्।

चच्च्—चन्चु, भ्वा, प। गतिः।

चच्चति। चचच्च। चच्चिता। चच्चात्। अचच्चीत्। चच्चिङ चच्चन्ति वाताः, छन्दोमञ्जरी १९, १। चच्चद्भुजभ्रमितचण्डगदा—' वेणीसंहारम्। विषीदति गोदिति चच्चति, गीतगो ४, ८। चच्चित्वा, चच्चा, चच्चः।

चट्—चटे (कटे), भ्वा, प। १वर्षणम्।

२ आवरणम्। ३भेदः, वो। चटति। (ए) अचटीत्। चट्, चु, प। भेदनम्। २ बधः, वो। चाटयति। उद्—उच्चाटनम्। अपसारणम्। उच्चाटनीयः करतालिकानां दानादिदानीं भवतीभिरेषः, नै ३, ७।

चण्—भ्वा, प। १ दानम्।

२ शब्दः, वो। चणति। चचाण। चेणतुः। चणिता। अचणीत्, अचाणीत्। चिचणिषति। चच्चण्यते। चच्चणिष्ट। चणयति, घटादिः। (गमनहिंसयोः) चणयति, चाणयति। अचीचणत्, अचचाणत्, वो। चन्, वो। चनति। चणकम्।

चण्ड्—चडि, भ्वा, चु, आ। कोपः।

चण्डते। चण्डयते। ० ति, वो। चण्डः। चण्डी। चण्डालः।

चत्—चद्—चते, चदे, भ्वा, उ।

याचनम्। चतति। ० ते। चचात। चेते। चतिता। चतिष्यति। ० ते। (ए) अचतीत्। अचतिष्ट। चद्, चदति। ० ते। चत्वारः।

चन्—(चण्), भ्वा, प, वो।

दानशब्दयोः। चनति।

चन्द्—चदि, भ्वा, प। १ आह्लादः।

२ दीप्तिः, वो। चन्दति। चचन्द। चन्द्रः। चन्दनः। छन्दः।

चप्—भ्वा, प। साम्त्वनम्।

२ उपशमः, वो। चपति। चचाप। चेपतुः। चपिता। चप् (चह्), चु, प। १ शाठ्यम्। २ चूर्णीकरणम्, वो। चपयति, घटादिः।

चम्—चमु, भ्वा, प। भक्षणम्।

चमति। चचाम। चेमतुः। चचाम मधु माध्वीकम्, भ १४, ९४। मांसं चेमुः, भ १४, ५३। चमिता। चमिष्यति। अचमीत्। चिचमिषति। चच्चम्यते। चच्चन्ति। चामयति। अचचामत्। (उ) चमित्वा, चान्त्वा। चान्तः। आ—आचमनम्। उपस्पर्शः। भक्षणम्। आचामति, पा ७, १, ७५। आचामेत्। विचमति। विराचामेदपः, मनुः २, ६०। अनुष्णाभिरफिराचामेत्, मनुः २, ६१। मण्डमाचामति यतः, उत्तर १३२। वायुराचामति खेदज्ञवान्

सुखे ते, र ८, ६८। ११, १०। समा—संहारः। महेषुजालानि अर्कः पयांसीव समाचचाम, भा १७, ३५।

चम्प्—चपि, चु, प। गतिः।

चम्पयति। चम्पति।

चम्ब्—(कम्ब्) भ्वा, प। हिंसामत्योः।

चय्—(अय्) भ्वा, आ। गतिः।

चयते। चेये। चयिता। अचयिष्ट।

चर्—भ्वा, प। १ गतिः। भ्रमणम्। २भक्षणम्। ३आचरणम्, वो। आ—सेवा। लट् चरति। शम्बूको नाम तपश्चरति, उ तर ४०। लिट् चचार। चेरतुः। चचाराश्रमपर्य्यन्ते हरिणानि, भारत। चेरतुः खरदूषणौ, भ ५, १। चेरुर्हविष्यं भुञ्जानाः कात्यायन्यर्चनव्रतम्, भागवतम्। लुट् चरिता। लृट् चरिष्यति, परिवादस्ते महाँल्लोके चरिष्यति, रामा। लुङ् अचारीत्। अचारिष्टाम्। अचारिषुः। सन् चिचरिषति। यङ् (भावगर्हायाम्) चञ्चूर्य्यते पा ७, ४, ८७, ८८। चञ्चूर्त्तिः। चञ्चूर्य्यन्तेऽभितो लङ्काम्, भ १८, २५। णिच् चारयति। अचीचरत्। चर्, चु, प। संशयः। असंशयः, वो। विचारयति यो धर्ममिति हलायुधः। चरित्वा। चरितम्। चूर्त्तिः, पा ७, ४, ८८। चरणम्। चरितव्यम्। चर्य्यम्। चरित्रम्। चरिष्णुः। चरः। चारः। चरणः। चर्म। अति—अतिचारः। अतिक्रमय्य गमनम्। लङ्घनम्। अतिचारं गते जीवे, ज्योतिषम्। अनु—अनुगमनम्। सहगमनम्। अप—मन्दाचरणम्। अभि—अभिचारः। अतिक्रमः। मारणम्। ध्येनेनाभिचरन्। पतिं या नाभिचरति, मनुः, ५, १६५। व्यभि—व्यभिचारः। व्यभिचचार न तापकरोऽनलः, नै। आ—आचरणम्। यद् यदाचरति श्रेष्ठः, गी ३, २१। जानन्नपि हि मेधावी जड़वल्लोक आचरेत्, मनुः, २, ११०। विप्रान् शूद्रवदाचरेत्। समा—अनुष्ठानम्। करणम्। स्नानं समाचरति चारु नदीप्रवाहे, स्मृतिः। उद्—उदयः। कुम्भपूरणभव उच्चचार निनादः, र ८, ७४। तूर्य्यध्वनिरुदचरत्, र १६, ८७। समुच्चरच्चारुपतत्रिशिञ्जितम्, भ २, २४। मुरुवचनमुच्चरते (उल्लङ्घ्य गच्छति), पा १, ३, ३३। पयः स्रोवा उदचरन्त, भ ८, ३१। मघोनि दिवमुच्चरमाणे, नै ५, ४८। उच्चरेत् (मूत्रपुरीषोत्सर्गं कुर्य्यात्), मनुः ४, ४८। णिच् उच्चारणम्। मुखसहितनासिक्योच्चार्य्यमाणोऽनुनासिकः, पा १, १, ८। उप—उपचारः। पूजा। भजनम्। सेवा। सुग्रीवविभीषणादीनुपाचरत्, र १४, १०। ४, ५२। एनमुपाचरत्, र ५, १२। उपचर्य्यः स्त्रिया देववत् पतिः, मनुः ५, १४५। गिरिप्रमुपचचार सा, कु १, १६१। परि—परिचर्य्या। सेवा। शुश्रूषा। गुरुं परिचरेत्, मनुः २, २४३। प्र—प्रचारः। तावद्रामायणकथा लोकेषु प्रचरिष्यति, रामा। वि—विचरणम्। भ्रमणम्। व्यचारीन्निरङ्कुशः, भ १५, ८६। विचचार दावम्, र २, ८। हंसं विचरन्तमन्तिके, नै १, ११७। णिच्, मीमांसा। अवधारणम्। सर्वेषां गुणदोषौ विचारयेत्, मनुः ७, १७८। विचारयति यो धर्मं विहङ्गिन्नाह्मणैः सह। विचारयत्यस्य लोके यावच्चन्द्रोज्ज्वलं यशः॥ कवि १२५। सम्—गमनम्। सङ्क्रमणम्। रथेन सञ्चरते, पा १, ३, ५४। यानैः समचरन्तान्ये समचारीदशङ्कितः,

भ ८, ३२, ३६। क्वचित् पथा सञ्चरते सुराणाम्, र २३, १९। सञ्चारयामास जरां पुत्रे, भारत। सञ्चारिते धूपे, र ६, ८। यूथानि सञ्चार्य्य द्विपेन्द्रः, शकु ५, ९।

चर्च्—भ्वा, तु, प। १परिभाषणम्। कथनम्। २ तर्जनम्। भर्त्सनम्। चर्चति। अचर्चत्। अचर्चीत्। अचर्क्षीत्। अचर्क्षीत्। चर्च्, चु, प। अध्ययनम्। अनुशीलनम्। चर्चयति वेदं विप्रः, दुर्गा। (अनुलेपनम्) चन्दनचर्चितनीलकलेवर, गीतगो १, ४०। चर्चितः। चर्चा। मृगमदकृतचर्चा, छन्दोमञ्जरी १५, ४। चर्चरी। चार्चिक्यम्। अर्भरः।

चर्ब्—(कर्ब्) भ्वा, प। गतिः। चर्बति।

चर्ब्—भ्वा, प। अदनम्। चर्वणम्। चर्वति। चचर्व। चर्वितः। अचर्वीत्। चर्व्, चु, प, वो। चर्वणम्। चर्वयति। चर्वति। रथं वक्त्रे निक्षिप्य दशनैश्चर्वयति, चण्डी।

चल्—भ्वा, प। १कम्पनम्। अस्थैर्य्यम्। २ गतिः, वो। चल्, तु, प। विलासः। क्रीड़नम्। लट् चलति, न चलति खलु वाक्यं सज्जनानाम्। स्वधर्म्मान्न चलन्ति, मनुः ७, १५। चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान्, हितो। चल सञ्चि कुञ्चम्, गीतगो ५, ११। लिट् चचाल। चेलतुः। क्षिप्ताश्चेलुः क्षणं भुजाः, भ १४, ४०। लुट् चलिता। लृट् चलिष्यति। लुङ् अचालीत्। अचालिष्टाम्। अचालिषुः। सपक्षोऽद्रिरिवाचालीत्, भ १५, १४। सन् चिचलिषति। यङ् चाचल्यते। चाचलति। णिच् (कम्पने घटादिः) चलयति। तरून् चलयन् शनैः, भ ८, ६०। चलयन् भृङ्गचक्षुर्वालकान्, र ८, ५४। शोलं चालयति (अन्यथा करोति)। सूत्रं चालयति (क्षिपति)। चालयति हस्तिनं यन्त्रा, दुर्गा। गोपालो दण्डेन पशुगणान् चालयन्। चालयन् सकलां पृथ्वीमिति चालशब्दाण्णिच्। चल्, चु, प। पोषणम्। चालयति। चलित्वा। चलितः। चलनम्। चलः। चालः। चालकः। तु, चलतो, चलन्तो। प्रहृष्टमना मृगान्तिकं चलितः, हितो। उद्—प्रस्थानम्। स्थितः स्थितामुच्चलितः प्रयाताम्, र २, ६। उच्चचाल बलभित्सखः, भ ११, ५१। प्र—गमनम्। कम्पः। प्रसिद्धिः। रोषात् प्रचलितो नृपतिसागरः, भारत। वि—स्खलनम्। च्युतिः। अस्थैर्य्यम्। क्षोभः। व्यचालीदम्भसां पतिः, भ १५, ७०। धर्म्माद्विचलितं नृपं हन्ति, मनुः ७, २८। तं धर्म्मं न विचालयेत्, मनुः ८, १३। सम्—णिच्, सञ्चालनम्। सञ्चालयामि नलिनीदलतालवृन्तम्, शकु ३, १२८।

चष्—भ्वा, उ। भक्षणम्।

ष, वो। बधः। चषति। ०ते। चषकः। चषालः। चाषः।

चह्—भ्वा, चु, प। परिकल्कनम्। शाठ्यम्। प्रतारणा। चहति। चचाह। चहिता। अचहीत्। चहयति, घटादिः। अचीचहत्। चह, चु, प। अदन्तः। १ दम्भः। २ शाठ्यम्। चहयति। अचचहत्।

चाय्—चायृ, भ्वा, उ। १ पूजा। अर्चना। २ चाक्षुषज्ञानम्। चायति। ०ते। चचाय। ०ये। तं पर्वतोयाः प्रमदाश्चचायिरे भा १२, ५१। चायिता। अचायीत्। अचायिष्ट। चिचायिषति।

•ते। चेकीयते, पा ६, १, २१। चेकीयीति, चेकेति। चेकीतः। (ऋ) अचचायत्। शम्भुं न च ते निचायितुमभिप्रसेहिरे (द्रष्टुम्), भा १२, १८। अपचितिः, की ४४९। अपचितः। अपचायितः, पा ७, २, ३०।

चि—चिञ्, भ्वा, उ, वो। सञ्चयः। चिञ्, स्वा, उ। चयनम्। राशीकरणम्। लट् चयति। •ते। हृत्वं पुष्पं चिनोति। चिनुते। चिन्वते। लिङ् चिनुयात्। लङ् अचिनोत्। अचिनुताम्। अचिन्वन्। अचिनुत। लिट् चिकाय, चिचाय, पा ७, ३, ५८। चिकेथ, चिकयिथ। चिक्ये, चिच्ये। लुट् चेता। लृट् चेष्यति। •ते। आशिषि, चीयात्। चेषीष्ट। लुङ् अचैषीत्। अचैष्टाम्। अचैषुः। अचेष्ट। अचेषाताम्। अचेषत। भूमावचैषुस्तान् हतान्, भ १५, ७६। कर्मणि, चीयते। चायिता। चायिष्यते। चायिषीष्ट। अचायि। अचायिषत। राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते, काव्यप्रकाशः। सन् चिकीषति। •ते। चिचीषति। •ते, पा ७, ३, ५८। यङ् चेचीयते। चेचयीति, चेचेति। णिच् चापयति, चाययति, पा ६, १, ५४। चिञ्, चु, उ, प, वो। चयनम्। चययति। •ते। चाययति। •ते। चपयति। •ते, पा ७, ३, ३६। चितः। चेयः, पा ३, १, ९७। चेतव्यः। चयः। चयनम्। चिन्वन्। चिन्वानः। परराष्ट्राणि नैषधं चिन्वन्तः, भारत। कायः। निकाय्यः। अग्निचित्। अप—अपचयः। हानिः। चयः। पूजा। णिच् अपचितः, अपचायितः, पा ७, २, ३०। अपचितमपि गात्रम्, शकु २, ३४। अपचितद्विषः (अपचितानां पूजितानां द्विषः), भ ९, २२। पूजा नमस्यापचितीत्यमरः। अव—चयनम्। अवचिन्वाना कुसुमानि हृष्टान्, भ ६, १०। अवचितबलिपुष्पा सा, कु १, ६०। आ—व्याप्तिः। आच्छादनम्। सञ्चयः। संग्रहः। आचिनोद् भूमिं हतैः, भ १७, ६९। आचिचाय शरैः सेनामाचिकाय च राघवौ, भ १४, ४६। आचिक्षाते तौ पन्नगैः, भ १४, ४७। उद्—चयनम्। उच्चिक्षिरे पुष्पफलं वनानि, भ ३, २८। उच्चयः। उप—उपचयः। वृद्धिः। उपाचायिष्ट सामर्थ्यं तस्य, भ ९, ३३। अधोऽधः पश्यतः कस्य महिमा नोपचीयते, हितो। यशस्तोमानुच्चैरुपचिनु, अनर्घ १४। महिमानमुपचिनोति, अनर्घ ३१। नि—निचयः। व्याप्तिः। निचितं खमुपेत्य नीरदैः, घटकर्परः १। परिणिचिनोति, पा ८, ४, १७। निर्—निश्चयः। अभिधेयं न निश्चिनोमि, अनर्घ ७०। न निश्चिकाय चन्द्रम्, भ १०, ६७। निरचायि भेदो नौषधीनां तेन, भ १५, १०७। परि—परिचयः। अभ्यासः। परिचेतुमुपांशु धारणाम्, र ८, १८। प्र—प्रचयः। व्याप्तिः। वृद्धिः। पुष्पैः प्रचितान् गोष्ठान्, भ २, १४। प्रचीयमाना सा, र ३, ७। वि—सञ्चयः। चिन्ता। अन्वेषणम्। विष्णुं विचिन्वन्ति योगिनो मुक्तये, र १०, २३। त्वयि धृतासवस्त्वां विचिन्वते, भागवतम्। सम्—सञ्चयः। सञ्चिकाय तपः, र १९, २। तपः प्रत्यहं सञ्चिनोति, शकु २, ९४।

चिक्—(चक्) चु, प। पीड़नम्।

चिट्—भ्वा, चु, वो, प। परिष्वङ्गः। चेटति। चेटयति। चेटः। चेटी।

चित्—चितो, भ्वा, प । १ संज्ञानम् । जागरणम् । २ ज्ञानम् । लट् चेतति । अविद्यानिद्रयाक्रान्ते जगत्येक: स चेतति, कवि १२६ । नेषूनचेतन्नस्यन्तम्, भ १७, १६ । लिट् चिचेत । चिचितु: । चिचेतिथ । चिचेत रामस्तत्क्षत्रक्षयम्, भ १४, ६२ । तद् यातुधानैश्चिचिते, भ २, २८ । लुट् चेतिता । लृट् चेतिष्यति । लुङ् अचेतीत् । अचेतिष्टाम् । अचेतिषु: । नाचेतीत्तान्, भ १५, ३८ । एवं तैऽचेतिषु: सर्वे (संज्ञां लब्धवन्त:), भ १५, १०८ । सन् चिचितिषति, चिचेतिषति । यङ् चेचित्यते । चेचेत्ति । णिच् चेतयति । यावदु राज्ञस्यचेतयन्ति न (प्रतिबुध्यन्ते, स्वार्थे णिच्), भ ८, १२३ । चित्, चु, आ । १ सञ्चेतनम् । संवेदनम् । ज्ञानम्, वो । चेतयते, धिया चेतयते सर्वं परस्य हृदये स्थितम्, कवि १२६ । सर्वे राजानं चेतयध्वम्, अनर्घ १०८ । अचीचितत । चितित्वा, चेतित्वा, पा १, २, २६ । (नृ) चित्तम् । चेतन: । चेतना । चित् । चेत: ।

चित्र—अदन्त: । चु, प ।
१ चित्रीकरणम् । आलेख्यकरणम् । २ अक्षिकेक्षणम् । कदाचिद्दर्शनम् । ३ अद्भुतदर्शनम्, वो । चित्रयति । चित्रापयति । चित्रयति प्रतिमां लोक: । चित्रयति राडुं लोक: (कदाचित् पश्यति), दुर्गा । चित्रैश्चित्रयति व्योम, कवि १५३ । क्रौञ्चपदालीचित्रिततीरा, छन्दोम २५, २ । वाग्देवताचरितचित्रितचित्तसद्मा, गीतगो १, २ ।

चिन्त्—चिति, चु, प । स्मृति: । चिन्ता । चिन्तयति । चिन्तति । यां चिन्तयामि सततं मयि सा विरक्ता, नीतिशतकम् २ । विद्यामर्थञ्च चिन्तयेत्, हितो । सुग्रीवोऽचिन्तयत् कपि:, भ ६, ८६ । लिट् चिन्तयामास । लुट् चिन्तयिता । लृट् चिन्तयिष्यति । लुङ् अचिचिन्तत् । चिन्तयित्वा । ०चिन्त्य । चिन्तित: । चिन्तनम् । चिन्ता । परि, वि, सम्—अत्यन्तचिन्ता । ध्यानम् । स्मरणम् । विचिन्तयन्ती यमनन्यमानसा, शकु ४, १८ । विचिन्तयन्त्या भवदापदम्, भा १, ३७ ।

चिल्—तु, प । वसनम् ।
चिलति । चिचेल । चेलिता । चेलम् ।

चिल्ल्—भ्वा, प । १ शैथिल्यम् । २ भावकरणम् । ह्रावकरणम् । चिल्लति । चिल्ल: । चिल्ली ।

चीक्—(श्रीक्) चु, प । आमर्शनम् । स्पर्श: । चीकयति । चीकति । चन्द्रावतीतरङ्गार्द्रांश्चीकयन्ति च यदृप:, हलायुध: । भट्टमल्लस्तु मर्षणे इति मूर्धन्यषमध्यं पठित्वा क्षमार्थमाह, दुर्गा ।

चीव्—(चीव्) ।

चीभ्—चीभृ—(श्रीभृ) भ्वा, आ । कत्थनम् । श्लाघा । प्रशंसा, वो । चीभते । चिचीभे । चीभिता । (ऋ) अचिचीभत् । ओष्ठावकारादिरयमित्येके, दुर्गा ।

चीव्—चीव्, चीव्, वो, चीव, भ्वा, उ । १ आदानम् । २संवरणम् । चीवति । ०ते । चीवति । ०ते । चिचीव । ०वे । पवर्गतृतीयान्तोऽप्ययम् । (ऋ) अचिचीवत् । चीव्, चु, प । दीप्ति: । चीवयति ।

चुक्—(चक्) चु, प । पीड़ा ।

चुच्—(शुच्) भ्वा, प । अभिषव: ।

चुट्—तु, चु, प । छेदनम् ।
चुटति । चोटयति । चुचोट । चुटिता । अचुटीत् । चुट्—भ्वा, प, वो ।

अव्ययीभावः। चोटति नदी ग्रीष्मे, दुर्गा। अव्ययीभाव इति प्रदीपः।

चुट्—चु, प। अल्पीभावः। चुट्यति।

चुड्—तु, प। संवरणम्।

चुडति। चुचोड। चुडिता। अचुडीत्।

चुड्ड्—(चुदड्) भ्वा, प। भावकरणम्। अभिप्रायसूचनम्। चुड्डति। क्विप् चुत्।

चुण्—तु, प, वो। छेदनम्।

चुणति। चुचोण। चुणिता। अचुणीत्।

चुण्ट्—चुण्ड्, चुटि, चुडि, भ्वा, प। अल्पीभावः। अव्ययीभावः। चुटि, चुडि, चु, प। छेदनम्। चुडि, वो, भ्वा, आ, चु, प। रोषः। चुण्टति। चुण्टयति। चुण्टति। चुण्डति। चुण्डयति। चुण्डति। °ते।

चुत्—च्युतिर् (च्युतिर्) भ्वा, प।

चुद्—चु, प। प्रेरणम्। क्षेपणम्। चालनम्। नियोगः। प्रश्नः। चोदयति। अचचुदत्। चोद्यमानः सिस्रक्षया, मनुः १,७५। अथैनमब्रवीच्चोदितः। तान् वधे मातुरचोदयत्। चोदयामास तं सभा वै क्रियतामिति। शिष्यान् समानीयाचार्य्योऽर्थमचोदयत्, भारत। चोदितः। चोद्यम्। चोदना। प्र, सम—प्रेरणम्। कथनम्। परिवेषयेत प्रयतो गुणान् सर्वान् प्रचोदयन्, मनुः ३ २२८। सञ्चोदयामास ग्रीघ्रं याहीति सारथिम्, रामा।

चुन्द्—(बुन्द्)।

चुप्—भ्वा, प। मन्दगमनम्।

अनैर्गतिः। चोपति। चोपिता।

चुम्ब्—चुबि, भ्वा, प। चुम्बनम्। लट् चुम्बति, स्निष्यति कामपि चुम्बति आलिङ्गति, गीतगो १, ४४। नीतिवर्त्मं चुम्बतु मल्लिकाम, हितो। लिट् चुचुम्ब, चारु चुचुम्ब नितम्बवती दयितम्। गीतगो १।४३। चुचुम्बुश्च सुतप्रियाः, भ १४, १२। प्रियामुख किम्मुरुषश्चुचुम्बे। व्यतिहारे नङ्, दुर्गा। कु ३, ३८। लुट् चुम्बिता। लुङ् अचुम्बीत्। अचुम्बिष्टाम्। अचुम्बिषुः। चुबि, चु, प। चुम्बनम्। चुम्बयति। चुम्बितम्। चुम्बनम्। चूड़ाचुम्बितकङ्कपत्रम्, महाना २, ३। उदयाचलचुम्बिबिम्बं चकास्ति, काव्यप्रकाशः।

चुर्—चु, प। स्तेयम्। चौर्य्यम्।

लट् चोरयति, पा ३,१,२५। चोरति, वो। कर्त्तृगामिनि फले तु आत्मनेपदम्। चोरयते, पा १, ३, ७४। यस्मिंश्चोरयेद् गृहाद्, मनुः ८, ३, ३३। लिट् चोरयामास। लुट् चोरयिता। लृट् चोरयिष्यति। आशिषि, चोर्य्यात्। लुङ् अचूचुरत्, पा ३, १, ४८। अचुचुरच्चन्द्रमसोऽभिरामताम्, मा १, १६।

चुल्—चु प। उन्नतिः। चोलयति।

चुलुम्प्—भ्वा, प। सौत्रधातुः।

लोपः। चुलुम्पति। चुलुम्पाञ्चकार।

चुल्ल्—भ्वा, प। १ अभिप्रायसूचनम्। २ हावकरणम्। विलासः। चुल्लति। चुचुल्ल। चुल्लिता। चुल्लन्ति चारुनयनाश्च सह प्रियेण, कवि ४७। चुल्ली।

चुष्—चु, प। सङ्कोचः।

चूषयति चक्षुः (सङ्कुचितं स्यात्), दुर्गा।

चूर्—चूरी, टि, भा। दाहः।

चूर्य्यते, चूर्य्यते चौरवृत्तीन् यः, कवि ८८। चुचूरे। चूरिता। (ई) चूर्णः

चूर्ण्—चु, प। १ पेषणम्। चूर्णीकरणम्। २ प्रेरणम्। चूर्णयति चूर्णयत्यरिमण्डलं यः, कवि८८। अचु

चूर्णत्। अश्मवर्षमचूर्णयं शरजालैः, भारत। चुर्णितैरुत्तमाङ्गैः, गीतगो ११, २७। तान् प्राचुचूर्णत् पदाभ्याम्, भ १५, ३६।

चूष्—भ्वा, प। पानम्।

चूषति। चुचूष। चूषिता। अचूषीत्। तत्तदा चूषति, अनर्घ १५४।

चृत्—चृतो, तु, प। १ हिंसा। २ ग्रन्थनम्। लट् चृतति। लिट् चचर्त्त। चचृततुः। लुट् चर्त्तिता। लृट् चर्त्तिष्यति, चर्त्स्यति. पा ३, २, ५७। चर्त्स्यन्ति बालहत्यान्, भ १६, २०। लृङ् अचर्त्तिष्यत्, अचर्त्स्यत्। लुङ् अचर्त्तीत्। अचर्त्तिष्टाम। अचर्त्तिषुः। सन् चिचर्त्तिषति। चिचृत्सति। यङ् चरीचृत्यते। चरीचर्त्ति। णिच् चर्त्तयति। अचीचृतत्, अचचर्त्तत्। चृत्, चु, प, वो। सन्दीपनम्। चर्त्तयति। चर्त्तति। (ई) चृत्तः।

चृप्—चु, प। सन्दीपनम्।

चर्पयति। चर्पति।

चेल्—चेल्ल (केल्ल) भ्वा, प।

१ गतिः। २ कम्पः, वो। चेलति। (ऋ) अचिचेलत्। चेल्ल्, चेल्लति, वो। चेलम्।

चेष्ट्—भ्वा, आ। चेष्टा। यत्नः। व्यापारः। परिस्पन्दनम्। लट् चेष्टते, यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्, मनुः १, ५२। सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि, गीतगो ३, ३३। वृष्ट्यर्थं नातिचेष्टेत, हितो। लिट् चिचेष्टे। लुट् चेष्टिता। लृङ् अचेष्टिष्ट। अचेष्टिषाताम्। अचेष्टिषत। णिच् चेष्टयति। अचिचेष्टत्, अचचेष्टत्, पा ७, ४, ८६। योद्धुमचिचेष्टद्राघवौ, भ १५, ६०। चेष्टितम्। चेष्टनम्। चेष्टा। तं शोणितपरीताङ्गं चेष्टमानं महीतले। वि—परिस्पन्दनम्। सिन्धुतीरविचेष्टनैः, र ४, ७०।

च्यु—च्यु ङ्, भ्वा, आ। गमनम्। पतनम्। च्युतिः। भ्रंशः। क्षरणम्। च्यवते। उत्पद्यन्ते च्यवन्ते, मनुः १२, ८६। चुच्युवे। च्योता। च्योष्यते। अच्योष्ट। अच्योषाताम्। अच्योषत। अच्योष्ट सत्त्वान्नृपतिः, भ १, २०। चुच्यूषते। चोच्यूयते। चोच्यवीति। च्यावयति। अचिच्यवत्, अचुच्यवत्। चिच्यावयिषति, चुच्यावयिषति, पा ७, ४, ८१। च्यु, चु, प। १ हासः। सङ्घनम्। च्यावयति। रक्षामरक्षुव्रतम् भ ८, ७१। च्युतो विधिः, र २, ४३। रतिच्युता, र ८, ६७। क्षतभार्य्ये च्युते राज्यात् रामे, भ ७, ८३। प्र—भ्रंशः। स्रावः। गर्भप्रच्युतिदोषेण, भारत। स्वर्गात् प्रच्यवेत, स्मृतिः।

च्युत्—चुत्, च्युतिर्, चुतिर्, भ्वा, प। आसेचनम्। ईषदार्द्रीकरणम्। सर्वतआर्द्रीकरणम्। क्षरणम्, वो। लट् च्योतति। च्योतति घृतं वह्नौ यज्वा, दुर्गा। लिट् चुच्योत। चुच्युततुः। लुट् च्योतिता। लृट् च्योतिष्यति। लुङ् (इर्) अचुच्युतत्, अच्योतीत्, पा ३, १, ५७। अचुच्युताम्, अच्योतिष्टाम्। अचुच्युतन्, अच्योतिषुः। शोणितं सम्प्रहारेऽच्युतत्, भ ६, २८। सैन्यमच्युतत् रक्तम्, भ १५, ११४। इदं कवचमच्योतीत्, भ ६, २८। सन् चुच्योतिषति, चुच्युतिषति। यङ् चोच्युत्यते। चोच्योत्ति। णिच् च्योतयति। अचुच्युतत्।

च्युत्, चोतति। चुचोत। चोतिता। अचुतत्, अचोतीत्।

(च्युष्)—(च्यु) चु, प। १त्यागः। २ सहनम्। ३हसनम्। च्योसयति।

——

(छ)

छद्—चु, उ। अपवारणम्।

आच्छादनम्। गोपनम्। छादयति। ०ते। छदति। ०ते। स तं शरैश्छादयन्, भ ६, ५८। छादितः, छन्नः, पा ७, २, २७। छन्नोऽभ्रेण चन्द्रमाः, भारत। अद्रीन्द्रं तुङ्गशैलतरुच्छन्नम्, भ ६, ८३। जर्जनं घटादिः। छद अपवारणे इति चौरादिकस्य घटादावयमनुवादः। छदयति पुत्रं पिता (बलवन्तं प्राणवन्तं वा करोति) अन्यत्र छादयति (अपवारयति) स्वार्थणिचि तु, छादयति (बलीभवति, प्राणीभवति, अपवारयति वा)। छद, चु, प। अदन्तः। संवरणम्। अपवारणम्। छदयति, छदयति सुरलोकं यो गुणैर्यश्च युद्धे सुरयुवतिविमुक्ताश्छादयन्ति स्वजस्र, कवि १६। अव, आ, प्र—आच्छादनम्। संवरणम्। शरजालैः प्रच्छन्नं विन्ध्यम्, भ ७, ५२। सीतां दिदृक्षुः प्रच्छन्नः, भ ८, ४३। व्याधो जालं विस्तीर्य्य प्रच्छन्नो भूत्वा स्थितः, हितो। सम्—आच्छादनम्। व्यापनम्। सेना महीं संच्छादयामास प्रावृषि व्योमिवाम्बुदः, रामा।

छन्द्—छदि, चु, प। संवरणम्।

गोपनम्। आच्छादनम्। छन्दयति, छन्दति। अचच्छन्दत्। छदि, छन्द् चु, प। दीप्तिः। छन्दयति, छन्दति। उप—प्रलोभनम्। प्रार्थना। उपच्छन्दयति मयि प्रयोज्यं त्वया न प्रतिषेधरीक्षणम्, र ५, ५८।

छम्—छमु (चमु) भ्वा, प। भक्षणम्।

छम्प्—चम्प, छपि, चु, प। गतिः।

छर्द्—चु, प। वमनम्।

उद्गिरणम्। छर्दयति। अचच्छर्दत्।

छल् णिजन्तनामधातुः। छलना।

छलयति। शिरीषप्रसवावतंसाश्छलयन्ति मीनान्, र १६, ६१। निशीथेऽभ्येत्य चाकस्मादस्मान् स छलयिष्यति, भारत। बलिं छलयते तुभ्यम्, गौतमो १, १६। छलयसि विक्रमणे बलिम्, गौतमो १, ८। केनापि छलितस्तातः, अनर्घ १२१।

छष्, भ्वा, उ। हिंसा। छषति। ०ते।

छिद्—छिदिर् क, उ। छेदनम्।

द्वैधीकरणम्। लट् छिनत्ति। छिन्तः। छिन्दन्ति। छिनत्सि। छिन्ते। छिन्दाते। छिन्दते। छिनत्ति नित्यमज्ञानम्, कवि २४६। नैनं छिन्दन्ति शस्त्राणि, गी २, २३। छिनद्मि क्षणदाचरान्, भ ६, ३६। लिङ् छिद्यात्। छिन्दीत। हि छिन्धि। लङ् अच्छिनत्। अच्छिन्ताम्। अच्छिन्दन्। अच्छिनः। अच्छिनत्। अच्छिन्त। लिट् चिच्छेद। चिच्छिदे। लुट् छेत्ता। स्यट् छेत्स्यति। ०ते। लुङ् (इर्) अच्छिदत्, अच्छैत्सीत्। अच्छैत्ताम्। अच्छैत्सुः। अच्छित्त। अच्छित्साताम्। अच्छित्सत। ते तं दन्तैरच्छिदन्, भ १५, ४३। वायव्यास्त्रेण तं पार्श्वं रामोऽच्छैत्सीत्, भ १५, ६७। स द्रुममच्छिदत्, भ १५, ६८। कर्मणि, छिद्यते। अच्छेदि, अच्छेदि तेनास्य किरीटम्, भ १५, ६४। सन् चिच्छित्सति। ०ते। यङ् चेच्छि-

यति। चेच्छेत्ति। णिच् छेदयति। अचिच्छिदत्। छित्वा। •छिद्य। छिन्नः। छेदः। छेदनम्। छित्तिः। छिदुरः। आ—आक्षेप्य ग्रहणम्। छेदनम्। उच्छेदः। इदं जातवेदोमुखादाच्छिनत्ति, कु २, ४६। आच्छेत्स्याम्येतस्य धनुर्ज्याम्। भर्त्तारमाच्छेत्स्यति कामिनीभ्यः, भारत। अव—अवच्छेदः, परिच्छेदः। विशेषः। उद्—उच्छेदः। उन्मूलनम्। नोच्छिन्द्यादात्मनो मूलम्, मनुः ७, १३९। एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन, मनुः ३, १, १। मूर्च्छान्तरायं मुहुरुच्छिनत्ति, भा १६, ९। परि—परिच्छेदः। इयत्तयावधारणम्। निर्णयः। परिच्छिन्नप्रभावस्त्वं मया, कु २, ५८। तं शीर्षच्छेद्यं परिच्छिद्य, र १५, ५१। परात्मनोः परिच्छिद्य बलाबलम्, र १७, ६०। यस्य यशः परिच्छेत्तुमियत्तयाऽलम्, र ६, ७७। वि—छेदः। अर्द्धं विच्छिन्नम्, शकु १, ३२। विच्छिद्यमाने कुले, भ ३, ५२। सम्—उच्छेदः। ज्ञानसंच्छिन्नसंशयः, गी ४, ४१

छिद्र—अदन्तः। चु, प। भेदः। रन्ध्रकरणम्। कर्णरन्ध्रकरणम्। छिद्रयति। छिद्रितः। छिद्रणम्।

छुट्—(चुट्), तु, छु, चु, प। छेदः। छुटति। छोटिका अङ्गुलिध्वनिः।

छुड्—(थुड्), तु, प। संवरणम्।

छुप्—तु, प। स्पर्शः।

छुपति। चुच्छोप। छोप्ता। अच्छोप्सीत्।

छुर्—तु, प। छेदनम्।

छुरति। चुच्छोर। छुरिता। आग्निधि, छुर्य्यात्, पा ८, २, ७९। अच्छुरीत्। ल छुरितः (रञ्जनम्), अग्निकिरणच्छुरितजलधर, गीतगो ११, २९। अलक्तच्छुरितं हृदयम्, गीतगो ८, १०। मनःशिलाविच्छुरिताः, कु १, ५६। छुरिका। छुरणम्।

छृद्—उक्छृदिर्, क, उ। १ दीप्तिः। २ देवनम्। क्रीड़नम्। ३ वमनम्, वो। देवनजिगीषेच्छाव्यवहारस्तुतिद्युतिक्रीड़ागतय इति केचित्, दुर्गा। लट् छृणत्ति। छृन्ते। लिङ् छृन्यात्। छृन्दीत। लङ् अच्छृणत्। अच्छृन्तः। लिट् चच्छर्द। चच्छृदे। चच्छृदिषे, चच्छृत्से। लुट् छर्दिता। लृट् छर्त्स्यति। •ते। छर्दिष्यति। •ते, पा ७, २, ५७। लुङ् (इर्) अच्छृदत्, अच्छर्दीत्। अच्छर्दिष्ट। सन् चिच्छर्दिषति। •ते। चिच्छर्त्सति। •ते। यङ्। चरीच्छृद्यते। चरीच्छृर्त्ति। छृदी चु, प। सन्दीपनम्। छर्दयति) छर्दति। छर्दिता। छर्दिष्यति (उ) छृदित्वा, छृत्वा। छृप्तः।

छृप्—(चृप) चु, प। सन्दीपनम्।

छेद—अदन्तः। चु, प। छेदनम्।

छो—दि, प। छेदनम्।

छ्यति, पा ७, ३, ७१। चच्छौ। चच्छतुः। छाता। छास्यति। छायात्। अच्छात्। अच्छासीत्, पा २, ४, ४८। णिच् छाययति, पा ७, ३, ३७। यङ् चाच्छायते। चाच्छाति, चाच्छेति। अवच्छितम्। अवच्छातम्।

छ्यु—छ्यु ङ् (चुङ्) भ्वा, आ। गतिः।

(ज)

जक्ष्—अदा, प। १ भक्षणम्। २ हसनम्। लट् जक्षिति, पा ७, २,

७६ । जक्षितः । जक्षति, पा ७, १, ४ । जक्षिमोऽनपपाधेऽपि नरान्, भ ४, ३८ । लिङ् जक्ष्यात् । लङ् अजक्षत्, अजक्षीत् । अजिक्षिताम् । अजक्षुः । लिट् जजक्ष । जजक्षुः, भ १३, ३८ । लुट् जक्षिता । लृट् जक्षिष्यति । लुङ् अजक्षीत् । अजक्षिष्टाम् । अजक्षिषुः । अजक्षीदङ्गमागतान्, भ १५, ४६ । सन् जिजक्षिषति । यङ् जाजक्ष्यते । णिच् जक्षयति । अजजक्षत् ।

जङ्—जङ्घि, वो, भ्वा, आ ।

१ गतिः । २ दानम् । जङ्घते । अजङ्घि, अजाङ्घि । घटादिः । (चङ्) ।

जज्—जङ्ग्—जञ्जि, भ्वा, प ।

युद्धम् । जजति । जङ्गति ।

जट्—भा, प । संघातः ।

जटति केशः (परस्परं लग्नः स्यात्) । जटा ।

जन्—जनी, दि, आ । प्रादुर्भावः ।

उत्पत्तिः । जननम् । स्फुटीभावः । लट् जायते, पा ७, ३, ७९ । गोमयाद् वृश्चिको जायते, १, ४, ३० । त्वमत्रा-जायथाः, भ १७, ३२ । लिट् जज्ञे, पा ६, ४, ८८ । लुट् जनिता । लृट् जनिष्यते । लुङ् अजनिष्ट । अजनि, पा ३, १, ६१ । ७, ३, ३५ । अजनिषाताम् । अजनिषत । नाजनिष्टास्य साध्वसम्, भ १५, ८८ । एकनेत्रोऽजनि चषात्, भ ६, १२ । भावे जायते, जन्यते । अ-जनि । सन् जिजनिषते । यङ् जाजायते । जङ्घन्यते, पा ६, ४, ४३ । जङ्घन्ति । णिच् जनयति । अजीजनत् । घटादिः । अपरा वीरमजीजनत् सुतम्, र ८, २९ । यं देवं देवकी देवी वसु-देवादजीजनत्, कृतिः । वैदेह्या जनये-मयानन्दम्, भ ८, ५७ । लोभो जनयते तृषाम्, हितो । जनित्वा । जातः । जातिः । जननम् । जनकः । जनः । जनिता । जन्यम् । जन्यो घटः । जन्युः । अजः । वीजम् । प्रजा । प्रजनः । प्रज-निष्णुः । णिच् जनयित्वा । जनितः । जनयिता । जनयितव्यम् । अधि—उत्-कृष्टभावः । ब्राह्मणो जायमानो हि पृथिव्यामधिजायते (उपरि भवति), मनुः १, ९९ । अनु—अनन्तरजननम् । पुत्रिकायां कृतायान्तु यदि पुत्रोऽनु-जायते, मनुः ९, १३१ । तमजोऽनुजातः (उपसृष्टत्वात् सकर्मकता), र ६, ७८ । अधि—उत्पत्तिः । वृद्धिः । अभिजननम् । अभिजातवाचि । कु । कामात् क्रोधो-ऽभिजायते, गी २, ६२ । तथाप्यनुदिनं तृष्णा ममैतेष्वभिजायते, भारत । उप—जननम् । अस्मिंस्तु निर्गुणे गोत्रे नापत्यमुपजायते, हितो । सङ्कल्पे-ष्वपजायते, गी २, ६२ । प्र—प्रसवः । उत्पत्तिः । प्रजायन्ते सुतान् नार्यः । सा प्रजज्ञे कुमारं, मातापित्रोः प्रजा-यन्ते पुत्राः, भारत । वि—प्रसवः । तेन विप्रसङ्गो विजज्ञे । समां समां विजायते इति पाणिनिः, ५, २, १२ । (मल्लीनाथः), र १८, २४ । तस्य सदृशः पुत्रो व्यजायत, रामा । मानात् क्रोधो व्यजायत, भारत । सम्—उत्पत्तिः । ततः संजज्ञिरे वीराः, भारत । रज्ञवा-हलं संजायते राज्ञः, मनुः ८, १७२ ।

जप्—भ्वा, प । १ जपः । पाठः । कथनम् । २ मानसम् । सदुच्चारः । (जिह्वोष्ठादिव्यापाररहितं शब्दार्थयो-श्चिन्तनम्), दुर्गा । लट् जपति । लिट् जजाप । जेपतुः । लुट् जपिता । लृट् जपिष्यति । लुङ् अजापीत्, अज-पीत् । अजपिष्टाम् । अजपिषुः ।

सन् जिजभिषति। यङ् (भावगर्हायाम्) जञ्जभ्यते। जञ्जभि, पा ७, ४, ८६। ३,१,२४। णिच् जापयति। अजीजपत्। जपित्वा, जप्त्वा, इत्येके। जप्तः। प्रजप्तः। प्रजपितः इति संक्षिप्तसारः। जपः। जपनम्। जप्यम्। जपन् सन्ध्याम्, भ ४, १४। गायत्रीं दशधा जप्त्वा, स्मृतिः। जपित्वा सूक्तम्, मनुः ११, २५१। दृषुवर्षजप्त—, ने ११, २६। सर्वथा जप्तविद्यानां विद्या नातिप्रसीदति। अभि—अभिमन्त्रणम्। औषधिं मन्त्रैरभिजजाप च, रामा। उप—भेदः। भेदोपजापावित्यमरः। उपजप्यानुपजपेत्, मनुः ७, १८७। मत्वा सहिष्णूनपरोपजप्यान्, भ १२, १२।

जभ्—(यभ्), भ्वा, प। रमणम्। विपरीतरमणम्। जभति। जजाभ। जेभतुः। जभिता। यङ् (भावगर्हायाम्) जञ्जभ्यते, पा ७, ४, ८६। जञ्जब्धि।

जम्—जमु (चमु) भ्वा, प। भक्षणम्।

जम्भ्—जभी, भ्वा, आ। गात्रविनामः। जृम्भणम्। जम्भते, पा ७, १, ६१। जजम्भे। जम्भिता। अजम्भिष्ट। जिजम्भिषते। जञ्जभ्यते, पा ७, ४, ८६। जम्भयति। (ई) जब्धः। जभि, वो, भ्वा, प। रमणम्। जम्भति। जम्भिता। जभि, चु, प। नाशनम्। जम्भयति। जम्भति।

जर्च्—जर्ज्—जर्ज्—जर्भ्—जर्त्स्। जर्च् जर्ज् जर्भ् वो, तु, प। जर्ज् जर्ज् भ्वा, प। जर्ज् (चर्च्) तु, प। १ उक्तिः। २ भर्त्सनम्। तर्जनम्। जर्चति। जर्ज्जति। जर्जति। जर्भर्ति। जर्त्सति।

जर्—भ्वा, प। १ घातनम्। तैक्ष्ण्यम्। २ जीवनम्। ३आच्छादनम्। ४समृद्धिः। जलति। जजाल। जेलतुः। जलिता। अजालीत्। जल्, चु, प। आच्छादनम्। अपवारणम्। जालयति। जालः। जलः। जालम्। जलम्।

जल्प्—(जप्) भ्वा, प। जल्पनम्। जल्पति, दूतः सर्वं जल्पति, हितो। जल्पिता। अजल्पीत्। जल्पितः, भ ८, १२५।

जष्—(कष्), भ्वा, प। ङ, वो। हिंसा।

जस्—जसु, दि, प। मोक्षणम्। मोचनम्। जस्यति। जजास। जेसतुः। जसिता। अजसत्, पुषादिः। अजासीत्, वो। (ङ) जसित्वा, जस्त्वा। जस्तः। जसु चु, प। १ हिंसा। २ताड़नम्। ३ अनादरः, वो। जासयति, जसति। उद्—उच्छूननम्। निजौजसोज्जासयितुं जगद्द्रुहाम्, मा १, ३७। मन्योरुज्जासयात्मनः म ८, १२०।

जंस्—जसि, चु, प। १ रक्षणम्। २ मोक्षणम्। जंसयति, जंसति।

जाग्र्—अदा, प। निद्राक्षयः। जागरणम्। लट् जागर्त्ति। जाग्रतः। जाग्रति, पा ७,१,४। निशायां जागर्त्ति संयमी। जाग्रति भूतानि, गी २,६९। जागर्त्ति छन्देषु दैवम् (चेष्टते), भ १८,११। दण्डः सुप्तेषु जागर्त्ति, मनुः ७,१८। लिङ् जाग्र्यात्। लङ् अजागः। अजाग्रताम्। अजागरुः, पा ७, ३८३। लिट् जागरामास। जजागार, पा ३, १, ३८। जागरामासतुः। जजागरतुः, पा ७,२,८५। जजागरिथ। अपसर्पेज्जजागार, र १७, ५१। लुट् जागरिता। लृट् जागरिष्यति। आशिषि,

जागर्य्यात्, पा ३,४,१०४। लुङ् अजागरीत्, पा ७, २, ५। अजागरिष्टाम्। अजागरिषु:। भावे जागर्य्यते। अजागारि, पा ७,३,८५। सन् जिजागरिषति, पा ३,१,२२। णिच् जागरयति, पा ७,३,८५। जागरित्वा। ०जागर्य्य। जागरित:। जागरणम्। जागर:। जागर्य्या। जागरूक:। जाग्रत्। दिशो निरीक्षमाणस्य नास्ति जागरतो भयमिति जागरशब्दाच्चिच्। प्र—निद्राक्षय:। अवधानम्। प्रजागराश्चक्रुर्वानरा:, भ १४, ६१। प्रजागराश्चकारारेरीक्षासु, भ ६,२।

जि—भ्वा, प। १ जय:।

उत्कर्षप्राप्ति:। २ अभिभव:। न्यूनीकरणम्। ३ न्यूनीभाव:। ४स्त्रीकरणम्। ५ अतिक्रम:। ६ वशक्रिया। लट् जयति देव:। जयति शत्रून्। देवदत्तं शतं जयति। जेस्वन्त्वोरन्त इदिति पद्मनाभ:। अनभिधानादस्मात् तुबन्त्वो: प्रयोगाभाव:। किन्तु तयो: स्थाने तिवन्ती इति। किञ्च तुप: स्थाने तातङ् दृश्यते। यथा, भावगम्यलय: कोऽपि जयताद् वागगोचर:, दुर्गा। जयति रघुवंशतिलक:, महाना १,१। जयन्ति यमुनाकूले रङ्ग:केलय:, गीतगो १, १। वपु:प्रकर्षादजयद् गुरुम्, र ३, ३४। लिट् जिगाय। जिग्यतु:, पा ७,३,५७। जिगयिथ, जिगेथ। गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा, कु २, ५३। न मे मायां जिगायेन्द्रोऽपि, भ १४, ४६। लुट् जेता। लट् जेष्यति। स्वराज्यं जेष्याव:, भ १६, ३६। आशिषि, जीयात्। लुङ् अजैषीत्। अजैष्टाम्। अजैषु:। त्वमजैष: पुरा सुरान्, भ १५, १२। कर्मणि जीयते। जायिता। जायिष्यते। जायिषीष्ट। अजायि। अजायिषत। केन जायिष्यते यम:, भ १६, २। वेपमानजननीशिरश्छिदा प्रागजीयत घृणा ततो मही, र ११,६५। सन् जिगीषति, पा ७, ३, ५७। यङ् जेजीयते। जेजयीति। जेजेति। णिच् जापयति, पा ६, १, ४८। ७, ३, ३६। अजीजपत्। जित्वा। ०जित्य। जित:। जय:। जेतव्य:। जेय:। जय्य:, पा ६, १, ८१। जयो। जित्। जेतुम्। जिष्णु:। जेता। जित्वर:। व्यति—परस्पराभिभव:। व्यतिजयते, पा १, ३, १४। व्यतिजिग्ये समुद्रोऽपि न धैर्य्यं तस्य गच्छत:, भ ८, ४। अधि—न्यूनीकरणम्। विनाशनम्। रावणवद् वयं सपत्नानधिजीयास्म, भ १९, २। अव—स्त्रीकरणम्। उद्धार:। अपहृतं सर्वस्वमवजित्य, मनु: ११, ८१। निर्—अभिभव:। पराजय:। अनेकशो निर्जितराजकत्वम्, भ २, ५२। शत्रुं निर्जित्य, भ ७,९४। परा—पराजय:। पराजयते, पा १, ३, १९। असहनम्। अभिभव:। अध्ययनात् पराजयते, पा १, ४, २६। शत्रून् पराजयते। अद्रिं खं पराजयमान उन्नत्या, भ ८, ९। सीतां पराजयमानां रावणस्य प्रीते:, भ ८, ७१। वि—विजय:। उत्कर्षप्राप्ति:। पराजय:। न्यूनीकरणम्। वशीकरणम्। विजयते, पा १, ३, १९। भो राजन्! विजयतां भवान्, शकु ५, ७१। व्यजेष्ठा विघ्ननायकान्, भ ६,६८। विजिग्ये सेनाम्, भ १४, १०६। व्यजेष्ट षड्वर्गम्, भ १, २। नन्दनस्य लक्ष्मीर्विजिग्ये भवने:, भ ११, ३५।

जिम्ब—जिवि, भ्वा, प। प्रीणनम्।

जिन्वति। जिजिन्व। अजिन्वीत्। जिवि (अजि) चु, प। दीप्तिः। जिन्वयति। दिवि, दिन्वति।

जिम्—जिमु। (चमु) भ्वा, प। भक्षणम्। जेमति। जेमनं लेप आहार इत्यमरः। (क्त) जिमित्वा जिग्ध्वा।

जिष्—जिषु, भ्वा, प। सेचनम्।

जीव्—भ्वा, प। प्राणधारणम्। जीवनम्। जीविकानिर्वाहः। लट् जीवति। त्वयि जीवति जीवामि। ह्याहारात् किञ्चिदुद्धृत्य ददति तेनासौ जीवति, हितो। लिट् जिजीव। जिजीवतुः। हरिं युधि समुपेत्य न दानवा जिजीवुः, छन्दो १३, ९। लुट् जीविता। लुङ् अजीवीत्। अजीविष्टाम्। अजीविषुः। यावदजीविषम्, भ १५, ११। सन् जिजीविषति। यङ् जेजीव्यते। जेजीवीति। णिच् जीवयति। अजिजीवत्। अजीजीवत्, पा ७, ४, १। कपीनजीजिवत्, भ १५, ११। जीवित्वा। ०जीव्य। जीवितः। जीवनम्। जीवकः। जीवः। जीवी। जीव्यम्। जीविका। अति—अत्यजीवदमरालकेश्वरो (अतिक्रम्य अजीवत्), र १९, १५। अनु—अनुजीवनम्। आश्रयः। अनुजीवी। उद्—उज्जीवनम्। पुनर्जीवनम्। उदजीवत् सुमित्राभूः, भ १७, ९५। उप—उपजीवनम्। आश्रयः। ग्रहणम्। जीवनोपायः। क्षीधनानि यो मोहादुपजीवति, मनुः ३, ५२। पर्जन्यमिव भूतानि महाद्रुममिव द्विजाः। बान्धवास्त्वोपजीवन्ति सहस्राक्षमिवामराः। एतद्वारं कविभिरुपजीव्यते, भारत। सम्—जीवनम्। सीतां मायेति शंसन्ती समजीवयत्, र १२, ७४। भस्मराशीकृतं हृष्टं विद्यया समजीवयत्। कीर्त्तिः पुरुषं सञ्जीवयति, भारत।

जु—भ्वा, प। सौत्रधातुः। वेगगतिः। जु, भ्वा, आ, वो, गतिः। जवति। ०ते। णिच् अजीजवत्। जिजावयिषति, पा ७, ४, ८०।

जुङ्—जुगि, भ्वा, प। वर्जनम्।

"जुच्" जुचि, चु, प। दीप्तिः।

जुड्—तु, प। गतिः।

जुड़ति। जुजोड़। जोड़िता। अजोड़ीत्। जुड्, तु, प। बन्धनम्। जुड़ति, तानुच्छृङ्खलतापन्नान् शृङ्खलेन जुड़त्यसौ, कवि ११३। जुड़िता। अजुड़ीत्। जुड्, चु, प। प्रेरणम्। जोड़यति। अजजुड़त्। दण्डं जोड़यति हिट्सु बलं तेषाञ्च जोड़ति, कवि ११३।

जुत्—जुट, भ्वा, आ। दीप्तिः। जोतते। जुजुते। युत्, योतते।

जुन्—(जुड), तु, प। गमनम्। जुनति। मरुतो जुनन्ति, कौ १५२।

जुर्—जुर्वी (उर्वी) भ्वा, प। वधः।

जुल्—चु, प, वो। पेषणम्। चूर्णीकरणम्। जोलयति।

जुष्—जुषी, तु, आ। १ प्रीतिः। हर्षः। २ सेवनम्। भजनम्। आश्रयः उपयोगः। लट् जुषते। न किं सुधा नाकजुषो जुषन्ते, राघवपाण्डवीयम् १, ४८। तन्निबोध जुषस्व च, भारत। शुचमजुषत, भ १७, ४२। लिट् जुजुषे, रथं जुजुषे (आरुढः), भ १४, ९५ लुट् जोषिता। लुङ् अजोषिष्ट। अजोषिषाताम्। अजोषिषत। सन् जुजुषिषते, जुजोषिषते। यङ् जोजुष्यते

जोजोष्टि। क्विच् जोषयति। अजूजुषत्। जुष्, चु, प। १ परितर्कणम्। जुष्टः। २हिंसा। ३परितर्पणम्। जोषयति। जोषति। (ई) जुष्टः। ब्रह्मसमूहजुष्टः, भ १, ४। आश्रममण्डलं मृगगणैर्जुष्टम्, भारत। ऋषिजुष्टजले, अमरः। कश्मलमनार्य्यजुष्टम्, गी २,२। प्र—विषयेषु प्रजुष्टानि (प्रसक्तानि), मनुः २, ९६। सजूः। सजुषौ।

जूर्—जूरी (यूरी) दि, आ।

१ हिंसा। २वयोहानिः। जूर्य्यते। जुजूरे जूरिता। भर्त्रे नखभ्यश्च चिरं जुजूरे। (क्रुध्यति स्म), भ ११, ८। (ई) जूर्णः।

जूष्—(यूष्) भ्वा, प। आ, वो। हिंसा।

ज—भ्वा, प, वो। न्यक्कारः।

तिरस्कारः। जरति। जजार। जर्त्ता।

जृम्भ्—जृभ्—जृभि, जृभी, (जभी) भ्वा, आ। गात्रविनामः। गात्रभङ्गः। जृम्भणम्। प्रकाशः। प्रादुर्भावः। लट् जृम्भते। जृम्भते बाला गर्भभरालसा। सा द। लिट् जजृम्भे, मधुर्जजृम्भे, कु ३, २४। लुट् जृम्भिता। लुङ् अजृम्भिष्ट। जृम्भितम्। जृभी, जर्भते, वो। (ई) जृम्भः। जृम्भमाणश्चुषो परिमृज्य, अनर्घ ८५। भार्य्यां नेक्षेत चाम्रतीं क्षुवतीं जृम्भमाणां वा, मनुः ४, ४३। उद्—उदयः। विकाशः। हर्षः। प्रीतांशुरुज्जृम्भते, रत्ना ३,१०२। सुकृतमुज्जृम्भते स्म, नै २, १०५। व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते, नीतिशतकम् ९०। अम्भोजमुज्जृम्भते, अनर्घ २४। वि—जृम्भणम्। व्याप्तिः। व्यजृम्भितापरे, भ १५, १०८। विजृम्भितस्य अन्धकारस्य, र ७, ४२। तूर्य्यनिस्वनाः सप्तनि व्यजृम्भन्त, र ३, १९। १२, ७२।

जॄ—जॄष्, दि, प। जॄ, क्रया, प।

वयोहानिः। जरा। जीर्णीभावः। परिपाकः। विलयः। क्षयः। लट् जीर्य्यति। वज्रं जीर्य्यति वज्रिणः, मद्भाना ५, ५०। सौहृदानि जीर्य्यन्ति कालेन। तृष्णा न जीर्य्यति जीर्य्यतः, भारत। जृणाति। जृणीतः। कायो न जीर्य्यति जृणाति न यस्य शक्तिः, कवि ९। लिट् जजार। जजरतुः। जेरतुः, पा ६, ४, १२४। जेरुराज्ञा दशास्यस्य, भ १४, ११२। लुट् जरिता, जरीता। लृट् जरिष्यति, जरीष्यति। आशिषि, जीर्य्यात्। लुङ् दि, अजारीत्। अजरत्, पा ३, १, ५८। क्रया, अजारीत्। अजारिष्टाम्। अजारिषुः। अजारीदिव च प्रज्ञा बलं शोकात्तथाजरत्, ६, ३०। उदरेऽजरन्ये तस्य, भ १५, ५०। सन् जिजरिषति, जिजरीषति, जिजीर्षति। यङ् जेजीर्य्यते। जाजर्त्ति। णिच् दि, जरयति, घटादिः। क्रया, जारयति। जॄ, चु, प। वयोहानिः। जारयति, जरति। यद्विद्विषां जरति चेतसि भोगतृष्णा तेषां वपूंषि विषिनेषु च जारयन्ति, कवि ९। जरित्वा, जरीत्वा, पा ७, २, ५५। जरित्वेव जवेन निपेतुः शाखिनः, भ ८, ४१। जीर्णः। जीर्णिः। जरन्, पा ३, २ २०४ (ष) जरा। जर्जरः।

जेष्—जेषृ (एषृ) भ्वा, आ। गतिः।

जेह्—जेह्, भ्वा, आ। प्रयत्नगत्योः।

जै—(जै) भ्वा, प। क्षयः।

जायति। जजौ। जाता। अजासीत्।

ज्ञप्—चु, प। १ ज्ञानम्।
२ ज्ञापनम्। ज्ञप मिच्चेति चुरादौ ज्ञापनं मारणादिकञ्च तस्यार्थः, कौ ८४। (मारणालोकननिशानतोषणस्तुतयः), दुर्गा। ज्ञपयति, पा ६, ४, ८२। अजिज्ञपत्। ज्ञीप्सति, पा, ७, ४, ५५। जिज्ञपयिषति, पा, ७, २, ४९। ज्ञपितः। ज्ञप्तः, पा ७, २, २७। प्रतिपज्ज्ञप्तिचेतना इत्यमरः।

ज्ञा—क्र्या, प।
अनुपसर्गात् ज्ञा, पा १, ३, ७६। ज्ञानम्। बोधः। जानाति, पा ७, ३, ७८। जानीते, मां जानीते, पा १, ३, ७६। सर्पिषो जानीते, मा १, ३, ४५। २, ३, ५१। सन्दर्भशुद्धिं गिरां जानीते जयदेव एव, गीतगो १, ४। लिङ् जानीयात्। जानीत। लङ्, अजानात्। अजानीत। अजानत। लिट् जज्ञौ। जज्ञतुः। जज्ञिथ, जज्ञाथ। जज्ञिव। जज्ञे। लुट्। ज्ञाता। लृट् ज्ञास्यति। ०ते। आज्ञिषि, ज्ञायात्, ज्ञेयात्। ज्ञासीष्ट। लुङ् अज्ञासीत्। अज्ञासिषुः। मा ज्ञासीत्वं सुखी रामः, भ १५, ९। भोगेषु रतो विद्युच्चाग्रं नाज्ञासिषम्, भ ७, २६। लङ् नाज्ञास्यत्वमिदं सर्वम्, भ ५, ८। कर्मणि, ज्ञायते। जज्ञे। ज्ञाता, ज्ञायिता। ज्ञास्यते। ज्ञायिष्यते। ज्ञासीष्ट। ज्ञायिषीष्ट। अज्ञायि। अज्ञायिषत, अज्ञासत। ज्ञास्येऽहं समस्तैर्ज्ञायिष्यन्ते मया, भ १६, ४०, ४१। नूनं नाज्ञायिषि त्वया, भ ४, ३२। सन् जिज्ञासते, पा १, ३ ६७। जिज्ञासमानो बलमस्य वाङ्गोः, भ २, ४३। भावं जिज्ञासमाना मुनिहोमधेनुः, र २, २६। इयान् जिज्ञासाञ्चक्रिरे, भ १४, ९१। यङ् जाज्ञायते। जाज्ञेति। णिच् (१ मारणम्, २ तोषणम्, ३ चानुषङ्गानम्, ४ ज्ञापनम्, ५ तीक्ष्णीकरणम्, एष्वेवार्थेषु जानातिर्मित्, कौ ८४)। मारणादौ ज्ञा चुरादिर्घटादिश्चेति वो। ज्ञपयति। अजिज्ञपत्। अज्ञपि, अज्ञापि। ज्ञप्तं ज्ञपम्। ज्ञाप्तं ज्ञापम्। ज्ञा, चु. प। नियोगः। प्रेरणम्। ज्ञापयति भृत्यं स्वामी, दुर्गा। आज्ञापयति यो भृत्यान् यज्ञे संज्ञपयत्यजान्। भूपाश्च भक्तिनम्राभिर्वाग्भिर्विज्ञापयन्ति यम्॥ कवि ६८। तज्ज्ञापयत्याचार्य्यः विज्ञापना भर्त्तृषु सिद्धिमेति, कौ ८४। जिज्ञापयिषति, जिज्ञपयिषति। ज्ञीप्सति, पा ७, २, ४९। ज्ञात्वा। ०ज्ञाय। ज्ञातः। ज्ञानम्। ज्ञेयम्। ज्ञाता। ज्ञप्तिः। ज्ञप्तः, पा, ७, २, २७। ज्ञापितः। ज्ञापनम्। अनु—अनुज्ञा। त्वामनुजानामि न गन्तव्यम्, रामा। ततोऽनुजज्ञे गमनं सुतस्य (कर्मणि लिट्), भ १, २३। अनुजिज्ञासति पुत्रम्, पा १, ३, ५८। अनुजिज्ञासता लङ्कादर्शनमिन्दुना उदेयत, भ ८, १५। अप—अपक्नवः। गोपनम्। यतमपजानीते, पा १, ३, ४४। आत्मानमपजानानः ग्रहमात्रोऽनयद्दिनम्, भ ८, १६। अभि—अभिज्ञानम्। स्मरणम्। ज्ञानम्। अभिजानासि यत् काश्मीरेष्ववसाम, पा १, २, ११२। सम्भविष्यावएकस्यामभिजानासि मातरि, भ ६, १३८। प्रत्यभि—प्रत्यभिज्ञा। अनुभवः। स्वयूथ्यस्वरान् प्रत्यभिजानते, अनर्घ ८५। अव—अवज्ञा। अमवानना। अवजानासि मां यस्मात्, र १, ७८। आ—णिच् आज्ञा। आदेशः। शासनम्। विज्ञापनम्। आज्ञापय लोकेषु

यत् करणीयम्, कु २, ३। यथाज्ञापयत्यायुष्मान्, शकु १, २९। उप—आधिक्यज्ञानम्। उपज्ञा ज्ञानमाद्यं स्यादित्यमरः। पाणिनिनोपज्ञातं व्याकरणम् (विनोपदेशेन ज्ञातम्), पा, ४, ३, ११९। प्रनि—अवगतिः। प्रणिजानीहि, भ ९, १००। परि—ज्ञानम्। निश्चयः। शब्दहेतुं परिज्ञाय, हितो। प्र—सम्यग् बोधः। परिज्ञानम्। न स्त्रियं प्रजानाति कश्चिदप्राप्तयौवनः, भारत। प्रति—प्रतिज्ञा। शतं प्रतिजानीते, पा १, ३, ४६। प्रतिजज्ञे रक्षसां वधम्, भ १४, ६४। प्रत्यज्ञास्त क्रियापटुः, भ ८, २६। वि—विशिष्टज्ञानम्। णिच् विज्ञापनम्। विभीषणः प्रणम्य व्यजिज्ञपत्, अनर्घ १५४। इति विज्ञापितो राज्ञा मुनिः, र १, ७४। सम्—ज्ञानम्। अवेक्षणम्। शतं संजानीते, पा १, ३, ४६। संजानान् परिहरन् (चेतयतः), भ ८, २७। (उत्कण्ठापूर्वकस्मरणम्) मातरं मातुर्वा संजानाति, पा २, ३, ५२। णिच्(मारणम्) संज्ञपयति शत्रून्।

ज्या—क्रया, प। वयोहानिः।

जरा। लट् जिनाति। जिनीतः। जिनन्ति, पा ६, १, १६। लिङ् जिनीयात्। लङ् अजिनात्। लिट् जिज्यौ, पा ६, १, १७। जिग्यतुः। जिज्यिथ, जिज्याथ। जिज्यिव। लुट् ज्याता। लृट् ज्यास्यति। आशिषि, जीयात्। लुङ् अज्यासीत्। अज्यासिष्टाम्। अज्यासिषुः। कर्मणि जीयते। सन् जिज्यासति। यङ् जेजीयते। जाज्याति, जाज्येति। णिच् ज्यापयति। जीत्वा। ०ज्याय, पा ६, २, ४२। जीनः। पा ८, २, ४४। ज्यानिः।

ज्यु—ज्युङ् (च्युङ्) भ्वा, आ। गतिः।

ज्युत्—द्युतिर्, भ्वा, प, वो। (जद्ध)। द्युत्र, भ्वा, आ, वो। दीप्तिः। द्योतति। ०ते।

ज्यो—ज्योङ्, भ्वा, आ। १ नियमः। २ व्रतस्यादेशः। ३ उपनयनम्। ज्यवते।

ज्रि—(जि) भ्वा, प। अभिभवः। न्यूनीभावः। न्यूनीकरणम्। ज्री, क्रया, प, वो। ज्रि (जॄ) ज्री, वो, चु, प। वयोहानिः। जीर्णीभावः। ज्रयति। ज्रिणाति। जिज्राय। ज्रेता। अज्रैषीत्। ज्रायति, ज्रययति। ज्रीणः। ज्रीणिः।

ज्वर्—भ्वा, प। रोगः।

ज्वरति। जज्वार। ज्वरिता। अज्वारीत्। जिज्वरिषति। जाज्वर्यते। जाजूर्त्ति, पा ६, ४, २०। णिच् ज्वरयति, घटादिः। अजिज्वरत्। ज्वरितम्। क्विप् जूः, जुरौ। सम्—सन्तापः। सन्तापसज्वरौ समौ इत्यमरः। संज्वारी

ज्वल्—भ्वा, प। १ दीप्तिः। ज्वलनम्। २ कम्पः, वो। लट् ज्वलति। रात्रौ ज्वलन्ति महौषधयः, अनर्घ १८। धिगिदमंशुकं ज्वलति, रत्ना ५, १९१। लिट् जज्वाल। जज्वलतुः। जज्वाल स राजा, भ १, ४। लुट् ज्वलिता। लृट् ज्वलिष्यति। लुङ् अज्वालीत्। अज्वालिष्टाम्। अज्वालिषुः। गिरावज्वालिषुः रात्रौ महौषध्यः, भ १५, १०६। सन्, जिज्वलिषति। यङ् जाज्वल्यते। जाज्वलति। णिच् ज्वलयति, ज्वालयति। उपसर्गात्तु प्रज्वलयति। प्रज्वालयतीति तु घञन्तात् तत् करोतीति णौ सिद्धम्, को ८६। ज्वलितम्। ज्वलनम्। ज्वलः। ज्वालः। अग्निर्ज्वलन्, भ ५, १२। उद्—उज्ज्वलीभावः। दीप्तिः। प्रज्वलनम्। रक्षाङ्कानि प्रज्वलुः, भ १४, ९८।

(झ)

झट्—(जट्) भ्वा, प । संघातः ।

राशीकरणम् । झटति । जझाट । झटिता ।

झस्—झसु (चसु) भ्वा, प । अदनम् ।

झर्ब्—झर्छ्—झर्भ्—(चर्च्) ।

भ्वा, तु, प । १ परिभाषणम् । उक्तिः । २ तर्जनम् । भर्त्सनम् । झर्चति । झर्च्छति, वो । झर्भति ।

झष्—(कष्), भ्वा, प । हिंसा ।

झषू, भ्वा, उ । १ आदानम् । ग्रहणम् । २ संवरणम् । आच्छादनम् । झषति । ०ते ।

झु—झू—झ्यु—झुङ्, झूङ्, झ्युङ् । भ्वा, आ । गतिः । झवते वो, 'झावते' ।

झूष्—(यूष्), भ्वा, प । हिंसा ।

झॄ—झृष् (जृष्), दि, झृ (जॄ) ।

क्रया, प । वयोहानिः । जीर्णीभावः । झीर्यति, झृणाति । जझार । जझरतुः । झरिता, झरीता । अझारीत् । (व) झरा । झर्झरः ।

(ट)

टङ्—टङ्कि, चु, प । बन्धनम् ।

टङ्कयति । टङ्कति । उद्—उल्लेखः उद्दङ्कितः । नाकृष्टं न च टङ्कितं न नमितं नोत्थापितं धनुः, महाना १ । २४ ।

टल्—भ्वा, प । १ वैकल्यम् । व्याकुलत्वम् । २ वैकल्यम् । विह्वलीभावः । टलति । टटाल । टेलतुः । टलिता । अटालीत् । टृल् टृलति । टलः । टालः । टृलः । टृालः ।

टिक्—टीक्, टिङ्क, टीङ्क, (कक्कि) ।

भ्वा, आ । गतिः । टेकते । टिटिके । टेकिता । टीकते । टिटीके । टीकिता । टीका । टीङ्क, टीकते इति कश्चित् ।

टिट्, चु, प, वो । प्रेरणम् । टेपयति ।

टृल्—(टल्), भ्वा, प । विह्वलवः ।

(ड)

डप—(डम्प, डम्भ, डिम्प, डिम्भ), चु, आ, उ, वो । संघातः । डापयति । ०ते । डपि, डम्भयति । ०ते । डभि, डम्भयति । ०ते । डिपि, डिम्पयति । ०ते । डिभि, डिम्भयति । ०ते ।

डम्ब्—डबि, चु, प, वो । नोदनम् । प्रेरणम् । डम्बयति । डिबि, डिम्बयति, वो । वि—अनुकरणम् । ऋतुविडम्बयामास तम्, र ४,१८ । विडम्बना । विडम्बते (लवि) ।

डिप्, दि, तु, चु, प । क्षेपणम् । प्रेरणम् । डिप्यति । डिपति । डिडेप । डेपिता । अडिपत् । तु, डिपिता । अडिपीत् । डिप (डप) चु, आ, उ, वो । सङ्घातः । डेपयति । ०ते । डिपन्ति यस्य मातङ्गा डिप्यन्ति च तुरङ्गमाः । डेपयन्ति मनुष्याश्च युद्धे निर्मोक्षतां भुवम् ॥ कवि ८६ ।

डिम्ब्—डिबि (डबि) ।

डी डीङ्, भ्वा, दि, आ । १उड्डयनम् । नभोगमनम् । २ गतिः, वो । लट् डयते, डीयते । लिट् डिड्ये । लुट् डयिता । लृट् डयिष्यते । लुङ् अडयिष्ट । अडयिषाताम् । अडयिषत । सन् डिडयिषते । यङ् डेडीयते । डेडयीति । णिच् डाययति । अडीडयत् । क्त डीनः, पा ८, २, ४५ । गोयीचन्द्र-

मते भ्वा, डयितः, डयितवान्। उड्—उड्डयनम्। उड्डीयन्ते शरा यस्य कोटिशः समराङ्गणे। भग्नानामरिसैन्यानामुड्डयन्ते रजांसि च॥ कवि १,४२। उदडीयत पक्षिभिः, नै २, ५। प्रोड्डिनोड्डीनसंडीनान्येताः खगगतिक्रिया इत्यमरः। अव—अधोगतिः।

(ढ)

ढुण्ढ्—ढुन्ढ्, भ्वा, प। अन्वेषणम्। ढुण्ढति। ढुण्ढ्यते गौर्गौपेन।

ढौक्—ढौक्ष (कक्षि) भ्वा, आ। गतिः। लट् ढौकते। वदनं ढौकते (आवृणोति), शकु ३, १९५। लिट् ढुढौके, यान्तं वने रात्रिचरी ढुढौके, भ २, २३। ढुढौकिरे पुनर्लङ्काम्, भ १४, ७१। लुट् ढौकिता। लृट् ढौकिष्यते। लुङ् अढौकिष्ट। अढौकिषाताम्। अढौकिषत। सन् ढुढौकिषते। यङ् ढोढौक्यते। णिच् ढौकयति। अङ्ढौकत्, पा ७, ४, २। अढौकयद्रथम्, भ १७, १०३। उप—उपढौकनम्। क्षणेन हर्षादुपढौकितानि पुष्पाणि, कौसुमे ५ किरणः।

(त)

तक्—भ्वा, प। १ हसनम्। २ सङ्गनम्, वो। तकति। ततोक। तकिता।

तक्ष—तक्ष्, भ्वा, प। तनूकरणम्। क्षयीकरणम्। तक्षणम्। लट् तक्षति, तक्ष्णोति, पा ३, १, ७६। लिट् ततक्ष। ततक्षतुः। ततक्षिथ, ततष्ठ। लुट् तक्षिता, तष्टा। लृट् तक्षिष्यति, तक्ष्यति। लुङ् अतक्षीत्, अताक्षीत्। अतक्षिष्टाम्, अताष्टाम्। अतक्षिषुः, अताक्षुः। सन् तितक्षिषति, तितक्षति। यङ् तातक्ष्यते। तातष्टि। णिच् तक्षयति। अततक्षत्। निर्, सम्—भर्त्सनम्। व्यथनम्। सन्तक्षति वाग्भिः, पा, ३, १, ७६। मर्मच्छिदा नो वचसा निरतक्षन्नरातयः, भा ११, ४९। तक्ष्, भ्वा, प। १ त्वचनम्। आच्छादनम्। २ त्वचो ग्रहणम्। ३ परिग्रहः। तक्षति। ततक्ष। तक्षिता।

तङ्क्, तङ्कि, भ्वा, प। कृच्छ्रजीवनम्। दौःस्थ्यम्। तङ्कति। ततङ्क। तङ्किता। अतङ्कीत्। आ—आतङ्कः। भयम्।

तङ्ग्—तगि (अगि) भ्वा, प। १ गतिः। २ स्खलनम्। ३ कम्पः, वो। तङ्गति। ततङ्गः। तङ्गिता। त्रगि, त्रङ्गति, वो।

तञ्च्, तञ्च्, तन्चू, तन्जू, रु, प। सङ्कोचः। लट् तनक्ति। तङ्क्तः। तञ्चन्ति। तञ्जन्ति। तनच्मि, तनज्मि। लङ् अतनक्। लिट् ततञ्च। लुट् तङ्क्ता, तञ्चिता। लृट् तङ्क्ष्यति, तञ्चिष्यति। लुङ् अताङ्क्षीत्। अताङ्क्ताम्। अताङ्क्षुः। अतञ्चीत्। अतञ्चिष्टाम्। अतञ्चिषुः। सन् तितङ्क्षति, तितञ्चिषति। यङ् तातञ्च्यते। तातङ्क्ति। णिच् तञ्चयति। तङ्क्त्वा, तञ्चित्वा। तङ्क्तः। तन्चु (चन्चु) भ्वा, प। गतिः। तञ्चति। तञ्चिता। (ड) तञ्चित्वा, तङ्क्त्वा। तङ्क्तः।

तट्—भ्वा, प। उच्छ्रायः। उच्चीभावः। तटति। ततोट। तटिता। तट्, चु, प, वो। आघातः। ताटयति।

तड्—चु, प। आघातः। ताडनम्। तड् (अजि) चु, प। दीप्तिः। ताडयति। अतीतडत्। अत-

ताड़च मुष्टिना (ताड़ं करोतीति णिच्) भ १५, ७८। णिच्यर्थं ताड़यन्ती, मनु ४, १६४। तं हस्तैरताड़यत्, भ ८, ३२। अताड़यन् मृदङ्गांश्च, भ १७, ७।

तण्ड्—तड़ि, भ्वा, आ। ताड़नम्। आघातः। तण्डते। ततण्डे। वितण्डा।

तन्—तनु, त, उ। विस्तारः। व्याप्तिः। प्रसारणम्। लट् तनोति, पा ३, १, ७८। तनुतः। तन्वन्ति। तन्वः, तनुवः। तनुते। तन्वाते। तन्वते। तनोति रविरातपम्, कु २, ३२। हि, तनु। तनवानि। लिङ् तनुयात्। तन्वीत। लङ् अतनोत्। अतनुताम्। अतन्वन्। अतनवम्। अतनुत। अतन्वाताम्। अतन्वत। तरवः पुष्पान्तरानतन्वन्, भ १०, २२। लिट् ततान। तेनतुः। तेनिथ। तेने। कुतूहलं तस्य ततान, भ २, १७। कूलानि सरोजलक्ष्मीं तेनुः स्खलत्पद्म हासैः, भ २, ३। पितुर्मुदं तेन ततान सोऽर्भकः, र ३, २५। लुट् तनिता। लृट् तनिष्यति। ०ते। लुङ् अतनीत्। अतानिष्टाम्। अतानिषुः। अतत, अतनिष्ट। अतनिषाताम्। अतनिषत। अतथाः। अतनिष्टाः, पा २, ४, ७८। अतानिष्टां तमो यथा, भ १५, ९१। कर्म्मणि, तायते। तन्यते, पा ६, ४, ४४। अतानि। सन् तितनिषति। ०ते। तितांसति। ०ते। तितंसति। ०ते, पा ६, ४, १७। यङ् तन्तन्यते। तन्तन्ति, पा ६, ४, ४४। णिच् तानयति। अतीतनत्। तनु, चु, प। १ श्रद्धा। २ उपक्षतिः। ३ आघातः हिंसा वर्ज्जनम् वो। ४ क्षुनोतिः। ५ शब्दः। ६ उपतापः, दुर्गा। ७ (उपसर्गात्) दीर्घीकरणम्। विस्तारः। तानयति, तनति। (उ)तनित्वा, तत्वा। ०तत्य। ततम्। तन्तिः। तन्नम्। तानः। तन्वन्। तत्। व्यति—अन्योन्यविस्तारः। व्यत्यतन्वातां मूर्त्ती, भ ८, ३। अव—व्याप्तिः। गरुत्मतां सन्ततिभिरन्तरीक्षमवतेने, भा १६, ४३। आ—व्याप्तिः। जड़तामातनोति उत्तर ९१। उद्—ऊर्द्धं विस्तारः। उत्तानः। परि—सर्वतो विस्तारः। वेष्टनम्। प्र—विस्तारः। श्रुतिभिर्वाचस्पत्यं प्रतायते, मा २, ३०। वि—विस्तारः वितत्य शार्ङ्गम्, भ ३, ४७। कौतुककियां वितेनतुः, र ११, ५३। कर्म्म व्यतानीत्। (प्रारब्धवान्), भ १, ११। वितनेषु अध्वरेषु, कु २, ४६। णिच् दीर्घीकरणम्। विस्तारः। वितानयति, वितानयति यः कीर्त्तिं वितनत्यमलं यशः। वितनोति च यः स्त्रीणां हृदये मन्मथव्यथाम्॥ कवि ९२। सम्—विस्तारः। सन्ततम्। सततम्।

तन्ब्—तबि, चु, आ।

१ कुटुम्बधारणम्। पोषणम्। २ धारणम्। धरणम्। ३ विस्तारः। तन्बयते। प्रजाः प्रजाः सुता इव तन्बयित्वा, शकु, ५, ९।

तन्द्र—तन्द्र, तन्द्रि, तद्रि, चु, प।

१ सादः। अवसादः। २ मोहः। तन्द्रयति। तन्द्रीः। तन्द्रयते। तन्द्रीः। सौत्रधातुरयमिति केचित्, दुर्गा।

तप्—भ्वा, प। सन्तापः।

दाहः। शोकः। तप्, दि, आ। १ ऐश्वर्य्यम्। प्रभुभावः। २ उपतापः, वो। ३ तपःकरणम्। लट् तपति। अर्ज्जनार्थं आत्मनेपदं यक् च। तप्यते तपस्तापसः,

संचिन्त। अयं धातुरैश्वर्ये वा तङ्ञनो लभते। अन्यदा तु शब्विकरणः परस्मैपदी, को १३६। तपत्यादित्यवद्यस्त्वं तप्यते यः परन्तपः। तपते रिपुराष्ट्रेषु तापयत्यहितं सताम्॥ कवि २९। तपति तनुगात्रि! मदनस्त्वाम्, शकु ३, ८८। रविस्तपति निःशङ्कम्, भ १६, ६। तपत्यादित्यवच्चैव चक्षूंषि च मनांसि च, मनु ७, ६। तपति न मां किशलयशयनेन, गीतगो ७, ३१। लिट् ततापे। तेपे। लुट् तप्ता। लृट् तप्स्यति। ०ते। लुङ् अताप्सीत्। अताप्ताम्। अताप्सुः। अतप्त। अतप्साताम्। अतप्सत। वनमताप्सीच्छनैर्भानुः, भ ९, २। भावकर्मणोः, तप्यते। अन्वतप्त पापेन, पा ३, १, ६५। कर्मकर्तरि अतप्त तपस्तापसः। तपति तापसं तपः (दुःखयति)। तप्यते तपस्तापसः (अर्ज्जयति), पा ३, १, ८८। तेपे तपः कपटवामनः, अनर्घ ३४। सन् तितप्सति। ०ते। यङ् तातप्यते। तातप्ति। तप्, चु, प। दाहः। तापयति। तपति। तप्ता। अतीतपत्। अयमात्मनेपदीति केचित्। तापयते दुर्गा। तप्, भ्वा, उ, वो। दाहः तपति। ०ते। तपिता। अयं सेट् इति बोपदेवः। तप्तम्। तपनम्। तापः। तपनः। अनु—अनुतापः। पश्चात्तापः। शोकः। अन्वतप्त पापेन, पा ३, १, ६५। विरहः किमनुतापयेद्विपश्चितम्, र ८, ९०। अभि—उत्तापः। अभितप्तमयोऽपि मार्दवं भजते, र ८, ४४। आ—आतपः। क्षुतिः। उद्—उत्तापः। सन्तापः। दीप्तिः। उत्तपति सुवर्णं सुवर्णकारः, पा ३, १, ८८। उत्तपते, पा १, ३, २७। उत्तपमान आतपः, भ ८, १५। उप—उपतापः। निर् उत्तापः। निष्टपति सुवर्णम् (सकृदग्निं स्पर्शयति)। निस्तपति सुवर्णम् (पुनः पुनरग्निं स्पर्शयति), पा ८, ३, १०२। निष्टप्तलोमिवाक्षानम्, भ ९, ८५। परि—परितापः। अनुतापः। शोकः। सन्तापः। व्यथा। कं स्त्रीकृता न विषयाः परितापयन्ति, हितो। हितादपेतः परितप्यसे, भा ११, २९। परितप्यते नोत्तमः परदुःखिभिः, भा १६, २१। प्र—प्रतापः। सन्तापः। भास्वन्तोऽपि प्रतपन्ति, गौ ११, ३०। प्रतपतु नरेन्द्रचन्द्रः, रत्ना १, ९। वि—दीप्तिः। वितपते रविः, पा १, ३, २७। भ ८, १४। सम्—सन्तापः।

तम्—तमु, दि, प। १ आकाङ्क्षा।

२ ग्लानिः, वो क्षयोभावः। ताम्यति। पा ७, ३, ७४। न च दुःखेन ताम्यति, कवि २४५। ततान। तेमतुः। तमिता। तमिष्यति। अतमत्। (अतमत्, अतामीत्, वो)। णिच् तमयति। अतमिः अतामि, पा ६, ४, ९३। ७, ३, ३४। (उ) तमित्वा,,तान्त्वा। तान्तः। मृदुलतान्तलतान्तमलोकयत्, भा ९, २। उद्रेण ताम्यता, भा ८, १७। उद्—उत्कण्ठा। उत्ताम्यति मे मनः, रत्ना ३, ८४। सम्—ग्लानिः। चिन्तासु सन्ताम्यति, गीतगो ४, २१।

तम्ब्—(कम्ब्) भ्वा, प। हिंसा।

तय्—(अय्) भ्वा, आ। गतिः।

पालनम्, वो। तयते, तयते चन्द्रगुप्तं यः, कवि ४०। तेये। तयिता। अतयिष्ट। तेये पुरात्, भ १४, ३५। धरित्रीं तेये, भ १४, १०८।

तर्क्—(कृप्) चु, प। १ दीप्तिः।

२ वितर्कः। ऊहः। ३ संशयः। ऋट्

तर्कयति। इच्छवेचनादत्रभवतीं परिव्राजकां तर्कयामि। शकु १, २१। लिट् तर्कयामास। लुट् तर्कयिता। लृङ् अतितर्कत्। तर्कयित्वा। ०तर्क्य। तर्कितः। तर्कणम्। तर्कः। प्र, वि—वितर्कः। प्रतर्कयन्नम्भोगेन्द्रनादान्, भ २, २८।

तर्ज्—भ्वा, प। भर्त्सनम्।

तर्जति। ततर्ज, तं ततर्ज, भ १४, ८०। तर्जिता। अतर्जीत्। अतर्जिष्टम्। अतर्जिषुः। तितर्जिषति। तातर्ज्यते। तातर्क्ति। णिच् तर्जयति। तर्ज्, चु, आ। तर्जनम्। तर्जयते। तर्जयति भर्त्सयति इत्यपि दृश्यते कविश्चिति आख्यातचन्द्रिका, रघुटीका १२, ४१। अहितान् तर्जयन्निव केतुभिः, र ४, २८। तावत्तर्जयदम्बरे, र १२, ४१। सोऽतर्जयत् सूतम्, भ १७, १०३। सखीमङ्गुल्या तर्जयति, शकु १, १८२। तर्जते यो हि भूपालान् न तर्जयति सज्जनान्, कवि २५। तर्जनी।

तर्ह्—भ्वा, प। हिंसा। तर्हति।

तर्व्—भ्वा, प। गतिः। तर्वति।

तस्—चु, प। प्रतिष्ठा।

तास्यायति। तस्यति, ते। अतीतसत्।

तस्—तसु, दि, प। उपक्षयः।

तस्तुहानिः। उत्तेपणम्, वो। तस्यति। तत्तास। तस्तिता। अतसत् (अतसत्, अतसीत्, अतासीत् वो)। (उ) तस्तित्वा, तस्त्वा। तस्तः।

तंस्—तसि, चु, प। अवसादनम्। अवतंसयति। अवतंसति, वो। उत्तंसयिष्यति काचांस्त्वय देवि! श्रीमः, वेणी ११।

ताय—तायृ, भ्वा, आ। १ सन्तानः। प्रबन्धः। विस्तारः। २ पालनम्। लट् तायते। अमर्षोऽतायत, भ १७, ५०। कामास्तेऽन्यत्र तायन्ताम्, भ २०, २५। तायते स्वकुलव्रतम्, कवि ४०। लिट् तताये। लुट् तायिता। लृट् तायिष्यते। लुङ् अतायिष्ट। अतायि, पा १, १, ६१। अतायिषाताम्। अतायिषत। अतायि सख्यमस्य। (सन्ततम्), भ ६, ३३। णिच् तायय्यति। (ऋ) अततायत् मायां व्यतायेताम्, भ १७, १०५।

तिक्—तिग्, स्वा, पा। १ गतिः। २ आस्कन्दनम्। गतिविशेषः। ३ वधः, वो। तिक्नोति। तिग्नोति। तिक्त (कक्ति) भ्वा, आ। गतिः। तेकते। तेकिता।

तिघ्—स्वा, प, वो। घातः। तिघ्नोति।

तिज्—भ्वा, आ। निशानम्। तीक्ष्णीकरणम्। २ क्षमा। सहनम्। (क्षमायां सन्) तितिक्षतेऽपराधम्, पा १, १, ५। अतिवादांस्तितिक्षेत, मनु ६, ४७। तितिक्षते क्षमी यस्तु सापराधेषु साधुषु। लिट् तितिक्षाञ्चक्रे। लुट् तितिक्षिता। लुङ् अतितिक्षिष्ट। तिज्, चु, प। निशानम्। तेजनम्। तेजयति। कुसुमचापमतेजयदंशुभिर्हिमकरः, र ९, ४१। तेजयन्ति यमाक्रम्य, कवि १६८। उद्—उत्तेजनम्। प्रेरणम्। उद्दीपनम्। व्यपकरणम्। तीक्ष्णीकरणम्।

तिप्—तिपृ, भ्वा, आ। क्षरणम्।

क्षुतिः। तेपते। तितिपे। तितिपिषे। तेमा। क्षीरस्वामी त्वयं क्षेट् इति वक्ष्यति। क्षिभाषितेट् इति वोपदेवः। तेपृक्षते। तिप्सीष्ट। अतिप्त। अतिप्साताम्। दिव्, देवते इति क्षिदिव्।

तिम्—दि, प। आर्द्रीभावः।
क्लेदनम्। तिम्यति। तितेम। तेमिता। तीम्, तीम्यति, वो।

तिल्—तिल्ल्—भ्वा, प। गतिः।
तिल, तु, चु, प। स्नेहनम्। स्निग्धीभावः। तेलति। तिल्लति। तिलति। तेलयति। तेतिल्यते श्रिशुजनो धनिनां गृहेषु। तिल्लन्ति यौवनमदेन रते युवानः। कवि ४७।
तीक्, तीक्ष (कक्कि) भ्वा, आ। गतिः।

तीम्—(तिम्) दि, प। क्लेदनम्। तीम्यति।

तीर—(पार) चु, प। अदन्तः।
कर्म्मसमाप्तिः। तीरयति। अतितीरत्।

तीव्—(पीव्), भ्वा, प। स्थौल्यम्।
तीवति। यस्तु नातीव तीवति, कवि ८५।

तु—अदा, प। सौत्रधातुः।
१ गतिः। २ वृद्धिः। पूर्त्तिः। ३ हिंसा। ४ जीवनम्। वृत्तिः, वो। तौति। तवीति, पा ७,२,८५। तुतः। तुवीतः। तुवन्ति। तुताव। तोता। तोष्यति। अतौषीत्।

तुज्—भ्वा, प। हिंसा। तोजति।

तुञ्ज्—तूजि, भ्वा, प। १ पालनम्। २ बलम्। ३ हिंसा। ४ जीवनम्, वो। ५ याञ्ज्ञा, वो। तुञ्जति। तुतुञ्ज। तुञ्जिता। अतुञ्जीत्। तुङ्गः। तुजि, (क्षुप) चु, प। दीप्तिः। तुजि, चु, प। १ हिंसा। २ बलम्। ३ दानम्। ४ वासः। तुञ्जयति। तुञ्जति। तोजयतीति केचित्। एवं सञ्जि, सञ्जयति।

तुट्—तु, प। कलहकरणम्।
तुटति। तुतोट। तुटिता। अतुटीत्।

तुड्—तुड्, भ्वा, प। तुड्, तु, प।
तोड़नम्। दारणम्। भेदः। हिंसा। तोड़ति। तुतोड़। तोड़िता। तुड़ति। तुड़िता। अतुड़ीत्।

तुण्ड्—भ्वा, प, वो। अनादरः।

तुण्—तु, प। कुटिलीकरणम्।
तुणति। तुतोण। तोणिता। अतोणीत्।

तुण्ड्—तुड़ि, भ्वा, आ, वो। वधः।
निपीड़नम्। तुण्डते पान्थं पिकः, दुर्गा।

तुत्थ—चु, प। अदन्तः। आवरणम्।
तुत्थयति। तुत्थापयति, वो। पांशुर्दिशां मुखमतुत्थयदुत्थितोऽद्रेः, भा, ५, ११।

तुद्—तु, उ। व्यथनम्।
पीड़नम्। ताड़नम्। खट् तुदति। °ते, पा ३, १, ७७। तुदसि मर्माणि वाक्शरैः, भारत। अतुदन् शस्त्रिभिर्दृढ़म्, भ १७, १२। लिट् तुतोद। तुतोदिथ। तुतुदे। तुतोद गदयारिम्, भ १४,८१। लुट् तोत्ता। लट् तोत्स्यति। °ते। लुङ् अतौत्सीत्। अतौत्ताम्। अतौत्सुः। अतुत्त। अतुत्साताम्। अतुत्सत। अतौत्सुः शूलैः, भ १५, ४। सन् तुतुत्सति। °ते। यङ् तोतुद्यते। तोतोत्ति। णिच् तोदयति। अतूतुदत्। तुत्त्वा। तुन्नः। तोदः। तोत्रम्। विधुन्तुदः। कर्म्मसु निस्तुतोद (व्यवयामास), भा १७, ४१। अदन्तुदः।

तुन्द् (त्रन्द्)।

तुप्—तुफ्, भ्वा, प । हिंसा ।

तु, प । १ हिंसा । २ क्लेशः, वो । तोपति । तुपति । तोफति । तुफति । तुम्फति, वो ।

तुभ्—भ्वा, आ, दि, क्रया, प ।

हिंसा । बधः । लट् तोभते । तुभ्यति । तुभ्नाति । तुभ्नीतः । तुभ्नन्ति । मुष्टिनाऽऽतुभ्नात्तम्, भ १७,७८ । अज्ञानतुभ्नात्, भ १७, ८० । लिट् तुतोभ । तुतुभे । लट् तोभिता । लुङ् भ्वा, अतुभत् । अतोभिष्ट । दि, अतुभत् । क्रया, अतोभीत् ।

तुम्फ्, तुम्फ् तुनप्, तुनफ्, भ्वा, प ।

हिंसा । तु, प । १ हिंसा । २ क्लेशः, वो । तुम्पति । तुम्फति । प्रतुम्पति गौः, पा ६, १, १५ । न यङ्लुकि, प्रतोतुम्पीति ।

तुम्ब्—तुबि, भ्वा, प । अर्दनम् ।

पीड़नम् । तुम्बति । तुबि, चु, प । १ अर्दनम् । २ अदर्शनम् । तुम्बयति । तुपि, तुम्पति । तुम्पयतीत्यके ।

तुर्व्—तुर्वी (उर्वी), भ्वा, प ।

हननम् । तूर्वति । तुतूर्व । तूर्विता । (ई) तूर्णम् । क्विप् तूः तुरौ ।

तुल्—चु, प । उन्मानम् ।

परिमाणम् । तोलयति, तोलयति काञ्चनं वणिक्, दुर्गा । तोलति, वो । यस्तोलयति दारिद्र्यकर्दमे पतितान्, कवि २०४ । अतूतुलत् । पृथिवी तोलयिष्यते (जङ्घे क्षेप्स्यते), भ १६, १६ । तुलयति, तुलना, इत्यादौ तुलाशब्दात् णिच्, को १७२ । त्वदीयं सौन्दर्य्यं तुङ्गनगिरिकन्ये ! तुलयितुम् इति शङ्करोक्तम् । रामे रुद्रधनुराक्षनं तुलयति, महाना १, ३१ । अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वाम् । मेघ २० । तोलितम् । तोलनम् । उद्—उत्तोलनम् । जङ्घे नयनम् ।

तुष्—दि, प । प्रीतिः । तुष्टिः ।

लट् तुष्यति । तुष्यन्ति ब्राह्मणा नित्यम्, कवि १४८ । लिट् तुतोष । तुतुषतुः । तुतोषिथ । तुतोष ह्यलब्धा, र ३, ६४ । तुतुषुर्वानराः सर्वे, भ १४, ११२ । लुट् तोष्टा । तोष्टा च भरतः परम्, भ २२, १४ । लृट् तोक्ष्यति । स्वयम्भुः कस्य तोक्ष्यति, भ १६, ३ । लुङ् अतुषत् । अतुषत् कुम्भकर्णः, भ १५,८ । सन् तुतुक्षति । यङ् तोतुष्यते । तोतोष्टि । णिच् तोषयति । अतूतुषत् । गुरून् सम्यगतूतुषः, भ ६,६८ । मूर्ख्यं न तोषयेदेनमाधिस्तेनोऽन्यथा भवेत्, मनु ८, १४४ । प्र, परि—परितोषः । प्रतुष्यति श्रोत्रसुखैरपथ्यैः, भ १२, ८३ सम्—सन्तोषः । भोजनविशेषैर्वायर सन्तोष्य, हितो ।

तुस्—भ्वा, प । शब्दः ।

तोसति । तुतोस । तोसिता । अतोसीत् ।

तुह्—तुहिर् (उहिर्) भ्वा, प ।

अर्दनम् । बधः, वो । तोहति । अतुहत् । अतोहीत् ।

तूड्—तूडृ, भ्वा, प, वो । अनादरः ।

तुडृ, (तुडृ) भ्वा, प । तोडनम् । दानम् ।

तूण, चु, प, वो । अदन्तः । सङ्कोचः तूणयति । अतुतूणत् । तूणः ।

तूण—चु, प, वो । सङ्कोचः ।

तूण, चु, आ । पूरणम् । तूणयति । तूर्ण

तूर्—तूरी, दि, आ १ त्वरा ।
२ हिंसा । तूर्यते, तूर्यते न क्वचित् । आर्ष्ये, कवि २५५ । तुतूरे । (ई) तूर्ण: ।

तूल्—भ्वा, प । निष्कर्ष: ।
निष्कोषणम् । अन्तर्गतस्य वह्निर्नि:-सारणम् । तूलति । तुतूल । अतूलीत् । तूल्, चु, प, वो । परिमाणम् । तूल-यति काञ्चनं वणिक् । तूलयत्यपि देवेन्द्रं संग्रामे भुजविक्रमात्, कवि २०४ । तूल्, चु, आ । पूरणम् । तूलयते । तूली । तूलिका ।

तूष—भ्वा, प । तुष्टि: ।
तूषति । तूषन्ति कुलदेवता:, कवि १४८ । तुतूष । तूषिता । अतूषीत् ।

तृच्—भ्वा, प । गति: ।
तृचति । तत्रृचे । तृचिता । अतृचीत् ।

तृण्—तृणु, त, उ । भक्षणम् ।
तर्णोति । तर्णुते (तृणोति, तृणुते) । बर्हींषि तर्णोति । हरिणो तृणुते तृणम्, अनर्घ ३५ । तृणोति शाल्वं युद्धे, कवि ७४ । (उ) तर्णिता, तर्त्वा । तृत: । तर्णक: । तृणम् ।

तृद्—उतृदिर, क, उ । हिंसा ।
२ अनादर: । लट् तृणत्ति । तृन्ते । भूतिं तृणन्ति यज्ञाणाम्, भ ६, ३८ । हि तृन्धि । लिङ् तृन्द्यात् । तृन्दीत । लङ् अतृणत् । अतृन्ताम् । अतृन्दन् । अतृणदम् । अतृन्त । लिट् ततर्द, त्र्या-म्बान् रिपोस्ततर्द शाखिना, भ १४, १०८ । तत्रृदे । तत्रृदिवे । तत्रृदे, पा ७, २, ५७ । लुट् तर्दिता । लृट् तर्दि-ष्यति । ०ते । तर्त्स्यति । ०ते । लृङ् अतर्दिष्यत् । ०त । अतर्त्स्यत् । ०त ।
लुङ् (दृर्) अतर्दत् । अतर्दीत् अतर्दि-ष्टाम् । अतर्दिषु: । अतर्दिष्ट । अरिमत-र्दिषु:, भ १५, ४४ । सन् तितर्दिषति । ०ते । यङ् तरीतृद्यते । तरीतर्त्ति । सन् तित्रृत्सति । ०ते । तर्दयति । अतीत्रृदत् । (उ) तर्दित्वा, तृत्वा । तृण्णम् । वि—ताड़नम् । मर्माणि च विलृन्दन्ति भ १६, १५ ।

तृप्—दि, प । १ प्रीणनम् ।
तर्पणम् । २ तृप्ति: । तृप्तीभाव: । तृप्, भ्वा, प । प्रीणनम् । लट् तृप्यति । तृप्नोति, पा ८, ४, ४८ । तृप्त: । तृप्नु-वन्ति । नाग्निस्तृप्यति काष्ठानाम् । को न तृप्यति वित्तेन, हितो । नयस्य न हि तृप्यामि, भारत । स्वन्दीनि तृप्यतु मधूनि पिबन्निवायम्, नै १४, १०९ । यस्तृप्नोति पितॄन्, कवि १० । दातुं तृप्यति यो धनम्, कवि १५४ । लिङ् तृप्नुयात् । लङ् अतृप्नोत् । लिट् ततर्प, ततृपतु: । ततर्पिथ, तत्रप्थ, ततर्प्थ । ततृपिव, ततृप्व । लुट् तर्पिता, तर्प्ता, तृप्ता, पा ६, १, ५९ । ७, २, ४५ । लृट् तर्पिष्यति, तर्प्स्यति, तृप्स्यति, तृप्ताति । स्वादि: सेट् तर्पिता । अत्र तर्प्स्यन्ति मांसादा:, भ १६, २८ । लृङ् अतर्पीत्, अतार्प्सीत्, अतृप्सीत् । अतृपत् । अतर्पिष्टाम्, अतार्प्स्टाम्, अतृप्ताम् । पितृनतार्प्सीन्नृप-रक्षतोयै:, भ २, ५२ । आत्मोत्थतृषत्, भ १५, २९ । नातार्प्सीद् भक्षयन्, भ १५, ४९ । सन् तितर्पिषति, तितृप्सति । यङ् तरीतृप्यते । तरीतर्त्ति । क्विप् तर्पयति । अतीतृपत्, अतितर्पत् । तृप्, चु, प । १ तृप्ति: । २ प्रीणनम् । ३ सन्दीपनम् । तर्पयति । तर्पति । तर्पिता । तृप्त: । तृप्ति: । तर्पणम् । यत्तदर्थं यतीव श्रम:,

कवि १५४। हविषा योऽग्निमयं तर्पति देवांस्तर्पयति प्रियोपकरणैः, कवि १०। अप—अपतर्पणम्। भोजनाभावः। आ—आतर्पणम्। प्रीणनम्। आलेपनम्। परि—सम्यक्तृप्तिः। परितृप्तिः। सम्—सन्तर्पणम्। यावद्वराङ्गैर्न रिपुः प्रवाञ्छान् सन्तर्पयति, भ १२, ७५।

तृप्—तृफ्—तु, प। तृप्तिः।

तृपति। तृफति। तर्पिता। अतर्पीत्, को १५१।

तृम्प्—तृम्फ्, तृन्प्, तृन्फ्, तु, प।

तृप्तिः। तृम्पति, तृम्फति। नलोपेऽपि नुम्, को १५१। तृपति, तृफति, वो। तृम्फ। अतृम्फीत्।

तृष्—जितृष्, दि, प। तृष्णा।

पिपासा। आकाङ्क्षा। तृष्यति। ततर्ष। तृष्यतुः। तर्षिता। तर्षिष्यति। अतृषत्। अतर्षीत्, वो। ऋतायञ्च कपयोऽतृषन्, भ १५, ५१। सन् तितर्षिषति। यङ् तरीतृष्यते। णिच् तर्षयति। अतीतृषत्। तृषित्वा, तर्षित्वा, पा १, २, २५। तृषित्वाऽनिशं स्वादु पिबन्तम्, भ ७, १०६। तृषितः। तर्षः। तृष्णा। तृष्णाक्। अनु—अभिलाषः।

तृह्—तृह्, तु, प। तृह्, रु, प।

हिंसा। वधः। लट् तृंहति। तृणेढि, पा ७, ३, ९२। तृण्ढः। तृंहन्ति। तृणेक्षि। तृणेड्ढि, भ ६, ३९। लोट् तृणेढु। तृण्ढि। तृण्हानि। तृणेढु रामः, भ १, १९। तृण्हानि दुराचारा राक्षसीः, भ २०, ३। लिङ् तृंह्यात्। लङ् अतृनेट्। अतृण्ढाम्। अतृंहन्। अतृण्हम्। अतृणेट् प्रवृन्, भ १७, ११। अतृंहन्लोमरैः भ १७, १२। लिट् ततर्ह। ततृहतुः। ततर्हिथः, ततर्ढ। लुट् तर्हिता, तर्ढा। रु, तर्हिता। लृट् तर्हिष्यति, तर्क्ष्यति। लुङ् अतृक्षत्, अतर्हीत्। रु, अतर्हीत्। सन् तितर्क्षति। तितर्हिषति। यङ् तरीतृह्यते। तरीतर्ढि। णिच् तर्हयति। अततर्हत्। अतीतृहत्, पा ७, ४, ७। तर्हित्वा, तृढ्वा। तृढः, तृढः सौमित्रिपत्रिभिः, भ १४, ३५।

तृंह्—तृन्ह् (तृह्) तु, प।

हिंसा। तृंहति। नलोपेऽपि नुम्, को १५१। तृहति, वो। ततृंह। तृंहिता, तृण्ढा। तृंहिष्यति, तृङ्क्षयति। आशिषि, तृह्यात्। अतृंहीत्, अताङ्क्षीत्। अतृंहिष्टाम्, अताङ्क्ष्टाम्। अतृंहिषुः, अताङ्क्षुः। सन् तितृंक्षति, तितृंहिषति।

तॄ—भ्वा, प। १ प्लवनम्।

जलोपरिस्थितिः। २ तरणम्। अतिक्रमणम्। उत्तरणम्। ३ अभिभवः, वो। लट् तरति, तरति सकलदुःखं वामनं भावयेद् यः, दुर्गा। न बाहुभ्यां नदीं तरेत्, मनु ४, ९७। लिट् ततार। तेरतुः, पा ६, ४, १२२। तेरिथ। लुट् तरिता, तरीता, पा ७, २, ३८। लृट् तरिष्यति, तरीष्यति। शिला तरिष्यत्युदकं न पर्णम्, भ १२, ७७। मच्चितः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि, गी १८, ५८। आशिषि, तीर्यात्। लुङ् अतारीत्, अतारिष्टाम्। अतारिषुः। सन् तितरिषति, तितरीषति, तितीर्षति, पा ७, २, ४१। यङ् तेतीर्यते। तातर्क्ति। णिच् तारयति। अतीतरत्। तीर्त्वा। ०तीर्य। तीर्णः, क्रुद्धं तीर्णः, र १४, ६। तरणम्। तरितुम्, तरीतुम्, तर्त्तुम्। तरितव्यम्, तरीतव्यम्,

तर्त्तव्यमिति केचित्। तरः। आतरः। अति—अतिक्रमः। अतितरन्त्येव मृत्युं श्रुतिपरायणाः, गी १३, २५। अव—अवतरणम्। रथादवततार, र १, ५५। विमानं ज्योतिष्पथादवततार, र १३, ६८। खभुजादवतारिता घूः, र १, ३४। अङ्गराजादवतार्य्य चक्षुः, र ६, ३०। उत्—उत्तरणम्। उत्तेरुनंदान्, भ ७, ५५। ६, ८५। उदतारीदुदन्वन्तम्, भ १५, १०। णिच् (उद्दमनम्) अन्नानभुक्तमुत्तार्य्य, मनु ११, १६०। निर्—निस्तारः। अतिक्रमः। क्रमेण निस्तीर्य्य च दोहदव्यथाम्, र ३, ७। आपदं निस्तरेद् यथा, भारत। निस्तारयति दुर्गात्, मनु ३, ८८। प्र—णिच् प्रतारणा। वि—वितरणम्। दानम्। सम्—सन्तरणम्। उत्तरणम्। सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि, गी ४, ३६। दौहित्र एनं सन्तारयति पौत्रवत्, मनु ८, १३८।

तेज्—भ्वा, प। पालनम्। तेजति।

तेप्—तेपृ (तिपृ) भ्वा, आ।

१ क्षरणम्। च्युतिः। २ कम्पनम्। तेपते। तेपन्ते यस्य वक्त्रेन्दोर्लावण्यामृतबिन्दवः, कवि १६६। संवीच्य तेपते स्त्रीणां वपुः, कवि १६६। तितेपे। तेपिता। देपते इत्येके।

तेव्—तेवृ, भ्वा, आ। १ क्रीड़नम्।

२ रोदनमिति भट्टमल्लः। तेवते।

तोड्—तोडृ, वो। भ्वा, प। अनादरः।

त्यज्—भ्वा, प। हानिः। त्यागः।

लट् त्यजति। त्यज क्षोभम्, भ ५, २३। बाणमत्यजत्, भ ६, १२२। लिट् तत्याज। तत्यजतुः। तत्यजिथ, तत्यक्थ। तत्यजिव। लुट् त्यक्ता। लृट् त्यक्ष्यति। लुङ् अत्याक्षीत्। अत्याक्ताम्। अत्याक्षुः। अत्याक्तामायुधानीकम्, भ १५,११३। सन् तित्यक्षति। यङ् तात्यक्ष्यते। तात्यक्ति। त्याजयति। तं प्राणैरतित्यजत्, भ १५, १२०। त्यक्ता। त्यक्तः। त्यागः। त्यक्तव्यम्। त्यागिनम्। त्याज्यः। परि—परित्यागः। वर्जनम्। कस्तस्य धर्मदारपरित्यागिनो नाम कीर्त्तयिष्यति, शकु टी ७, ९८। सन्, वर्जनम्। सन्त्याजयाञ्चकार सीताम्, भ ५, १०४।

त्रख्—(द्रख्) भ्वा, प। गतिः। त्रखति।

त्रङ्क्—त्रकि (कक्कि) भ्वा, आ। गतिः।

त्रङ्ख्—'त्रखि' (द्रख्) भ्वा, प। गतिः।

त्रङ्ग्—त्रगि, वो, भ्या, प। गतिः।

त्रन्द्—त्रदि, भ्वा, प। चेष्टा। त्रन्दति।

त्रप्—त्रपूष्, भ्वा, आ। लज्जा।

लट् त्रपते। लिट् त्रेपे, पा ६, ४, १२२। त्रेपाते। लुट् त्रपिता, त्रप्ता। लृट् त्रपिष्यते, त्रप्स्यते। आशिषि, त्रपिषीष्ट, त्रप्सीष्ट। लुङ् अत्रपिष्ट, अत्रप्त। अत्रपिषाम्, अत्राप्साताम्। अत्रपिषत, अत्रप्सत। सन् तित्रपिषते, तित्रप्सते। यङ् तात्रप्यते। तात्रप्ति। णिच् त्रपयति। त्रापयति। अतत्रपत्। (ष) त्रपा त्रप्तः। अप—अपत्रपा। लज्जा सापत्रपाऽन्यत इत्यमरः। बलैरपत्रेपे, भ १४, ८४। हृदयमपत्रपते, उत्तर १७२।

त्रस्—त्रसी, दि, प। उद्वेगः।

त्रासः। लट् त्रस्यति, त्रसति, पा १, १, ५०। त्रसति कः सति नाश्रयबाधने, नै ४, १६। त्रस्यन्ति शत्रवो यस्मात् त्रसन्ति परदारगाः, क्षत्रि १०६। तत्रास। तत्रसतुः, त्रेसतुः। तत्र-

सिथ, त्रेसिथ, पा ६, ४, १२४। लुट् त्रसिता। लृट् त्रसिष्यति। लुङ् अत्रासीत्, अत्रसीत्। मा त्रसीः, भ ८, ११९। कपेरत्रासिषुर्नादात्, भ ९, ११। सन् तित्रासिषति। यङ् तात्रस्यते। तात्रस्ति। णिच् त्रासयति। अतित्रसत्। त्रम्, चु, प। १ धारणम्। २ ग्रहणम्। ३ वारणम्। बधः, वो। त्रासयति। (ई) त्रस्तः। त्रस्तुः। त्रासः। त्रस्यन् वैरायमाणेभ्यः, भ ५, ९५। वि, सम्—भयम्। सन्तत्रसुर्हिषः, भ १४, ३९। सन्त्रासयाञ्चकारारिम्, भ ५, १०४।

'त्रंस्—त्रसि (कुप) चु, प। दीप्तिः।

'त्रा'—अदा, प। रक्षणम्।

त्रायति। केचिदादौ त्रा इति पठ्यते। तेन त्राहीति संक्षिप्तसारम्। चक्रिंस्त्राहीति मुग्धबोधम्।

त्रुट्—तु, प। छेदनम्। भेदः। विदीर्णभावः। त्रुट्यति, त्रुटति, पा ३, १, ७०। यावन्मम दन्ता न त्रुट्यन्ति तावत्तव पार्श्वं छिनद्मि, छिनो। त्रुटन्ति सर्वसन्देहांस्त्रुट्यन्ति ग्रन्थयो हृदि, कवि ३८। तुत्रोट। तुत्रुटतुः। त्रुटिता। अत्रुटीत्। त्रुट्, चु, आ। छेदनम्। त्रोटयते। त्रुटितम्। त्रुट्यद्रोमधनुः, महाना १, ३७।

त्रुप्—त्रुफ्—त्रुम्प्—त्रुम्फ्—

त्रुप्, त्रुफ्, (तुप) भ्वा, प। हिंसा। त्रोपति। त्रोफति। त्रुम्पति। त्रुम्फति।

त्रै—त्रैङ्, भ्वा, आ। पालनम्।

त्राणम्। रक्षणम्। लट् त्रायते, त्रायते वर्णधर्मश्च, कवि ४०। त्रायते रक्षसो भयात्, मी २, ४०। पुत्राम्नो नरकात् त्रायते पितरं सुतः, मनु ९, १३८। तत्रे। त्राता। त्रास्यते। अत्रास्त। अत्रासाताम्। अत्रासत। द्रुतमत्रास्त सुग्रीवो भ्रातृव्यं शत्रुसङ्कटात्, भ १४, १२०। मा न त्रास्थाः चतां पुरम्, भ १२। परि—परित्राणम्। रक्षणम्। त्रातः, त्राणः, पा ८, २, ५६।

त्रौक्—त्रौक्ङ (ककि) भ्वा, आ।

गतिः। त्रौकते। तुत्रौके। त्रौकिता। अत्रौकिष्ट। तुत्रौकिषते। तोत्रौक्यते। त्रौकयति।

त्वच्—त्वचू (तच्छू) भ्वा, प।

तक्षणम्। तनूकरणम्। क्षयीकरणम्। त्वक्षति काष्ठं तक्षा, दुर्गा। तत्वक्ष। त्वक्षिता, त्वष्टा। त्वक्षिष्यति, त्वक्ष्यति। अत्वाक्षीत्, अत्वक्षीत्। त्वच—त्वचने तक्षवत्, वो।

त्वङ्—त्वंगि, भ्वा, प। कम्पः।

त्वगि (अगि) भ्वा, प। गतिः। त्वङ्गति।

त्वच्—तु, प। संवरणम्।

आच्छादनम्। त्वचति। त्वक्। त्वच्छु—त्वनच्छु (तनच्छु)भ्वा, प। गतिः। त्वनच्छु, रु, प, वो। सङ्कोचः। त्वच्छति, त्वनक्ति। तत्वच्छ। त्वच्छिता। त्वच्छित्वा, त्वक्ता।

त्वर्—ञित्वरा, भ्वा, आ। त्वरा। वेगः। सम्भ्रमः। त्वरते, त्वरते धर्मं एव यैः, कवि २५५। त्वरस्व वत्से! उत्तर २४०। तत्वरे। नानुनेतुमबलाः स तत्वरे। त्वरिता। अत्वरिष्ट। निहन्तुमत्वरिष्टारीन्, भ १५, ४९। सन् तित्वरिषते। यङ् तात्वर्यते तातूर्त्ति, पा ६, ४, २०। णिच्

त्वरयति । दूतास्त्वरयन्ति माम्, रामा । अतत्वरत्, पा ७, ४, ९५ । अतत्वरतां योद्धुम्, भ १४, ६० । त्वरितः, तूर्णः, पा ७, २, २८ । त्वरा ।

त्विष्—भ्वा, उ । दीप्तिः ।

उज्ज्वलीभावः । त्वेषति । ०ते । तित्वेष । तित्विषे । वानरास्तित्विषुः, भ १४, ७० । त्वेष्टा । त्वेक्ष्यति । ०ते । आशिषि, त्विषीष्ट । अत्वित्षत् । ०ते । तित्विक्षति । ०ते । तित्विषीष्ट । तित्वेष्टि । त्वेषयति । अतित्विषत् । ० अव—निवासदानदीप्तिषु । अवत्वेषति । ०ते । (निवसति ददाति दीप्यते वा), दुर्गा । दाननिरसनयोरिति प्रदीपः ।

त्सर्—भ्वा, प । छद्मगतिः ।

कपटगमनम् । लट् त्सरति । लङ् अत्सरत् । लिट् तत्सार । तत्सरतुः । लुट् त्सरिता । लृट् त्सरिष्यति । लुङ् अत्सारीत् । अत्सारिष्टाम् । अत्सारिषुः । त्सरुः ।

(थ)

थुड्—तु, प । संवरणम् ।

आच्छादनम् । थुडति । तुथोड । थुडिता । अथुडीत् । लेखनवत् थोडनमपि । स्थुड्, स्थुडति । खुड्, खुडति । छुड्, छुडति ।

थुर्व्—थुर्वी (उर्वी) भ्वा, प ।

हननम् । थूर्वति । (ई) थूर्णम् ।

(द)

दक्ष—भ्वा, आ । १ वृद्धिः । वेगः । शीघ्रकरणम् । दक्षते, दक्षते सर्वकार्येषु कुलं दक्षयते द्विषाम्, कवि २१६ । ददक्षे । दक्षिता । अदक्षिष्ट । णिच् दक्षयति । अददक्षत् । कर्मणि, अदक्षि, अदाक्षि । गतिहिंसनयोः घटादिः, को ८२ । दक्षः । दक्षा । दक्षिणा ।

दघ्—स्वा, प । घातनम् ।

पालनम् । दघ्नोति । छान्दसोऽयम्, को १४८ । वोपदेवस्तु भाषायामपि पठितवान् ।

दङ्घ्—दघि, भ्वा, प । १ पालनम् । २ वर्जनम् । दङ्घति । दङ्घिता ।

दण्ड—अदन्तः । चु, प ।

दण्डनिपातनम् । दण्डयति, दण्डापयति, वा । तान् सहस्रञ्च दण्डयेत्, मनु ९, २३४ । कौटसाक्ष्यं कुर्वाणान् दण्डयित्वा प्रवासयेत्, मनु ८, १२३ । अनृतन्तु वदन् दण्डाः स्ववित्तस्यांशमष्टमम्, मनु ८, ३६ ।

दद्—भ्वा, आ । १ दानम् ।

२ धारणम्, वो । ददते, ददते द्रविणं ब्राह्मणेभ्यो यः, कवि १७१ । विट विटपमसुं ददस्व तस्मै, मा ७, ५३ । ददे, पा ६, ४, १२७ । ददिता । अदादिष्ट ।

दध्—भ्वा, आ । १ धारणम् ।

२ दानम्, वो । दधते, दधते यः सदाचारम्, कवि १७४ । देधे । दधिता ।

दन्व्—दवि, भ्वा, प, वो । गतिः । दन्वति । ददन्व । दन्विता । अदन्वीत् ।

दभ्—दम्भ्—दभि, चु, वो ।

प्रेरणम् । दभि, चु, वो । राशीकरणम् । दाभयति । दम्भयति । ०ते । दभिर्धातुष्वपठितोऽपि वार्त्तिकबलात् स्वीकार्यः । अत दाभ्यः, को ३१२ ।

दभ्—दन्भु, प। दम्भः।
परवञ्चनहेतुव्यापारः। गर्वः। दम्भोति। ददम्भ। जदम्भतुः, देभतुः, कौ १४८। दम्भिता। दम्भिष्यति। दभ्यात्। अदम्भीत्। अदम्भिष्टाम्। गजालातैर्दम्भिषुः (दम्धवन्तः), भ १५, ३। जन् दिदम्भिष्यति, पा ७,२, ४९। धिप्सति। धीप्सति, पा ७, ४, ५६। भूयस्त्वं धिप्सुमाक्षेप्य राजपुत्रं दिदम्भिषुः, भ ९, ३३। यङ् दादभ्यते। दादम्भ्धि। णिच् दम्भयति। अददम्भत्। (उ) दम्भित्वा, दब्ध्वा। दब्धः।

दम्—दमु, दि, प। १ उपशमः।
शान्तीभावः। २शान्तीकरणम्। शासनम्। दमनम्। लट् दाम्यति पा ७, ३, ७४। यमो दाम्यति, राक्षसान्, भ १८, २०। लिट् ददाम। देमतुः। लुट् दमिता। लुङ् अदमत् (अदमत्, अदमीत्, वो) जानुभ्यामदमच्चान्यान्, भ १५, ३७ णिच् दमयति। °ते, पा १, ३, ८९। (उ) दमित्वा, दान्त्वा, पा ७, २, ५६। दान्तः। णिच् दान्तः, दमितः, पा ७, २. २७। अदान्तास्त्रिदशैरपि, भ ९, १९। तनुश्रिया कमनीयतामदं दमयन्ती, नै, २, १८। दमौ, पा ३. २, १४१। प्र—दमनम्। प्रादमयन्त वन्द्यः पुष्पेषुम्, भ ८, ६२।

दय्—भ्वा, आ। १ दानम्।
२ गमनम्। ३ रक्षणम्। ४ हिंसा। ५ आदानम्। ग्रहणम्। ६दया। अनुकम्पा। लट् दयते। दयते दीनं दयालुः, दुर्गा। तेषां दयसे न कस्मात्, भ २, ३३। योऽर्थिभ्यो दयते धनम्, कवि ८४। सर्पिषो यदते। लिट् दयाञ्चक्रे, पा १, १, ३७। दयाञ्चक्रे न राक्षसः भ ५, १०६। लुट् दयिता। लृट् दयिष्यते। लुङ् अदयिष्ट। अदयिषाताम्। अदयिषत। खेषामप्यदयिष्ट न, भ १५,६३। दयितः। दया। रामस्य दयमानः भ ८, ११९। न गजा नगजा दयिता दयिता (दृष्टा रक्षिताः), भ १०, ९। दया।

दरिद्रा—अदा, प। दुर्गतिः।
क्लेशेनावस्थानम्। अकिञ्चनीभावः। लट् दरिद्राति। दरिद्रितः। दरिद्रति, पा ६, ४, ११२, ११४। दरिद्राति यथा हरिः, भ ५, ८६। नेदानीं शक्रयज्ञेन्द्रो दरिद्रितः, भ १८, ३१। उपर्युपरि पश्यन्तः सर्व एव दरिद्रति, हितो। लिङ् दरिद्रियात्। लङ् अदरिद्रात्। °द्रितम्। °द्रुः। लिट् दरिद्राञ्चकार। ददरिद्रौ (ददरिद्र, वो। तन्निर्मलम्, कौ १२५। ददरिद्रतुः। लृट् दरिद्रिता। लृट् दरिद्रिष्यति। आशिषि, दरिद्रयात्। लुङ् अदरिद्रौत्, अदरिद्रासीत्। अदरिद्रिष्टाम्, अदरिद्रासिष्टाम्। अदरिद्रिषुः, अदरिद्रासिषुः। भावे, अदरिद्रि, अदरिद्रायि। सन् दिदरिद्रिषति, दिदरिद्रासति। णिच् दरिद्रयति। क्त दरिद्रितः। अच् दरिद्रः, दरिद्रायकः। दरिद्राणम्। क्त्वच् दरिद्रित्वा कौ ३१६। दरिद्रणीयम्। क्वसु ददरिद्रान्, ददरिद्रावानित्येके।

दल्—भ्वा, प। १ विशरणम्।
भेदः। विदारणम्। २ विदीर्णीभावः। विकसनम्। लट् दलति, दलति सा छदि विरहभरेण, गीतगो ७, ३५। लिट् ददाल। देलतुः। ददाल भूः, भ १४, २०। लुट् दलिता। लृट् दलिष्यति। लुङ् अदालीत्। अदालिष्टाम्। अदा-

लिषुः शिलादेहे, भ १५, ३८। णिच् दलयति (दालयति, वो)। दलयन्नष्टौ कुलच्छाभृतः, महाना १, ३३। दल् चु, प। भेदः। दालयति। मुष्टिनादालयत्तस्य मूर्द्धानम् भ १७, ७८। दलितः। दलनम्। दालः) कुद्दालः) दाड़िमम्। दलच्चण्डोशचाप—' महाना १, ३६। वि—भेदः। विकाशः। त्वदिषुभिर्व्यदलिष्यद् वक्षोऽपि, नै ४, ८८। दरविदलितमल्लो, गीतगो १, ३६। शेफालिकां विदलितामवलोक्य तन्वी।

दंश्—दन्श्, भ्वा, प। दंशनम्। दन्तव्यापारः। लट् दशति, पा ३, ४, २५। पदा स्पृशन्तं दशति द्विजिह्वः, र १४, ४। दशति विम्बफलं शुकशावकः, दुर्गा। विम्बाधरं दशसि चेद् भ्रमर प्रियायाः, शकु ६, १४५। लिट् ददंश। ददंशतुः। ददशतुः वो। ददंशिथ, ददंष्ठ। लुट् दंष्टा। लृट् दङ्क्ष्यति। आशिषि, दश्यात्। लुङ् अदाङ्क्षीत्। अकाङ्क्षीत्। अदाङ्क्षुः, अदाङ्क्षुरदशन्, भ १५, ४। १७, १३। कर्म्मणि, दश्यते। अदंशि। सन् दिदङ्क्षति। यङ् (भावगर्हायाम्) दन्दश्यते, पा ७, ४, ८६। दंदशीति। दन्दष्टि। दंदंष्टि, दंदंशीति वो। णिच् दंशयति। अददंशत्। दंशि, चु, आ। १ दंशनम्। २ दर्शनम्। दंशयते, दंशति। आकुम्भोयमात्मनेपदं णिच् सन्नियोगेनैवेति व्याख्यातारः। नलोपस्तु भ्वादेरेव, कौ १७६। नाहिदंशयते कश्चिदिद्यया गरुड़ाख्यया, कवि २०५। भट्टमल्लमते दंशनमिह सन्नाहः तेन अदंशयन्नरहितशौर्य्यदंशनास्तनूः, मा १७, २१। केचित् तु चुरादिषभयपदीषु पठन्ति (टीका)। दंशि (कुप) चु, प। दीप्तिः। दंशयति। दष्टः। दंशनम्।

दस्—दस्त (तमु) दि, प। १ क्षयः। वस्तुहानिः। २ उत्क्षेपणम्, वो। दस्यति। ददास। दसिता। अदसत्। अदासीत्, वो। दस् (दंस्)।

दंस्—दसि, चु, प, वो। दीप्तिः।

दसि, चु, आ। १दर्शनम्। २ दंशनम्, सन्नाहः, दन्तव्यापारश्च। दंसयति। °ते। दंसति। दस—इति कश्चिद् दासयदे।

दह्—भ्वा, प। भस्मीकरणम्।

दाहः। सन्तापः। लट् दहति, मदनानलो दहति मम मानसम्, गीतगो १०,२। लिट् ददाह। देहतुः। देहिथ, ददग्ध। लुट् दग्धा। लृट् धक्ष्यति। क्रुध्यन् कुलं धक्ष्यति विप्रवह्निः, भ १, २३। लुङ् अधाक्षीत्। अदाग्धाम्। अधाक्षुः। दृष्टाधाक्षीदिव द्विषः, भ १५, २२। कर्म्मणि, दह्यते। अदाहि। शरीरं मे दह्यते मदनाग्निना, महाना ४, २८। शोकेन देहे जनता, भ २, ११। सन् दिधक्षति। यङ् (भावगर्हायाम्) दन्दह्यते, पा ७, ४, ८६। दन्दग्धि। यत्तु दन्दह्यते लोकम्, मा २, ११। णिच् दाहयति। अदीदहत्। दग्ध्वा। दग्धः। दाहः। दहनम्। निर्—दाहः। प्रणाशः। सन्तापः। एनो निर्दहन्त्याशु तपसा, मनु ११, २४१।

दंह्—दहि, चु, प, वो। १ दाहः। २ दीप्तिः। दंहयति।

दा—दाण्, भ्वा, प, डुदाञ्, जु, उ।

दानम्। वितरणम्। लट् यच्छति, पा ७, ३, ७८। ददाति। दत्तः, ददति। दत्ते। ददते ब्राह्मणायास्मै

आशिषः, कवि १७५। लिङ् दद्यात्। ददीत। हि, देहि, पा ६, ४, ११९। स्व, दत्स्व। वाचं देहि, भ ६, १८। भयानि दत्त सोतायै, भ ८,९६। लङ्। अददात्। अदत्ताम्। अददुः। अदत्त। रत्नानि चाददुर्गाश्च, भ १७, ५३। लिट् ददौ। ददिथ, ददाथ। ददे। अस्त्रजातं तस्मै ददौ, भ २, २२। लुट् दाता। लृट् दास्यति। °ते। आशिषि, देयात्। दासीष्ट। लुङ् अदात्। अदाताम्। अदुः। अदित। अदिषाताम्। अदिषत, पा १, २, १७। स्कन्धस्य विश्रान्तिमदाम्, नै ३, १९। कर्मणि, दीयते। ददे। सुता ददे तस्य सुताय मैथिली, भ ३। दायिता। दायिष्यते। दायिषीष्ट। अदायि। अदायिषत। सन् दित्सति। °ते, पा ७, ४, ५४। यङ् देदीयते, पा ६,४, ६६। दादेति। दादाति। णिच् दापयति। अदीदपत्। वणिजो दापयेत् करान्, मनु ७, १२७। तो नृपेण दाप्यौ दमम्, मनु ८, ५९। दत्त्वा। ° दाय। दत्तः। दत्तिः। प्रदत्तम्। प्रत्तम्। दानम्। देयः। (ड) दत्रिमः। ददः। दातृ। दायः। आ—आदानम्। ग्रहणम्। स्वीकरणम्। आदत्ते, पा १, ३, २०। आदत्तः। आत्तः, पा ७, ४, ४७। भ ६, ८३। नीलस्त्वादित पर्वतम्, भ १५, ४३। राजानं तेज आदत्ते (नाशयति), मनु ४, २, १८। आयच्छते, पा १, ३, २८। व्या—व्यादानम्। प्रसारणम्। मुखं व्याददाति। नदी कूलं व्याददाति, पा १, ३, २०। प्र—प्रदानम्। सम्प्रदानम्। प्रकृष्टदानम्। कन्या प्रदीयते, मनु ८, २०४। सम्प्र—सम्प्रदानम्। समन्त्रकत्यागः। आयच्छते, °ति कूपाद्रज्जुम्, पा १, ३, २०। सम्—दास्या मालां संयच्छते कामुकः (दास्यै ददाति), पा १, ३, ५५।

दा—दाप्, अदा, प। छेदनम्।

दाति, दाति दारिद्र्यमर्थिनाम्, कवि २४। दायात्। अदासीत्। कर्मणि, दायते। दिदासति। दादायते। क्त दातम्, दितम्। दितिः। दात्रम्।

दान्—भ्वा, उ। १ आर्जवम्।

ऋजुभावः। ऋजूकरणम्। २ खण्डनम्। नाशनम्। आर्जवे सन् इति भट्टोजिदीक्षितवोपदेवौ। स्वार्थे इति क्रमदीश्वरपद्मनाभौ। दीदांसति, °ते दस्यम् पा ३, १, ६। परार्थे तु दानयति, दानति, °ते, वो। तत्र तिवादयो न स्युरिति रमानाथः।

दाय्—भ्वा, आ, वो। दानम्।

दायते, दीनानां दायते नित्यम्, कवि ८४। (ऋ) अददायत्।

दाश्—दास्—दाशृ, दाशृ, भ्वा, उ। दानम्। दाशति। °ते। दासति। °ते। दाशृ, चु, आ, वो। दानम्। दाशयते। दाश्वान् सुपुत्राशिषम्, र।

दिन्व्—दिवि (जिवि) भ्वा, प। प्रीणनम्। दिन्वति। दिदिन्व। दिन्विता।

दिप्—दिपृ (तिपृ) भ्वा, आ। क्षरणम्।

दिम्भ्—चु, उ, वो। सङ्घातः। (उ) दिम्भ्—दिभि, चु, प, वो। प्रेरणम्। चु, आ, वो। सङ्घातः। दिम्भयति। °ते।

दिव्—दिवु, दि, प। १ क्रीड़ा।

२ विजयेच्छा। ३ व्यवहारः। क्रयविक्रयणादि। ४ दीप्तिः। ५ स्तुतिः। ६ हर्षः। ७ मदः। मत्तीभावः। ८ स्वप्नः।

निद्रा । ९ कान्तिः । इच्छा । १०गतिः । लट् दीव्यति, पा ३, १, ६९ । ८, २, ७७ । अक्षैः अक्षान् वा दीव्यति, पा १, ४, ४३ । शतस्य दीव्यति, पा २, ३, ५८, । स्नेहेन दीव्यन्ति विषयान् भ ८, ७८ । अधिलङ्कं स्त्रियो दीव्य, भ ५, ३८ । अदीव्यद्रौद्रं शस्त्रम्, भ १७, ८७ । प्राणिद्यूतेषु दीव्यति, कवि ८४ । लिट् दिदेव । दिदिवतुः । लुट् देविता । लृट् देविष्यति । आशिषि दीव्यात् । लुङ् अदेवीत् । अदेविष्टाम् । अदेविषुः । अदेवीद् बन्धुभोगानाम्, भ ८,१२२ । सन् दिदेविषति, दुद्यूषति पा ७, २, ४९ । ६, ४, १९ । मृगः प्राणैर्दिदेविषन्, भ ५, ५७ । तेनादुद्यूषयद्रामम्, भ ५, ५९ । यङ् देदीव्यते । देदिवीति, देदेति, देद्योति, वो । णिच् देवयति । अदीदिवत् । (ङ) देवित्वा, द्यूत्वा, पा ७, २, ५६ । ०दीव्य । द्यूतम् । द्यूनः । आद्यूनः । परिद्यूनः, पा ८, २, ४९ । देवनम् । अक्षा द्यूताः । मनसा देवी । अक्षा दीव्यन्ते क्षात्रेण न त्वक्षैर्दीव्यते, दुर्गा । प्र—विक्रयः प्रादेवीदात्मसम्पदम्, भ ८, ११२ । प्रादेवीत् परिघं परिघेण, भ ९, ९ । शतस्य शते वा प्रदीव्यति, पा २, ३, ५९ । दिवु, चु, प । १ मर्दनम् । २ अर्दनम् । पीड़नम्, वो । ३ याचनम् । ४ गतिः । देवयति । देवति । दिवु, चु, आ । परिक्रूजनम् । परिदेवयते कश्चित्तस्य राष्ट्रे न दुःखितः, कवि ६० ।

दिश्—तु, उ । अतिसर्जनम् । दानम् । आज्ञा । आदेशः । निर्देशः । कथनम् । लट् दिशति । ०ते । दिशेत्युक्तो दिशेच्च यः साक्षिणः, मनु ८, ५७ । लिट दिदेश । दिदिशे । यानाय निदेशकारिणः, भै १,५६ । दिदेश कौ साय समस्तमेव, र ५, १० । लुट् देष्टा लृट् देक्ष्यति । ०ते । आशिषि, दिश्यात् दिक्षीष्ट । लुङ् अदिक्षत् । अदिक्षत सम् – दिदिक्षति । ०ते । यङ् देदिश्यते देदेष्टि । णिच् देशयति । अदीदिशत् दिष्टः । दिष्टिः । दिष्टा । ०दिश्य देष्टुम् । दिक् । देशः । अति—अति देशः । आरोपः । अप—व्यप—अ देशः । रोगशान्तिमपदिश्य, र १९,५४ व्याजः । आ—आदेशः । अनुमतिः आज्ञा । आदिक्षत् तस्य सिंहा नम् । आदिक्षदस्याभिगमं वनाय, ३, ८ । आग्नशरणस्य मार्गमादेश शकु ५, ४४ । प्रत्या—प्रत्यादेशः । निर करणम् । निवारणम् । स्वप्नेऽहं प्रत्य दिष्टा । प्रत्यादिदेशैनमभाषमाणा, ६, २५ । प्रजानां प्रत्यादिदेशाविन विनेता, र ६, ९९ । तव मन्त्रैः प्रत्य दिश्यन्त इव मे शराः, र १.६२ । उद उद्देशः । अभिप्रायः । तमुद्दिश्य क्षिप्ते लगुड़ेन शृगालो हतः, हितो । उप- उपदेशः । हितोक्तिः । निर्देशः । कौक्ष नम् । विद्वानेवोपदेष्टव्यः । वानराग पदिश्य, हितो । ब्राह्मणस्य कर्मेदमु दिष्टम्, मनु २, १८० । नि—निदेशः शासनम् । निर्—निर्देशः । विधानम् कथनम् । आदेशः । पौठमासक्षे नि दिक्षच्च काञ्चनम, भ १५, ८ । प्र—द नम । निर्देशः । उपदेशः । प्रदिशं जलं चातकेभ्यः, मेघ ११७ । प्रदिश रात् सुतीक्ष्णमुनिकेतनम् भ ४, ५ दाहं प्रदिदेश वानरस्य, भ ९, १३७ सम्—सन्देशः । दानम् । भ्रात्रे रा सन्दिश्य, भ ६, १४१ । अभिदू काचिदिति सन्दिदिशे, मा ९, ५९ ।

दिह्—अदा, उ । १ उपचयः ।

दृद्धिः । दृद्धिकरणम् । २ लेपनम् । वो । लट् देग्धि । दिग्धः । दिहन्ति । धेक्षि । दिग्धे । हि, दिग्धि । ख, धिक्ष । लिङ् दिह्यात् । दिहीत । लङ् अधेक् । अदिग्धाम । अदिहन् । अदिग्ध । अदिहाताम् । अदिहंयन्दनैः शुभ्रैः, भ १७, ५४ । लिट् दिदेह । दिदेहे । लुट् देग्धा । लृट् धेक्ष्यति । ०ते । लुङ् अधिक्षत् । अदिग्ध, अधिक्षत । सन् दिदिक्षति । ०ते । यङ् देदिह्यते । देदेग्धि । णिच् देहयति । अदीदिहत् । दिग्धः । अस्रदिग्धः, र १६, १५ । सचन्दनोशीरमृणालदिग्धः, भ । देग्धुम् । देहः । सम्—सन्देहः । संशयः । सन्दिग्धो विजयो युधि, हितो ।

दी—दीङ्, दि, आ । क्षयः ।

दीनभावः । लट् दीयते । दीयन्ते प्रत्यहं यस्य दुरितानि, कवि ८४ । लिट् दिदीये । दिदीयाते, पा ६, ४, ६२ । लुट् दाता । लृट् दास्यते । लुङ् अदास्त, पा ६, १. ५० । सन् दिदीषते, पा १,२, ६ । दिदासते, सङ्क्षिप्तसारः । यङ् देदीयते । देदयीति, देदेति । णिच् दाययति । दीत्वा । ०दाय । दीनः । उपदानम् ।

दीक्ष्—भ्वा, आ । १ मुण्डनम् ।

२ यजनम । ३ उपनयनम् । ४ नियमग्रहणम् । व्रतानुष्ठानम् । ५ व्रतादिष्टविध्यनुष्ठानम् । अभिषेकः । दीक्षते । दिदीक्षे । दीक्षिता । अदीक्षिष्ट । दीक्षस्व तुरगाध्वरे, भ २०,१४ । दीक्षितः । दीक्षणीयः । दौक्षा ।

दीधी—दीधीङ्, अदा, आ । छान्दसः ।

१ दीप्तिः । २ क्रीडनम् । दीधीते । दीध्याते । दीध्यते । ऐप्, दीध्ये, पा १,१, ६ । दीध्याञ्चक्रे । दीधिता, पा ७, ४, ५३ । दीधिष्यते । आदीध्यनम् । आदीध्वकः । ल्यप् आदीध्य । दीधितिः । दीधीवेव्योर्डित्वेऽपि छान्दसत्वात् व्यत्ययेन परस्मैपदम् । दीध्यत्, वेव्यत्, कौ १८३ । अदीधयुः, दुर्गा ।

दीप्—दीपौ, दि, आ । दीप्तिः ।

ज्वलनम् । शोभा । उज्ज्वलीभावः । लट् दीप्यते, तारापतिर्दीप्यते, अनर्घ १४८ । लिट् दिदीपे, पुनर्दिदीपे मदुर्दिनश्रीः, र ५, ४७ । लुट् दीपिता । लृट् दीपिष्यते । लुङ् अदीपि । अदीपिष्ट, पा ३, १, ६१ । अदीपिषाताम् । अदापिषत । क्रुङादीपि रघुव्याघ्रः, भ ६, ३२ । देवाहवेष्वदीपिष्ट, भ १५, ८८ । सन् दिदीपिषते । यङ् देदीप्यते । देदीप्ति । णिच् दीपयति । अदीदिपत्, अदिदीपत्, पा ७, ४, ३ । लङ्कामग्निनादीदिपन्, भ १५, ११० । वृन्दावनान्तरमदीपयदिन्दुः, गीतगो ७, १ । (ई) दीप्तः । दीप्तिः । दीपनम् । दीपिता । दीप्रः । प्रदीपः । आ—ज्वलनम् । मङ्गल्लेपनम् । आदीप्त क्षणानुः, भ ३,३ । उद्—उद्दीपनम् । प्रकाशनम् । उज्ज्वलनम् उत्तेजनम् । उप, प्र, ज्वलनम् । दाहः । सम् - सन्दीपनम् । उद्दीपनम् । सलिलमलव दवाग्नेः सम्यदीप्तेन्धनस्य, दीपिका ।

दु- भ्वा, प । गतिः । ट् दु, स्वा, प ।

१ उपतापः । उपतप्तीभावः । २ उपतप्तीकरणम् । परितापः । पीडनम् । लट् दवति । दुनोति, सुखं तव दुनोति माम्, र ८, ५६ । मन्मथेन दुनोमि, गीतगो ३,८ । कर्णिकारं दुनोति निर्गन्धतया स्म चेतः, कु ३, २८ । सखीसंवासो दुनोति मनः, गीतगो ७, ३० ।

लङ् अदुनोत्। अदुनुताम्। अदुन्वन्। प्रणयिनीः सोऽदुनोत्, र १८, २१। सारथिमदुनोत् भ १७, ८८। लिट् दुदाव। दुदुवतुः। दुदविथ, दुदोथ। दुदुविव। अरीन् दुदाव क्रतान्तवत्, भ १४, ८५। लुट् दोता। दविता, वो। लृट् दोष्यति। आशिषि, दूयात। लुङ् अदौषीत्। अदावीत्, वो। अदौष्टाम्। अदौषुः। सन् दुदूषति। यङ् दोदूयते। दोदोति। णिच् दावयति। अदूदवत्। क्ष, भ्वा, दृनः। स्वा, दुनः। मृदुतया दुतयेति, माघः ६, ५८। कौ २४७। (टु) दश्रुः। दावः। दवः।

दुःख—(सख) अदन्तः। चु, प।

दुःखकरणम्। दुःखयति। दुःखापयति, वो। दुष्व, दुष्वयतीत्यपि।

दुर्व—दुर्वी (उर्वी) भ्वा, प। बधः।

दुर्वति। दुदूर्व। दूर्विता।

दुल—चु, प। उत्क्षेपः।

दोलयति, दोलयत्यरिवर्गस्य जीविताशाश्च यः सदा, कवि २१०। दोलयति धूलिम्, दुर्गा।

दुष—दि, प। वैकृत्यम्।

अशुद्धीभावः। दोषः। लट् दुष्यति, खादन् मांसं न दुष्यति, मनु ५, ३२। दुदोष। दुदुषतुः। दोष्टा। दोक्ष्यति। अदुषत्। अदुक्षत्, वो। दुदुक्षति। दोदुष्यते। दोदोष्टि। णिच् दूषयति। (चित्तदूषणं) दूषयति दोषयति चित्तं कामः, पा ६, ४, ८०, ८१। तस्याभिषेकसम्भारं दूषयामास पार्थिवाम्बुभिः, र १२, ४। योऽकामां दूषयेत् कन्याम्, मनु ८, ३६४। दुष्टः। दूषणम्। दोषः। अभि—अभिघातः। शिवदूत्यभिदूषिताः पेतुः, चण्डी। प्र—व्यभिचारः। अधर्माभिभवात् प्रदुष्यन्ति कुलस्त्रियः, गौ १, ४०।

दुह्—दुहिर् (उहिर्) भ्वा, प।

अर्दनम्। दोहति। दोहिता। अदुहत्। अदोहीत्।

दुह्—अदा, उ। प्रपूरणम्। दोहनम्।

व्यक्तीकरणम्। लट् दोग्धि। दुग्धः। दुहन्ति। धोक्षि। दुग्धे। दुहाते। दुहते। धुक्षे। धुग्ध्वे। कामान् दुग्धे, उत्तर १८८। पयो गां दुहन्ति, भ १२, ७३। पयो दोग्धि पाषाणम्, भ ८, ८२। प्राणानात्मानम्, भ ६, ८। लोट् दोग्धु। दुग्धि। दोहानि। धुक्ष्व। धुग्ध्वम्। दोहै। लिङ् दुह्यात्। दुहीत। लङ् अधोक्। अदुग्ध। लिट् दुदोह। दुदुहे। दुदोहे गां स यज्ञाय, र १, २६। रत्नानि धरित्रीं दुदुहुः, कु १, २। लुट् दोग्धा। लृट् धोक्ष्यति। °ते। लुङ् अधुक्षत्। अदुग्ध, अधुक्षत। त—थाम्—ध्वम्—वहिषु लङ् वदपि। अधुक्षाताम्। अधुक्षन्त। कर्मणि, दुह्यते। अदोहि। कर्मकर्त्तरि, गौः पयो दुग्धे, पा ३, १, ८८। स्वयं प्रदुग्धे वसूनि मेदिनी, भा १, १८। अदोहीव विषादोऽस्य (स्वयं चरित इव), भ ६, ३४। सन् दुधुक्षति। °ते। दोदुह्यते। दोदोग्धि। णिच् दोहयति। अदूदुहत्। दुग्ध्वा। दुग्धः। दोहनम्। दोहः। दोग्धव्यः। कामदुघा।

दू—दूङ्, दि, आ। उपतापः।

खेदः। उपतप्तीकरणम्। दूयते, कवि २५६। कथं पश्यन् न दूयसे, र १, ७१। दृष्ट्वा शून्यानि दूये सरयूजलानि, र

१६, २१। १, ७१। दुदुवे। दविता। अदविष्ट। क्त, दूतः, पा ८, २, ४५।

दृ—दृङ् तु, आ। आदरः।

प्रीत्या सम्भ्रमः। प्रायेणायमाङ्पूर्वः। आद्रियते, पा ७, ४, २८। यः सदाद्रियते धर्मम्, कवि ७७। ददे। दद्रिषे। दर्त्ता। दरिष्यते। दृषीष्ट। अदृत। अदृषाताम्। दिदरिषते, पा ७, २, ७५। देद्रीयते। दर्दर्त्ति। दारयति। अदीदरत्। आदृतः। आदरः। आदृतस्तेन, भ ६, ५५।

"दृ, भ्वा, प। हननम्। क्रया, चु, प। भयम्। दृणोति। दृणाति। दरयति।" भये घटादिरिति कश्चित्। दरयति।

दृष्—दि, प। १ हर्षः। २ मोहनम्।

गर्वः। दर्पः। दृप्यति। ददर्प। दृप्तपतुः। ददर्पिथ, ददृप्थ, ददर्प्थ। एवं विजिग्ये तां सेनां प्रहस्तोऽतिददर्प च, भ १४, १०६। दर्पिता, दर्प्ता, द्रप्ता। दर्पिष्यति, द्रप्स्यति, दर्प्स्यति। अदर्पीत्, अद्राप्सीत, अदार्प्सीत, अदृपत्, कौ १०४। दिदर्पिषति, दिदृप्सति। दरीदृप्यते। दर्दर्प्ति। दर्पयति। अदीदृपत्। कं श्रीर्न दर्पयति, क्षितौ। दर्पित्वा, दृप्त्वा। दृप्तः। दर्पः। दर्पकः। दृप्, दृफ्, दृम्फ्, तु, प। उत्क्लेशः। पीड़नम्। दृपति। दृफति। दृम्फति। ददर्प। दर्पिता। अदर्पीत्। दृप् (चृ०) चु, प। सन्दीपनम्। उद्दीपनम्। दर्पयति। दर्पति।

दृभ्—दृभी, तु, प। ग्रन्थनम्।

दृभति। ददर्भ। दर्भिता। अदर्भीत्। दृभ, चु, प। सन्दर्भः। रचना। दर्भयति। दर्भति वो। दृभी, चु, प। भयम्। दर्भयति। दर्भति। (दृ) दृब्धः। सन्दर्भः। दर्भः।

दृम्प्—(डप्) चु, उ, वो। सङ्घातः।

दृश्—दृशिर्, भ्वा, प। प्रेक्षणम्। दर्शनम्। ज्ञानम्। साक्षात्कारः। लट् पश्यति, पा ७, ३, ७८। आश्चर्यमिव पश्यामि स्वप्नान् पश्यामि दारुणान्, रामा। अहं पश्यामि तपसा क्षिप्रं द्रक्ष्यसि नैषधम्, भारत। पश्यामि त्वां (जानामि)। सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम्, र १, ७५। अर्थान् धर्मेण पश्यति (निरूपयति), मनु ८, १७५। एवं साङ्ख्यञ्च योगञ्च यः पश्यति स पश्यति, गो ५, ५। लिट् ददर्श। दृशतुः। ददर्शिथ, ददृष्ठ, पा ७, २, ६५। ददृशिव। लुट् द्रष्टा, पा ६, १, ५८। लृट् द्रक्ष्यति। आशिषि, दृश्यात्। लुङ् अद्राक्षीत्, पा ३, १, ४७। अदर्शत्, पा ७, ४, १६। अद्राष्टाम्, अदर्शताम्। अद्राक्षुः, अदर्शन्। मा दर्शतान्यं भरतञ्च मत्तः, भ ३, १५। कर्मणि, दृश्यते। अदृश्यत स्थावरराजकन्या, कु, ३, ५२। ददृशे, प्रतीयूषा प्रददृशे जनेन, भ ३, १८। दर्शिता, द्रष्टा। दर्शितारस्त्वया ताः, भ २२, ४, १०। दर्शिष्यते, द्रक्ष्यते। त्वयाद्य कृतार्थो द्रक्ष्यते पतिः, भ ५, ५८। दर्शिपौष्ट, दृक्षीष्ट। रक्षोभिर्दर्शिषीष्ठास्त्वं दृक्षीरन् भवता च ते, भ १८, २८। अदर्शि। अदर्शिषाताम्। अदृक्षाताम्। तेन येऽदर्शिषत शत्रवः, भ १५, ७२। अदृक्षतामांसि नवोत्पलानि, भ २, १०। सन् दिदृक्षते, पा १, ३, ५७। यङ् दरीदृश्यते। दरीदर्ष्टि। णिच् दर्शयति। °ते। अदीदृशत्, अददर्शत्, पा ७, ४, ७। वीर्यं मा न ददर्शस्वम्, भ १५, ८२।

वनितां दर्शयिताहे, नै ५, ७१। दृष्ट्वा। ०दृश्य। दृष्टः। दृष्टिः। दर्शनम्। द्रष्टुम्। द्रष्टा। द्रष्टव्यम्। दृश्यन्। दर्शनीयम्। पारदृश्वा। सदृक्। अव—आलोचना। आलोकनम्। यथाभूतपृथग्भावमेकस्थमनुपश्यति, गी १३, ३०। अभि—लक्ष्यीकरणम्। उद उत्प्रेक्षणम्। ऊर्ध्वं दर्शनम्। उत्पश्यतः सिंहनिपातमुग्रम्, र २, ६०। तावुदपश्यद्वत्सिनौ जनः, मा १, १५। उप—प्रदर्शनम। नवे राज्ञि सदसच्चोपदर्शितम्, र ४, ८। नि—निदर्शनम्। परं नृपं निदर्शयामास तस्मै, र ६, ३१। परि—परिदर्शनम्। प्र—प्रदर्शनम्। सम्—सन्दर्शनम्। सम्पश्यते, कौ २४६।

दृह्—दृंह्—दृहि, भ्वा, प। दृढिः। दर्हति। दृंहति। क्त, दृढः, पा ७, ३, २०।

दृ—भ्वा, प, वो। भयम्।

दॄ, दि, प। विदारः। द, क्रया, प। १ विदारणम्। २ भयम्, वो। लट् दरति। दीर्ष्यति। दृणाति, दृणाति च रिपून् रणे। दरन्ति दिगधीशाश्च यस्य दिग्विजयोद्यमे, कवि ७१। हृदयं दीर्ष्यतीव मे, भारत। न दीर्ष्ये सहस्रधाऽहम्, उत्तर २, २३। न विदीर्ष्येऽहम्, कु ४, ५। इत्यादावात्मनेपदमपि। लिट् ददार। ददरतुः, ददृतुः, पा ७, ४, ११, १२। ब्रह्मास्त्रेण ददाराद्रिम्, भारत। लुट् दरिता, दरीता। लृट् दरिष्यति, दरीष्यति। लुङ् अदारीत्। अदारिष्टाम्। अदारिषुः। सन् दिदरिषति, दिदरीषति, दिदीर्षति। यङ् देदीर्ष्यते, दादर्त्ति। णिच् दारयति। अदिदरत्, शुष्टनादिदरत्तस्य मूर्द्धानम्, भ १५, ८१। भये घटादि। दरयति। भयादन्यत्र दारयति। क्रियादरयं मित्त्वार्थीऽनुवादः। धात्वन्तरमेवेदमिति मते तु दरति, कौ ८३। दीर्त्वा। ०दीर्ण्य। दीर्णः। दीर्णिः, दरणम्। दरः। दारः। दाराः। अव—अवदारणम्। खननम्। उर्वीमवदारयद्भिः, र १३, २। द्रुतावदीर्णे इत्यमरः। वि—विदारः। तस्य हृदयं विददे, र १४, १३। स्तनं विददार काकः, अनर्घ १२२।

दे—देङ्, आ। पालनम्।

रक्षणम्। दयते। दिग्ये। दिग्याते, पा ७, ४, ८। दाता। दास्यते। दासीष्ट, अदित। अदिषाताम्। अदिषत। अदिथाः, पा १, २, १७। दित्सति, पा ७, ४, ५४। देदीयते। दादेति। णिच् दापयति। कर्मणि, दीयते। दत्तः।

देप् (तिप्, तेप्)।

देव्—देवृ (तेवृ) भ्वा, आ।

१ देवनम्। क्रीडनम्। २ रोदनमिति भट्टमल्लः। ३ दीप्तिः। देवते, देवते कन्दुकैर्नित्यम्, कवि ८०। अदेवत सायकैः, भ १७, १०२। दिदेवे। देविता। अदेविष्ट। अदेविषाताम्। अदेविष्ट ब्रह्मास्त्रम् (द्योततेस्त्र), भ १५, ८४। देवयति। अदिदेवत्। परि—परिदेवनम्। विलापः। भ्रातोः पर्य्यदेविष्ट सा पुरः, भ ४, ३४। १४, ४८। आत्मनः परिदेवध्वे, भ ७, ८६। आदेवकः।

दै—दैप्, भ्वा, प। शोधनम्।

शुद्धीकरणम्। दायति। योऽवदायति कीर्त्तिञ्च, कवि २४। ददौ। दाता। दास्यति। दायात्। अदासीत्। कर्मणि, दायते। दिदासति। दादायते। दादाति।

दापयति। अदीदपत्। अव—शुक्लीभावः। अवदातः। श्विन्दते श्वेतते त्रीणि स्युः शुक्लत्वेऽवदायति, भट्टमल्लः।

दो—दि, प। क्षेदनम्।

प्रणिद्यति। ददौ। दाता। देयात्। अदात्। दीयते। दित्सति। दित्वा। °दाय। दितः। दितिः। दानम्। शिरोऽवद्यति विद्विषाम्, कवि २४।

द्यु—अदा, प। अभिगमनम्।

द्यौति। दुद्याव। द्योता। अद्यौषीत्।

द्युत्—भ्वा, आ। दीप्तिः। प्रकाशः।

द्योतते। दिद्युते, पा ७, ४, ६७। दिद्युते यथा रविः, भ १४, १०४। द्योतिता। द्योतिष्यते। द्योतिषीष्ट। अद्युतत्। अद्योतिष्ट, पा १, ३, ६१। दिद्युतिषते, दिद्योतिषते, पा १, २, २६। ७, ४, ६७। देद्युत्यते। देद्योत्ति। द्योतयति। अदिद्युतत्। गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन, दर्पणः। स्नेहो मयि द्योत्यते, वीर २४। द्युतित्वा, द्योतित्वा। द्युतितः। द्योतनम्। द्योतः। द्युतिः। उद्—औज्ज्वल्यम्। तद्वंशः कुलमुद्योतयामासुः, र १०, ८०। वि—शोभा। शस्त्रैरत्तो विदिद्युते, भ ९, ३६। विद्योतस्व स्त्रियः प्रति, भ ८, ८८। व्यद्योतिष्ठ सभावेद्यामसौ नरशिखित्रयो, मा २, ३।

द्यै—भ्वा, प। ध्यकरणम्।

द्यायति। दद्यौ। द्याता। अद्यासीत्।

द्रम्—भ्वा, प। गतिः।

द्रमति। दद्राम। वानरा दद्रमुः, भ १४, ७०। द्रमिता। अद्रमीत्। दंद्रमणः।

द्रा—अदा, प। १ पलायनम्। २ निद्रा। अस्मिन्नर्थे निपूर्व एवेति रमानाथः। द्राति। ददौ। ददतुः। द्राता। द्रायात्, द्रेयात्। अद्रासीत्। अद्रासिष्टाम्। दिद्रासति। दाद्रायते। दाद्राति। दाद्रेति। द्रापयति। अदिद्रपत्। क्त, द्राणः नि—निद्रा। तदा निद्रावुपल्वलं खगः, नैः, १, १२१। निद्रान्, भ १०, ७४। निद्रालुः।

द्राख्—द्राखृ (ओखृ) भ्वा, प।

१ शोषणम्। २ भूषणम्। ३ सामर्थ्यम्। ४ निवारणम्। द्राखति, द्राखति क्षीणतापन्नं वपुः, कवि १०९। ध्राख्, ध्राखति। राखृ, राखति। लाख् लाखति।

द्राघ्—दाष्ट, भ्वा, आ। १ सामर्थ्यम्।

२ आयामः, वो। दीर्घीकरणम्। ३ श्रमः। द्राघते, द्राघते वपुरत्यर्थं यद्वियोगे मृगीदृशाम्, कवि। १०९। ददाघे। द्राघिता। अद्राघिष्ट। द्राघयन्ति मे शोकं स्मर्यमाणा गुणास्तव, भ १८, ३३। द्राष्ट, ध्राघते। राष्ट, राघते, लाष्ट, लाघते। उल्लाघः, पा ८, २, ५५।

द्राङ्—द्राङ्क्षि, भ्वा, प।

१ घोरशब्दः। २ आकाङ्क्षा। द्राङ्कति। ध्राङ्क्षि, ध्राङ्कति। ध्वाङ्क्षि, ध्वाङ्कति। ध्वाङ्क्षि, ध्वाङ्कति, न ध्वाङ्कति जनः कश्चित्, कवि १६४। ध्वाङ्क्षः।

द्राड्—द्राड्, भ्वा, आ। १ भेदः।

बधः, वो। द्राडते। ध्राडृ, ध्राडते।

द्राह्—द्राह्व, भ्वा, आ। जागरणम्।

२ निःक्षेपः। द्राह्वते, द्राह्वते च निशागमे वपुः, कवि १०९। (क्त) अदद्राह्वत्।

द्रु—(द्रु) भ्वा, प। १ गतिः।

२द्रवीभावः, वो। ३ पलायनम्। द्रवति, द्रवति चन्द्रकान्तः, उत्तर। नद्यः समुद्रं द्रवन्ति गो ११, २८। दुद्राव। दुद्रुवतुः। दुद्रोथ। दुद्रुव। भयाद् दुद्रुवुस्ते, भारत। द्रोता। द्रोष्यति। द्रूयात्। अदुद्रुवत्, पा ३, १, ४८। रक्षस्याशानदुद्रुवत्, भ ६, ५८। दुद्रूषति। दोद्रूयते। दोद्रोति। द्रावयति। अदुद्रवत्, अदिद्रवत्। दिद्रावयिषति, दुद्रावयिषति, पा ७, ४, ८१। द्रुतः। द्रुतिः। द्रवः। द्रावः। गभस्तिधाराभिरिव द्रुतानि भानोस्तेजांसि, भ २, १२। अनु—अनुसरणम्। उप—उपद्रवः। प्र, वि—पलायनम्। भीताः प्रादुद्रवन्, भ १४, २५।

द्रुड्—भ्वा, तु, प, वो। मज्जनम्।

द्रोड़ति। द्रोड़िता। द्रुड़ति। द्रुड़िता।

द्रुण्—तु, प। १ हिंसा। २ गतिः। ३ कौटिल्यम्। द्रुणति। द्रोणिता। द्रुणति प्रकृतो यस्य दिङ्मुखेषु रिपुव्रजः, कवि २४०। द्रोणः। द्रोणी। द्रुणः।

द्रुह्—दि, प। जिघांसा।

अपकारः। लट् द्रुह्यति, देवदत्ताय द्रुह्यति, पा १, ४, ३७। लिट् दुद्रोह। दुद्रुहतुः। दुद्रोग्ध। दुद्रोढ़। दुद्रोहिथ। लुट् द्रोग्धा, द्रोढ़ा, द्रोहिता, पा ८, २, ३३। लृट् द्रोक्ष्यति, द्रोहिष्यति। लुङ् अद्रुहत्, पुषादिः। सन् दुद्रोहिषति, दुद्रुहिषति, दुद्रुक्षति। यङ् दोद्रुह्यते। दोद्रोग्धि, दोद्रोढि। णिच् द्रोहयति। अदुद्रुहत्। द्रोहित्वा, द्रुहित्वा। द्रुग्ध्वा। द्रुग्धः। द्रूढ़ः। द्रोहणम्। द्रोहः। द्रोही। द्रोग्धव्यम्। द्रोढ़व्यम्। द्रोहितव्यम्। अभि—निन्दा। अपकारः। देवदत्तमभिद्रुह्यति, पा १, ४, ३८। किंसखा योऽभिद्रुह्यति, पा २, १, ६४। वि—विद्रोहः।

द्रू—द्रूङ्, स्वा, वो। क्रया, उ। १ वधः। २ गतिः, वो। द्रूणोति। द्रूणाति। द्रूणुते। द्रूणीते। द्रूणाति द्रोणवद् युद्धे, कवि २१०। दुद्राव। दुद्रुवे। तं दुद्रावाद्रिणा कपिः, भ १४, ८१। द्रविता। अद्रावीत्। अद्रविष्ट।

द्रेक्—द्रेक, भ्वा, आ। १ शब्दः।

२ उत्साहः। शब्दोत्साहः। वृद्धिः। उन्नतिः। द्रेकते। दिद्रेके। द्रेकिता। अद्रेकिष्ट। प्राद्रेकत हयहिषम्। (शब्दितवत्), भ १७, ८। द्रेक्क, द्रेकते। अदिद्रेकत्।

द्रै—भ्वा, प। स्वप्नः। द्रायति।

द्विष्—अदा, उ। अप्रीतिः।

द्वेषः। निन्दा। विरोधः। लट् द्वेष्टि। द्विष्टः। द्विषन्ति। द्वेक्षि। द्विष्टे। द्विड्ढि। लिङ् द्विष्यात्। द्विषीत। लङ् अद्वेट्। अद्विष्टाम्। अद्विषुः। अद्विषन्, पा ३, ४, ११२। अद्विष्ट। द्वेष्टि गुणिभ्योऽपि, भ १८, ६। द्विषन्ति मन्दाश्चरितं महात्मनाम्, कु, ५, ७५। अद्विषुः स्वेभ्यः अद्विषम् वानरेभ्यः, भ १७, ६१। लिट् दिद्वेष। दिद्वेषिथ। दिद्विषे। दिद्विषिषे। लुट् द्वेष्टा। लृट् द्वेक्ष्यति। ०ते। आशिषि, द्विष्यात्। द्विक्षीष्ट। लुङ् अद्विक्षत्। ०त। सन् दिद्विक्षति। ०ते। यङ् देद्विष्यते। देद्वेष्टि। णिच् द्वेषयति। अदिद्विषत्। द्विष्टा। द्विष्टः। द्वेषणम्। द्वेषः। द्वेष्टुम्। द्वेष्टा। द्विट्। द्वेषणः। द्विषन्

वनेचराग्राणाम्, भ ५, ९७। वि—विद्वेषः। विरागः। स्वशत्रून् विद्वेषयन्, भ १२, २३।

हृ—भ्वा, प। १ आच्छादनम्।

२ अनादरः। हरति। दहार। दहरतुः। हर्त्ता। हरिष्यति। अहार्षीत्। अहार्ष्टाम्। हारम्। हाः।

(ध)

धक्क्—चु, प। नाशनम्। धक्कयति।

धण्—धन्—(अण्) भ्वा, प। शब्दः। धणति। दधाण। धणिता। धनति, वो।

धन्व्—धवि, भा, प। गतिः। ध्वन्वति।

धा—डुधाञ्, हृ, उ। १ धारणम्। २ पोषणम्। ३ दानम्, वा। लट् दधाति। धत्तः। दधति। धत्ते। दधाते। दधते, दधते शासनं यस्य शिरसा च नरेश्वराः, कवि १७४। काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतिम्, हितो। सेषुं चापं धत्ते, भ ४, २६। हि धेहि, पा ६,४, ११९। स्व, धत्स्व। लिङ् दध्यात्। दधीत। धर्मं दध्यान्मनः, मनु १२, २३। लङ् अदधा। अधत्ताम्। अदधुः। अधत्त। अदधत। लिट् दधौ। दधिथ, दधाथ। दधिव। दधे, लक्ष्म्यै समाधिं न दधे मृगावित्, भ २, ७। दधुः कुमारानुगमे मनांसि, भ ३, ११ तधतुर्भुवनद्वयम्, र १, २६। लुट् धाता। स्लट् धास्यति। ०ते। न सुतं धास्यति (जनयिष्यति), नै ३, १५। आशिषि धेयात्। धासीष्ट। लुङ् अधात्। अधाताम्। अधुः, पा २, ४, ७७। अधित। अधिषाताम्। अधिषत, पा १, २, १७। कर्मणि, धीयते। दधे। धायिता। धायिष्यते। धायिषीष्ट। अधायि। अधायिषत। सन् धित्सति। ०ते, पा ७, ४, ५४। यङ् देधीयते, पा ६, ४, ६६। दाधेति, दाधाति। णिच् धापयति। अदीधपत्। हित्वा। ०धाय। हितः। हितिः। धानम् धातुम्। धाता। धायः। धेयः। धातव्यः। धान्यम्। अन्तर्, तिरस्—अन्तर्धानम्। अन्तर्धत्त रामात्, भ ५, ३२। कृष्णमेघस्तिरोदधे र १०, ४। पुरम्—पुरस्करणम्। तुरासाहं पुरोधाय, कु २, १। श्रत्—श्रद्धा। विश्वासः। आदरः। सम्भावना। श्रद्दधे राघवे, र ११, ४२। परतः श्रद्दधतेऽथवा बुधाः, मा १६, ४०। अपि—आच्छादनम्। पिदद्धि पाणिभिर्दृशः, भ ७, ६८। अभि—अभिधानम्। आख्यानम्। कबन्धबधमभ्यधुः, भ ७, ७८। क्षेत्रमित्यभिधीयते, गी १३, १। अव—अवधानम्। प्रणिधानम्। अवहितोऽस्मि। देव! अवधीयताम्, हितो। व्यव—व्यवधानम्। व्यवधाय देहम्, र ९, ५७। आ—आधानम्। अर्पणम्। स्थापनम्। धारणम्। मरिष्यतोऽभ्युच्चयमादधानम्, भ २, ८। समा—समाधानम्। उत्पन्नमापदं यस्तु समाधत्ते स बुद्धिमान्, हितो। सम्प्रति धीमद्भिः समाधीयते, दायभाग १९८। उप—उपधानम्। अर्पणम्। शेते भुजमुपधाय, रामा। बाहुलतोपधायिनो श्रयेत, कु ५, १२। भीमे, चोपाधिताननेः, भ १५, ३७ छन्द चैनामुपधातुमर्हसि, र ८, ९८। नि—निधानम्। स्थापनम्। न्यासः। शवमजिने निधाय, भ ३, २५। न्यधायिषातां चरणौ भुवस्तले, मा १, १३। प्रेतं निदध्युर्भूमौ, मनु ५, ६८। प्रति—प्रणिधानम्। अवधानम्। प्रति-

नि—प्रतिनिधिकरणम् । सन्नि—सन्निधानम् । विपन् सन्निहिता तस्य, हितो । परि—परिधानम् । वि—विधानम् । करणम् । अनुष्ठानम् । दैवं न विदधे नूनं युगपत् सुखभावयोः, भ ६, १४० । यज्ञशिष्टाशनं सतामन्नं विधीयते, मनु २, ३८ । सहसा विदधीत न क्रियाम् भा २, ३० । हिषता विहितं त्वयाथवा (समर्पितम्),भा २,१७ । अनुवि—अनुविधानम् । साधनन् । प्रतिवि—प्रतिविधानम् । प्रतिकारः । तथापि शक्तितः प्रतिविधास्यते, वीर २३ । सम्—सन्धानम् । योगः । आरोपणम् । धनुषि समधत्त सायकम्, र ३, ५३ । शक्नुया नहि सन्दध्यात् हितो । सन्दधाति धनुष्येव योग्यकालेषु सायकम्, कवि १३२। अनु—अनुसन्धानन् । धर्मोपदेशं यस्तर्केणानुसन्धत्ते, मनु १२, १०६ । अभिसम्—अभिसन्धि । अभिप्रायः। त्वया अभिसन्धीयते कामिमार्थे , शकु ३,१४ ।

धाव्—धावु, भ्वा, उ । १ गतिः । २ वेगः । शीघ्रगतिः । ३ मार्जनम् । शुद्धीभावः । शुद्धीकरणम् । लट् धावति । ०ते । यस्य रोषारुणा दृष्टिर्धावते यत्र शात्रवे । पाशपाणिस्ततस्तस्मिन् यमदूतोऽपि धावति ॥ कवि १२- । लिट् दधाव । ०वे । दधावाङ्गिश्चक्षुस्तस्य, भ १४, ५०। लुट् धाविता । लृट् धाविष्यति । ०ते। लुङ् अधावीत् । अधाविष्ट । अधावीदरिसम्मुखम्, भ १५, १७। सन् दिधाविषति । ०ते यङ् दाधाव्यते । णिच् धावयति । अदीधवत् । न पादौ धावयेत् कांस्ये, मनु ४, ६५ । (उ) धौत्वा, पा ६,४,१९ । धावित्वा । धौतः पटः । अस्यजवे निष्ठाया अप्रयोगः, दुर्गा । गतौ धावित इति पद्मनाभः । पश्चाद्धावितोऽचिन्तयत्, हितो । दृष्टिधौतः, र ११, ८० । धावनम् । धावकः । ववलः । अनु—अनुधानम् । पश्चाद्धावनम् । अनुसन्धानम् । अप—पलायनम् । अभि—अभिमुखगतिः । तं हन्तुमभ्यधावत, भ ६, ४१ । वि, निर्—मार्जनम् । दिधौतहारगुलिका, र ५, ७०। पानीयैर्विदधाविरेऽञ्जनानि, मा, ५० ।

धि—तु, प । धारणम् ।

धियति । दिधाय । धेता । अधैषीत् ।

धिच्च् (धुच्च्) ।

धिन्व्—धिवि (जिवि) भ्वा, प ।

१ प्रीणनम् । २ गतिः, वो । धिनोति, पा ३, १, ८० । धिनुतः । धिन्वन्ति । धिनोमि । धिन्वः । धिन्मः, पा ६, ४ १०७ । धिनोति हव्येन हिरण्यरेतसम्, भा १, २२ । दिधिन्व । धिन्विता । धिन्विष्यति । अधिन्वीत ।

धी—धीङ्, दि, आ । १ आधारः । २ आराधनम् । ३ अनादरः, वो । धीयते । दिधिये । धेता । धिषीय । अधिष्ट । क्त, धीनः ।

धु—धुञ्, स्वा, उ । कम्पनम् ।

धुनोति । धुनुते । धुनोति चासिं तनुते च कीर्त्तिम् । कूलस्थितांस्तरूनधुन्वन् वारीणि, भ १०, २२ । दुधाव । दुधुवे । धौता । अधौषीत् । अधौष्ट, कौ १४६ । धुच्च—धिच्च्—भ्वा, आ । सन्दीपनम् । २ क्लेशनम् । ३ जीवनम् । धुच्चते । धिच्चते । दुधुच्चे । धुच्चिता । अधुच्चिष्ट । दुधुच्चिषते, दोधुच्च्यते । दोधुष्टि । णिच् धुच्चयति । अदुधुचत् । सम्—सन्दीपनम् शरान्निः सन्धुच्यताम्, भ २, २८ ।

धू—धूञ्—भ्वा,वो,स्वा,क्रया,उ,भू,तु,प।
कम्पनम्। विधूननम्। भ्वा, धवति। ०ते। दुधाव। दुधुवे। धविता। अधाषीत्। तु, धुवति। धुविता। अधुवीत्। धूनोति। धूनुते। धुनाति। धुनीते। धूनोति चम्पकवनानि धुनोत्यशोकं, चूतं धुनाति धुवति स्फुटितानिमुक्तम्। वायुर्विधूनयति चम्पकपुष्परेणून् यत्कानने धवति चन्दनमञ्जरीश्च॥ कवि ८। लिट् दुधाव। दुधुवे। दुधुवुर्वाजिनः स्कन्धान्, र ४, ६७। लुट् धोता, धविता, पा ७, २, ४४। लृट् धोष्यति। ०ते। धविष्यति। ०ते। अधावीत्। अधाविष्टाम्। अधाविषुः, पा ७, २, ७२। अधोष्ट, अधविष्ट। मा न धावीररिं रणे, भ ६, ५०। सन् दुधूषति। ०ते, पा ७, २, १२। यङ् दोधूयते, दोधोति। णिच् धूनयति, कौ १८१। धूञ्, चु, उ। कम्पनम्। धूनयति। धवति। ०ते। धावयतीति केचित्, कौ १८१। धनुरधूनयन्महत्, भ १७, ६४। धूत्वा। ०धूय। धूतः। क्रया, धूनः, पा ८, २, ४४।७, २, १३। धूनिः। अव—निरासः। व्यथामवधूय, र ३, ६३। अवधूतभयाः, र ६, १६। आ—ईषत् कम्यः। उद्—उत्क्षेपः। रजःकणैः खुरोद्धूतैः, र ८, ६। निर्, वि—निरासः। क्षयः। ज्ञाननिर्धूतकल्मषाः, गी ५, १७। विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्, स्मृतिः।

धूप—भ्वा, प। सन्तापनम्।
सन्तप्तीकरणम्। धूपायति, ०ते, वो। पा ३, १, २८। धूपायाञ्चकार, दुधूप। धूपायिता, धूपिता। अधूपायीत्, अधूपीत्। धूप्, चु, प, वो। दीप्तिः। धूपयति।

धूर्—धूरी (गूरी) दि, आ।
१ हिंसा। २ गतिः। धूर्य्यते। जात्या धूर्य्याय धूर्य्यन्ते, कवि १३८। दुधूरे। धूरिता।

धूर्व्—धुर्वी (उर्वी) भ्वा, प)
हननम्। धूर्वति। दुधूर्व। (ई) धूर्णः। धूर्त्तः। धूः धुरौ, धुरः।

धूष्—धूष्—धूम्, चु, प।
कान्तिकरणम्। भूषणम्। धूषयति।

धृ—धृञ्, भ्वा, उ। धारणम्।
धृङ्, भ्वा, आ। १अवध्वंसनम्। चूर्णीभावः। २पतनम्,वो। ३ अविध्वंसनम्। ४ स्थापनमिति गोविन्दभट्टः। धृङ्, तु, आ। १ अवस्थितिः। जीवनम्। २धारणम्, वो। लट् धरति। ०ते। ध्रियते, पा ७, ४, २८। ध्रियते यावदेकोऽपि रिपुः, मा २, ३५। धरते यो धुरं धर्य्यो धैर्य्यं धारयति ध्रुवम्। ध्रियते यद्धीः सम्यक् ध्रियति श्रीश्च शाश्वती। कवि ३५। लिट् दधार। दधे। लुट् धर्त्ता। लृट् धरिष्यति। ०ते। आशिषि, ध्रियात्। धृषीष्ट। लुङ् अधार्षीत्, अधार्ष्टाम्। अधार्षुः। अधृत। अधृषाताम्। अधृषत। कर्म्मणि, ध्रियते। अधारि, अधारि पद्मेषु तदङ्घ्रिणा धृणा, नै १, २०। ताभिर्गर्भः प्रजाभूत्यै दधे, र ३, ५८। सन् दिधीर्षति। ०ते तु, दिधरिषते, पा ७, २, ७५। यङ् देधीयते। दर्धर्त्ति। णिच् धारयति ०ते। अदीधरत्। ०ते। धृ, चु, प, वो धारणम्। धारयति। धारयन् मस्करिव्रतम्, भ ५, ६२। अधारयन् स्रजं कान्ताः भ १७, ५४। गृहीतापरिशो धनम्। देवदत्ताय शतं धारयति, प

१, ४, ३५। धारयन्निव तस्थे वसूनि प्रत्यपद्यत, भ ८, ७४। अर्थान्तरवृत्तित्वमस्य प्रसिद्धमेव। दण्डधारो महीपतिः दण्डप्रयोक्ता इत्यर्थः। ग्रन्थसङ्ग्रन्थधारिणं ग्रन्थसङ्ग्रन्थग्राहकमित्यर्थः, इति गोयीचन्द्रः। धृत्वा। ०धृत्य। धृतः। धृतिः। धरणम्। धर्त्तुम्। धर्त्तव्यम्। धारकः। धर्म्मः। णिच्, धारयित्वा। ०धार्य्य। धारितः। धारणम्। धारणा। अव—णिच् अवधारणम्। निश्चयः। निरूपणम्। अवधारय सौमित्रे भूषणान्तरसाम्यतः, महाना ४, १९। उद्—उद्धारः। मोचनम्। उददीधरत् प्रपितामहान् भगीरथः, उत्तर। निर्—सम्—निर्द्धारणम्। निश्चयः। प्रचुरीभवन् न निरधारितमः, मा ९, २०।

धृज्—धृङ्ग्—धृजि, भ्वा, प। गतिः।

धृष्—धृष्, भ्वा, प, वो। १ संहतिः। २ हिंसा। जि धृषा, स्वा, प। प्रागल्भ्यम्। दम्भः। लट् धर्षति। धृष्णोति। न धृष्णोति गुरोरग्रे न धर्षति निजाः प्रजाः। तमेव धर्षयत्येकं, कवि ८७। अधृष्णोद् रावणः, भ १७, ८१। लिट् दधर्ष। तधृषतुः। वानरा दधृषुः, भ १४, १०२। लुङ् धर्षिता। लृट् धर्षिष्यति। लुङ् अधर्षीत्। अधर्षिष्टाम्। अधर्षिषुः। सन् दिधर्षिषति। यङ् दरीधृष्यते। दरीधर्ष्टि। णिच् धर्षयति। अदधर्षत्, अदीधृषत्, पा ७, ४, ७। धृष् (धृषा, वो) चु, प। १ प्रसहनम्। २ अमर्षः। अभिभवः, वो। धर्षणम्। धृष्, चु, आ, वो। अक्लिबत्वनम्। निःशङ्कीकरणम्। धर्षयति। धर्षति। धर्षयते। न धर्षति निजाः प्रजाः। तमेव धर्षयत्येकं यस्तासु प्रतिकूलति, हलायुधः। (क्त) धर्षित्वा, धृष्ट्वा। (आ) धर्षितं धृष्टं तेन। (जि) धृष्टोऽस्ति। धृष्टः, पा ७, १, १९। धर्षितः। धर्षितवान्, पा १, २, १९। धर्षणम्।

धृ—(जॄ) क्रया, प। वयोहानिः।

धृणाति। दधरतुः। धरीता, धरिता।

धे—धेट्, भ्वा, प। पानम्।

लट् धयति। लिट् दधौ, पा ६, १, ४५। लुट् धाता। लृट् धास्यति। आशिषि, धेयात्। लुङ् अधात्, पा २, ४, ७८। अधासीत्, पा ७, २, ७३। अदधत्, पा ३, १, ४९। अधाताम्, अधासिष्टाम्, अदधताम्। अधात्सामधासोच्च रुधिरम्, भ १५, २९। त्वं मे मतिमिवाधासीर्नष्टा प्राणानिवादधः, भ ६, १८। कर्म्मणि, धीयते। अधायि। सन् धित्सति, पा ७, ४, ५४। यङ् देधीयते। दाधेति, दाधाति। णिच् धापयति। ०ते। धौत्वा। ०धाय, पा ६, ४, ६९। धौतः, कौ ३६१। धयनम्। धयः। स्तनन्धयः। धे (ट्) स्तनन्धयौ। न वारयेद् गां धयन्तीम्, मनु ४, ५९। सम्—सन्धिः। न सन्धयति केनापि सर्वत्र विजयो नृपः, कवि १३२।

धेक—अदन्तः। चु, प। दर्शनम्।

धोर्—धोर्ज (धोर्ज) भ्वा, प। गतिचातुर्य्यम्। धोरति। धोरन्त्याधोरणाक्रान्ता विनीता यस्य वारणाः, कवि १३९। (ऋ) अदुधोरत्। आधोरणः। धोरितम्।

ध्मा—भ्वा, प। १ शब्दः।

शङ्खादिवादनम्। २ अग्निसंयोगः। ३ अग्नेरुच्चज्वालीकरणम्, दुर्गा। लट् ध्मति पा ७, ३, ७८। कस्यूंश्च तान्ध्मा-

नक्षमन्, भ ३, ३४। लिट् दध्यौ। दध्मतुः। लुट् ध्माता। लृट् ध्मास्यति। आग्निषि, ध्येयात्, ध्यायात्। लुङ् अध्मासीत्। अध्मासिष्टाम्। कर्मणि, ध्मायते। अध्मायि। सन् दिध्मासति। यङ् देध्मीयते, पा ७, ४, ३१। दाध्मेति, दाध्माति। णिच् ध्मापयति। अदिध्मपत्। क्त, ध्मातः। ध्मा—शब्दः। दाहः। स्फोतिः। दर्पाध्मातः। आध्मातमुदरं भृशम्, सुश्रुतः।

ध्राङ् (द्राङ्)

ध्यै—भ्वा, प। चिन्ता। ध्यानम्। ध्यायति, ध्यायत्यनिष्टं चेतसा, मनु ९, २१। दध्यौ। दध्यतुः। ध्याता। ध्यास्यति। ध्येयात्, ध्यायात्। अध्यासीत्। अध्यासिष्टाम्। दिध्यासति। दाध्यायते। दाध्याति। णिच् ध्यापयति। अदिध्यपत्। ध्यात्वा। °ध्याय। ध्यातः। ध्यातम्। ध्येयः। क्विप् धीः। विषयान् ध्यायन्, गी २, ६०। अनु—स्मरणम्। चिन्ता। अनुग्रहः। अनुदध्युरनुध्येयं (अनुध्यानमनुग्रहः), र १९, ३६। अभि—चिन्ता। सङ्कल्पः। परधनलिप्सा। नि—स्मरणम्। दर्शनम्। तन्निदध्यौ सः, म १४, ५६। निर्यर्णनन्तु निध्यानं दर्शनालोकनेक्षणमित्यमरः। चिरं निदध्यौ दुहृतः स गोदुहः, मा १२, ४०। ध्रज्, ध्रञ्ज्—ध्रजि (धृजि) भ्वा, प। गतिः ध्रण्—ध्रन्—(धण) भ्वा, प। शब्दः।

ध्रस्—उध्रस्, क्रया, चु, प।

उच्छ्रस्तिः। ध्रसाति। ध्रासयति। उकारो धात्ववयवः। उध्रसाति। उध्रसाञ्चकार।

ध्राख्—ध्राख (ध्रोख) भ्वा, प।

१ शोषणम्। २असमर्थः। ध्राखति। ध्राघ् (द्राघ्) ध्राङ्ग् (द्राङ्ग्) ध्राङ् (द्राङ्)

ध्रिज्—भ्वा, प, वो। गतिः। ध्रेजते।

ध्रु—ध्रू, वो, भ्वा, प। ध्रु, ध्रुव्, तु, प।

१गतिः। २स्थैर्य्यम्। ध्रुवति। ध्रुवति। दुध्राव। दुध्रोव। दुध्रुवतुः। तं दुध्रावाद्रिणा कपिः (व्यापादितवान्), भ १४, ८१। ध्रू, ध्रोता, ध्रोष्यति, अध्रौषीत्। ध्रू, ध्रविता, ध्रविष्यति, अध्रावीत्। तु, ध्रुता, ध्रुष्यति, अध्रुषीत्, अध्रुताम्। ध्रुव्, ध्रुविता, ध्रुविष्यति, अध्रुवीत्, अध्रुविष्टाम्।

ध्रेक् (ध्रेक्)।

ध्रै—भ्वा, प। क्षयः। ध्रायति।

ध्वज्—ध्वञ्ज्—ध्वजि (धृजि) भ्वा, प। गतिः। ध्वजति। ध्वञ्जति।

ध्वण्—(अण) भ्वा, प। शब्दः।

ध्वन्—भ्वा, प। शब्दः।

ध्वनति। ध्वनन्ति यद्गुणान् मर्त्या ध्वनयन्ति च खेचराः, कवि २५५। दध्वान। दध्वनतुः। दध्वान मेघवद् भीमम्, भ ९, ५। पणवा दध्वनुर्हताः, भ १४, ३। ध्वनिता। ध्वनिष्यति। अध्वनीत्, अध्वानीत्। दिध्वनिषति। दन्ध्वन्यते। दन्ध्वन्ति। ध्वनयति घण्टाम्। अन्यत्र ध्वानयति (अस्पष्टाक्षरमुच्चारयति)। अदिध्वनत्। ध्वन—अदन्तः। चु, प। शब्दः। ध्वनयति। अदध्वनत्। ध्वनितः। ध्वननम्। ध्वानः। ध्वनिः। ध्वनति मधुपसमूहे, गीतगो ५, ४।

ध्वंस्—ध्वन्स्, भ्वा, आ।

१अवस्रंसनम्। ध्वंसः। अधःपतनम्। २ गमनम्। ध्वंसते, ध्वंसते यदि भवादृशस्ततः, भा १२, ४२। तमांसि ध्वंसन्ते, वीर ५। ध्वंसेत हृदयं सद्यः, भा ११, ५७। दध्वंसे। प्राणा दध्वंसिरे, भ १४, १५। ध्वंसिता। ध्वंसिष्यते। अध्वसत्। अध्वंसिष्ट, पा १, ३, ९१। शस्त्रमध्वसत, भ १५, ९३। सन् दिध्वंसिषते। यङ् दनीध्वस्यते, पा ७, ४, ८४। दनीध्वस्ति। णिच् ध्वंसयति। अदध्वंसत्। मूर्द्धानमदध्वंसन्नरहिषः। भ १५, ९१। (उ) ध्वंसित्वा, ध्वस्त्वा। ध्वस्तः। ध्वंसः। अप, अव—चूर्णनम्। निन्दा। वि—निपातः। क्षयः।

ध्वाङ्क्ष्—(ध्राङ्क्ष्)।

ध्वृ—भ्वा, प। कुटिलीकरणम्। ध्वरति। दध्वार। दध्वरतुः। ध्वर्त्ता।

(न)

नक्क्—(धक्क्) चु, प। नाशनम्।

नच्च्—णच् (ल्टच्च) भ्वा, प। गतिः।

नख्—नङ्ख्—णख्, णङ्खि (उख्) भ्वा, प। गतिः। नखति। नङ्खति।

नज्—ओनजा, तु, आ, वो। लज्जा।

नट्—णट्, भ्वा, प। १ नर्त्तनम्। २ हिंसा, वो। नटति। नटन्ति नाटके यस्य चरितं भरतादयः, कवि १७८। ननाट। नेटतुः। नटिता। अनटीत्, अनाटीत्। नृतिनतिगतिषु घटादिर्णौपदेश एव, कौ ८२। नटयति। नाट्येन केन नटयिष्यति दीर्घमायुः, अनर्घ। प्रणटयति नट्, चु, प। अवस्कन्दनम्। नाट्यम्। अभिनयः। अनुकरणम्। भ्रंशः, वो। नाटयति। हृषसेचनं नाटयति, शकु १, ८०। ईश्वरस्याभिख्यां नाटयत्येष शैलः, मा ४, ६५।

नट, (अजि) चु, प। दीप्तिः। नाटयति। उद्—हिंसा। वृषलस्योन्नाटयति, पा २, ३, ५६। नटः। नाटकम्।

नड्—णड्, चु, प। भ्रंशः। नाड़यति।

नद्,—णद्, भ्वा, प। अव्यक्तशब्दः। नादः। लट् नदति। नवाम्बुमत्ताः शिखिनो नदन्ति, घटकर्परः २। लिट् ननाद। नेदतुः। दुन्दुभयो नेदुः, रामा। लुट् नदिता। लृट् नदिष्यति। लुङ् अनादीत्, अनदीत्। सन् निनदिषति। यङ् नानद्यते। नानत्ति। णिच् नादयति। अनीनदत्। णद्, चु, प। दीप्तिः। नादयति। उद्, नि—उच्चनादः। असोढ सिंहध्वनिरुन्नाद, कु १, ५७। मदपटुनिनदद्भीराजहंसैः, र ५, ७५। अम्बुदैः शिखिगणो विनाद्यते (प्रयोजकणिजन्तस्य सकर्मकत्वम्), घटकर्परः। प्रणदति, प्रणिनदति, पा ८, ४, १७। निनदः। निनादः।

नन्द्—टुनदि, भ्वा, प। समृद्धिः। आनन्दः। नन्दति। ननन्द। ननन्द पश्यन् स स्थलीः, भा ४, २। ननन्दतुस्तत्सदृशेन तत्समौ, र ३, २३। नन्दिता। नन्दिष्यति। नन्द्यात्। अनन्दीत्। अनन्दिषुः। निनन्दिषति। नानन्द्यते। नानन्ति। नन्दयति। अननन्दत्। गोपाङ्गनानृत्यमनन्दयत्तम्, भ २, १६। नन्दित्वा। ०नन्द्य। नन्दितः। नन्दनम्। (टु) नन्दथुः। नन्दतः, पा

३, १, १३४। नन्दकः। नन्दः। नन्दानन्दौ। अभि—अभिनन्दनम्। सम्भावनम्। प्रशंसा। सन्तोषणम्। प्रीत्साहनम्। कामना। नाभिनन्देत मरणं नाभिनन्देत जीवितम् (न कामयेत), मनु ६, ४५। तत्तत् प्राप्य शुभाशुभं नाभिनन्दति न द्वेष्टि (प्रशंसति), गी २, १७। वाग्भिः सखीनां प्रियमभ्यनन्दत्, र ७, ६६। दिवौकसोऽपि सीतादेवीमभिनन्दन्ति, वीर १०४। सेनापते वचनं ते नाभिनन्दामि, शक्र २, ४१। आ—आनन्दः। आनन्दितारस्त्वां दृष्ट्वा, भ २२, २४। आननन्दहानरान्, भ १५, ५८। प्रति—संवर्द्धनम्। प्रीत्या प्रतिननन्दतुः, र १, ५८। प्रतिनन्द्य तथाशीर्भिः, भारत।

नभ्—णभ् (तुभ्) भ्वा,आ। दि,क्रया,प।

हिंसा। बधः। नभते। नभ्यति। नभ्नाति। ननाभ। नेभे, स तं नेभे, भ १४, ३३। नभिता। नभिष्यति। ०ते। भ्वा, अनभत्। अनभिष्ट। दि, अनभत् क्रया। अनभीत्, अनाभीत्।

नम्—णंम्, भ्वा, प। १ प्रह्वत्वम्।

नम्रीभावः। २नमस्करणम्। ३शब्दः। शब्दार्थौ न भाषायाम्, दुर्गा। लट् नमति, भक्त्या नमति यो देवान्, कवि २५३। प्रहर नमतु चापम, वीर ३३। नम चितीन्द्रम, भ १२, ३८। लिट् ननाम। नेमतुः। नेमिथ, ननन्थ। सविभ्रमं नेमुः, भ ३, ४३। लुट् नन्ता। लृट् नंस्यति। लुङ् अनंसीत्। अनंसिष्टाम्। अनंसिषुः, पा ७, २, ७३। अनंसीद् भूभरेणास्य, भ १५, २५। अनंसीच्चरणौ तस्य, भ ८, ५१। भावकर्म्मणोः, नम्यते। अनामि। कर्त्तरि, नमते। अनंस्त दण्डः स्वयमेव, पा ३,१,८९। सन् निनंसति। यङ् नंनम्यते। नंनन्ति। नंनम्यमानाः फलदित्सयेव लताः, भ २,२५। णिच् नमयति, नामयति। सोपसर्गस्य तु प्रणमयति। अनीनमत्। नमयति धनुरेषं यः, महाना १, २३। नत्वा। ०नत्य, नम्य। नतः। नतिः। नमनम्। नन्ता। नम्रः। नन्तव्यः। अव, आ—अवनतिः। उद्—उन्नतिः। उन्नमति मेघः, मृच्छ १६६, संमुन्नमनाम काचित्, भा १०, ५३। उप—उपस्थितिः। प्रणतिः। अकामोपनतेनेनसा, र १०, ३९। परि—परिणामः। परिपाकः। परिणमन्ति न पल्लवानि, भा ५, ३७। रत्नं चेत् क्वचिदस्ति तत् परिणमत्वस्मासु· शक्रादपि, वीर १०। विपरि—विपरिणामः। विरूपावस्था। विपरिणमते दौर्जन्यम्, अनर्घ ९२। प्र—प्रणतिः। गुरवे प्रणम्य, र १३, ७०। तामञ्जलिभिः प्रणेमुः, र १४, १३।

नम्ब्—भ्वा, प, वो। गतिः। नम्बति।

नय्—णय् (अय) भ्वा, आ। १ गतिः।

२ रक्षा, वो। नयते। नेये। नयिता।

नर्द्—(गर्द्) भ्वा, प। शब्दः।

गर्जनम्। नर्दति। ननर्द। नर्दिता। अनर्दीत्। अनर्दिषुः कपिव्याघ्राः, भ १५, ३५। प्रनर्दति। प्रनर्दकः, पा ८, ४, १४। कष्टं विनर्दतः, भ ९, १८।

नर्व्—भ्वा, प, वो। गतिः। नर्वति।

नल्—णल्, भ्वा, प। १ गन्धः।

अर्दनमिति गोविन्दभट्टः। २ बन्धनम्। नलति। णल्, चु, प, वो। दोषिः। नालयति।

नश्—णश्, दि, प। १ नाशः।

क्षयः। मरणम्। २अदर्शनम्। तिरोभावः। लुक्कायनम्। पलायनम्। लट् नश्यति। ध्रुवाणि तस्य नश्यन्ति, हितो। लिट् ननाश। नेशतुः। नेशिथ, ननंष्ठ। नेशिव। नेश्व, कौ १४०। नेशुर्निशाचराः, भ १४, ११२। लुट् नशिता, नष्टा, पा ७, २, ४५। ७, १, ६०। लृट्, नशिष्यति, नङ्क्ष्यति। लृङ् अनशिष्यत्, अनङ्क्ष्यत्। आशिषि, नश्यात्। लुङ् अनशत् (अनेशत्, वो)। चेष्टा व्यनेशन्विखिलास्तदाख्याः, नै। अम् अनेशम्। सन् निनशिषति, निनङ्क्षति। यङ् नानश्यते। नानंष्टि। णिच् नाशयति। अनीनशत्। सूतो रथमनाशयत् (दूरमपनीतवान्), भ १७, १०२। तेषामज्ञानजं तमो नाशयामि, मी १०, ११। तपो मा नीनशः, भा ११, ३१। नशित्वा, नष्ट्वा, नंष्ट्वा, पा ६, ४, ३२। नष्टः। नष्टिः। नशनम्। नाशः। नशितुम्। नंष्टुम। नाशकः। नश्वरः। प्र, वि—विनाशः। प्रणशिष्यति, प्रनङ्क्ष्यति। प्रनष्टः। प्रणाशः, पा ८, ४, ३६। प्राणशन्, भ १५, ४८। विनङ्क्षति पुरी क्षिप्रम्, भ १६, २६।

नस्—णस्, भ्वा, आ। कौटिल्यम्।

नह्—णह्, दि, ब। बन्धनम्।

लट् नह्यति। ०ते। लिट् ननाह। नेहतुः। नेहिथ। ननद्ध। नेहे। लुट् नद्धा, पा ८, २, ३४। लृट् नत्स्यति। ०ते। अनात्सीत्। अनाद्धाम्। अनात्सुः। अनद्ध। अनत्साताम्। सन् निनत्सति। ०ते। यङ् नानह्यते। नानद्धि। णिच् नाहयति। अनीनहत्। नद्धा। ०नद्ध। नद्धः। नद्धव्यम्। नाहः, उपानत्। अपि—आच्छादनम्। कवचं पिनद्ध, भ ३, ४७। उद्—उन्नमय्य बन्धनम्। भुजङ्गभोगोद्यज्जटाकलापम्, कु ३, ४६। सम्—आच्छादनम्। समवायः। मिलनम्। समनद्धान् वर्मभिः भ १७, ४। समनात्सीत् सैन्यम्, भ १५, १११। कुसुममिव यौवनमङ्गेषु सन्नद्धम्, शकु १, १०२। परि—परिणाहः। दैर्घ्यम्। पर्य्याणद्धम्। निराणद्धम्। पर्य्यवनद्धम्। प्रावनद्धः, पा ८, ४, २, ३८।

नाथ्—नाध्—नाथृ, नाष्ट, भ्वा, आ १ प्रार्थना। २ उपतापः। ३ ऐश्वर्य्यम्। ४ आशीर्वादः। दृष्टार्थशंसनम्। आशिषि एव नाथेरात्मनेपदम्, अन्यत्र नाथति, कौ ३२। आशिषि नित्यम्, अन्यत्र विभाषयेति केचित्, दुर्गा। लट् नाथति। ०ते। नाधते। नार्थान्तरं के नाम न लोकनाथम्, नै ३, २५। नाथसे किमु पतिं न भूभृतः, भा १३, ५८। सर्पिषो नाथते, कौ २४२। भृत्यैर्नाथस्व वैदेहि, भ ८, १२०। लिट् ननाथ। ०थे। लुट् नाथिता। लृट् नाथिष्यति। ०ते। लुङ् अनाथीत्, अनाथिष्टाम्। अनाथिषुः। अनाथिष्ट। णिच् नाथयति अननाथत्। अनु उप—प्रार्थना। राजानमुपनाथति, पा २, ३, ५५।

नास्—णास्, भ्वा, आ। शब्दः।

नासते। नासा। नासिका। न शब्दे इत्येके इति प्रदीपः।

निन्द्—णिन्द्, भ्वा, प। चुम्बनम्।

निन्दति, निन्दति स्तनकञ्चोरुकपोलक्षिगलादिकम्, कवि १८८। निनिन्द। निन्दिता। निन्दिष्यति। चिन्दिन्द

नो भूयः, भ ६, १, ६। प्रणिच्चणम्। प्रनिच्चणम्, पा ८, ४, ३३।

निज्—णिजिर्, भ्वा, उ। १ शौचम्। निर्मलीकरणम्। २ पोषणम्। लट् नेनेक्ति। नेनिक्तः। नेनिजति। नेनिक्ते, पा ७, ४, ७५। यत्पादौ मौलिरत्नांशुजालैर्नेनेक्ति राजकम्, कवि १३०। लोट् नेनेक्तु। नेनिग्धि। नेनिजानि, पा ७, ३, ८७। लिङ् नेनिज्यात्। नेनिजीत। लङ् अनेनेक्। अनेनिक्ताम्। अनेनिक्तुः। अनेनिजम्। अनेनिक्त। लिट् निनेज। निनिजे। लुट् नेक्ता। लृट् नेक्ष्यति। ०ते। आशिषि, निज्यात्। निक्षीष्ट। लुङ् अनिजत्। अनैक्षीत्। अनिजताम्। अनैक्ताम्। अनिक्त। अनिक्षाताम्। सन् निनिक्षति। ०ते। यङ् नेनिज्यते। नेनिजीति। णिच् नेजयति। अनीनिजत्। निक्षा। निक्तः। नजनम्। अव—अवनेजनम्। प्रक्षालनम्। निर्—निर्णेजनम्। शोधनम्। अङ्गिर्निर्णिक्तम्, मनु ५, १२७। चेलनिर्णेजकः।

निञ्ज्—णिजि, अदा, आ। शुद्धिः। निङ्क्ते। निनिञ्जे। निञ्जिता। अनिञ्जिष्ट।

निद्—नेद्—णिट्, णेट्, भ्वा, उ। १ कुत्सा। २ सन्निकर्षः। नेदति। ०ते। नेदते न परं कश्चित्, कवि १५०।

निन्द्—णिदि, भ्वा, प। कुत्सा। निन्दा। निन्दति। तं निन्दति परीवादं परस्य विदधाति यः, कवि १५०। निन्दसि श्रुतिजातम्, गीतगो १, १३। निनिन्द। निनिन्दतुः। निनिन्द रूपं हृदयेन पार्वती, कु ५, १। निन्दिता। निन्दिष्यति। अनिन्दीत्। अनिन्दिष्टाम्। कर्मणि, निन्द्यते। अनिन्दि। निनन्दिषति। यङ् नेनिन्द्यते। नेनिन्दि। निन्दयति। अनिनिन्दत्। निन्दित्वा। निन्द्य। निन्दितः। निन्दनम्। निन्दनीयम्। निन्दा। निन्दकः। प्रनिन्दति, प्रणिन्दति, पा ८, ४, ३३। प्रणिन्दिष्यति वो भूयः, भ ६, १०६।

निन्व् (पिन्व्)।

निल्—णिल्, तु, प। गहनम्। दुर्बोधः। निलति। निनेल। नेलिता।

निवास—अदन्तः, चु, प। आच्छादनम्। निवासयति यश्चित्रं चीनांशुकम्। कवि।

निश्—णिश्, भ्वा, प। समाधिः। नेशति। प्रणेशति। निशा।

निष्—णिषु, भ्वा, प, वो। सेचनम्। निष्क्—णिष्क, चु, आ। परिमाणम्। निष्कयते।

निंस्—णिसि अदा, आ। चुम्बनम्। निंस्ते। निंसाते। निंसते। निंस्से। दन्तच्छदम, भ ५, १६। सुखं निंस्से सुखं स्त्रीणां यत्रजा, कवि १६६। निनिंसे। निंसिता। अनिंसिष्ट। प्रणिंसनम्, प्रनिंसनम्, पा ८, ४, ३३ दन्त्यान्तोऽयम। आभरणकारस्तु तालव्यान्त इति बभ्राम कौ, १२३।

नी—णीञ्, भ्वा, उ। प्रापणम्। नयनम। लट् नयति। ०ते। अज ग्रामं नयति गोपः, दुर्गा। नयन्ति यद्गुणाः सर्वं यस्तान्नयति दिङ्मुखम् कवि १७१। मामपि तत्र नय, हिली

(सम्मानने) शास्त्रे नयते। (ज्ञाने) तत्त्वं नयते, पा १, ३, ३६। लिट् निनाय। निनयिथ, निनेथ। निन्यिव। निन्ये। संविष्टः कुशशयने निशां निनाय, र १,९६। लुट् नेता। लृट् नेष्यति। ०ते। आशिषि, नीयात्। नेषीष्ट। लुङ् अनैषीत्। अनैष्टाम्। अनैषुः। अनेष्ट। अनेषाताम्। अनेषत। अनैषीद्राक्षसान् क्षयम्, भ १५, १०। कर्मणि, नीयते अजा ग्रामम्। अनायि। कपिनाऽनेषत क्षयं द्विषः, भ ९, २०। मन् निनीषति। ०ते। यङ् नेनीयते। नेनेति, नेनयीति। णिच् नाययति। अनीनयत्। नीत्वा। ०नीय। नीतः। नीतिः। नयनम्। नयः। नेतुम्। नेता। नायकः। नेत्रम्। नयनम्। अनु—अनुनयः। मारीचोऽनुनयंस्तामात्, भ ५, ४६। स चानुनीतः प्रणतेन पश्चात्, र ५,५४। अप—अपसारणम्। शठूनपनेष्यामि, भ १६, ३०। अभि—अभिनयः। अनुकरणम्। कुसुमावचयमभिनयन्त्यौ, शकु ४, १, १२। आ—आनयनम्। तेनाङ्गनाभिरानायि सः, १, १०। उदा—उत्सङ्गीकरणम्। बालकमुदानयते। प्रत्या—प्रत्यानयनम्। प्रत्यानेष्यति शत्रुभ्यो वन्दीमिव जयश्रियम्, कु २,५२। उद्—उत्क्षेपणम्। दण्डमुन्नयते, पा १, ३, ३६। (उन्नतिः वृद्धिः) समुन्नयन् भूतिम्, भा १, ८। उप—उपनयनम्। भृतिः। माणवकमुपनयते, कर्मकरानुपनयते, पा १, ३, ३६। विद्वानुपानेष्ट तान्, भ १, १५ (प्रापणम्) आर्घ्यस्यासनमुपनय, मृच्छ २७५। अर्घ्यमुपनीय, भ ६, ७०। भिक्षामुपनयति भिक्षोः करतले, महाना २, ७१। (उपस्थितिः) मत्सम्भोगः कथमुपनयेत्, मे ९४। नि—प्रापणम्। उदकं निनयेच्छेषं पिण्डान्तिके, मनु ३, २१८। निर्—निर्णयः। कथं निर्णीयते परः, हितो। परि—परिणयः। परिणेष्यति पार्वतीं यदा हरः, कु ४, ४२। प्रणयनम्। रचना। प्रापणम्। मुग्धबोधं व्याकरणं प्रणीयते। तस्मार्घ्यं प्रणीय, भ ५, ७। वि—धर्मादिषु व्ययः। ऋणादिपरिशोधनम्। अपनयनम्। शतं विनयते, कं विनयते, पा १, ३, ३६। क्रोधं विनयते, परस्य क्रोधं विनयति, पा १, ३, ३७। विनयन्तेऽस्य तदयोधा मधुभिर्विजयश्रमम्, र ४, ६८। (आसनम्। शिक्षा) विनेष्यन्निव दुष्टसत्त्वान्, र २, ८। मा चापलायेति गणान् व्यनैषीत्, कु ३, ४१। विनिन्युरेनं गुरवः, र ३, २९। नील्—णील्, भ्वा, प। नीलवर्णः। २, तत्करणम्। प्रणीलते। नीलम्। नीलो।

नीव्—(पीव) णीव्, वो। भ्वा, प। स्थौल्यम्। नीवति।

नु—णु, अदा, प। स्तुतिः। लट् नौति। नुतः। नुवन्ति। लिङ् नुयात्। लङ् अनौत्। अनुताम्। लिट् नुनाव। नुनुवतुः। नविता। नोता, वो। लुट् अनावीत्। अनोषीत्, वो। सन् नुनूषति। यङ् नोनूयते। नीनोति। णिच् नावयति। अनूनवत्। नुत्वा। नुतः। नुतिः।—आ—सातकण्ठशब्दः। आनुते शिवा, कौ २४३। पतत्रिणो मन्द्रमानुवानाः, भ ८, ६७। नुद्—तु, प, वो। बधः। नुदति। नुद्—णुद्, तु, उ। प्रेरणम्। क्षेपणम्। निरासः। अपसारणम्। लट् नुदति। ०ते। मन्दं मन्दं नुदति

प्रवनस्वाम्, मे ८। पापं नुदति, वीर १३। लिट् नुनोद। नुनुदे। संशयं नुनोद, र ६, ६८। नृपतेर्व्यंजनादिभिस्तमो नुनुदे, र ८, ४१। लुट् नोत्ता। लृट् नोत्स्यति। ०ते। आशिषि, नुद्यात्। नुत्सीष्ट। लुङ् अनौत्सीत्। अनौत्ताम्। अनौत्सुः। अनुत्त। अनुत्साताम्। अनुत्सत। सन् नुनुत्सति। ०ते। यङ् नोनुद्यते। नोनोत्ति। णिच् नोदयति। अननुदत्। नुत्त्वा। नुन्नः। नुत्तः, पा ८, २, ५६। नुत्तिः। नोदनम्। नोदः। आत्मापराधं नुदतः शुश्रूषया, र १६, ८५। अप—अपनोदनम्। अपनुनुदुर्देहखेदान्, भ १०, १३। निर्—प्रत्याख्यानम्। खण्डनम्। आवातः। पयो मांसं शाकञ्चैव न निर्नुदेत्, मनु ४, २१०। प्र—प्रेरणम्। वि—णिच् विनोदनम्। प्रीणनम्। प्रापनम्। दूरीकरणम्। क्व खिन्नमात्मानं विनोदयामि, शक्र ३,२०। विनोदयिष्यन्ति मुनिकन्यकास्त्वाम्, र १४, ७७। तापं विनोदय दृष्टिभिः, गीतगो १०, १३।

नू—णू, तु, प। स्तवनम्।

नुवति, नुवति त्रिषु लोकेषु षड्गुणान् प्रयतो जनः, कवि ४२। नुनाव। नुविता। अनुवीत्। परिणतगुणोदयः, कौ १५३। क्रुस्वान्तोऽयमिति वररुचिः।

नृत्—नृती, दि, प। गात्रविक्षेपः।

नर्त्तनम्। नृत्यति, नृत्यति युवतिजनेन समम्, गीतगो। ननर्त्त। ननृतुः सहावाम्, भ ३, ४३। नर्त्तिता। नर्त्स्यति, नर्त्तिष्यति। अनर्त्स्यत्, अनर्त्तिष्यत्, पा ७, २, ५७। नर्त्स्यन्ति मुदा युताः, १६, २०। अनर्त्तीत्। अनर्त्तिष्टाम्। अनर्त्तिषुः। निनर्त्सति, निनर्त्तिषति। नरीनृत्यते, पा ८, ४, ३८। नरीनर्त्ति। णिच् नर्त्तयति। ०ते। अननर्त्तत्, अनीनृतत्। नर्त्तित्वा। नृत्तम्, नृत्यम्। नर्त्तनम्। नर्त्तकः, नर्त्तकी। आ—रणनृत्यम्। कम्पनम्। मरुद्भिरानर्त्तितनक्तमाले, र ५, ४२।

नॄ—क्रया, प। नयनम्। प्रापणम्। नृणाति। प्रापणे, नरयति, घटादिः। नीर्णः।

नेद् (निद्) नेष् (एष्)।

(प)

पच्—भ्वा, चु, प। परिग्रहः।

पचति। पचयति। अदन्तः, वो। पचः।

पच्—डुपचष्। भ्वा, उ। पाकः।

रन्धनम्। परिणामः। परिणतावस्था। विनाशोन्मुखीभावः। लट् पचति। ०ते। तण्डुलानोदनं पचति। पक्वान्यन्नं चतुर्विधम्, गो १५, १४। शाकं पचति। भूतानि कालः पचति, भारत। लिट् पपाच। पेचिथ, पपक्थ। पेचिव। पेचे। लुट् पक्ता। लृट् पक्ष्यति। ०ते। आशिषि, पच्यात्। पक्षीष्ट। लुङ् अपाक्षीत्। अपाक्ताम्। अपाक्षुः। अपक्त। अपक्षाताम्। अपक्षत। कर्मणि, पच्यते। अपाचि। सद्य एव सुकृतां काङ्क्षितं पच्यते, र ११, ५०। नरके पच्यते घोरे। सन् पिपक्षति। ०ते। यङ् पापच्यते। पापचीति, पापक्ति। णिच् पाचयति। अपीपचत्। पक्ता। ०पच्य। पक्वः, पा ८, २, ५२। पक्तिः। पचनम्। पाकः। पाकिमम्। पचा। पक्तुम्। पक्ता। पाचकः। पचः, पा।

(ड़) पक्किमम्। ददर्श मालूरफलं पक्वे लिमम्, नै १, ८४। परिपाकः। विपाकः। पच (पञ्च)।

पञ्च्—पचि, भ्वा, आ। व्यक्तीकरणम्। पञ्चते। पचु, पचते, वो। पचति। पञ्चति इत्यप्येके। पचि, चु, प। विस्तारः। पञ्चयति। प्रपञ्चय पञ्चमरागम्, गीतगो, १०, १३। यो वाग्मी वादिनां मध्ये वाचमुच्चैः प्रपञ्चते। प्रपञ्चयन्ति यत् कीर्त्तिं दिङ्मुखेषु महाजनाः॥ कवि ४९। पञ्चकः। पङ्कः। पञ्चनम्। पङ्क्तिः।

पट्—(अट) भ्वा, प। गतिः।

पटति। पट् (कुप) चु, प। १ दीप्तिः। २ विकारः। छेदनम्। पाटयति। अपीपटत्। उद्—उत्पाटनम्। प्रांशुमुत्पाटयामास मुस्तास्तम्बमिव द्रुमम्, र १५, १९। विभेदः। केतकवर्हं विपाटयामास नखाग्रैः, र ६, १७। पट, चु, प। भदन्तः। वेष्टनम्। पटयति। पटः। पटी।

पठ्—भ्वा, प। कथनम्। पाठः।

पठति श्लोकं धीरः। पपाठ। पेठतुः। पेठिथ। पठिता। पठिष्यति। अपठीत्, अपाठीत्। कर्मणि, पठ्यते। अपाठि। श्लोकः कस्य कवेरमुष्य कृतिनस्तत् पठ्यतां पठ्यते। पिपठिषति। पापठ्यते। पापठ्टि। पाठयति। अपीपठत्। पठित्वा। पठितः। पठितिः। पठनम्। पाठः। पाठकः। पठत्सु तेषु, नै १, ३४।

पण्—भ्वा, आ। १ व्यवहारः।

वाणिज्यम्। २स्तुतिः। व्यवहारे, शतस्य पणते, या २, ३, ५७। पेणे। पणिता। अपणिष्ट। प्राणानामपणिष्ट, भ ८, १२१। स्तुतावेवायः। आयान्तात्मनेपदम्, को ५८। पणायति, पा ३, १, २८। ०ते वो। पणायाञ्चकार। पेणे, पा, ३, १, ३१। पणायितासि, पणितासे। पणायिष्यति, पणिष्यते। आशिषि, पणाय्यात्। पणिषीष्ट। अपणायीत्। अपणिष्ट। वोपदेवमते व्यवहारेऽपि आयः। न चोपलेभे वणिजां पणायाः, वणिजां पणायान् इति जयमङ्गलधृतपाठः। पणायान् पणलाभान् इति तस्यार्थः, भ ३, २७। पणायित्वा, पणित्वा। ०पणाय्य, पण्य। पणायितः। पणितः। पण्यम्। पणः। आपणः।

पण्ड्—पड़ि, भ्वा, आ। गतिः।

पड़ि, चु, प। १नाशनम्। २राशीकरणम्, वो। पण्डते। पण्डयति, पण्डति। पण्डा। पण्डितः।

पत्—पत्लृ, भ्वा, प। १ गतिः।

२पतनम्। भ्रंशः। पातित्यम्। ३ ऐश्वर्य्यम्, वो। लट् पतति, पतत्यधोधाम, मा १, २। पतन्ति पितरो श्लोषां लुप्तपिण्डोदकक्रियाः, गी १, ४१। सुरापः पतति, स्मृतिः। लिट् पपात। पेततुः। पेतिथ। पक्षौ पपात खम्, भ ५, १००। भुवि पपात मूर्च्छितः, रामा। लुट् पतिता। लृट् पतिष्यति। भानुरप्यपतिष्यत् क्ष्माम्, भ २१, ६। लुङ् अपप्तत्, पा ७, ४, १९। कर्मभावयोः पत्यते। अपाति। सन् पिपतिषति, पित्सति, पा ७, ४, ५४। यङ् पनीपत्यते। पनीपत्ति, पा ७, ४, ८४। णिच् पातयति। अपीपतत्। पतित्वा। ०पत्य। पतितः, पा ७, २, १५। पतनम्। पातः, पतः। पतितुम्। पातकः। पातुकः। उत्पतिष्णुः। पक्षं पतङ्गः पा-

तालं पत्याः। अनु—अनुपातः। अभि—अभिमुखपतनम्। आ—आगमनम्। उपस्थितिः। शनैरापततस्तान्, भ ३, ४८। उद्—उत्पतनम्। उड्डयनम्। उत्पातः। नि—निपतनम्। अधःपतनम्। उपस्थितिः। निपतन्ति रणेषु यस्य बाणाः, कवि ४९। मरणव्याधिशोकानां किमद्य निपतिष्यति। णिच्—निपातनम्। ज्योत्स्ना इत्येते मत्वर्थे संज्ञायां निपात्यन्ते, पा ५, २, १४। कात्यायनोव महिषं विनिपातयामि। प्रणि—प्रणिपातः। संनि—मिलनम्। निर्—निर्गमः। प्र—निपतनम्। उपस्थितिः। प्रापतन्नारुतिस्तत्र, भ १५,५३। सम्—गतिः। सम्पत्य तत् सनीडे, भ ५ ३१। पत्, दि, आ, वो। ऐश्वर्यम्। पत्यते। क्षौणीतलेऽधिपत्यते यः, कवि ४९। पेते। पतिता। पतः, पत्, आद्योऽन्तः। द्वितीयो हलन्तः। चु, प। १गतिः। पतनम्। २ऐश्वर्यम्, वो। अदन्तादा णिच् पतयति, पतति। पतयन्ति समन्ततो विपक्षाः, कवि ४९। पतञ्चकार। पतिता। अपतीत्, को १८२। पातयति। अपीपतत्। णिज्रहितो पतधातावेव अदन्तौ।

पथ्—पथे, भ्वा, प। गतिः।

पथ्—(पृथ्) चु, प। प्रक्षेपः। (पथयति। पथयत्युत्तरापथम्, कवि २३७)

पद्—भ्वा, प, वो। स्थैर्यम्।

पदति। पद अदन्तः। चु, आ। गतिः। पदयते। संपरिच्छिद्य लक्ष्याणि पदयन्ते पदातयः। आहवे राजलक्ष्मीश्च यस्य सम्पद्यते ध्रुवम्॥ कवि २०७।

पद्—दि, आ। गतिः। प्राप्तिः।

पद्यते। पेदे। पत्ता। पत्स्यते। पत्सीष्ट। अपादि, पा ३, १, ६०। अपत्साताम्। अपत्सत। पित्सते, पा ७, ४, ५४। पनीपद्यते। पनीपत्ति। पा ७, ४, ८४। णिच् पादयति। अपीपदत्। पत्त्वा। °पत्य। पन्नः। पत्तिः। पत्तुम्। पत्तव्यम्। णिच् पादितम्। पादनम्। पादयितव्यम्। अनु, अभि—प्राप्तिः। जरां सद्योऽन्वपद्यत, भारत। अभिपेदे राघवं मदनातुरा, र १२, ३२। आ—आगमनम्। प्राप्तिः। आपत्प्राप्तिः। आपत्तिः। तर्कीएन्याम्। उत्पत्तिः। निशाचरादापादि ध्वंसः, भ ६,३१। एषा रावणिरापादि (आगतः), भ १५, ८९। व्या—मरणम्। व्यापन्नानां गवां, स्मृतिः। व्या—णिच्—व्यापादनम्। हननम्। आत्मानं तव हारि व्यापादयामि, द्विती। उद्—उत्पत्तिः। उदपादि भव्या, कु १, २२। व्युद्—व्युत्पत्तिः। नामरूढमपि व्युदपादि, मा १०, २३। उप—उपयोगः। सम्भावनम्। सिद्धिः। सम्पन्नता। प्राप्तिः। सङ्गतिः। मद्भावायोपपद्यते (उपयुक्तो भवति), गौ १३, १८। नैतत् त्वयि उपपद्यते (योग्यः न भवति), गौ २, ३। पौत्रदौहित्रयोर्विशेषो नोपपद्यते (न सम्भाव्यते), मनु ९,१३९। पञ्चमो नोपपद्यते (पञ्चमस्य सम्बन्धो नास्ति, मनु ९,१८६। सर्वं सखे त्वय्युपपन्नमेतत् (सिद्धं), कु ३,१२। अभ्युप—अनुग्रहः। रतिमभ्युपपत्तुमातुराम्, कु ४, २५। निर्—निष्पत्तिः। सिद्धिः। प्र—गतिः। प्राप्तिः। तपोवनं प्रपेदे, भ ४, १। ये यथा मां प्रपद्यन्ते (भजन्ते),

गो ४,११। प्रति—अङ्गीकारः। प्राप्तिः। ज्ञानम्। सिद्धिः। प्रतिपादनम्। न मासे प्रतिपत्तासे मान्धेत्, भ ८, ९५। चेतो वालिबधं न प्रतिपद्यते (न प्रत्येति), भ १६, १११। प्रत्यपत्था हितं न च (नावगतवान्), भ १५, १४। विधिना प्रतिपादयिष्यता नववैधव्यम्, कु ४, १। विप्रति—विरुद्धज्ञानम्। विरोधः। वि—विपत्तिः। त्वयापि चित्राङ्गि विपद्यते यदि, नै १, १४१। त्वमनाथा विपत्स्यसे, उत्तर ४४। सम्—उत्पत्तिः। सम्पन्नता। प्राप्तिः। णिच् सम्पादनम्। सम्पत्स्यते वः कामोऽयम्, कु २, ५४। स्वसुः सम्पाद्य पाणिग्रहणम् र ७, २९।

पन्—(पण्) भ्वा, आ। स्तुतिः।

पनायति। ०ते, वो। पनायाञ्चक्रे। पेने। पनायितासि। पनितासे। अपनायीत्। अपनिष्ट।

पन्थ्—पथि, चु, प। गतिः।

पम्ब्—भ्वा, प, वो। गतिः। पम्बति।

पय्—(अय्) भ्वा, आ। गतिः।

पर्ण—अदन्तः। चु, प। इरितभावः।

पर्द्—भ्वा, आ। अपानशब्दः।

पर्प्—भ्वा, प। गतिः। पर्पति।

पर्व्—(अर्ब्) भ्वा, प। गतिः।

पर्व्—भ्वा, प, वो। पूरणम्। पर्वति।

पर्ष्, स्पर्ष् (वर्ष) भ्वा, आ। स्नेहनम्।

पल्—पल्ल्, वो। भ्वा, प। गतिः।

पलन्ति यद्द्विषो दिक्षु, कवि २५८।

पल्—चु, प, वो। पालनम्।

पालयति।

पल्यूल् (वल्यूल)।

पश्—पष्—पस्—भ्वा, उ, वो।

१ ग्रन्थनम्। २ पीड़नम्। ३ स्पर्शः। पर्शति। ०ते। पषति। ०ते। पसति। ०ते। पश्, पष्, पस्, वो, चु, प। बन्धनम्। पाशयति। पाषयति। पामयति। सम्पाशयति यः शत्रून् शृङ्खलैः। विपाशयति आत्मानम्॥ कवि २३०। पश, पष, अदन्तौ। चु, प। १ गतिः। (२ विहतिः। ३ स्पर्शनम्। ४ बन्धनम्, वो), पशयति। पषयति। सोपसर्गप्रयोगो माभूत्, दुर्गा। पश सौत्रधातुः। यङ् पम्पश्यते, पा ७, ४, ८६।

पंश्—पंस्—पशि, पसि, चु, प।

नाशनम्। पंशयति। पंसयति।

पा—भ्वा, प। पानम्।

लट् पिबति, पा ६, ३, ५८। पिबसि रतिसर्वस्वमधरम्, शकु १,१३१। अशोककलिकाश्चाष्टौ ये पिबन्ति, स्मृतिः। दुःशासनस्य रुधिरं न पिबाम्युरस्तः, वेणीसं। पिबन्ति मधु, कवि ६५। लिट् पपौ। पपतुः। पपिथ, पपाथ। पपिव। तं पपौ लोचनाभ्याम् (ददर्श), र २,१९। लुट् पाता। आशिषि, पेयात्, पा ६,४,६७। लुङ् अपात्। अपाताम्। अपुः, पा २, ४,७७। कर्मणि, पीयते। अपायि। अपायिषाताम्। अपासाताम्। सन् पिपासति। यङ् पेपीयते, पा ६,४,६६। पापेति, पापाति। णिच् पाययति। ०ते, पा ७, ३, ३७। अपिप्यत्, पा ७, ४, ४। पीत्वा। ०पाय। पीतः। पीतिः। पानम्। पाता। पार्यो। पातव्यम्। पानीयम्। पेयम्। सुरापः। रविपीतजला नदी, कु ४,४४।

पा, भदा, प। पालनम्। रक्षणम्।

पाति। उपप्लवेभ्यः प्रजाः पासि, र २, ४८। यः कीर्त्तिं पाति, कवि २६।

धर्माणां पाहि, भारत । पपौ । पाता । ायात् । अपासीत् । कर्मणि, पायते । पिपासति । पापायते । णिच् पाल यति । अपीपलत्, पा ७, ३, ३७ । ात्वा । पातः । पान्तो मुनीन्, भ ६, ८६ । प्रति—प्रतिपालनम् । प्रतीक्षा । अन्यासक्तो देवस्तदवसरं प्रतिपालयामि, शकु ५, २६ ।

पार—अदन्तः । चु, प ।

कर्मसमाप्तिः । शक्तिः । पारयति । अपपारत् । कर्मणि, पार्यते । पारितः । पारणा । जवेन गां पतितुमपारयन्तः (अशक्नुवन्तः), भा ४, १० ।

पाल्—चु, प । रक्षणम् । पालनम् । पालयति । पालयति भूमिपालः ।

पि—तु, प । गतिः । पियति ।

पिछ्—चु, प । छेदनम् । पिच्छ्, वो । पिच्छ्—तु, प, वो । बाधः । पिच्छति । पिञ्ज्—पिजि, अदा, आ । १ वर्णः । पिङ्गलीभावः । २ सम्पर्कः । ३अव्यक्तशब्दः । ४पूजनम्, वो । पिञ्जते । पिपिञ्जे । पिञ्जिता । पिजि, पिज (तुजि) चु, प । १ हिंसा । २बलम् । ३आदानम्, वो । ४निवासः । दीप्तिः, वो । पिञ्जयति । पिञ्जति । पेजयति । पिञ्जरः । पिङ्गलः ।

पिट्—भ्वा, प । १ शब्दः । २सङ्घातः । पेटति । पेटः । पेटी । पिटकः । पिटाकः ।

पिठ्—भ्वा, प । १हिंसा । २क्लेशः ।

पिण्ड्—पिडि, भ्वा, आ । चु, प । संहतिः । पिण्डीकरणम् । पिण्डते । पिण्डयति । पिण्डम् । पिण्डी ।

पिन्व्—पिवि, णिवि, मिवि, षिवि, भ्वा, प । सेचनम् । पिन्वति । निन्वति ।

पिल्—चु, प, वो । प्रेरणम् ।

पिश्—तु, प । १ अवयवः ।

२दीपनम् । पिशति, पा ७, १५, ८ । त्वष्टा रूपाणि पिंशतु, कौ १५७ । पिपेश । पेशिता ।

पिष्—पिष्लृ, रु, प । सङ्चूर्णनम् । पेषणम् । घर्षणम् । हिंसनम् । लट् पिनष्टि । पिंष्टः । पिंषन्ति । पिनक्ति । शुष्कपेषं पिनष्मुर्वीम्, भ ६, ३७ । पिनष्टि चौरस्य, पा ३, २, ५६ । हि पिण्ढि सुन्दरि चन्दनम् । आनिप् पिनषाणि । लिङ् पिंष्यात् । लङ् अपिनट् । अपिंष्टाम् । अपिनट् च रथानीकम्, भ १७, ६६ । लिट् पिपेष । पिपिषतुः । पिपेषास्य रथं कपिः, भ १४, ८० । लुट् पेष्टा । लृट् पेक्ष्यति । लुङ् अपिषत् । कर्मणि, पिष्यते । अपेषि । अपिक्षातां सहस्रे द्वे तद्दिनेन वनौकसाम्, भ १५, ६८ । सन् पिपिक्षति । यङ् पेपिष्यते । पेपेष्टि । णिच् पेषयति । अपीपिषत् । पिष्ट्वा । पिष्टः । पेषणम् । पेष्टुम् ।

पिस्—पेस्—पिस्ट, पेस्ट, भ्वा, प । गतिः । पिंस्, चु, प । १ गतिः । २ हिंसा । ३दानम् । ४प्राणनम् । ५वासः, वो । मूर्द्धन्यान्तोऽयमिति केचित्, दुर्गा । पेसति । पेसयति ।

पिंस्—पिसि (कुप) चु, प । दीप्तिः ।

पी—पीङ्, दि, आ । पानम् । पीयते । पीयन्ते च प्रियाधरम्, कवि ६५ । पिप्ये । पेष्यते । पेषीष्ट । अपेष्ट । पीत्वा । ०पीय । पीतः । कथं निपीय, नै १, १ ।

पीड्—चु, प। १ अवगाहनम्। २ बधः, वो। क्लेशः। पीड़नम्। पीड़यति। पीड़यन्ति जनं धाराः, भ ७, ८। पीड़तीति हलायुधः। यथा—राष्ट्रं पीड़ति नाम्नोयं पीड़यत्यरिमण्डलम्, कवि २५१। पीड़यामास। पीड़यिता। अपिपीड़त्, अपीपिड़त्, पा ७, ४, ३। नीलमपीपिड़च्छरैः, भ १५, ८२। कर्मणि, व्याधिभिः पीड्यते, मनु ५, ५०। आ—भूषणम्। क्लेशः। उद्—उत्पीड़नम्। उपद्रवः। अन्योऽन्यमुत्पीड़यत् स्तनद्वयम्, कु २,४०। उप, नि—संश्लेषः। पीड़नम्। हननम्। तिपीड्य पादौ, र २, २३। निर्दयं निपीड्य, मा १६, ३। निर्—निष्पीड़नम्। आर्द्रवस्त्रादेर्निर्जलीकरणम्।

पील्—भ्वा, प। स्तम्भनम्।

पोव्—भ्वा, प। स्थौल्यम्।

पुछ्—(युछ्) भ्वा, प। प्रमादः।

पुट—तु, प। संश्लेषणम्।

पुटति। पुपोट। पुटिता। अपुटीत्। लुट् (कुप) च, प। १ दीप्तिः। २ चूर्णीकरणम्। पोटयति। पुट, अदन्तः। चु, प। संसर्गः। पुटयति। पुटितः। पुटम्। पोटा।

पुट्ट् (चुट्ट) चु, प। अल्पीभावः।

पुड्—तु, प। त्यागः। उत्कर्षः। पुडति। पुपोड। पुडिता। अपुडीत्।

पुण्—तु, प। धर्माचरणम्।

पुणति शुभं लोकः, दुर्गा। पोणिता। पुण (पूण)। पुण्यम्। निपुणः।

पुण्ट्—पुटि (अजि) चु, प। दीप्तिः।

पुण्ड्—पुड़ि (मुड़ि) भ्वा, प। खण्डनम्। चूर्णनम्। पुण्डति। पौण्ड्यमित्येके। पुण्ड्रः। पुण्ड्रकम्। पुण्ड्रौकम्।

पुथ्—दि, प। हिंसा। पूथ् (कुप)। चु, प। दीप्तिः। पुथति। पोथयति।

पुन्थ्—पुथि (कुथि) भ्वा, प। १ हिंसा। २ पीड़नम्। पुन्थति। पुथि। पुन्थति।

पुर्—तु, प। अग्रगमनम् पोरिता।

पुल्—भ्वा, तु, चु, प। महत्त्वम्। पोलति। पुलति, वो। पोलयति। पुलकः। विपुलः।

पुष्—भ्वा, क्रया, प। पोषणम्। भरणम्। वर्द्धनम्। उपचयः। लट् पोषति। पुष्णाति। पुष्णीतः। पुष्णन्ति। तृष्णां न पुष्णाति यशांसि पुष्यति प्रवारणैर्विप्रमनांसि पोषति। भृत्यांश्च यः पोषयतीप्सितैर्धनैः, कवि २१। ईश्वरव्याहृतयो विपरीतमर्थं न पुष्णन्ति (बोधयन्ति), कु ३, ६३। हि पुषाण। लिङ् पुष्णीयात्। लङ् अपुष्णात्। अपुष्णीताम्। अपुष्णन्। लिट् पुपोष। पुपुषतुः। पुपोषिथ। लावण्यमयान् विशेषान् पुपोष, कु १, २५। उत्कर्षे पुपुषुर्गुणाः, र ४, ११। लुट् पोषिता। लृट् पोषिष्यति। लुङ् अपोषीत्। अपोषिष्टाम्। सन् पुपोषिषति, पुपुषिषति। यङ् पोपुष्यते। पोपोष्टि। णिच् पोषयति। अपूपुषत्। पोषित्वा। ०पुष्य। पुषितः। पोषणम्। पोष्यः। पोषकः।

पुष्, दि, प। पोषणम्।

उपचयः। पुष्यति। स पुष्यतितरां त्वाम्, भ ४, २९। पुष्यति स्वां न शोभाम् शकु, १, ८१। वर्षं पुष्यत्यनेकं सरयूप्रवाहः, र १६, ५८। देह-

मपुष्यः सुरामिषैः, भ १७, ७२। पुपोष। पोष्टा। पोष्यति। अपुषत्, पा ३, १, ५५। अस्मानपुषत् स्वपोषम्, भ ३, १३। पुपुक्षति। पुष, चु, प। धारणम्। पोषयति आभरणम्। परपिण्डेनात्मानं पोषयामि, हितो। पुष्टा। पुष्टः। पुष्टिः। वलिपुष्टकुलादिवान्यपुष्टः पृथगस्मादचिरेण भाविता तैः, मा २, ११६।

पुष्प्—दि, प। विकसनम्।

पुष्पयति। शरदि पुष्पन्ति सप्तच्छदाः। पुपुष्प। पुष्पिता। पुष्पम्।

'पुस्—प्युस्' दि, प।

दाहविभागयोः।

'पुस्'—चु, प। उत्सर्गः।

पोसयति।

पुंस—चु, प। १ वर्द्धनम्। २ मर्दनम्।

पुस्त्—चु, प। आदरानादरबन्धनेषु।

पू—पूङ्, भ्वा, दि, आ।

पूञ्, क्रया, उ। पवनम्। पवित्रीकरणम्। शुद्धीकरणम्। पवते। पवसे हविः, भ ६, ६४। पूयते। पुनाति। पुनाते, पा ७, ३, ८०। होमाग्निधूमसुरभिः पवते मारुतो मृदुः। गोदावरीतरङ्गार्द्रः पुनाति भुवि यत्प्रजाः॥ कवि १८०। जाह्नवी नः पुनातु। हि पुनीहि। भागीरथि पुनीहि माम्। लिङ् पुनीयात्। पुनीत। लुङ् अपुनात्। अपुनीत्। लिट् पुपाव। पुपविथ। पुपुवे। लुट् पविता। लृट् पविष्यति। °ते। आशिषि, पूयात्। पविषीष्ट। लुङ् अपावीत्। अपाविष्ट। सन् पूङ्, पिपविषते, पा ७, २, ७४। पूञ्, पुपूषति। °ते। यङ् पोपूयते। पोपोति। णिच् पावयति। अर्प पवत, पा ७, ४, ८०। पूङ्, पवित्वा, पूत्वा। पवितः। पूतः, पा १, २, २२। ७, २, ५१। सूनोऽपि गङ्गासलिलैः पवित्वा सहाश्वमात्मानम्, भ २, १८। पूञ्, पूत्वा। पूतः, पा ७, २, ११। विनाग्नेः पूनाः यवाः। पूतिः। वपनम्। पवितुम्। पावकः। पवमानः। पवित्रम्। त्वदीयैश्चरितैर्महीधरः पावितः, कु ५, ३७। उद्—वस्त्रपूतत्वम्। द्रवाणामेव सर्वेषां शुद्धिरुत्पवनं स्मृतम्, स्मृतिः।

पूज—चु, प। पूजा। अर्चना।

सम्मानः। प्रशंसा। पूजयति। राजानं पूजयति, रत्ना १, १३२। पूजयामास। पूजयिता। पूजयिष्यति। अपूपुजत्। अपूपुजन् विष्टरपाद्यमाल्यैः, भ २, १६। कर्म्मणि, पूज्यते। अपूजि। अपूजयिषाताम्, अपूजिषाताम्। पूजयित्वा। °पूज्यः। पूजितः। पूजनम्। पूजा। पूजकः। पूजनीयम्। पूज्यम्। पूजयितव्यम्।

पूण—'पुण' (पुल्) चु, प।

राशीकरणम्। पूणयति धान्यम्, दुर्गा।

पूय्—पूयो, भ्वा, आ। १ भेदः। २ दुर्गन्धः। पूयते। (ई) पूतः। पूयः।

पूर्—पूरी, दि, चु, आ।

आप्यायनम्। प्रीणनम। पूरणम। वर्द्धनम्। पूर्य्यते। पितॄन् पूरयति श्राद्धे पूर्य्यन्ते पितरस्तच्च, कवि १५१। पुपूरे, राज्ञः पुरो भूपतिभिः पुपूरे, राघवपाण्डवीय २, १। निःखनैर्द्यौः पुपूरे, भ १४, ८८। वेणून् पुपूरिरे मुखमारुतैः, भ १४, २। पूरिता। अ-

पूरि। अपूरिष्ट, पा ३, १, ६१। अपूरिषाताम्। अपूरिषत। चु. पूरयति, पूरति। पूरय मधुरिपुकामम्, गीतगो. ५, १४। कपोनां सङ्घाताः पूरयन्तो दिशः, ७, ३०। पूरयन्ति मनोरथान्, हितो। पूरित्वा, पूरयित्वा। ०पूर्य। पूर्णः। चु, पूर्णः। पूरितः, पा ७, २, २७। पूर्त्तिः। पूरणम्। पूरकः। उदरं शाकेनापि प्रपूर्य्यते, हितो।

पूर्व—पुर्व (पर्व) भ्वा, प।

पूरणम्। पूर्व (गूर्द) च, प। निवासः। निमन्त्रणम्, वो। पूर्वति, पूर्वयति। अयं वर्ग्यवान्तोऽपि।

पूल्—भ्वा, चु, प। राशीकरणम्। पूलति, पूलयति। पूनः। पञ्चपूली।

पूष्—भ्वा, प। वृद्धिः। पूषति। प्रतिक्षणं पूषति यस्य विक्रमः, कवि २१।

पॄ—(पॄ) भ्वा, प। १ पालनम्।

२ पूरणम्। पॄ, स्वा, प। प्रीतिः। प्रीणनम्। पृङ्, तु, आ। व्यायामः। व्यापारः। प्रायेणायं व्याङ्पूर्वः। लट् पिपर्त्ति। पिपृतः। पिप्रति। पृणोति। व्याप्रियते। धर्मे व्याप्रियते नित्यं पिपर्त्ति पृथिवीञ्च यः। पारयत्यर्थिनामाशाम, कवि २७। लङ् अपिपः। अपिपृताम्। अपिपरुः। अपृणात। व्याप्रियत। लिट् पपार। पप्रतुः। पप्रे। लुट पर्त्ता। लृट् परिष्यति। ०ते। लुङ् पपार्षीत्। अपार्ष्टाम्। अपार्षुः। अपृत। अपृषाताम्। सन् पुपूर्षति। ०ते। यङ् पेप्रीयते। पर्पर्त्ति। णिच् पारयति। अपोपरत्। पॄ, चु, प। परिपूरणम्। पारयति, पृत्वा। ०पृत्य। पृतः। परणम्।

पृच्—पृची, अदा, आ। सम्पर्कः। संसर्गः। पृचि, पृज्, पृजि, इत्येके। पृक्ते। पृङ्क्ते। पपृचे। ०क्षे। पपृजे। ०क्षे। पृच्, पृची, रु. प। सम्पर्कः। संसर्गः। योगः। संश्लेषः। पृणक्ति। पृङ्क्तः। पृञ्चन्ति। हि पृङ्ग्धि। लङ् अपृणक्। अपृणग्धनुषा शरम्, भ ६, ३२। लिट् पपर्च। पपृचतुः। पर्चिता। पर्चिष्यति। अपर्चीत्। अपर्चिष्टाम्। पिपर्चिषति। परीपृच्यते। पर्चयति। पृच (युज्) चु. प। १संयमनम्। बन्धनम्। २ सम्पर्कः वो। पर्चयति। पर्चति। (ई) पृक्तः। पृक्तसुषारैर्गिरिनिर्झराणाम्, र २, १३। सम्—पम्पर्कः। योगः। स्यन्दनौ समपृच्येतामुभयोः (कर्मणि लङ्), भ १७,१०६। वागर्थाविव सम्पृक्तौ, र १, १। सम्पर्की। सम्पृक्ते नाभिशस्तैर्यः संपृणक्ति। न पापिभिः सम्पचपति न क्षुद्रैर्न सम्पर्चति वञ्चकैः॥ कवि २८। सम्पृक्ते मधुना चूर्णं भिषक्।

पृड्—तु, प। १सुखनः।

२ प्रीणनम्, वो। पृडति। पर्डिता।

पृण्—तु, प। प्रीणनम्। पृणति।

पृथ्—चु, प। प्रक्षेपः। पर्थयति। अपीपृथत्, अपपर्थत्, पा ७, ४, ७।

पृष्—पृषु. भ्वा, प। १ सेकः।

२ हिंसा। ३ क्लेशः। पर्षति। पपर्ष। पृष्टः। पृषितमित्यौणादिकम्।

पॄ—भ्वा, क्रया, प। १ पालनम्।

२ पूरणम्। लट् पिपर्त्ति, पा ७,४,७७। पिपूर्त्तः। पिपुरति, पा ८,१,१०२। पिपर्मि। पिपूर्वः। पृणाति। पृणीतः।

पृणन्ति । लिङ् पिपूर्य्यात् । पृणीयात् । लङ् अपिपः । अपिपूर्त्ताम् । अपिपरुः । अपृणात् । अपृणीताम् । अपृणन् । लिट् पपार । पपरतुः । पप्रतुः, पा ७,४,१२ । लुट् परीता, परिता । लृट् परीष्यति, परिष्यति । आशिषि, पूर्य्यात् । लुङ् अपारीत् । अपारिष्टाम् । अपारिषुः । अपारीत् स हतशेषान् प्लवङ्गमान्, भ १५, १०० । कर्मणि, पूर्य्यते । सन् पिपरीषति, पिपरिषति, पुपूर्षति । यङ् पोपूर्य्यते, पापर्त्ति । पॄ, चु, प । पूरणम् । पारयति । अपीपरत् । पूर्त्वा । ०पूर्य्य । पूर्त्तः, पा ८, २, ५७ । पूर्त्तिः ।

पेण् (पेण्) ।

पेल्—पेल्ल, भ्वा, प । गतिकम्पयोः ।

पेव्—पेव, भ्वा, आ । सेवा ।

पेवते । अयं वर्ग्यान्तोऽपि ।

पेष्—पेषृ, भ्वा, आ । प्रयत्नः ।

पेस्—पेस्ट (पिस्ट) भ्वा, प । गतिः ।

पै—भ्वा, प । शोषणम् ।

पायति । पपौ । पाता । पायात् । अपासीत् । णिच् पाययति, पा ६,३,३७ ।

पैण्—पैणृ, भ्वा, प । १गतिः ।

२ प्रेरणम् । ३ श्लेषणम् । ४ पेषणम्, वो । पैणृ—प्रैण् लैणृ इत्येके । पैणति । संग्रामे, शत्रुसेनां द्रविणवितरणैः पैण यत्यर्थिदौस्थ्यम्, कवि १८ ।

प्याय्—ओप्यायी, भ्वा, आ । वृद्धिः ।

स्फोतिः । लट् प्यायते । लिट् । पिप्ये, पा ६, १, २८ । पिप्यिषे लुट् प्यायिता । लृट् प्यायिष्यते । लुङ् अप्यायि । अप्यायिष्ट, पा ३, १, ६१ । अप्यास्त, वो । अप्यायिषाताम् । अप्यायिषत । समस्त्वप्यायि, भ ६, ३३ । भावे, प्याय्यते । अप्यायि । सन् पिप्यायिषते । यङ् पेपीयते, पा ६, १, २८ । णिच् प्याययति । । अपिप्ययत् । प्यायित्वा । ०प्याय्य । पीनः, पा ६, १, २८ । खाङ्गे, पीनं मुखम् । अन्यत्र, प्यानः पीनः खदः । सोपसर्गस्य प्रप्यानः, को ३५८ । आ—स्फोतिः । प्रोतिः । आपीनोऽभुः आपीनमुधः, को ३५८ । आप्यानस्कश्वकण्ठासं रामम्, भ ५, ५६ । आप्यायन्ते यतः प्राप्य यज्ञभागान् दिवौकसः । प्रभूतधनसम्पत्तेराप्यायन्ते च यत्प्रजाः ॥ कवि १३५ । णिच्, (प्रीणनम्) आप्यायितोऽहं भवतामनेन वचनामृतेन, हितो । सम्—वृद्धिः । मन्युरस्य समापिप्ये, भ १४, ३२ । प्रप्यायनीयः, पा ८, ४, ३४ ।

प्युष्—प्युषिर्, दि, प, वो ।

१दाहः । २भागः । सान्तोऽपि । चु, प, वो । उत्सर्गः ।

प्यै—प्यैङ्, भ्वा, आ । वृद्धिः ।

प्यायते । पप्ये । प्याता । अप्यास्त ।

प्रच्छ् तु, प । श्नीत्सा । जिज्ञासा । प्रश्नः । अनुयोगः । पृच्छति । अपृच्छल्लक्ष्मणं सीताम्, भ ६, ८ । ब्राह्मणं कुशलं पृच्छेत्, मनु २, १२७ । लिट् पप्रच्छ । पप्रच्छतुः । पप्रच्छिथ, पप्रष्ठ । लुट् प्रष्टा । लृट् प्रक्ष्यति । आशिषि, पृच्छ्यात् । लुङ् अप्राक्षीत् । अप्राष्टाम् । अप्राक्षुः । कर्मणि, पृच्छ्यते । अप्रच्छि । पृच्छ्यते पुनरसौ क्षितिपालः, महाना ३, १३ । सन् पिपृच्छिषति, पा १, २, ८ । ७, २, ७५ । यङ् परीपृच्छ्यते । पाप्रष्टि । णिच् प्रच्छयति । अपप्रच्छत् ।

पृष्टा। ०पृच्छ्य। पृष्टः। पृष्टिः। प्रच्छनम्। प्रश्नः। प्रष्टुम्। प्रष्टव्यम्। शब्दप्राट्। आ—आमन्त्रणम्। प्रस्थानकाले सम्भाषणम्। आपृच्छते, कौ २४३। व्रजापृच्छस्व सुहृज्जनम्, रामा। सर्वा मातुरापृच्छ्य प्रययुः, भारत।

प्रथ्—भ्वा, आ। प्रख्यानम।

विख्यातिः। प्रसिद्धिः। प्रथते, प्रथते पृथुवद् यस्य पृथिव्यामुज्ज्वलं यशः। प्रथयन्ति प्रथीयांसो गुणाः, कवि १८६। पप्रथे, तदाख्यया तीथ भुवि पप्रथे, र १५, १०१। प्रथिता। प्रथिष्यते। अप्रथिष्ट। अप्रथिषाताम्। णिच् प्रथयति, घटादिः। अपप्रथद् गुणान् भ्रातुः, भ १५, ७२। प्रथ्, चु, प। विख्यातिः। प्रक्षेप', वो। प्राथयति। प्रथितम्। प्रथनम्। प्रथा। पृथिवी।

प्रष्—भ्वा, आ। १ विस्तारः। २ प्रसवः, वो। प्रसते। प्रसयति, घटादिः।

प्रा—अदा, प। पूरणम्।

प्राति। पप्रौ। प्राता। प्रेयात्, प्रायात्। अप्रासीत्, अप्रासीदिषुभिर्मुखम्, भ १५, ६८। कर्मणि, पप्रे दोनैश्च मेदिनी, भ ४, ४२। णिच् प्रापयति। क्त प्राणः। प्रातः। प्रायः।

प्री—प्रीञ्, भ्वा, उ, वो। तर्पणम्।

प्रीङ्, दि, आ। प्रीतिः। २ प्रीणनम्। ३ कान्तिः, वो। प्रीञ्, क्र्या, उ। १ प्रीणनम्। २ प्रीतिः। ३ कामना। इच्छा। लट् प्रयति। ०ते। प्रीयते, यः प्रीयते प्रणयिषु प्रमृते न भृत्यान्, कवि ७। प्रकाममप्रीयत यज्वनां प्रियः, मा १, १७। प्रीणाति। प्रीणीते। लिङ् प्रीणीयात्। प्रीणीत। लङ् अप्रीणात्। अप्रीणीत। लिट् पिप्राय। पिप्रिये। सुरान् पिप्राय पश्यतः, भ ५, १०४। पितॄन् पिप्रियुः, भ ३, ३८। नदीं पश्यन् पिप्रिये, र १५, ३०। लुट् प्रेता। लृट् प्रेष्यति। ०ते। लुङ् अप्रैषीत्। अप्रेष्ट। सन् पिप्रीषति। ०ते। यङ् पेप्रीयते। पेप्रर्यीति। पेप्रेति। णिच्—प्रीञ्, प्रीणयति, पा ७, ३, ३७। अपिप्रीणत्। प्रीङ् प्रायायति। प्रीञ्, चु, प। प्रीणनम्। प्रीणयति। केचित्तु, प्रायायति। प्रयति। ०ते। यं प्रायायन्ति कविसूक्तिरसायनानि, कवि ७। प्रीत्वा। प्रीतः। प्रीतिः। प्रयणम्। प्रीणयित्वा। प्रीणितः। प्रीणनम्। प्रियः।

प्लु—प्लुङ् (च्यु,ङ्) भ्वा, आ। गतिः।

प्लवते। पुप्लुवे। प्लोता। अप्लोष्ट। मा न प्लोढुं द्रुतं वियत् भ ८, ७७। णिच् प्लावयति। अपुप्लवत्, अपिप्लवत्। पुप्लावयिषति, पिप्लावयिषति, पा ७, ४, ८१। प्लावयन्तो। वनैरशोकवनिका (व्याप्लुवाना), भ ८, ५९।

प्लुष्—(प्लुष्) प्रेष् (पेष्)।

प्लेङ्खोल—अदन्तः। चु, प। चापलम।

प्लेष्—प्लेषृ (एषृ) भ्वा, आ। गतिः।

प्रोथ—प्रोथृ, भ्वा, उ। १ पर्य्याप्तिः। परिपूर्णता। २ सामर्थ्यम्, दुर्गा। प्रोथति। ०ते। पुप्रोथ। पुप्रोथे। पुप्रोथास्मै न कश्चन, भ १४, ८४। प्रोथिता। अप्रोथीत्। अप्रोथिष्ट। नाप्रोथीदस्य कश्चन, भ १५, ४०।

प्लुच्—(भ्लुच्) भ्वा, उ। भक्षणम्।

प्लुव्—भ्वा, आ, वो। गतिः। प्लुतिः।

प्लुह्—भ्वा, आ। गतिः। प्लोहते।

प्लोह दीप्ताविति प्रदीपः। प्लोहा, प्लोहानौ।

प्ली—क्रया, प। गतिः। प्लिनाति।

प्लु—प्लुङ्, (प्लुङ्), भ्वा, आ।

१गतिः। लम्फः। २ उत्तरणम्। ३सन्तरणम्। प्लवते। अम्बूनि मज्जन्त्यलाबूनि ग्रावाणः प्लवन्ते, वीर १३। पुप्लुवे, मृगः पुप्लुवे, भ ५, ४८। पुप्लुवे सागरं नौक्या, भारत। प्लोता। प्लोष्यते। अप्लोष्ट। अप्लोषाताम्। अप्लोष्ट च निरङ्गुशः भ १५, ४६। सन् पुप्लुषते। यङ् पोप्लूयते। पोप्लोति। णिच्। प्लावयति। अपुप्लवत्, अपिप्लवत्। पुप्लावयिषति, पिप्लावयिषति, पा ७, ४, ८१। (प्लावनम्) गङ्गा दक्षिणां दिशं प्लावयन्ती, भारत। अव—अधःपतनम्। आ—अवगाहनम्। स्नानम्। समासाज्जल आप्लुत्य, मनु ५, ७७। उद्—उल्लम्फः। तदन्नमुत्प्लुत्य भक्षयामि, हितो। उप—उत्प्लोडनम्। पौलस्त्योपप्लुता देवाः, र १०, ५। परि—व्याप्तिः। चलनम्। वि—विप्लवः। विपत्तिः। ध्वंसः। अर्थं विप्लावयन्ति ये, मा २, ५६। सम्—वृद्धिः। दुःखानि संप्लवन्ते, उत्तर १४२।

प्लुष्—प्रुष्—प्लुषु, प्रुषु, भ्वा, प।

प्लुष्, दि, प। दाहः। भस्मीकरणम्। प्लुष्, प्रुष्, क्रया, प। १स्नेहनम्। २पूरणम्। ३सेवनम्। ४सेचनम, वो। ५मोचनमिति भट्टमल्लः। ६ दाहः। प्लोषति। प्रोषति। प्लुष्यति। प्लुष्णाति। प्रुष्णाति। पापान् प्लुष्णातु वानलः (दहतु, धातूनामनेकार्थत्वात्) भ, २०, ३४। मां प्लुषाण वक्ष्ये, भ २०, ३७। पुप्लोष। पुप्लुषतुः। प्लोषिता। प्लोषिष्यति। अप्लोषीत्। दि, अप्लुषत्। अप्लोषीत्। व्युष दाहे प्लुष च इत्यत्र पाठः सिजर्थः, कौ १४३। (ड) प्लोषित्वा, प्लुष्ट्वा। °प्लुष्य। भ्वा प्लुष्टः, प्लुषितः। प्लोषणम्। प्लोषः।

प्लुस्—दि, प। १ दाहः।

२भागः, वो। प्लुस्यति। अप्लुषत्, अप्लोसीत्, वो।

प्लेव्—प्लेङ्, भ्वा, आ, वो। सेवा।

प्सा—अदा, प। भक्षणम्।

प्साति। पप्सौ। प्साता। प्सास्यति। प्सायात्, प्सेयात्। अप्सासीत्, मांसमप्सासीत्, भ १५, ६। पिप्सासति। पाप्साय्यते। पाप्सायति। प्सापयति। अपिप्सपत्। प्सातः। प्सानम्। प्रणिप्साति।

(फ)

फक्क्—भ्वा, प। १ मन्दगतिः।

२असद्व्यवहारः। फक्कति। पफक्क।

फण्—भ्वा, प। १ गतिः। २ निःस्नेहः। अनायासोत्पत्तिः, दुर्गा। फणति। पफाण। फेणतुः, पफणतुः, पा ६, ४, १२५। फेणिथ, पफणिथ। फणिता। फणिष्यति। अफाणीत्, अफणीत्। पिफणिषति। पम्फण्यते। पम्फणिष्ट। फणयति। गत्यर्थौ घटादिः। निःस्नेहे, फाणयति। फणेर्घटादित्वं नेच्छन्तीति केचित्, कौ ८७। क्त, फाणटः, पा ७, २, १८। अनायासकृतं फाणटमित्यमरः।

फल्—अभिफला, भ्वा, प । भेदः ।

फल्, भ्वा, प । १ निष्पत्तिः । परिणामः । २निष्पादनम् । ३गमनम्, वो । लट् फलति,हृदयं मे फलति मद्दस्रधा, रामा । बाल्मीकिः फलति स्म दिव्या गिरः, अनर्घ ४ । मणीनां रविकरसंवलिताः फलन्ति भासः (वर्द्धन्ते) भा ५, २८ । लिट् पफाल । फेलतुः, पा ३, ४, १२२ । कल्पद्रमा योगबलेन फेलुः, भ ३, ४२ । लुट् फलिता । लृट् फलिष्यति । लुङ् अफालीत् । अफालिष्टाम् । अफालिषुः । सन् पिफलिषति । पम्फुल्यते । पम्फुल्लति पा ७, ४, ८७, ८८ । णिच् फालयति । अपीफलत् । फलित्वा । फलितः । अभिफला, फल्लः । फुल्लवान् पा ८, २, ५५ । प्रफुल्लत । प्रफुल्ल इति फुल्लधातोरच् । संफुल्ल उतफुल्ल इति पद्मनाभः । फुल्लमस्य फलितमस्य । पफुल्लतः पफलित इति प्रदीपः । प्रति—प्रतिविम्बनम । मुखं प्रतिफलत्, नै ४, १३ । ज्योतिषि रौप्यभित्तिषु प्रतिफलति (सम्मूर्च्छति), मा ४, ६४ ।

फुल्ल—भ्वा, प बिकासः ।

फुल्लति । पुफुल्ल । अफुल्लीत् । प्रफुल्लम् । प्रफुल्लितः ।

फेल्—फेल्ल (पेल्ल) भ्वा, प । गतिः ।

(ब)

बट् (वट्) बण् (वण्) वन् ।

बठ्—भ्वा, प । १ स्थौल्यम् । २सामर्थ्यम, वो । बठति । बेठतुः ।

बद्—"बन्द्" भ्वा, प । स्थैर्य्यम् । बदति, बन्दति । बबाद । बेदतुः । बेदिथ । बद्यात् । अबदीत्, अबादीत् । बदरी ।

बध्—भ्वा, आ । बन्धनम् ।

२ चित्तविकारः । ३ निन्दा, वो । (चित्तविकारे सन्) बीभत्सते, पा ३, १ ६ । बीभत्सते परस्त्रीभ्यः, करि ५४ । बीभत्साञ्चक्रे । बीभत्सिता । अबीभत्सिष्ट । बीभत्सितः । वीभत्सा । बन्धनादौ, बधते । मा बधिष्ठा जटायुं माम् (मा बधीः), भ ६, ४१ । बध्, चु, प । बन्धनम् । बधः । बाधयति । बधति । बाधयन्ति न दुःखार्त्ता केशान् यदरियोषितः, कवि ५४ ।

बन्ध्—क्रा, प ।। बन्धनम् ।

लट् बध्नाति । बध्नीतः । बध्नन्ति । यो बध्नाति रिपुं रणे, कवि ५४ । फलं बध्नन्ति नीतय (जनयन्त), र १२, ६९ । मतिं बधान सुग्रीवे, भ २०, २२ । लिङ् बध्नीयात् । लङ् अबध्नात् । अबध्नाताम् । अबध्नन् नमबध्नाद् ब्रह्मपाशेन, भ ९, ७५ । लिट् बबन्ध । बबन्धतुः । बबन्धिथ । बबन्ध । अभिलाषे मनो बबन्ध, र ३, ४ । क्रमं बबन्ध क्रमितुम् (कृतवान्), भ २, ९ । लुट् बन्धा । लृट् भन्त्स्यति । आशिषि, बध्यात् । लुङ् अभान्त्सीत् । अबान्धाम् । आभान्त्सुः । कर्मणि, बध्यते । अबन्धि । तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः, हितो । सन् बिभन्त्सति । यङ् बाबध्यते । बाबन्धि । बन्ध् (बध्) चु, प । बन्धनम् । बन्धयति । अबबन्धत् । बद्धा । बध्य । बद्धः । बद्धिः । बन्धनम् । बन्धः । बन्धुम् । बन्धा । बन्धव्यम् । अनु—अनुबन्धः । सम्बन्धः । अपरित्यागः । अनुवर्त्तनम् । भङ्क्तेऽपि गुणालानामनुबध्नन्ति तन्तवः, हितो ।

भवतो मानसं किं स्नेहमनुबध्नाति, चण्डी। आ—बन्धनम्। करणम्। नि—निबन्धः। ग्रन्थनम्। रचना। निरोधः। निर्—निर्बन्धः। आग्रहः। प्र—प्रबन्धः। प्रति—प्रतिबन्धः। प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः, र १, ८०। सम्—सम्बन्धः।

बभ्र् (बभ्र्) बर्ष् (वर्ष्)।

बख् (कख्) भ्वा, प। हिंसागत्योः।

बर्ब (कर्ब्) भ्वा, प। गतिः।

बर्ह् (बर्ह) भ्वा, आ। १ कथनम्। २ हिंसा। ३ आच्छादनम्। ४ प्राधान्यम्। ५ दानम्, वो। बर्हते। बर्ह्हते। बर्ह, बर्ह्ह (कुप) चु. प। दीप्तिः। बर्हयति। बर्ह्हयति। बर्ह् (ब्रूष) चु. प। हिंसा। बर्हयति। दन्त्यादयोऽप्येते। निबर्हयति वृद्धारीन् तपसा यो निबर्हते, कवि २५२। निबर्हितांहसा, मा १। बर्हिणः। बर्हम्।

बल्—भ्वा, प। १ जीवनम्।

२ धान्यावरोधनम्। ३ समृद्धिप्रतिबन्धः। बल् (भल्) भ्वा, आ। १ निरूपणम्। २ हिंसा। ३ दानम। बलति। •ते। बबाल। बेले। बलिता। बल्, चु, प। जीवनम्। बलयति, घटादिः। अबीबलत्। चु, आ, वो। निरूपणम्। बालयते। बालः। बलम्।

बष् (बष्) बस् (बस्)।

बंह्—बर्हि, भ्वा, आ। वृद्धिः।

बंहते। बबंहे। दन्त्यादिश्च।

बाध्—बाधृ. भ्वा, आ। उन्मज्जनम्। स्नानम्। बाडते। दन्त्यादिश्च।

बाध्—बाधृ, भ्वा, आ। लोडनम्। प्रतिघातः। पीडनम्। प्रतिबन्धः। बाधते। दन्त्यादिश्च। मां बाधते नहि तथा विषिनेषु वामः, मद्दाना ३, ३७। वीराणां समयः स्नेहक्रमं बाधते, उत्तर १८३। बबाधे। जनं न मत्त्वेष्वधिको बबाधे, र २, १४। भ १४, ४५। बाधिता। अबाधिष्ट। अबाधिषाताम। बिबाधिषते। बाबाध्यते। बाबाद्धि। बाधयति। अबबाधत्। बाधित्वा। बाधितः। बाधनम्। बाधा। आ—दमनम्। आबाधन्ते मनसिजमपि कुमार्यः, शकु ३, १:८। प्र—परिपीड़नम्। प्रबाधमानस्य जगन्ति, भ १२, २।

बाह् (बाह्) बिट् (विट्) बिड् (विड्)।

बिन्द्—बिदि, भ्वा, प। अवयवः। बिन्दति। बिन्दुः।

बिल्—तु, चु, प। भेदः।

बिलति। बेलिता। बेलयति।

बिश्—बेश्, बिस्—बेस् (पिस्ट) भ्वा, प। गतिः। बेशति। बेसतीत्येके।

बिस्—दि, प। प्रेरणम्। अबिसत्।

बीभ्—भ्वा, आ। श्लाघा। बीभते।

बुक्क्—भ्वा, प। भाषणम्।

श्वादिरवः। चु, प। भाषणम्। बुक्कति। बुक्कयति। बुबुक्क। बुक्किता। अबुक्कीत्।

बुड्ड् (बुड्ड्)।

बुट्—चु. प, वो। हिंसा।

आबोटन्ति नखैरङ्गं सुखमाबोटयन्ति ये, कवि २२९।

बुड्—तु. प, वो। त्यागसंवरणयोः। बुड़ति। बुबोड़। बुड़िता। अबुड़ीत्।

बुध्—भ्वा, प । १ अवगमः ।

२ विज्ञापनम्, वो । बोधति । बुबोध । बोधिता । बोद्धा, वो । बुधिर्, भ्वा, उ । ज्ञानम् । बोधः । बोधति । ०ते । बोधते ब्रह्मविद्यां यः क्षत्रविद्याञ्च बोधति, कवि ५३ । बोधिता । (इर्) अबुधत् । अबोधीत् । अबोधिष्ट । बुध्, दि, आ । बोधः । ज्ञानम् । चेतनम् । जागरणम् । लट् बुध्यते । पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते । ब्रह्मात्मानञ्च बुध्यते, कवि ५३ । लिट् बुबुधे । बुबुधिषे । अपि लङ्घितमध्वानं बुबुधे न बुधोपमः, र १, ४८ । लुट् बोद्धा । लट् भोत्स्यति । नाभोत्स्यत भवानजम, भ २१, १६ । आशिषि, भुत्सीष्ट, पा १,२, ११ । मोतां भुत्सीध्वम्, भ ७, १०० । लुङ् अबोधि । अबुद्ध, पा ३, १, ६१ । अभुत्साताम् । अभुत्सत । अभुद्धम् । अबोधि दुःखं त्रैलोक्यम्, भ ६, ३२ । अभूच्छौत् शनैरबोधि सः, भ १५, ५७ । कर्मणि, बुध्यते । अबोधि । सन् बुभुत्सते । यङ् बोबुध्यते । बोबोद्धि । णिच् बोधयति । अबूबुधत्, अबूबुधत् कस्मान्माम्, भ १५, ५ । (विकासः) सविता बोधयति पङ्कजान्येव, शक्रु ५, १५६ । बोद्धा । बुद्धः । बुद्धिः । बोधनम् । बोधः । बोद्धा । बोद्धव्यम् । बुधः । क्विप् भुत् । अनु—स्मरणम् । आर्य्ये सम्यगनुबोधितोऽस्मि, शक्रु १, १८ । अव—अवबोधः । ज्ञानम् । उद्—उद्बोधः । विकासः । जागरणम् । स्मरणम् । नि—ज्ञानम् । श्रवणम् । निबोध यज्ञाङ्गभुजामभीप्सितम्, ३, १४ । निबोध वचः मम, भारत । प्र—जागरणम् । विकासः । ज्ञानम् । तं वैतालिकाः प्रबोधयन्नुषसि वाग्भिः, र ५, ६५ । प्रबोधितः शासनहारिणा हरेः, र ३, ६८ । प्रबोधयत्यूर्द्ध्वमुखैर्मयूखैः, कु १,१६ । प्रति, वि—जागरणम् । सुप्ता मयैव भवती प्रतिबोधनीया, रत्ना ३,४७ । सम्—ज्ञानम् ।

बुन्द्—(बुद्, बुन्ध्, चुन्द्)

उबुन्दिर्, भ्वा, उ । निशामनम् । श्रवणम् । प्रणिधानम् । बुन्दति । ०ते । बुबुन्द । ०न्दे । इति बुबुन्द सः, भ १४, ७२ । बुन्दिता । अबुदत् । अबुन्दीत् । बोदति । ०ते । बुन्धति । ०ते । बोधति । ०ते, वो । चुन्दति । ०ते । बुन्ध्, चु, प, वो । बन्धनम् । बुन्धयति ।

बुस्—दि, प । त्यागः । अबुसत् ।

बुल्—चु, प वो । ज्ञानम् ।

बुस्त्—(प्रुस्त्) चु, प ।

आदरानादरयोः ।

बृह् (ब्रह्) बृंह् (बृंह्) ।

ब—क्र्या, प । १वरणम् ।

प्रार्थनम् । २भरणम् । बॄञ् क्र्या, उ । वरणम् । प्रार्थनम् । बृणाति । बृणीते, पा ७,३,८०। बबार । बबरे । बरिता, बरीता । बूर्य्यात् । बरिषीष्ट, बूर्षीष्ट । अबारीत् । अबारिष्टाम् । अबरिष्ट, अबूर्ष्ट । कर्मणि, बूर्य्यते । अबारि । सन् बिबरिषति । ०ते । बिबरीषति । ०ते । बबूर्षति । ०ते । यङ् बोबूर्य्यते । बाबर्त्ति । णिच् बारयति । अबीबरत् । क्त बूर्णः । बूर्णिः ।

बेह् (बेह) ब्युष् (ब्युष्) ब्युस् (ब्युस्) ।

ब्रण—भ्वा, प, वो। शब्दः। ब्रणति।

ब्रू—ब्रज्, अदा, उ। कथनम्।

लट् ब्रवीति, आह। ब्रूतः, आहतुः। ब्रुवन्ति, आहुः। ब्रवीषि, आत्थ। ब्रूथः, आहथुः, पा ८, २, ३५। ब्रूथ। ब्रूते। ब्रुवते। लिङ् ब्रूयात्। ब्रवीत। लङ् अब्रवीत्। अब्रूत। लिड़ादौ वचादेशः, पा २, ४, ५३। वच्धातुवत् रूपम्। उवाच। ऊचे। अवोचत्। ०त। इत्यादि।

(भ)

भञ्ज्, (भ्रञ्ज्) भ्वा, उ। भञ्ज्, चु, प।

भञ्जणम्। भञ्जति। ०ते। बभञ्ज। ०ञ्जे। भञ्जिता। भञ्जिष्यति। ०ते। अभञ्जीत्। अभञ्जिष्ट। भञ्जयति। कथमेतन्मांसं सुललितं भञ्जयामि, हितो। भञ्जयन्त्यस्थि भञ्जन्ते मांसं भञ्जन्ति शोणितम्, कवि १०२। भञ्जयामास। भञ्जयति। भञ्जयिष्यति। अबभञ्जत्। भञ्जयित्वा। ०भञ्ज्य। भञ्जितः। भञ्जणम्। भञ्जयितव्यम्।

भज्—भ्वा, उ। भक्तिः। सेवा।

अनुरागः। आश्रयः। प्राप्तिः। विभागः। लट् भजति। ०ते। हरिम्भज। अभितप्तमयोऽपि मार्दवं भजते, र ८, ४४। भ्रातरं समं भजेरन् पैतृकं रिक्थम्, मनु ८, १०४। लिट् बभाज। भेजतुः। भेजिथ, बभक्थ। भेजिव। भेजे। वनानि भेजतू राघवौ, भ ६, ७२। भेजुः ककुभो दश, ६, १२३। पुनरेव दोर्ग्भ्यां भेजे, र २, २३। लुट् भक्ता। लट् भक्ष्यति। ०ते। आशिषि, भज्यात्। भक्षीष्ट। लुङ् अभाक्षीत्। अभाक्ताम्। अभाक्षुः। अभक्त। अभक्षाताम्। अभक्षत। कर्म्मणि, भज्यते। अभाजि। सन् बिभक्षति। ०ते। यङ् बाभज्यते। बाभक्ति। णिच् भाजयति। अबीभजत्। दिशोऽरीनभाजयत्, भ १७, ८०। भज, चु, प। दानम। भाजयति। भक्ता। ०भज्य। भक्तः। भक्तिः। भजनम्। भागः। भागी। भाजकः। भजनीयम्। भक्तव्यम्। वि—विभागः। अहोरात्रे विभजते सूर्य्यः, मनु १, ६५। बिभजन् दायं पित्र्याम्, मनु ८, १६४।

भञ्ज्—भन्जो, रु, प। आमर्दनम्।

भङ्क्तः। लट् भनक्ति। भङ्क्तः। भञ्जन्ति। भनक्ति कामिनीनाञ्च दृष्ट्या मानमनङ्गवत्, कवि १३३। भनक्त्युपवनं कपिः, भ ८, २। भनज्मि सर्वमर्य्यादाः, भ ६, ३८। हि भङ्ग्धि। लिट् भञ्जयात्। लङ् अभनक्। स कन्याशुल्कं धनुरभनक्, भ ५, ३६। लिट् बभञ्ज। बभञ्जतुः। बभञ्जिथ, बभङ्क्थ। बभञ्जुर्बलयानि, भ ३, २२। लुट् भङ्क्ता। लट् भङ्क्ष्यति। आशिषि, भज्यात्। लुङ् अभाङ्क्षीत्। अभाङ्क्ताम्। अभाङ्क्षुः। परिघमभाङ्क्षीत्, भ १५, १२१। अस्य मा भाङ्क्त प्रतिज्ञाम्, भारत। कर्म्मणि, भज्यते। अभाजि। अभञ्जि, पा ६, ४, ३२। धनुरभाजि त्वया, र ११, ७६। सन् बिभङ्क्षति। यङ् बम्भज्यते। बम्भङ्क्ति। णिच् भञ्जयति। अबभञ्जत्। भजि, चु, प। दौर्म्भिः। भञ्जयति। दोर्भ्यां यो द्विषतां दर्पं भञ्जयत्याञ्जनेयवत्, कवि १३२। भङ्क्ता, भक्ता, पा ६, ४, ३२। ०भज्य। भग्नः। भञ्जनम्। भङ्गः। भङ्गुरम्।

भट—भ्वा, प। भृतिः। भरणम्। भटति। बभाट। बभटतुः। भटिता। भाटयति। भटयति। परिभाषणे घटादिः।

भण—(भण्) भ्वा, प। शब्दः।

कथनम्। भणति। बभाण। बभणतुः। क्वीणा च क्वुटा च बभाण भैमी, णे ३, ६९। भणिता। अभणीत्, अभाणीत्। अभार्णीद् युक्तम, भ १५, १५। कर्मणि, भण्यते। अभाणि। बिभणिषति। बभण्यते। बभणिष्ट। भाणयति। अबीभणत्, अवभाणत्। भणितः। भणितिः। भाणः।

भण्ड्—भड़ि, भ्वा, आ। १परिहासः।

२ सनिन्दोपालम्भनम्। निन्दायुक्तभर्त्सनम्। भड़ि, चु. प। १ कल्याणम्। २ प्रतारणम्, वो। भण्डते। भण्डयति। भण्डति। भण्डः। भाण्डम्।

भन्द्—भदि, भ्वा, आ। १ कल्याणम्।

२ सुखम्। ३ प्रोणनम, वो। भदि, चु. प, वो। कल्याणम। भन्दते। भन्दयति। भन्दति।

भर्त्स्—(तर्ज्) चु. आ। भर्त्सनम्।

भर्त्सयते। °ति, वो। न भर्त्सयति कर्मस्थान् न च भर्त्सयते परान्, कवि २४९।

भर्भ्—भर्ब्—भ्वा, प। हिंसा।

भल—भल्ल् भ्वा, आ। १ कथनम्।

२ हिंसा। ३ दानम्। ४ निरूपणम्, वो। भल्, चु. आ। आभण्डनम्। निरूपणम्। भलते। बभले। भल्लते। बभल्ले। भालयते। भालूकः। भल्लूकः।

भष्—भ्वा, प। १ भक्षणम्। श्वादिरवः, दुर्गा। २ खलोक्तिः, वो। ३भर्त्सनमिति प्राचः। भषति श्वा। भषत्यन्यदोषं खलः। भषति श्वा पान्थम्, दुर्गा।

भा—अदा, प। दीप्तिः। शोभा।

भाति। अभात्। अभान्। अभुः। बभौ। बभतुः। बभिथ, बभाथ। बभिव। भाता। भास्यति। भायात्। अभासीत। अभासिष्टाम्। अभासिषुः। बिभासति। बाभायते। बाभेति। भापयति। अबीभपत्। भातः। भातिः। भानम्। व्यति—व्यतिभावः। परस्परशोभाः। लोकयुगं दृशौ रमणीगुणा अपि व्यतिभाते, नै २, २२। आ—आभा। ताः स्त्रियो दक्षसुता इवाबभुः, र ३, ३३। प्र—प्रभा। क्ता, प्रभातम्। प्रभाता शर्वरी, रामा। प्रति—प्रतिभा। प्रतिभानम्। धर्मस्त्रिवर्गसारः प्रतिभाति, कु ५, ३८। विचारमूढः प्रतिभासि मे त्वम्, र २, ४७।

भाज—अदन्तः। चु, प। पृथक्करणम्।

भाम्—भ्वा, आ। क्रोधः। भाम—अदन्तः। चु, प। क्रोधः। भामते। बाभाम्यते बभाम्यते इति न्यासकारः।

भाष्—भ्वा, आ। कथनम्।

भाषते। बभाषे। तं वाक्यमिदं बभाषे। भाषिता। भाषिष्यते। भाषिषीष्ट। अभाषिष्ट। अभाषिषाताम्। अभाषिषत। कर्मणि, भाष्यते। अभाषि। तपोधनैरित्यमभाषिषातां तौ, भ २, २७। बिभाषिषते। बाभाष्यते। बाभाष्टि। भाषयति। अबीभषत्। अजभाषत्, पा ७, ४, २। भाषित्वा।

°भाष्य। भाषितः। भाषणम्। भाषा। भाष्यम्। अप—निन्दा। यो महतोऽपभाषते, कु ५, ४३। अभि—सम्भाषणम्। नोदक्यया अभिभाषेत, मनु ४, ५७। आ—आभाषणम्। आलापः। कथनम्। परि—परिभाषा। सङ्केतः। परिभाषणम्। यः सनिन्द उपालम्भस्तत्र स्यात् परिभाषणमित्यमरः। प्रति—प्रत्युक्तिः। वि—विभाषा। विकल्पः। सम्—सम्भाषणम्। तान् दृष्ट्वा व सम्भाषसे, भ्रमराष्टकम् ३।

भास्—भास्व, भ्वा, आ। दीप्तिः।

भासते। बभासे, बभासे रणे शरैः, भ १४, ८३। भासिता। अभासिष्ट। भासयति। अबीभसत्, अबभासत्, पा ७, ४, ३। अवभसन् खकाः शक्तीः, भ १५, ४२। भाः। भासः। भास्वरः। भासुरः।

भिक्ष्—भ्वा, आ। १ भिक्षा।

याच्ञा। २ लाभः। ३ लोभोक्तिः। ४ क्लेशः, दुर्गा। भिक्षते। गुरोः कुले न भिक्षेत, मनु, २, १८४। भिक्षमाणो वनं प्रियाम्, भ ६, ८। भिक्षितः। भिक्षा। भिक्षुः।

भिद्—भिदिर्, रु, उ। भेदः।

विदारणम्। भङ्गः। विच्छेदः। त्यागः। लट् भिनत्ति। भिन्तः। भिन्दन्ति। भिन्ते। भिन्दाते। भिन्दते। भिनद्मि कुलपर्वतान्, भ ६, ३५। सुभग त्वत्कथारम्भे भिनत्त्यङ्गानि साङ्गना, दर्पणः। दूत एव हि सन्धत्ते भिनत्त्येव च संहतान्, मनु ७, ६६। हि भिन्धि। लिङ् भिन्द्यात्। भिन्दीत। लङ् अभिनत्। अभिन्ताम्। अभिन्दन्। अभिनः। अभिनत्। अभिन्त। समयमभिनत्, र ४५, ८४। लिट् बिभेद। बिभेदिथ। बिभिदिव। बिभिदे, न कारणात् स्याद् बिभिदे कुमारः, र ५, ३७। लुट् भेत्ता। ल्रट् भेत्स्यति। °ते। भेत्स्यत्यजः कुम्भमयोमुखेन, र ५, ५५। आशिषि, भिद्यात्। भित्सीष्ट। लुङ् (इर्) अभिनत्, अभैत्सीत्। अभिदताम्, अभैत्ताम्। अभिदन्, अभैत्सुः। अभित्त। अभित्साताम्। अभित्सत। अभैत्सीत्तं शरैः, भ १५, ११७। कर्मणि, भिद्यते। अभेदि। भिद्यते हृदयग्रन्थिः, भागवतम्। शुष्ककाष्ठञ्च मूर्खञ्च भिद्यते न तु नम्यते। सन् बिभित्सति। °ते। यङ् बेभिद्यते। बेभेत्ति। णिच् भेदयति। अबीभिदत्। कुशलैर्विप्रैः कुन्तीपुत्रान् भेदयामः, भारतः। भित्त्वा। °भिद्य। भिद्यः। भित्तिः। भेदनम्। भेदः। भिदा। भेत्तम्। भेत्ता। भिदुरः। भेद्यः। भिद्यो नदः। भेत्तव्यः। उद्—ऊर्ध्वभेदः। प्रकाशः। उद्भिन्नया रत्नशलाकया, कु १, २४। यावद्वोद्भिद्यते स्तनौ, स्मृतिः। निर्—भेदः। प्रकाशः। आयूंषि त्वत्तु निर्भिद्य, भ ६, ६७। रहस्यं निर्भिन्नम्। प्र—प्रभेदः। प्रति—भर्त्सनम्। निराकरणम्। प्रत्यभैत्सुरवदन्त्य एव तमश्रुबिन्दुभिः, र १८, २२। प्रतिपाद्य क्रान्तम्, मा ६, ५८। सम्—मिश्रणम्। संश्लेषः। कदम्बसम्भिन्नः पवनः, भ ७, ५।

भिन्द्—भिदि (बिदि) भ्वा, प। अवयवः।

भिल्—(बिल्) चु, प। भेदनम्।

भी—जिभी, ह्वा, प। भयम्।

लट् बिभेति। बिभीतः। बिभितः,

पा ६, ४, ११५। बिभ्यति। न बिभेति नरेन्द्रेभ्यः, कवि १२१। लिङ् बिभीयात्, बिभियात्। लङ् अबिभेत्। अबिभीताम्, अबिभिताम्। अबिभयुः। बिभेतु स्त्रीभ्योऽपि, कु ३, ८। दैवाद् बिभीहि, भ २०, २७। लिट् बिभाय। बिभयाञ्चकार, पा ३, १, ३८। आमभावपक्षे बिभ्यतुः। बिभयिथ, बिभेथ। न बिभाय न जिह्राय, भ ५, १२। प्रबिभयाञ्चकार काकुत्स्थात्, भ ६, २। लुट् भेता। लृट् भेष्यति। लुङ् अभैषीत्। अभैष्टाम्। अभैषुः। मा भैषीः। मा भैः, इति पद्मनाभः। मा स्म भैषीः, भ ५, ५८। सन् बिभीषति। यङ् बेभीयते। बेभयीति, बेभेति। णिच् भाययति। शरैर्भीरुमभाययत्, भ ५, ५१। प्रयोजकाट् भये तु, भाषयते, भीषयते, पा ७, ३, ४०। १, ३, ६८। शत्रून् भीषयमाणः, भ ५, ५८। भीत्वा। भीतः। भीतिः। भयम। भेतव्यम्। भीरुः। भीलुकः। भीमः। भीष्मः। भीषणः। भयानकः। भी, क्रया, प, वो। १ भयम्। २ भरणम्। भीनाति, भिनाति। भी, चु, प। भयम्। भाययति, भयति। इभी भये इत्यत्र इभीति धातुद्वयमिति रमानाथः।

भुज्—भुजो, तु, प। वक्रीकरणम्।

भुज्, रु, प (आ, अपालने, पा १, ३, ६६)। १ पालनम्। रक्षणम्। २ अभ्यवहारः। भोजनम्। उपभोगः। अनुभवः। लट् भुजति। भुनक्ति। भुङ्क्तः। भुञ्जन्ति। भुङ्क्ते। भुञ्जाते। भुञ्जते। यो भुङ्क्ते भुवनं धर्मेण यस्य धौर्न भुजत्यलम्, कवि २५८। भुनक्ति पृथिवीं राजा। दुष्टो जनो दुःखशतानि भुङ्क्ते, दुर्गा। अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्, मनु ३, ११८। रामां भुनक्ति बुभुजे न च भोक्ष्यतीशः, महाना २, ४८। लोट् भुनक्तु। भुङ्ग्धि। भुनजानि। भुङ्क्ष्व। लिङ् भुञ्जात्। भुञ्जीत। लङ् अभुनक्। अभुङ्क्ताम्। अभुञ्जन्। अभुनजम्। अभुङ्क्त। अभुञ्जाताम्। अभुञ्जत। राज्यमभुनक्, र १२, १८। लिट् बुभोज। बुभोजिथ। बुभुजे। बुभुजे मेदिनीं बधूमिव, र ८, ७। लुट् भोक्ता। लृट् भोक्ष्यति। ०ते। आशिषि, भुज्यात्। भुक्षीष्ट। लुङ् अभौक्षीत्। अभौक्ताम्। अभौक्षुः। अभुक्त। अभुक्षाताम्। अभुक्षत। कर्मणि, भुज्यते। अभोजि। सन् बुभुक्षति। ०ते। यङ् बोभुज्यते। बोभोक्ति। णिच् भोजयति। ०ते, पा १, ३, ८७। अबूभुक्षत्। ०त। भुक्त्वा। ०भुज्य। (भो) भुग्नः, पा ८, २, ४५। भुक्तः। भुक्तिः। भोजनम्। भोगः। भोक्तुम्। भोक्ता। भोग्या पृथिवी। भोज्यमन्नम्। आ—आभोगः। परिपूर्णता। उप—उपभोगः। पर्य उपभुज्यते, र १, ६८। परि, सम्—सम्भोगः।

भुरुड्—भुड़ि, भ्वा, आ। तोड़नम्।

दारणम्। भेदः। भुरुडते। बुभुरुडे। भुरुडा इति प्रदीपकारः।

भू—भ्वा, प। १ सत्ता। विद्यमानता।

२ उत्पत्तिः। सम्पन्नता। भावः। भू, भ्वा, उ, वो। प्राप्तिः। (प्राप्तिसम्पन्नजन्मस्थिति भट्टमल्लः)। लट् भवति। ०ते। भवते दुरितक्षयं यथोक्तैः क्रतुभिर्भावयते च नाकलोकम्। भवति त्रिदशेश्च पूजितो यजनवद् भावयति

हिषय सर्वान् ॥ कवि ५०। यागात् सर्गो भवति, को २२। लोट् भवतु। ०ताम्। लिङ् भवेत्। भवेत। लङ् अभवत्। ०त। गर्भोऽभवद् मधुरराजपत्न्याः, कु १, १८। लिट् बभूव। बभूवतुः। बभूविथ। बभूविव। बभूवे, पा ६, ४, ८८। ७, ४, ७२। लुट् भविता। लृट् भविष्यति। ०ते। शक्तिं यस्मिन् क्षेप्स्यसि स न भविष्यति, भारत। आशिषि, भूयात्। भविषीष्ट। लुङ् अभूत्। अभूताम् पा २, ४, ७७। ७, ३, ८८। अभूवन्। अभूवम्। अभूनृपः, भ १, १। केकयीतो भरतोऽभूत्, भ १, १४। ब्राह्मणानां चरणक्षालने कृष्णोऽभूत्, भारत। भावकर्मणोः, भूयते। बभूवे। भाविता, भविता। भाविष्यते, भविष्यते। भाविषीष्ट, भविषीष्ट। अभावि। अभाविषाताम्। सन् बुभूषति। ०ते, पा १, २, ८। यङ् बोभूयते, पा ३, १, २२। बोभवीति, बोभोति। णिच् भावयति। अबीभवत्, पा ७, ४, ८०। बिभावयिषति। भू, चु, प। १ चिन्ता। २मिश्रणम्। ३ शुद्धिः। भावयति। भू, चु, आ। प्राप्तिः। भावयते। भवते। भवतीत्येके। भूत्वा। ०भूय। भूतः। भूतिः। भवनम्। भवः। भावः। भवितुम्। भविता। आद्यभविष्णुः। भूष्णुः। प्रभावुकः। आद्यभावुकः। परिभवो। भव्यम्। ब्रह्मभूयम्। भवनीयम्। भवितव्यम्। भूः। अधिभूः। प्रतिभूः। स्वयम्भूः। विभुः। प्रभुः। शम्भुः। भुवनम्। अन्तर्—अन्तर्भावः। कर्मयोगे सर्वाण्यन्तर्भवन्ति, मनुः १२, ८७। आविस्—आविर्भावः। तिरस्—तिरोभावः। तूष्णीम्—तुष्णीम्भावः। न्यक्—न्यग्भावः। पुनर्—पुनर्भावः। प्रादुर्—प्रादुर्भावः। अधि—ऐश्वर्यम्। अनु अनुभावः। न त्वं तेनान्वभाविष्टा नान्वभावि त्वयाऽप्यसौ। अनुभूतो मया चासौ तेन चान्वभविष्यहम्, भ ५, ३५। अभि—अभिभवः। जयः। न्यूनीकरणम्। शत्रुभिर्नाभिभूयते, मनु ७, १७८। अभिभवति सर्वभूतानि तेजसा (अतिशेते), मनु ७, ५। कुलमधर्मोऽभिभविष्यति (प्राप्नोति), गौ १, ४०। अभ्यभूच्चिलयं भ्रातुः, भ ६, ११७। उद्—उद्भवः। णिच्—कल्पना। मायां मयोद्भाव्य परोचितोऽसि, र २, ६२। परा—पराभवः। न्यूनीभावः। न्यूनीकरणम्। परि—अनादरः। मा मां महान्त परिभूः, भ १, २२। प्र—उत्पत्तिः। ऐश्वर्यम्। हिमवतो गङ्गा प्रभवति, पा १, ४, ३१। प्रभवाणि, पा ७, ४, १६। प्रभवति नहि दोषो भूरिभावे गुणानाम्, ज्योतिषम्। प्रति—प्रतिरूपत्वम्। प्रतिभूत्वम्। वि—ऐश्वर्यम्। णिच्—चिन्ता। सम्—सम्भवः। घटनम्। उत्पत्तिः। मिलनम्। भाग्येनैतत् सम्भवति, हितो। सम्भूयाम्भोधिमभ्येति महानद्या नगापगा, मा २, १००। णिच् सम्भावनम्। अभिनन्दनम्। अवबोधः। चिन्ता। मानः। सत्कारः। समाश्वासनम्। बन्धुं न सम्भावित एव कश्यपाग्रः (चिन्तितः), र ६, ७। धारां शितां रामपरश्वधस्य सम्भावयत्युत्पलपत्रसाराम् (मन्यते), र ६, ४२। सम्भाव्य चिरप्रमूढौ तातौ, वीर ६२। विशेन ज्ञायां सम्भावयामास, कु ३, १७।

भूष्—भ्वा, (तसि) चु, प।

भूषणम्। भूषति। भूषयति। भूष-

याङ्गम्, भ २०, १५। बुभूष। बुभूषते कन्या स्वयमेव। भूषा। भूषणम्।

भृ—भृञ्, भ्वा, उ। भरणम्। धारणम्। ग्रहणम्। प्राप्तिः। पूरणम्। २ पोषणम्, वो। प्रतिपालनम्। ङ्भृङ् ङ्ा, उ। १ धारणम्। २ पोषणम्। ३ दानम्। लट् भरति। ०ते। भरति कुम्भमद्भिर्जनः, दुर्गा। यो भुजाभ्यां भुवो भारं भरते भरतोपमः। बिभर्त्ति च यशोराशिं भूयांसं यस्य भूरपि॥ कवि १२७। दरिद्रान् भर कौन्तेय, हितो। बिभर्त्ति। बिभृतः। बिभ्रति। बिभृते। बिभ्राते। बिभ्रते। हि, बिभृहि। आनिए्, बिभराणि। लिङ् बिभृयात्। बिभ्रीत। साध्वीं भार्य्यां बिभृयात्, मनु ९, ९५। लङ् अबिभः। अबिभृताम्। अबिभरुः। अबिभृत। सन्त्रासमबिभः, भ १७, १८। अबिभरुः प्रान्त्ये वारि मूर्द्धभिः, भ १७, ५३। लिट् बिभराञ्चकार। बभार। बभृव, पा ७, २, १३। बिभराञ्चक्रे। बभ्रे, बभृषे। धुरं धरित्र्या बिभराम्बभूव, र, १८, ४५। बलित्रयं बभार बाला, कु १, ३८। लुट् भर्त्ता। ल्रट् भरिष्यति। ०ते। आशिषि, भ्रियात्। भृषीष्ट। लुङ् अभार्षीत्, अभार्ष्टाम्। अभार्षुः। अभृत। अभृषाताम्। अभृषत। अभृढ्वम्। अभार्षीद् ध्वनिना लोकान्, भ १५, २४। कर्म्मणि, भ्रियते। अभारि। सन् भ्वा, बुभूषति। ०ते। बिभरिषति। ०ते, पा ७, २, ४९। ङ्ा, बुभूर्षति। ०ते। यङ् बेभ्रीयते। बर्भर्त्ति। णिच् भारयति। अबीभरत्। भृत्वा। ०भृत्य। भृतः। भृतिः। भर्त्ता। भृत्यः। भार्य्या। भृत्या। भरणम्। भरः। भारः। भृत्। (डु) भृञिमम् (ट वो) भरथुः। अभृत्रिमपरिवारो, भ ४, ३७। सम्—सङ्कल्पः। सञ्चयः। वृद्धिः। परिपूरणम्। परिपोषणम्।

भृच्—(भ्रच्) भ्वा. उ। भर्त्सनम्।

भृज्—भृजी, (ऋजि) भ्वा, आ। भर्जनम्। पाकविशेषः। भर्जते, तपसा भर्जते पापम्, कवि ९७। बभृजे। भर्जिता। अभर्जिष्ट। (ई) भृष्टम्। भर्जनम्।

भृड् (क्रुड), तु, कु, प। मज्जनम्।

भृश्—भृशु, दि, षु, प। भ्रंशः।

भृंश्—भृशि (अजि) षु, प। दानिः।

भृ—क्रया, प। १ भर्त्सना। २पोषणम। ३ धारणम्। ४ भर्जनम्, वो। भृणाति कर्म्मबीजानि सर्वाणि योगाभ्यासाद् भृणाति यः, कवि ९७। बभार। बभरतुः। भरिता, भरीता।

भेष्—भेषृ, भ्वा उ। भयगत्योः। भेषति। ०ते। देवेष्वोऽपि न भेषते।

भ्यस्—भ्वा, आ। भयम्। भ्यसते।

भ्रक्ष्—म्लक्ष्, भ्वा, उ। भक्षणम्।

भ्रण्—(अण्) भ्वा, प। शब्दः।

भ्रम्—भ्रमु, भ्वा, दि, प। १ चलनम्। पादविहरणम्। अनवस्थानम्। भ्रमणम्। पर्य्यटनम्। अस्मिन्नर्थे सकर्मकोऽकर्मकश्च। २भ्रान्तिः। लट् भ्रमति। भ्राम्यति, पा ३, १, ७०। कीर्त्तिर्भ्रमिष्यति यस्योर्व्यां गुणाः स्वर्गे भ्रमन्ति च, कवि २६२। भ्राम्यन्त्यभीताः परितः पुरं नः, भ १२, ७२। न जाने को हेतुर्भ्रमति विपिने भिक्षुक इव, दुर्गा। भ्रमतीव च मे मनः, गो १, ३०। लिट् बभ्राम। बभ्रमतुः। भ्रेमतुः,

पा ६, ४, १२४। क्षीरस्वामी त्वयं सेडिति बभ्राम, कौ ५५। भ्रेमुः शिलोच्चयांस्तुङ्गान्, भ ७, ५५। लुट् भ्रमिता। लृट् भ्रमिष्यति। लुङ् अभ्रमीत्। अभ्रमिष्टाम्। दि, अभ्रमत्। अभ्रमीत्, वो। सन् बिभ्रमिषति। यङ् बम्भ्रम्यते। बम्भ्रन्ति। णिच् भ्रमति। अविभ्रमत्। शक्तिमविभ्रमत्, भ १५, ५३। भ्रमित्वा, भ्रान्त्वा। भ्रान्तः। भ्रान्तिः। भ्रमणम्। भ्रमः। भ्रामः। भ्रमिः। भ्रमी। भ्रमरः। उद्—उपरि भ्रमणम्। परिभ्रमणम्। मारीचोद्भ्रान्तहारीताः, र ४, ४९। वि—विभ्रमः। सम्—सम्भ्रमः। भयम्।

भ्रंश्—भ्रंस्—भ्रन्श, भ्रन्सु (ध्वन्सु) भ्वा, पा। भ्रन्शु, भ्रशु, वो। दि, प। अवभ्रंसनम्। अधःपतनम्। भ्रंशते। भ्रंसते। भ्रश्यति, पा ६, ४, २४। भ्रंशते दुरितं राष्ट्रे प्रजाभ्यो यत्प्रभावतः। भ्रश्यत्यरिपताकिनी, कवि १७६। भ्रश्यन्ति कर्णोत्पलग्रन्थयः, महाना १, ३९। बभ्रंश। ०शे। बभ्रंशेऽसौ धृतेः, भ १४, ९१। संग्रामाद् बभ्रंशुः (पलायिताः), भ १४, १०५। भ्रंशिता। भ्रंशिष्यति। ०ते। भ्वा, अभ्रंशत्। अभ्रंशिष्ट। दि, अभ्रश्यत्। सुग्रीवोऽस्याभ्रशद् हस्तात्, भ १५, ५९। भावे, भ्रश्यते। अभ्रंशि। बिभ्रंशिषति। ०ते। बाभ्रश्यते। बाभ्रंष्टि। भ्रन्सु, बनीभ्रश्यते। बनोभ्रंसीति, पा ७, ४, ८४। भ्वा, बनीभ्रश्यते इति क्वचित्। भ्रंशयति। अबभ्रंशत्। भ्रंशित्वा। भ्रष्टा। भ्रष्टः। भ्रंशनम्। भ्रंशः। परि, प्र—च्युतिः। हानिः।

भ्रस्ज्—तु, उ। पाकः। भर्जनम्। लट् भृज्जति। ०ते, पा ६, १, १६। तेजसारींश्च भृज्जति, कवि ८९। लिट् बभ्रज्ज, बभर्ज, पा ६, ४, १४७। बभ्रज्जिथ, बभ्रष्ठ। बभर्जिथ, बभर्ष्ठ। बभ्रज्जिव, बभर्जिव। बभ्रज्जे, बभर्जे। बभ्रज्ज शोको रावणमग्निवत्, भ १४, ८६। लुट् भ्रष्टा, भर्ष्टा। लृट् भ्रक्ष्यति। ०ते। भर्क्ष्यति। ०ते। आशिषि, भृज्यात्। भ्रक्षीष्ट, भर्क्षीष्ट। लुङ् अभ्राक्षीत्, अभार्क्षीत्। अभ्राष्टाम्, अभार्ष्टाम्। अभ्राक्षुः, अभार्क्षुः। अभ्रष्ट, अभर्ष्ट। सन् बिभ्रक्षति। ०ते। बिभ्रज्जिषति। ०ते। बिभर्जिषति। ०ते, पा ७, २, ४९। यङ् बरीभृज्यते। बाभ्रष्टि, बाभर्ष्टि। णिच् भ्रज्जयति। भर्ज्जयति। अबभ्रज्जत्, अबभर्जत्। देहं बिभ्रच्चुरस्याग्नौ, भ ५, ५७। लोकान् बिभ्रच्चुरिव तेजसा, भ ९, २४। भृष्ट्वा। ०भृज्य। भृष्टः। भृष्टिः। भर्ज्जनम्। भर्जनम्। भ्रष्टुम्, भर्ष्टुम्।

भ्राज्—भ्राजृ (एजृ) टुभ्राजृ, भ्वा, पा। दीप्तिः। शोभा। भ्राजते। बभ्राजे, भ्रेजे, पा ६, ४, १२५। भ्राजिता। भ्राजिष्यते। अभ्राजिष्ट। अभ्राजिषाताम्। अभ्राजिषत। अभ्राजिष्ट क्षयाग्निवत्, भ १५, २४। बिभ्राजिषते। बाभ्राज्यते। बाभ्राष्टि। भ्राजयति। अबिभ्राजत्, अबभ्राजत्, पा ७, ४, २। अबभ्राजच्छक्तिं तस्मिन्, भ १५, ८३। (टु) भ्राजथुः। भ्राजिष्णुः। टुभ्राजृ बिभ्राट्। भ्राजृ बिभ्राक्, कौ ८७, १२५।

भ्राश्—टुभ्राशृ, टुभ्रास्ज्। टुभ्राशृ, टुभ्रास्ज्, भ्वा, आ। दीप्तिः। शोभा। भ्राश्यते, भ्राशते। भ्रास्यते,

भ्रामते । क्लाश्यते, क्लाशते । क्लास्यते । क्लामते, वा ३, १३, ७० । बभ्राशे । भ्रेशे, पा ६, ४, १२५ । उद्भ्राश्यन्ते परं लोके ये भिक्षाव्रतचारिणः । न द ना दुःखिताः केचिद् भ्रश्यन्ति यस्य मण्डले ॥ कवि १६३ ।

भ्री—क्रया, प । १ भयम् । २भरणम् । बिभ्रीणाति 'भ्रीणाति' । बिभ्राय । अभ्रैषीत् ।

भ्रण्—चु, आ । १आशा । २विशङ्का । भ्रेज्—भ्रेज (एजृ) भ्वा, आ । दीप्तिः । भ्रेष—भ्रेषृ, भ्लेषृ, भ्वा, उ । भयगत्योः ।

(म)

'मङ्क' (मस्क्) मच्च् (म्रच्च्) ।

मख्, मङ्ख, मखि (इखि) भ्वा, प । गतिः । मखति, मङ्खति ।

मङ्क्—मकि, भ्वा, आ । भूषणम् । गतिः, वो । ममङ्किरेऽस्राः, भ १४, १० ।

मङ्ग्—मगि (अगि) भ्वा, प । गतिः ।

मङ्घ्—मघि, भ्वा, प । भूषणम् ।

मघि (अघि) भ्वा, आ । १ गतिः । २आक्षेपः । निन्दा । ३ आरम्भः । गत्यारम्भः । ४ जवः । ५ कैतवम् । ६ अक्षक्रीड़ा, दुर्गा । मङ्घति । °ते ।

मच्—भ्वा, आ । १ दम्भः । २ शाठ्यम् । ३ उक्तिः । मचते । "मच्च मुच्च मुच ।"

मज्ज्—टु मस्जो, तु, प । शुद्धिः । स्नानम् । अवगाहनम् । मज्जनम् । मज्जति । ममज्ज । ममज्जतुः । ममज्जिथ, ममङ्क्थ । ममज्जिव । मङ्क्ता, पा ७, १, ६० । मङ्क्ष्यति । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः । भावे मज्ज्यते । अमज्जि । मिमङ्क्षति । मामज्ज्यते । मामङ्क्ति । मज्जयति । अममज्जत् । उद्—उन्मज्जनम् । सरित्तो गज उन्ममज्ज, र ५,४३ । नि—निमज्जनम् । एको हि दोषो गुणसन्निपाते निमज्जति, कु १, ३ । शोके न्यमाङ्क्षीत्, भ १, २० । शाखिनो न्यमाङ्क्षुरम्बुधौ, भ १५, ३१ । मङ्क्ता, मक्ता, पा ६, ४, ३२ । मग्नः । मज्जनम् । (टु) मज्जथुः । मङ्क्तम् । मङ्क्तव्यम् । मज्जनीयम् । साधुभक् । मज्जा । मद्गुः । मद्गुरः ।

मञ्च्—मचि, भ्वा, आ । धारणम् । २ उच्छ्रायः । ३ पूजनम् । ५ दीप्तिः, वो । मञ्चते । निर्—नीराजनम् । तं निर्मञ्चा, नै ७, ४३ । मञ्चः ।

मञ्ज्—मिञ्ज्—मजि, मिजि (कृप) चु, प । दीप्तिः । मञ्जयति । मिञ्जयति । मजि, चु, प । शुद्धिः । मार्जनम्, वो ।

मठ्—भ्वा, प । मदनिवासमर्दनेषु । मठति । मठः । माठः ।

मण्—(अण्) भ्वा, प । शब्दः ।

मण्ठ्—मठि (कठि) भ्वा, आ । शोकः । मण्ठते । ममण्ठे ।

मण्ड्—मड़ि, भ्वा, प । भूषणम् । मड़ि (वड़ि) भ्वा, आ । १विभाजनम् ।

२वेष्टनम्, वो । मडि, चु, प । १ भूषा । २हर्षः । मण्डति । ०ते । मण्डयति । मण्डयन्ति गुणाः सर्वं यो गुणानेव मण्डति, कवि २५० । अममण्डत् । कपिसैन्येरमण्डयत्, भ १०, १३ । मण्डयित्वा । मण्डितः । मण्डनम् । बधं मण्डयितारः, पा ३, २, १३५ । मण्डकः । मण्डनः । मण्डलः । मण्डूकः ।

मथ्—मथे, भ्वा, प । विलोड़नम् । मथति । मनो मथति नारीणां, कवि६२ ।

मद्—मदी, दि, प । १हर्षः ।

२मत्तीभावः, वो । माद्यति, पा ७, ३, ७० । सर्वलोकातिशायिन्या विभूत्या नच माद्यति, कवि २४३ । ममाद । मेदतुः । इतरा तु ममाद, मा १०, २७ । मदिता । मदिष्यति । अमदत् (अमादीत् अमदीत्, वो) । मिमदिषति । मामद्यते । मामत्ति । (हर्षदैन्ययोः) मदयति । अन्यत्र, मादयति (चित्तविकारमुत्पादयति) । अमीमदत् । अमदयत् सहकारलता मनः, र ८, ३८ । मद्, चु, आ । तृप्तियोगः । तृप्तीकरणम् । मादयते, मनो मादयते यस्य योगाभ्यामरसायनम्, कवि २४३ । मदित्वा । (ई) मत्तः, पा ८, २, ५७ । मदनम् । मदः । मदनः । मादकः । मद्यम् । उद्—उन्मादः । चित्तविकारः । प्र—प्रमादः । अनवधानता । धर्मात् प्रमाद्यति, स्वहितात् प्रमाद्यति, भ १८, ८ । प्रमाद्यन्ति प्रमदासु विपश्चितः मनु २, २१३ ।

मन्—भ्वा, प, वो । पूजा । गर्वः ।

मनु, त, आ । ज्ञानम् । अवबोधः । मनति । मनुते, मनुते मनुतुल्योऽसौ प्रजामात्मजवत् प्रभुः । पितृवन्मन्यते तच्च मान्यं जनपदः सदा ॥ कवि १५६ । ममान । मेने । मनिता । मनिष्यति । ०ते । अमनीत्, अमानीत् । अमनत । अमनिष्ट । अमथाः । अमनिष्टाः, प्रा २, ४, ७६ । मन्, दि, आ । ज्ञानम् । अवबोधनम् । सम्भावनम् । मन्यते । आत्मानं मन्यते बलिनं बली, भ ५, २५ । को बहु मन्येत राघवम् (श्लाघेत), भ ५, ८४ । न त्वा तृणाय मन्ये, पा २, ३, १७ । मन्ये स विज्ञः, नै ३, ३२ । मेने । मन्ता । मंस्यते । मंसीष्ट । अमंस्त । अमंसाताम् । अमंसत । अमंस्त स्थितिमन्तरमन्वयम्, र २, २७ । मिमंसते । मन्मन्यते । मन्मन्ति । मानयति । अमीमनत् । मन्, चु, आ । १स्तम्भः । २गर्वः । मानयते । मन, अदन्तः । चु, प, वो । धारणम् । मनयति । मत्वा । ०मत्य । ०मन्य इत्येके । मतः । मतिः । मननम् । मानः । मन्तुम् । मन्ता । मन्तव्यः । दर्शनीयमानो भार्यायाः । शूरमानो । शूरम्मन्यः । अनु—अनुमतिः । देवराय प्रदातव्या यदि कन्यानुमन्यते, मनु ८, ८७ । राजन्यान् स्वपुरनिवृत्तयेऽनुमेने, र ४, ८७ । अभि—अभिमानः । सम्मतिः । अव—अवमानः । अवज्ञा अवामंस्त स तान् दर्पात्, भ १५, ६६ । चतुर्दिगीशानवमन्य मानिनो, कु ५, ५३ । मम्—सम्मतिः । पूजा । काले संमन्यसेऽतिथिम्, भ ६, ६५ । सममंस्त बन्धून्, भ १, २ ।

मन्व्—मत्रि, चु, आ । मन्त्रणा ।

गुप्तपरिभाषणम् । मन्त्रयते, श्रुतस्य यां मन्त्रयते, नै ३, १०७ । अममन्त्रत । अनु, अभि—अभिमन्त्रणम् । मन्त्रकर

चक्रसंस्करणम्। उपाक्रतः पशुरसौ योऽभिमन्त्रा व्रते हत इत्यमरः। आ—आमन्त्रणम्। कथनम्। प्रस्थानानुमतिप्रार्थनम्। सम्बोधनम्। निमन्त्रणम्। तमामन्त्रा जगाम, भारत। आमन्त्रयत संक्रुद्धः समितिम्, भ ९, ९८। आमन्त्रयेत तान् प्रश्नान्, भ १८, ७। नि—निमन्त्रणम्। तं न्यमन्त्रयत सम्भृतक्रतुः, र ११, ३२।

मन्थ्—भ्वा, क्र्या, प। विलोड़नम्।

मन्थनम्। गाहः। संक्षोभः। मथि, माथि (कुथि) भ्वा, प। १हिंसा। २पीड़नम। मन्थति, मान्थति। मथ्नाति। मथ्नीतः। मथ्नन्ति। दधि मथ्नाति घृतम। मथ्नाति वादिनः शास्त्रे रणे मन्थति वैरिणः, कवि ६२। मां मथ्नातीव मन्मथः, भारत। लिङ् मथ्नीयात्। लङ् अमथ्नात्। तस्याभथ्नाच्चतुरो हयान्, भ १७, ४१। लिट् ममन्थ। ममन्थतुः। रथं ममन्थ सहयम्, भ १४, ३६। लुट् मन्थिता। ल्रट् मन्थिष्यति। मथ्यात्। मथि, मन्थ्यात्। लुङ् अमन्थीत्। अमन्थिष्टाम्। अमन्थीत् परानीकम्, भ १५, ४६। कर्मणि, मथ्यते। मथि, मन्थ्यते। अमन्थि। देवासुरैरमृतमम्बुनिधिर्ममन्थे। सन् मिमन्थिषति। यङ् मामथ्यते। ममन्थि। णिच् मन्थयति। अममन्थत्। मथित्वा। मन्थित्वा। मथितः। मथि, मन्थितः। मन्थनम्॥ मन्थः।

मन्द्—मदि, भ्वा, आ। १ स्तुतिः।

२मोदः। ३मदः। गर्वः। ४स्वप्नः। निद्रा। ५कान्तिः। ६गतिः। जड़ीभावः, वो। मन्दते, मन्दते यो न सुन्दरः, कवि १७६। ममन्दे। मन्दिता। अमन्दिष्ट। मन्दः। मन्दुरा। मन्दिरम्।

मभ्—(अभ्र्) भ्वा, प। गतिः। मम्ब्—(पम्ब्) भ्वा, प। हिंसा। मय्—(अय) भ्वा, आ। गतिः। मर्च्—(गर्ज) चु, प। शब्दः। मर्व्—भ्वा, प, वो। गतिः।

मर्व्—(पर्व) भ्वा, प। पूरणगत्योः।

मल्—मल्ल, भ्वा, आ। धारणम्।

मलते। मल्लते। मलम्। मलिनम्। माला। आमलकी। परिमलः। मल्लिका। मल्लः।

मव्—मव्य्—भ्वा, प। बन्धनम्।

मवति। मव्यति। ममाव। मेतुः शृङ्खलादिभिः, भ ९, ९०। मविता। अमवीत्, अमावीत्। क्षिप् मूः, मुवौ।

मश्—मिश्—भ्वा, प। १ शब्दः। रोषकृतशब्दः। २रोषः, वो। मशति। मेशति। ममाश। मशकः। मिमेश। मेशिता।

मस्क्. मस्क् (कस्कि) भ्वा, आ। गतिः।

मस्—मसी, दि, प। १परिणामः।

२परिमाणम्। मस्यति। ममास। मेसतुः। मसिता। अमसत्, अमासीत्, वो। (ई) मस्तः। मासः। समो, सम्यतीत्येके।

मह्—भ्वा, प। मह, अदन्तः।

चु, प। पूजा। महति। अमहीत्। महयति। नित्यं महति माहेयीं भक्त्या महयति द्विजान्, कवि ३४। महो। महः।

मंह—महि (वहि) भ्वा, आ। वृद्धिः।

(भजि) चु, प। दीप्तिः। मंहते। मंहयति। लक्ष्मीश्च मंहते, कवि ३४।

'मा—अदा, प। दि, आ। मानम्। ङ्ना, आ। १ परिमाणम्। २शब्दः। लट् माति। मायते। मिमीते। मिमाते। मिमते, पा ६, ४, ११२। श्रुत्वा धर्मं मिमीते। यः क्वचित् स्मृत्या च मायते। कवि ७९। यो मिमीते च मीमांसाम्, कवि १८१। लङ् अमात्। अमुः, अमान्। अमिमीत। अमिमाताम्। अमिमत। पुरः सखीनामभिमीत लोचने, कु ५, १५। लिट् ममौ। ममिथ, ममाथ। ममे। तनौ ममुस्तव न वैटभद्विषो मुदः, मा १, २३। लुट् माता। लृट् मास्यति। ०ते। आशिषि, मेयात्। मासीष्ट। लुङ् अमामीत्। अमामिष्टाम्। अमामिषुः। अमास्त। अमासाताम्। अममत। कर्मणि, मीयते। अमायि। अमायिषाताम्। अमासाताम्। मन् मित्सति। ०ते, पा ७, ४, ५४, ५८। यङ् मेमीयते, पा ६, ४, ६६। मामेति। मामाति। णिच् मापयति। अमीमपत्। मित्वा, पा ७, ४, ४०। ०माय। मितः। मितिः। मानम्। अनु—अनुमानम्। मरुतां वेगभङ्गोऽनुमीयते, कु २, २५। उद्—उन्मानम्। तोलनम्। उप—उपमानम्। वाक्यार्थेन बाक्यार्थ उपमीयते, दण्डी २, ३३। निर्—निर्माणम्। निर्माति यः पर्वणि पूर्णमिन्दुम्, नै ३, ३२। सृष्टिस्थितिविलयमजः स्वेच्छया निर्मिमीते, महाना १, १। ताभ्यां दिवं भूमिञ्च निर्ममे, मनु १, १३। परि—परिमाणम्। उदरं परिमाति मुष्टिना, नै २, ३५। भुवनरचनामन्यथा निर्मिमाणे, अनर्घ १३। प्र—प्रमाणम्। निश्चयज्ञानम्। न प्रमिमीतेऽनुभवाद्दृतेऽल्पधीः, मा १६, ४०।

माङ्—माचि, काचि, भ्वा, आ। आकाङ्क्षा।

'मात्'—मात्ट, भ्वा, उ। मानम्।

मान्—भ्वा, आ। १ पूजा।

२मीमांसा। विचारः, वो। पूजायां णिच्। पूजायां तिवादयो न स्युरिति रमानाथः। लट् मीमांसते शास्त्रार्थम्, पा ३, १, ६। यश्च मीमांसते धर्मं मानयत्यर्थिनो द्विजान्। मानति सजनं सर्वं शास्त्रं मानयते परम्॥ कवि ३२। लिट् मीमांसाञ्चक्रे। लुट् मीमांसिता। लुङ् अमीमांसिष्ट। मान् चु, प। पूजा। प्रशंसा। मानयति। मानति। मानिनो मानयेः, भ १९, २४। न मानयसि मामार्ये रुदतीम्, भारत। मानयित्वा। मानितः। माननम्। मानः। माननीयम्। मीमांसितः। मीमांसा।

मार्ग्—चु, प। अन्वेषणम्।

प्रतिसन्धानम्। मार्गयति। मार्गति। यो मार्गयति सन्मार्गं मार्गति क्षेममात्मनः। नृपतेः सुतमम्पदे वरममार्गीत्, भ १,१३। मार्ग्, चु, प, वो। संस्कारः। २ सर्पणम्।

मार्ज्—(गज) चु, प। १ शब्दः। २शुद्धिः। मार्जनम्, वो। मार्जयति।

माह्—माङ्ह, भ्वा, उ। मानम्।

माङ्हति। ०ते। माङ्ह इत्येके। माङ्हिता, माढा।

मि—डुमिञ्, स्वा, उ। प्रक्षेपणम्।

मीञ्, क्रया। हिंसा। वधः। लट् मिनोति। मिनुते। मीनाति। मीनोते। मिनोति मार्गणान् युद्धे मीनाति द्विषतां बलम्। यो मायां मीयते मान्यो

धर्मेण मयतेऽधमम् ॥ कवि ३८। लङ् अमिनोत्। अमिनुत। अमीनात्। अमीनीत। लिट् ममौ, पा ६, १, ५०। मिम्यतु:। ममिथ, ममाथ। मिम्यिव। मिम्ये। लुट् माता। लृट् मास्यति। •ते। आशिषि, मीयात्। मासीष्ट। लुङ् अमामीत्। अमासिष्टाम्। अमासिषु:। अमास्त। अमासाताम्। अमासत। कर्मणि मीयते। अमायि। सन् मित्सति। •ते. पा ७, ४, ५४। यङ् मेमीयते। मेमयीति। मेमेति। णिच् मापयति। अमीमपत्। मित्वा, मीत्वा। •माय। मित:। मिति:। मानम्। मातव्यम्। (डु) मित्रिमम्। अनु—अनुमिति:। उप—उपमिति:। प्र—प्रमिति:। प्रमाणम्। प्रमीणाति, पा ८, ४, १५।

मिक्—तु, प। उत्पीड़ा। मिक्षति।

मिक्ल—मिजि—(कुप) चु, प। दीप्ति:।

मिद्—मेद्, मिथ्, मेथ्, मिध्, मेध्, मिट्, मेट्, मिथ्, मेथृ, मिष्, मेष्, भ्वा, उ। १मेधा। २ हिंसा। मेथृ, मेष्। सङ्गमे; वो। मेदति। •ते। मेथति। •ते। मेधति। •ते। प्रजाये गृहमेधिनाम्, र १, ७। मेद:। मेदक:। मेधा। मेध:।

मिद्—जिमिदा, भ्वा, आ। दि, प। स्नेहनम्। स्निग्धीभाव:। मेदते। मेद्यति, पा ७, ३, ८२। किञ्चित् किल न मेदते। इति व्यायामशीलोऽसौ महाकायो न मेद्यति, कवि १३६। मिमेद।। मिमिदे। मेदिता। मेदिष्यति। •ते। अमिदत्। अमेदिष्ट। दि, अमिदत्। अमेदीत्, वो। मिद्, मिदि, चु, प, वो। स्नेह:। मेदयति। मिन्दयति। मिदित्वा, मेदित्वा। मिन्न:। प्रमिन्न:। प्रमेदित: पा ९, २, १७। प्रमेदिता: सपुत्रास्ते (स्निग्धीभवितुमारब्धा:), भ ८, १७। मेद:।

मिल्—तु, प। संश्लेषणम्।

मिल, तु, उ। सङ्गम:। मिलनम्। मिलति।•ते। मिलति अङ्गमाकुञ्चयन्ती, महाना २. ४४। मिलन्ति प्रत्यहं यस्य वाजिवारणमम्पद:, कवि १४५। मिमेल। मिमिले। मेलिता। मेलिष्यति। मिलिष्यतीति संज्ञिससार:। अयं कुटादिरिति कुलचन्द्र:, दुर्गा। अमेलीत्। अमेलिष्ट। मेलयति। अमीमिलत्। मिलित्वा। मिलित:। मेलनम्। मिलनमिति पद्मनाभ:। व्यालनिलयमिलनेन, गीतगो ४, २।

मिव् (पिव्) मिश्, मश्।

मिश्र—चु, प। अदन्त:। मिश्रकम्। सम्पर्क:। मिश्रयति। मिस्रयति, वो। सुभ्रादिगणे मिश्रपाठ: कर्त्तव्य:।

मिष्—मिषु (जिषु) भ्वा, प। उ, वो।

सेचनम्—मिष्, तु, प। स्पर्द्धा। मेषति। •ते। मिषति। मिमेष। मिमिषे। मेषिता। अमेषीत्। अमेषिष्ट। मिषतामाच्छिनत्ति न: (पश्यताम्), कु २, ४६। उद्—उन्मेष:। नि—निमेष:। उन्मिषन्निमिषन्नपि, गी ५, ८। मत्स्य: सुप्तो न निमिषति, भारत।

मिह्—भ्वा, प। सेचनम्। क्षरणम्।

मेहति। मिमेह। मिमेहिथ। मिमेह रक्तम, भ १४, १००। मेढा। मेक्ष्यति। अमिक्षत्। मिमिक्षति। मेहयति। मीढ:। मेहनम्। मेढ्र:।

मी—मङ्, दि, आ। हिंसा।

मीयते। मिम्ये। मेता। मेष्यते।

अमेष्ट। मिल्लते। ल्ल, मौनः। मौ, चु, प। गतिः। मायय्यति। मय्यति। मेता। न चानुमाययत्यन्यस्तस्य यच्चेतसि स्थितम्, कवि १४३। मौ, क्रया (मि)।

मौम्—(द्रम) भ्वा, प। गतिशब्दयोः।

पशवोऽपि न मौमन्ति यद्देशे दुःखपीड़िताः। कवि १८१।

मौल्—भ्वा, प। निमेषः। सङ्कोचः।

मौलति। मौलन्ति रिपुनारीणां मुखपद्मवनानि च, कवि। मिमौल। तस्या मिमौलतुर्नेत्रे, भ १४, ५१। मौलिता। मौलिष्यति। अमौलीत्। मिमौलिषति। मेमौल्यते। मेमाल्लति। मौलयति। अमिमौलत्, अमौमिलत्, पा ७, ४, ३। मौलित्वा। ०मौल्य। मौलितः। मौलनम्। उद्—उन्मौलनम्। उदयः। उदमालोच्च लोचने, भ १५, १०२। चन्द्रोऽयमुन्मौलति, महाना ४, २२। नि—निमौलनम्। मुद्रणम्। निमिल्य नेत्रे सहसा व्यबुध्यत, कु, १, ५३। निमिमौल नरोत्तमप्रिया (ममार), र ८, ३७। प्र—प्रमौला। तन्द्रा।

मौव्—(पौव्) भ्वा, प। स्थौल्यम्।

मुच्—मुच्लृ, तु, उ। मोचणम्।

त्यागः। वियोगः। क्षेपणम्। वर्षणम्। विस्रंसनम्। बन्धनरहितीभावः, दुर्गा। लट् मुञ्चति, ०ते। मागरिकाया हस्तं मुञ्चति, रत्ना २, २०.१। लिट् मुमोच। मुमुचतुः। मुमोचिथ। भुमुचे। धेनुमृषेर्मुमोच, र २। मुमुचुः खधूपान्, भ ३, ५। (परिधानं) उष्णीषं मुमुचे, भ १४, ८५। लुट् मोक्ता। लृट् मोक्ष्यति। ०ते। मोक्ष्यते मरुद्भीनां वेणीः, कु २, ६१। आशिषि, मुच्यात्। मुक्षीष्ट। लुङ् अमुक्त्। अमुक्त। अमुक्षाताम्। अमुक्षत। अक्तं तस्यामुचत्, भ १५, ५३। कर्मणि, मुच्यते। अमोचि। मुच्यन्तामभीषवः, शक्रु १, २८। कर्मकर्त्तरि, महापातकिनस्तपसैव मुच्यन्ते किल्बिषात्ततः, मनु ११, २४०। तस्माद्मुच्ये, र १, ७३। मन मुमुक्षति। ०ते। मोक्षते। मुमुक्षति वत्सं क्षणः। मोक्षते मुमुक्षते वा वत्सः स्वयमेव, पा ७, ४, ५७। यङ् मोमुच्यते। मोमोक्ति। णिच् मोचयति। अमूमुचत्। मुच, चु, प। प्रमोचनम्। सर्वायसं करिणि मुञ्चति कङ्कपत्रं यश्च प्रमोचयति पापचयञ्च काये, कवि ४८। मुक्ता। ०मुच्य। मुक्तः। मुक्तिः। मोचनम्। मोक्ता। मुक्। अव—उन्मोचनम्। आ—परिधानम्। आमुञ्चद् वर्म, भ १७, ६। आमुञ्चतीवाभरणम्, र १३, २१। उद्—उन्मोचनम्। विभूषणान्युन्मुमुचुः, भ ३, २२। निर्—उत्कर्त्तनम्। मुक्तिः। चर्मनिर्मोचनेऽपि वा, स्मृतिः। सेयं रामभद्रतेजसा एनसो निरमुच्यत, वीर ८। प्र—मुक्तिः। पापात् प्रमुच्यते, मनु ११, २३०। प्रति—परिधानम्। प्रत्यर्पणम्। तुरङ्गं प्रतिमोक्तुमर्हसि, र ३, ४७। वि—विमुक्तिः। त्यागः। पुण्या वाचो विमुञ्चथ। नादान् विमुञ्चति, भारत।

मुच्—मुञ्च् (मच्) मुक्ष (युक्ष)।

मुज्—मुज्ज्, मुजि (गुज) भ्वा, प।

चु, प, वो। १ शब्दः। २ मार्जनम्। वो। मोजति। मुञ्जति। मोजयति। मुञ्जयति।

मुट्—भ्वा, प। मर्दनम्।

मुट्, तु, प। १आक्षेपः। २प्रमर्दनम्।

मोटति। मुटति। मुटति हिषतां दर्पं तेषां खड्गञ्च मोटति। यो मोटयति राष्ट्रेषु तत्कीर्त्याऽमरमण्डयान्॥ कवि १०४। मुमोट। मोटिता। अमोटीत्। तु, मुटिता। अमुटीत्। मोटयति। मोटति, वो। स मे संसाररिपुं परि मोटयतु, छन्दो। मुटि, मुण्टति, वो। मुड्, मोडति इति कश्चित्।

मुण्—तु, प। प्रतिज्ञा। मोणिता।

मुण्ड्—मुटि, भ्वा, आ।

पालनापसृत्योः। मुण्डते।

मुण्ड्—मुडि, भ्वा, प। खण्डनम्। केशमुण्डनम्। मुण्ड्, भ्वा, प। मर्दनम्। पीड़नम्। मुड़ि, भ्वा, आ। मार्जनम्। शुद्धिः। मज्जनम्। मुण्डति। °ते। मुण्डितः।मुण्डनम्। मुण्डी। मुण्डः।

मुद्—भ्वा, आ। हर्षः। चित्तोल्लासः। मोदते, अत्यन्तं गन्धमाघ्राय मोदन्ते तत्पुरस्त्रियः, कवि २१७। मुमुदे। स्वभावान् गोपाङ्गनानां मुमुदे विलोक्य, भ २, १५। मोदिता। मोदिष्यते। मोदिष्ये कस्य मौख्यैः, भ १६, २४। अमोदिष्ट। अमोदिषाताम्। मुमोदिषते। मुमुदिषते। मोमुद्यते। मोमोत्ति। मोदयति। अमूमुदत्। मोदयध्वं रघूत्तमम्, भ ७, १०१। मुद्, चु, प। संसर्गः। मिश्रणम्। मोदयति शक्तून् घृतेन। मोदयन्ति यदुद्याने मारुतं पुष्परेणवः, कवि १०७। मोदित्वा, मुदित्वा। °मुद्य। मुदितः। मोदितः, पा १, २, २१। मोदनम्। मोदः। मुद्, मुद्रा। मुदिरः। अनु—अनुमोदनम्। पाकशासनो रामभद्रस्याभिषेकमनुमोदते, वीर ११७। के द्यूतमन्वमोदन्त के चैतत् प्रत्यषेधयन्, भारत। प्र—हर्षः। प्रमुदितवरपक्षम्, र ६, ८६।

मुर्—तु, प। वेष्टनम्। मोरिता।

मुर्च्छ् (मूर्च्छ्) मुर्व् (मूर्व्) मुल् (मूल्)।

मुष्—क्र्या, प। स्तेयम्। चौर्य्यम्। लुण्ठनम्। वञ्चनम्। लट् मुष्णाति। मुष्णीतः। मुष्णन्ति। तस्य मुष्णाति यः शिरः, कवि ११५। दैवं प्रज्ञां मुष्णाति, भारत। विषयबाहुल्यं काल-विप्रकर्षश्च नः स्मृतिं मुष्णाति, वीर ६६। हि, ३ षाण। मुषाण रत्नानि, मा १, ५१। लिङ् मुष्णीयात्। लङ् अमुष्णात्। लिट् मुमोष। मुमुषतुः। लुट् मोषिता। लृट् मोषिष्यति। लुङ् अमोषीत्। सन् मुमुषिषति, पा १, २, ८। यङ् मोमुष्यते। मोमोष्टि। णिच् मोषयति। अमूमुषत्। °मुषित्वा, पा १, २, ८। °मुष्य। मुषितः। मोषणम्। मोषः। मोषिता। मुट्। सैन्यरेणुमुषितार्कदीधितिः, र ११, ५१। मुषित्वा धनदम् (वञ्चित्वा) भ ७, ८७। शीघ्रं न यात यदि तन्मुषिताः। स्थ, रत्ना ४, ४१। परात्मीयविवेकञ्च प्रामुष्णात्, भ १७, ६०।

मुस्—मुष्—दि, प। खण्डनम्। मुस्यति, मुष्यति, वो। मुष्यति दुःखं यः, कवि १२५। अमुसत्। °षत्। राघवस्यामुषत् कान्ताम्, भ १५, १६। मुष् (मष्)।

मुस्त्—च, प। राशीकरणम्।

मुह्—दि, प। वैचित्तम्।

अविवेकः। मोहः। ज्ञानरहितीभावः। मुह्यति। धीरस्तत्र न मुह्यति, गी २, १३। मुमोह। मुमुहतुः। मुमोहिथ,

मुमोग्ध, मुमोढ। स शुश्रुवांस्तद्वचनं मुमोह, भ १, २०। मोहिता, मोग्धा, मोढ़ा। मोहिष्यति, मोक्ष्यति। अमुहत्। मा मुहो मा रुषोऽधुना, भ, १५, १६। मुमोहिषति, मुमुहिषति, मुमुक्षति। मोमुह्यते। मोमोग्धि, मोमोढि। मोहयति। अमूमुहत्। मोहित्वा, मुहित्वा, मुग्ध्वा। मूढ्वा। मुग्धः। मूढ़ः। मोहः। मोहनम्।

मू—मूङ्, भ्वा आ। बन्धनम्।

मूत्र—अदन्तः। चु, प। प्रस्रावः।

मूत्रयति। यङ् मोमूत्र्यते, को १०२।

मूर्च्छ्—मुर्च्छा, भ्वा, प। १मोहः। २उच्छ्रायः। हृद्धिः। व्याप्तिः। मूर्च्छति। ज्योत्स्नाच्छलेन मूर्च्छन्ति यद्गुणाः शशलाञ्छने, कवि २३८। शिलोच्चये मूर्च्छति मारुतस्य न रंहः, र २, ३१। मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्य्यमत्तानाम्, शकु ५, ८५। मुमूर्च्छ। मूर्च्छिता। मूर्च्छिष्यति। अमूर्च्छीत्। तेनामूर्च्छीदसौ क्षतः, भ १५, ५५। मुमूर्च्छिषति। मोमूर्च्छ्यते। मूर्च्छयति। अमुमूर्च्छत् वीणावादनम्। वीणां मूर्च्छयित्वा, भागवतम्। मूर्त्तः। मूर्त्तवान्। मूर्त्त्वा। भावे, मूर्त्तं मूर्च्छितमनेन। आरम्भे, प्रमूर्त्तः। प्रमूर्च्छितः। मूर्च्छित इति तारकादित्वात्। मूर्च्छा। मूः। मुरौ।

मूर्व्—मुर्वी, भ्वा, प। बन्धनम्।

मूल्—भ्वा, प। उ, वो। प्रतिष्ठा।

स्थितिः। मूलति। °ते। मुमूल। °ले। मूलिता। मूल्, मुल्, चु, प। रोपणम्। मूलयति। मोलयति, वो। उद्—उत्पाटनम्। निर्—विनाशनम्। लूनानि नोन्मूलयति प्रभञ्जनः, हितो। उन्मूलितारः कपिकेतनेन, भा ३, १४। उन्मूलयन्तं यः शत्रूनुन्मूलति तमांसि च, कवि २११।

मूष्—मुष्, भ्वा, प। स्तेयम्।

मूषति। मोषति, यो मोषति परद्रव्यम्, कवि ११५। मूषिता। मोषिता। मूषकः। मूषिका।

मृ—मृङ्, तु, आ। प्राणत्यागः।

मरणम्। म्रियते, पा १, ३, ६१। नैकोऽपि म्रियते नरः, कवि १०५। ममार। मम्रतुः। ममर्थ। मम्रिव। मर्त्तासि। मरिष्यति। मृषीष्ट। अमृत। अमृषाताम्। अमृषत। अमृढ्वम्। मुमूर्षति। मेम्रीयते। मर्मर्त्ति। मारयति। अमीमरत्। अनु—अनुमरणम्।

मृक्ष् (म्रक्ष्)।

मृग—अदन्तः। चु, आ। मृग्—दि, प। अन्वेषणम्। मृगयते, मृगयति। यस्मिन् मृगयते नित्यं जनो धनम्, कवि ६०। रामो मृगं मृगयते वनवीथिकासु, महाना ३, ५६। मृग्यतीति कण्ड्वादिः, को १८४। मृग्यन्तः पदवीं तथात्यकरुणा व्याधा न मुञ्चन्ति माम्, दुर्गा।

मृज्—मृजू, अदा, प। शुद्धीभावः।

शुद्धीकरणम्। मार्जनम्। लट् मार्ष्टि, पा ७, २, ११४। मृष्टः। मृजन्ति, मार्जन्ति। मार्क्षि। मार्ष्टि तीर्थोदकैर्नित्यम्, कवि ५५। हि मृड्ढि। लिङ् मृज्यात्। लङ् अमार्ट। अमृष्टाम्। अमृजन्, अमार्जन्। लिट् ममार्ज। मम्रृजतुः, ममार्जतुः। मम्रु-

र्जिथ, ममार्ड। खड्गान् ममार्जुश्च मस्तुश्च परखधान्, भ १४, ९२। लुट् मार्जिता, मार्ष्टा। लृट् मार्जिष्यति, मार्क्ष्यति। लुङ् अमार्जीत्, अमार्क्षीत्। अमार्जिष्टाम्, अमार्ष्टाम्। अमार्जिषुः, अमार्क्षुः। अमार्जीद् भल्लतोमरम्। अमार्क्षीच्चासिपत्त्रादीन्, भ १५, १११। कर्मणि, मृज्यते। अमार्जि। सन् मिमार्जिषति, मिमृक्षति, मिमार्क्षतीत्येके। यङ् मरीमृज्यते। मर्मार्ष्टि। णिच् मार्जयति। अमीमृजत्, अममार्जजत्। मृजू,चु, प। १शौचम। २भूषणम्। मार्जयति। मार्जति, मार्ज्यालेपनेर्हिजान्। यो मार्जयति साम्राज्यं श्रियश्चापल्यवाच्यताम्, कवि ५५। माजिता, मार्ष्टा। मार्जित्वा, मृष्ट्वा। मृज्य। मृष्टः। मार्ष्टिः। मार्जनम। मृजा। मार्जितुम्, मार्ष्टुम्। मृज्यः, मार्ग्यः। मन्युस्तस्य त्वया मार्ग्यो मृज्यः शोकश्च तेन ते, भ ६, ५६। परि, वि, सम्—शोधनम्। मलापनयनम्। वाच्यं त्यागेन पत्त्राणः परिमार्ष्टुम्, र १४, ३५। जलेन लोचने प्रमृज्य, र ३, ४१। अयशः प्रमृष्टम्, र, ६, ४१। आवासे सिक्तसंमृष्टे, भ ५, ८०।

मृक्ष्—मृज्, भ्वा, प। शब्द इत्येके।

मृड्—(मृद्) तु, प। १ सुखनः। मधुरध्वनिः। २हर्षः, वो। मृड् (मृद्) क्रया, प। १क्षोदः। मर्दनम्। २हर्षः। मृडति। मृड्णाति। स्त्रिया मृड्यति मृड्णाति सरखत्या च यः सदा, कवि २७१। ममर्ड। ममृडतुः। मर्डिता। अमर्डीत्। मृडित्वा, पा १, २, ७। मृडितम्। अमृडित्वा सचस्नाचम्, भ ७, २६। मृड्वः।

मृण्—तु, प। हिंसा। मर्णिता।

मृणति वारणान्, कवि १०५। मृणालम्।

मृद्—क्रया, प। क्षोदः। मर्दनम्। चूर्णीकरणम्। मृद्नाति,मृद्नाति द्विषतां दर्पं या भुजाभ्यां भुवः पतिः। कवि १४४। हि, मृदान। मृद्नीयात्। अमृद्नात्। बलान्यमृद्नात्, र १, ८५। ममर्द। ममृदतुः। मर्दिता। मर्दिष्यति। अमर्दीत्। अमर्दिष्टाम्। अमर्दिषुः। तानमर्दीत्, भ १५, ३५। मिमर्दिषति। मरीमृद्यते। मरीमर्त्ति। मर्दयति। अममर्दत्, अमीमृदत्। मृदित्वा, पा १, २, ७। मृदितः। मर्दनम्। मर्दः। अभि, अव—आक्रमणम्। भङ्गः। दलनम्। वि—घर्षणम्। सम्—पीडनम्। सच्चूर्णनम्।

मृध्—मृधु, भ्वा, उ। आर्द्रभावः।

मृश्—तु, प। आमर्दनम्।

स्पर्शः। प्रणिधानम्। परामर्शः। चिन्ता। मृशति। ममर्श। ममृशतुः। ममर्शिथ। मर्ष्टा, स्रष्टा, पा ६, ५८। मर्क्ष्यति, स्रक्ष्यति। अमार्क्षीत्, अस्राक्षीत, अमृक्षत्। अमार्ष्टाम्, अस्राष्टाम्। अमृक्षताम्, क्रो १०४। कर्मणि, मृश्यते। अमर्शि। मिमृक्षति। मरीमृश्यते। मरीमर्ष्टि। मर्शयति। अमीमृशत्। मृष्ट्वा। मृश्य। मृष्टः। मर्शनम। मर्शः। आ—स्पर्शः। आक्रमणम्। आमृष्टं नः परैः पदम्, कु २, ३१ स गौरवं दशरथस्य बाहुमामृशन्, अनघ १२। परा—परामर्शः। ज्ञानम्। वितर्कः। विवेकः। स्पर्शः। अभीष्टदेवतां

ग्रन्थकृत् परामृशति, काव्यप्रकाशः। परामृशन् हर्षजड़ेन पाणिना, र ३, ६८। पूर्वोक्तं परामृशति। वि—परामर्शः। वितर्कः। प्रणिधानम्। रामप्रवासे व्यमृशन् न दोषम्, भ ३।

मृष्—मृषु, भ्वा, प। ड, वे।

१ सेचनम्। २ क्षमा। सहनम्। मृष्, दि, उ। क्षमा। मर्षति। ०ते) मृष्यति। ०ते। ममर्ष। ममृषे। मर्षिता। मर्षिष्यति। ०ते। आशिषि, मृष्यात्। मर्षिषीष्ट। अमर्षीत्। दि, अमृषत्। अमर्षिष्ट। मिमर्षिषति। ०ते। मरीमृष्यते। मरीमर्ष्टि। मृष्, चु, ड। क्षमा। तितिक्षा। मर्षयति। ०ते। मर्षति। ०ते। मृष, अदन्तः। च, प। भ्वा, उ, वे। क्षमा। मृषयति। मृषति। ०ते। मृषाम्बभूव। मृषिता। मृषिष्यति। ०ते। अमृषीत्। अमृषिष्ट। मृषयति न नृपाणां मृष्यते चोदितानाम् अनुचितमनुमात्रं न हिषां मर्षते यः। अपि शतमपराधान् मर्षते ब्राह्मणानां, सितवसनभृतां वो मर्षयत्यागमज्ञः॥ कवि १५। (ड) मृषित्वा, मर्षित्वा, मृष्ट्वा, पा १, २, २५। पा १, २, २०। मृष्टम्। मर्षितः, पा २, २। ०मर्षणम्। मर्षः। अप—निन्दा। अपमृषितं वाक्यम् (अविस्पष्टम्), कौ ३५४। परि—क्षान्तिः। परिमृष्यति, पा १, ३, ८२। मघोने परिमृष्यन्तम् (असूयन्तम्), भ ८, ५२।

मृ—क्रया, प। हननम्।

मृणाति, युद्धे मृणाति शत्रूणामस्त्रान्, कवि १०५। ममार। ममरतुः। मूर्णः।

मे—मेङ्, भ्वा, आ। १ विनिमयः। २ प्रत्यर्पणम्। मयते। मेने। माता। मास्यते। अमास्त। मित्सते, पा ७, ४, ५४। मेमीयते। मामाति। मामेति। मापयति। अपमित्य। अपमाय, पा ६, ४, ७०। ३, ४, १८। यो लिङ्गेनानुमयते कृत्स्नमप्यविचेष्टितम्, कवि।

मेट्—मेत्—भ्वा, प। उन्मादः।

मेथ् मेद्, मेध् (मिद्),

मेप्—मेपृ, भ्वा, आ। गतिः।

मेव्—मेव्—(मेङ्) भ्वा, आ। सेवा।

मोच्—चु, प। क्षेपः। मोचनम्। मोचयति। मोचति, वे। सङ्गरे षु मोचयति यश्च शरं मनुष्ये, कवि ४। त्वां शापान् मोचयिष्यति, भारत।

म्ना—भ्वा, प। आवृत्तिः। अभ्यासः। पौनःपुन्येनानुशीलनम्। मनति, पा ७, ३, ७८। मनन्ति मानिनो यस्य यशः, कवि ७८। मम्नौ मम्नतुः। म्नाता। म्नास्यति। म्नायात्, म्नेयात्। अम्नासीत्। अम्नासिष्टाम्। अम्नासिषुः। मिम्नासति। मान्नायते। मान्नाति। मान्नेति। म्नापयति। अमिम्नपत्। आ—आवृत्तिः। उक्तिः। आमनन् मन्त्रमुत्तमम्, भ १७, ३०। अपथ्यमायतौ लोभादामनन्त्यनुजीविनः, भ १८, ५। त्वामामनन्ति प्रकृतिम्, कु २, १३।

म्रक्ष्—मृक्ष्—भ्वा, प। म्रक्षणम्। सङ्घातः। चु, प। १ म्लेच्छनम्। अपशब्दः। २ म्रक्षण म्, वे। ३ म्लेच्छनम्

वो। म्रक्षति। मृक्षति। म्रक्षयति। मृक्षयति। म्रक्षितः। म्रक्षणम्। मक्ष इत्येके। मक्षिका इति प्रदीपः।

म्रद्—भ्वा, आ। मर्दनम्।

म्रदते। म्रदन्ते चरणौ यस्य, कवि १४४। म्रदयति, घटादिः। अमम्रदत्, पा ७, ४, ९५। म्रदा।

म्रुच्—म्रुञ्च्—म्रुच्, म्रुञ्चु, भ्वा, प। गतिः। म्रोचति। अम्रुचत्। अम्रोचीत्, पा ३, १, ५८। म्रुञ्चति। अम्रुञ्चीत्। म्रुचित्वा। म्राचित्वा, म्रुक्त्वा। म्रुक्तः।

म्रेट्—म्रेड्—म्रेटृ, म्रेडृ, भ्वा, प। उन्मादः म्रेटति। म्रेडति। आ—णिच्, आम्रेडनम्। पुनःपुनः कथनम्। एतदेव यदा वाक्यमाम्रेडयति देवराट्, भारत।

म्लच्—चु, प। छेदनमित्येके।

म्लुच्—म्लुञ्च्—म्लुचु, म्लुञ्चु, भ्वा, प। गतिः। म्लोचति। अम्लुचत्। अम्लोचीत्। म्लुञ्चति। अम्लुञ्चीत्।

म्लेक्—भ्वा, प। १ अव्यक्तवर्णः।

असटशब्दः। २अपशब्दः। देश्योक्तिः, वो। असंस्कृतकथनम्, दुर्गा। म्लेच्छति, विद्वान् न म्लेच्छति धृतव्रतः, कवि १८७। मिम्लेच्छ। म्लेच्छिता। म्लेच्छयति। म्लेच्छितः (असटशब्दे) म्लिष्टः, पा ७, २, १८।

म्लेट्—म्लेड्—भ्वा,। उन्मादः।

म्लेव्—म्लेठ (गेठ) भ्वा, प सेवा।

म्ले—(ग्ले) भ्वा, प। हर्षक्षयः। कान्तिसंक्षयः। ग्लानिः। ग्लायति। मम्लौ। तौ पथि न मम्लतुः, र ११, ९। ग्लाता। ग्लास्यति। ग्लेयात्, ग्लायात्। अग्लासीत्। अग्लासिष्टाम्। ग्लानः। ग्लानिः। ग्लानम्।

(य)

यक्ष्—चु, आ। पूजा। यक्षयते। शिवं यक्षयते भक्त्या, कवि २६७।

यज्—भ्वा, उ। १पूजा। यागः। २सङ्गमः। ३दानम्। लट् यजतिः०ते। पशुना रुद्रं यजते। लिट् इयाज। ईजतुः, पा ६, १, १७। इयजिथ, इयष्ठ। ईजिव। ईजे। ईजुर्देवान् पुरोहिताः, भ १४, ९०। लुट् यष्टा। लृट् यक्ष्यति। ०ते। आशिषि, इज्यात, पा ३, ४, १०४। यक्षीष्ट। लुङ् अयाक्षीत्। अयाष्टाम्। अयाक्षुः। अयष्ट। अयक्षाताम्। अयक्षत। अङ्गान्ययाक्षीदभितः प्रधानम्, भ १, १२। विदशानयष्ट, भ १, २। कर्मणि, इज्यते। अयाजि। मन् यियक्षति। ०ते। यङ् यायज्यते। यायजीति। यायष्टि। णिच् याजयति। अयीयजत्। इष्ट्वा। ०इज्य। इष्टः। इष्टिः। यजनम्। यागः। इज्या। याजकः। यष्टा। यज्वा। यायजूकः। यियक्षुः। अहीषीत् कृष्णवर्त्मानम् समयष्टाश्वमण्डलम, भ १५, ९६।

यत्—यती, भ्वा, आ। प्रयत्नः। चेष्टा। यतते, यतते धर्मं एवासौ, कवि ७५। द्रुतं यतस्व, भ १२, ४। येते। यतिता। यतिष्यते। यतिष्ये तद्विनिग्रहे, भ ५, २९। अयतिष्ट। अयतिषाताम्। अयतिषत। प्रनष्टुमयतिष्ट च, भ १५, ५८। यियतिषते। यायत्यते। यायत्ति। यत्, चु,

प । १निकारः । परिभवः । तिरस्कारः । ताड़नम्, वो । २ उपस्कारः । अलङ्करणम् । यातयति, यातयत्यनिशं द्विषः, कवि ७५ । यतित्वा । (ई) यत्तम् । यतितमपि दृश्यते, इति संक्षिप्तसारम् । यत्नः । आ—वशीभावः । वयं त्वय्यायतामहे, वीर १५ । निर्—प्रत्यर्पणम् । धान्यधनयोः प्रतिदानम् । परिवर्त्तः । वैरनिर्यातनम् । निर्यातयति वैरञ्च, कवि ७५ । प्र—प्रयत्नः । विजेतुं प्रयतेतारीन्, मनु ७, १०८ ।

यन्त्र्—यत्रि, चु, प्र । सङ्कोचः ।

बन्धनम् । यन्त्रयति । यन्त्रति । यन्त्रितः । यन्त्रणम् । यन्त्रणा । स्नेहकारुण्ययन्त्रितः, भारत । नि—बन्धनम् । नियमनम् । मेखलया नियन्त्रितमधोवासः, महाना २, २ । स्त्रीयन्त्रणामानशिरे, र ७, २३ ।

यभ्—भ्वा, प । रमणम् ।

विपरीतरमणम् । यभति । ययाभ । येभतुः । येभिथ, ययब्ध । यब्धा । यप्स्यति । अयाप्सीत् । अयाब्धाम् । अयाप्सुः । यियप्सति । यायभ्यते । यायब्धि । याभयति । अयीयभत् ।

यम्—भ्वा, प । १ उपरमः ।

विरतिः । निवृत्तिः । २ बन्धनम् । यच्छति, पा ७, ३, ७७ । ययाम । येमतुः । मेमिथ, ययन्थ । यन्ता । यंस्यति । अयंसीत् । अयंसिष्टाम् । अयंसिषुः, पा ७, २, ७३ । भावे, यम्यते । अयमि, अयामि । यियंसति । यंयम्यते । यंयन्ति यम्, चु, प । १परिवेषणम् । अन्नादेरर्पणम् । अपरिवेषणम्, वो । ३ वेष्टनम् । यमयति (ब्राह्मणान् भोजयति) अन्नाद्युपसमर्पणे वेष्टने च घटादित्वम्, को ८६ । यमयति चन्द्रम् (परिवेष्टते), को १७४ । अन्यत्र, आयामयति (द्राघयति) यमयति, यामयति अन्नं द्विजाय गृह्णाति, दुर्गा । यमयति विमार्गात् प्रजा राजेति कश्चित् । नियमयसि विमार्गप्रस्थितानात्तदण्डः, शक्रु ५, १८ । एकहस्तयमिता मूर्द्धजाः, शक्रु १ । यत्वा । ०यत्य, पा ६, ४, ३७, ३८ । यतः । यतिः । यमनम् । यमः । यामः । आ—आयामः । दीर्घीकरणम् । आयच्छते पादम्, पा १, ३, २८ । बाणमुद्यतमायंसीत् (उपसंहृतवान्), भ ६, ११८ । आयच्छति रणे मौर्वीमस यावद्विभित्सया, कवि २१६ । आयामयति, ०ते । पा १, ३, ८८ । व्या—व्यायामः । व्यायच्छमानयोस्तयोः, भ ६, ११८ । उद्—उद्यमः । अवगुरणम् । शक्तिमुदयच्छत्, भ १७, ८२ । प्रियपरशुरयं मे बाहुरुद्यच्छमानाः, अनर्घ १०२ । नित्यमुद्यच्छमानाः स्मरसम्भोगकर्मसु नार्य्यः, भ ८, ४७ । उप—विवाहः । स्वीकारः । उपयच्छते कन्याम्, पा १, ३, ५६ । सीतां हित्वा दशमुखरिपुर्नोपयेमे यदन्याम्, र १४, ८७ । लुङ् उपायत । उपायंस्त, पा १, २, १६ । अस्त्राण्युपायंसत जित्वराणि, भ १, १६ । नि—नियमः । शासनम् । मखद्विषस्त्वया नियम्याः, र ३, ४५ । सम्—बन्धनम् । संयमः । योगः । केशान् संयम्य, भारत । वानरं मा न संयमीः, भ ६, ५० । दास्या मालां संयच्छते कामुकः (दास्यै ददाति), पा २, ५५, ७५ ।

यस्—यसु, दि, प । प्रयत्नः ।

चेष्टा । यस्यति । यसति । संयस्यति ।

संयसति। अन्यत्र, प्रयस्यति। पा। ययास। येषतुः। यसिता। अयसत्। (अयसत्, अयसीत्, अयासीत्, वो)। यियसिषति। यायस्यते। यायस्ति। यासयति। अयीयसत्। (ङ) यसित्वा। यस्त्वा। यस्तः। आ—आयासः। खेदः। आयस्यसि तपस्यन्ती, भ ६, ६८। (णिच्) पीड़नम्। आयासयति। ०ते, पा १, ३, ८८। प्र—प्रयासः। पुनःपुनः प्रायसदुत्प्लवाय सः, नै १, १२५।

या—अदा, प। गमनम्। प्राप्तिः।

याति। अयात्। अयुः। अयान्, पा ३, ४, १११। ययौ। ययतुः। ययिथ, ययाथ। ययिव। याता। यास्यति। अयासीत्। अयासिष्टाम्। अयासिषुः। यियासति। यायायते। यायाति। यायेति। यापयति। अयीयपत्। यात्वा। ०याय। यातः। यानम्। यातव्यः। यायावरः। अति—अतिक्रमः। धनुः सबाणं कुरु मातियासीः, भ २, ५१। अन्—सङ्गमनम्। निधनेऽप्यनुयाति यः, मनु ८, १७। अपपलायनम्। अभि—आक्रमणम्। कुबेरादभियास्यमानात्, र ५, ३०। आ—आगमनम्। प्राप्तिः। उद्—उदयः। उन्नतिः। इति मतिरुदयासीत्, नै २, १०९। प्रत्युद्—प्रत्युद्गमनम्। प्र—प्रयाणम्। प्रायादरण्यम्, भ ३, ३६।

याच्—टुयाचृ, भ्वा, उ। याञ्ज्ञा।

प्रार्थना। भिक्षा। याचति। ०ते। याचतेमान् वरान्, पितॄन्, मनु ३, २५८। ययाच। ०चे। ययाचुरभयम्, भ १४, १०५। याचिता। याचिष्यति। ०ते। अयाचीत्। अयाचिष्ट। कर्मणि, याच्यते वरं देवः। अयाचि। यियाचिषति। ०ते। यायाच्यते। यायाक्ति। याचयति। अययाचत्। याचित्वा। ०याच्य। याचितः। याचनम्। याञ्ज्ञा। (टु) याचथुः। याचित्रिमम्, वो। याचमानः शिवं सुरान्, भ ६, ८।

यु—अदा, प। १ मिश्रणम्।

२ अमिश्रणम्। युज्, क्रया, उ। बन्धनम्। यौति। युतः। युनाति। युनीते। यौति काले कुलस्त्रीभिः क्षेत्रमन्तानहृदये। युनाति यौवनस्थोऽपि न वेश्याबन्धकीजनैः॥ कवि १८५। युयाव। युयुवे। यविता। यविष्यति। यूयात्। अयावीत्। क्रयादिरनिट्। योता। योष्यति। ०ते। अयौषीत्। अयोष्ट। कर्मणि, यूयते। अयावि। सन् यियविषति, पा ७, ४, ८०। युयूषति, पा ७, २, ४८। क्रया, युयूषति। ०ते। योयूयते। योयवीति। यायोति। यावयति। अयीयवत्। यु, चु, आ, वो। निन्दा। यावयते। युतः। युतिः। यवनम्। यवः। यवितुम्। अदा, याव्यम्, पा ३, १, १२६। योत्रम्।

युङ्—युगि (जुग) भ्वा, प। वर्जनम्।

युक्, पुक्, मुक्, भ्वा, प। प्रमादः।

युज्—दि, आ। समाधिः।

समाधानम्। चित्तवृत्तिनिरोधः। योग्यभावः, दुर्गा। युजिर्, रु, उ। योगः। सङ्गतिः। युज्यते योगी। यद् येन युज्यते लोके बधस्तत् तेन योजयेत्, हितो। त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते, हितो। न पादैः प्रष्टुं जगत्पूज्यमयुज्यतार्कः (नार्हत) मा

३, २। युनक्ति। युङ्क्तः। युञ्जन्ति। युङ्क्ते। युञ्जते। यमं युनज्मि कालेन, भ ६, ३७। हि युङ्धि। स्व, युङ्क्ष्व। लिङ् युञ्जात्। युञ्जीत। लङ् अयुनक्। अयुङ्क्त। लिट् युयोज। युयुजे। युयुजुः स्यन्दनानस्मै, भ १४, ८०। शब्दा महाराज इति तस्मिन् युयुजे, र १८, ४२। लुट् योक्ता। लृट् योक्ष्यति। ०ते। आशिषि, युज्यात्। युक्षीष्ट। लुङ् अयुजत्। अयौक्षीत्। अयुजताम्। अयोक्ताम्। अयुक्त। अयुक्षाताम्। कर्मणि, युज्यते। अयोजि। स मद्गुरुः क्रतोरस्येन फलेन युज्यताम्, र ३, ६७। अजिताधिगमाय स मन्त्रिभिर्युयुजे (सङ्गतः), र ८, १७। सन् युयुक्षति। ०ते। यङ् योयुज्यते। योयोक्ति। युज, चु, प। संयमनम्। बन्धनम्। चु आ, वो। निन्दा। योजयति। योजति। अयौक्षीत्। योजयते। युक्ता। युज्य। युक्तः। युक्तिः। योजनम्। योगः। योक्तव्यः। योज्यः। योग्यः। युनक्तीति युङ्। युज्यत इति युक्, कौ १६५। अनु—अनुयोगः। प्रश्नः। साक्षिणोऽनुयुञ्जीत, मनु ८, ७९। अभि—अभियोगः। विवादः। अभियुङ्क्ते, कौ २५४। आ—संयमनम्। क्त, प्रशंसा। तुरगानायुञ्जन्, भारत। आयुक्तो दूतकर्मणि, भ ८, ११५। उद्—उद्योगः। उद्युक्ते, कौ २५५। उप—उपयोगः। भोगः। सेवा। उपयुङ्क्ते, पा १, ३, ६४। षाड्गुण्यमुपयुञ्जीत, मा २, ८३। नि, प्र—नियोगः। प्रेरणम्। प्रयुङ्क्ते, पा १, ३, ६४। कार्ये गुरुष्वात्मसमं नियोज्ये, कु ३,१३। अरण्यायने पिता यां प्रायुङ्क्त, भ ३, ५१। नियुङ्क्ते गुल्मपाषाणो नियोजयति रक्षकान्। यो नियोजति सामन्तान् स्वयमात्मनि युज्यते॥ कवि ४२। वि—वियोगः। अन्यः प्राणैर्वियुज्यते, हितो। सम्—संयोगः।

युत्—(जुत्) भ्वा, आ। दीप्तिः।

युध्—दि, आ। सम्प्रहारः।

युद्धम्। अभिभवेच्छा। युध्यते। तुरङ्गघातमयुध्यत, भ ५, १०१। युध्यते चौरं राजा (हन्ति) दुर्गा। का हि दण्डेन युध्यति, इत्यादौ युधमिच्छतीति क्यच्, कौ १३७। युयुधे। योद्धा। योत्स्यते। युत्सीष्ट। अयुद्ध। अयुत्साताम्। अयुत्सत। तेऽयुत्सताहवे, भ १५, ३५ युयुत्सते। योयुध्यते। योयोद्धि। योधयति। अययुधत्। एकः शतं योधयेद् प्राकारस्थः, मनु ७, ७४। योधयिष्यति संग्रामे राजानम्, भ १६, २८। युद्धा ०युध्य। युद्धम्। योधनम्। योधः युध्। योद्धा। योद्धव्यम्। नि—नियुद्धम्। बाहुयुद्धम्। प्रति—प्रतियुद्धम् कथं भीष्ममिषुभिः प्रतियोत्स्यामि गो २, ४। को दुर्योधनं शक्तः प्रतियोधयितुं रणे, भारत।

युन्ध्—(पुन्ध्)।

युष्—युषु, दि, प। विमोहनम्।

यूष 'जूष् झूष्' भ्वा, प। बव्वः।

येष् (येषृ) भ्वा, आ, वो। यत्नः।

यौट्—'यौड्' भ्वा, प। योगः।

(र)

रक्—चु, प। स्वादः। राकयति

रक्ष्—भ्वा, प। १ पालनम्।

रक्षणम्। अविनाशनम्। २ रोषः। ३ सङ्घातः। रक्षति। आत्मानं सततं रक्षेद्दारैरपि धनैरपि, मनु ७, २१३। स रक्ष तात मन्त्रञ्च सपत्नांश्च ममोद्धर, भारत। ररक्ष। रक्षिता। रक्षिष्यति। अरक्षीत्। अरक्षिष्टाम्। अरक्षिषुः। रणेऽरक्षीद्राक्षसान्, भ १५, ८७। कर्मणि, रक्ष्यते। अरक्षि। काकेभ्यो रक्षतामन्नम्। रिरक्षिषति। रारक्ष्यते। रारक्षिष्टे। रक्षयति। अररक्षत्। रक्षित्वा। ०रक्ष्य। रक्षितः। रक्षणम्। रक्षा। रक्षणः।

रख्—रङ्ख्—(इखि) भ्वा, प। गतिः।

रग्—रगे, भ्वा, प। शङ्का।

रगति। रराग। रगिता। (ए) अरगीत्। रगयति, घटादिः। रग्, रघ् (रक) चु, प। स्वादः। प्राप्तिः, वो। रागयति, राघयति, वो।

रङ्ग्, रगि (अगि) भ्वा, प। गतिः।

रङ्ग्—रघि, भ्वा, आ। गतिः।

रङ्गते। ररङ्गे। हारं ररङ्गतुर्यास्यम् (परस्मैपदं चिन्त्यम्), भ १४, १५। रघि (अजि) चु, प। दीप्तिः। रङ्गयति।

रच—अदन्तः। चु, प। रचना।

प्रणयनम्। करणम्। रचयति। अररचत्। रचयति। शयनम्, गीतगो ७, २३। मया रचितोऽञ्जलिः, रामा। तेन स रचितो राजा, भ १२, ३७। विरचितानुरूपवेशः, र २, ७६।

रञ्ज्—रन्ज्, भ्वा, दि, उ। रागः। अनुरागः। आसक्तिः। २ वर्णान्तरोत्पादनम्। रजति। ०ते, पा ६, ४, २६। रज्यति। ०ते। चित्तं रजति नारीणां स्वयं ता अनुरज्यते, कवि २६०। ररञ्ज। ररञ्जिथ, ररङ्क्थ। ररञ्जे। रङ्क्ता। रङ्क्ष्यति। ०ते। रज्यात्। रङ्क्षीष्ट। अराङ्क्षीत्। अराङ्क्ताम्। अराङ्क्षुः। अरङ्क्त। अरङ्क्षाताम्। अरङ्क्षत। कर्मणि, रज्यते। अरञ्जि। कर्मकर्त्तरि, रज्यति। ०ते, पा ३, १, ८०। रिरङ्क्षति। ०ते। रारज्यते। रारङ्क्ति। रञ्जयति। (मृगरमणे आखेटके) रजयति मृगम् (मारयति), घटादिः। अन्यत्र, रञ्जयति पक्षिणः। रञ्जयति मृगान् तृणदानेन, को १८६। रङ्क्ता, रङ्क्ता, पा ६, ४, ३२। ०रज्य। रक्तः। रक्तिः। रञ्जनम्। रागः। रङ्क्तव्यम्। रजकः। रजनी। अनु—अनुरागः। भ्रातृभार्य्यायां योऽनुरज्येत कामतः, मनु ३, १७३। मृगमन्वरज्यदतुषारकरः, मा ६, ७। अप—विरागः। उप—उपरागः। राहुग्रासः। वि—विरागः।

रट्—रठ, भ्वा, प। कथनम्।

रटति। रठति। माघे मासि रटन्त्यपः, स्मृतिः। रराट। रेटतुः। करभा रेटुः, भ १४, ५। रटिता। अरटीत्, अराटीत्। घोरास्वाराटिषुः शिवाः, भ १५, २७।

रण्—(अण्) भ्वा, प। शब्दः।

रणति। रराण। रेणतुः। रणिता। अरणीत्, अराणीत्। रिरणिषति। रंरण्यते। रंरणिष्ट। राणयति। अरीरणत्, अरराणत्। रण् (कण्) भ्वा, प। गतिः। रणति। रणयति, घटादिः।

रद्—भ्वा, प। विलेखनम्। भेदः।

रदति। रदिता। रदः। रदनः।

रध्—दि, प। १ हिंसा।
२ निष्पत्तिः। ३ पाकः, वो। लट् रध्यति। लिट् ररन्ध, पा ७, १, ६१। ररन्धतुः। ररन्धिथ। ररद्ध। ररन्धिव, रेध्व। ररन्धिम, रेध्म। लुट् रधिता, रद्धा, पा ७, २, ४५। लृट् रधिष्यति, रत्स्यति। लुङ् अरधत्। अङि नुम्। अनिदितामिति नलोपः, को १४०। अरन्धत्, वो। कर्मणि, रध्यते। अरन्धि। सन् रिरधिषति, रिरत्सति। यङ् रारध्यते। रारद्धि। णिच् रन्धयति। अररन्धत्। रधित्वा, रद्धा। ०रध्य। रद्धः। रन्धनम्। रन्धः। रधितुम्, रद्धुम्। अन्नं रधितुमारभे, भ ८, २८। क्षत्तु रेधिवान्।

रप्—भ्वा, प। उक्तिः। रपति।

रफ्—रम्फ्, रफि, भ्वा, प। गतिः।
बधः, वो। रफति। रम्फति। 'रर्फति'।

रभ्—भ्वा, आ। राभस्यम।
उत्सवौभाग्यः, दुर्गा। निर्विचारप्रवृत्तिः, गोविन्दभट्टः। रभते। रेभे। रब्धा। रप्स्यते। रप्सीष्ट। अरब्ध। अरप्साताम्। अरप्सत। कर्मणि, रभ्यते। अरभि, पा ७, १, ६२। सन् रिप्सते, पा ७, ४, ५४। यङ् रारभ्यते। रारब्धीति, रारब्धि, पा ७, १, ६२। णिच् रम्भयति। अररभत्, पा ७, १, १३। रब्ध्वा। ०रभ्य। रब्धः। रम्भणम्। आ—आरम्भः। मारब्धा बलिविग्रहम्, भ ५, ३८। पेष्टुमारब्धि चित्तौ, भ १५, ५८। परि—परिरम्भः। आलिङ्गनम्। इमां लतां त्वन्नाम्निबुद्ध्या परिरप्समानः, र १३, ३२। सम्—संरम्भः। कोपः।

रम्—रमु, भ्वा, आ। क्रीड़ा।
रमणम्। आसक्तिः। रमते। रेमे। सखीनां मध्यगता रेमे, कु १, २८। रन्ता। रंस्यते। रंसीष्ट। अरंस्त। अरंसाताम्। अरंसत। व्यरंसीत्। व्यरंसिष्टाम्। व्यरसिषुः, पा ७, २, ६३। अरंस्त नीतौ, भ १, २। मा रंस्था जीवितेन नः, भ ६, १५। रिरंसते। रंरम्यते। रंरन्ति। रमयति। अरीरमत्। कामपि रमयति रामाम्, गीतगो १, ४६। सम्भोगस्नेहचातुर्य्यै राजानं रमयामास सा, भारत। रत्वा। रमित्वा। रान्त्वा, दुर्गा। ०रत्य। ०रम्य। रतः। रतिः, पा ६, ४, ३७, ३८। रमणम्। रामः। रमः। रन्तुम्। रन्तव्यम्। रमणीयम्। रमणः। अन्, अभि, आ—आसक्तिः। पत्नीषु राजाऽभिरेमे, भ १, ८। आरमति, पा १, ३, ८३। आरमन्तं परं स्मरे, भ ८, ५३। उप—निवृत्तिः। मरणम्। उपरमति। ०ते, पा १, ३, ८४, ८५। उपारंसीच्चिकीर्षितात्, नात्र सीतेत्युपारंस्त, भ ८, ५४, ५५। देवदत्तमुपरमति (उपरमयति), संक्षिप्त। क्षणं पर्य्यरमत्तस्य दर्शनात् (तुष्टिमानभवत्), भ ८, ५३। वि—निवृत्तिः। विरतिः। विरमति। व्यरंसीत् कृताकृतेभ्यः, भ ३, २१।

रम्ब्—रम्भ्—रबि, रभि (अबि) भ्वा, आ। शब्दः। रबि, रवि, रिबि, रिवि, भ्वा, प। गतिः। रम्बते। रम्भते। रम्बति, रम्बति। रिम्बति, रिम्बति।

रय्—भ्वा, आ। गतिः। रयते।

रस्—(तु) भ्वा, प। शब्दः।

रसति। रसन्ति मधुरैः कण्ठैः पतत्रिणः, कवि २०२। रसतु। रसना, गीतगो १०, ६। ररास। रेसतुः। परुषं ररास, र १६, ७८। रेसुः पदातयः, भ १४, ९। रसिता। रसिष्यति। अरसीत्, अरासीत्। गोमायुसारङ्गगणा भीमम्ररासिषुः, भ ३, २६। रिरसिषति। रारस्यते। रारस्ति। रासयति। अरीरसत्। रसति कोकिले, मा ६, ७०। रस, अदन्तः। चु, प। १ आस्वादनम्। २ स्नेहनम्। रसयति। रसयन्ति सुखाद्यानि तत्करप्रतिपालिताः, कवि २०२। अररसत्। रसितवती मद्यम्, मा १०, २७। रिरसयिषति शब्दम्, मा ११, ११।

रह्—भ्वा, चु, प। रह, अदन्तः।

चु प। त्यागः। रहति। राहयति। अरीरहत्। रहयति। अररहत्। रहयत्यापदुपेत मायतिः, भा २, १४। विरहयन् मलयाद्रिम, र ९, २। रहत्यविदुषां सङ्गं रहयत्यप्रियं सदा, कवि २६२।

रंह्—रहि, भ्वा, प। गतिः।

रंहति। ररंह। ररंहाश्वकुञ्जरम्, भ १४, ९८। रंहिष्यति। रंह्यात्। अरंहीत्। रहि (अजि) चु, प। दीप्तिः। रंहयति। रंह, अदन्तः। चु, प। गतिः। रंहयति, वो।

रा—अदा, प। १ दानम्।

२ ग्रहणम्, वो। राति। न राति रोगिणेऽपथ्यं वाच्यतेऽपि भिषक्तमः। भागवतम। ररौ। राता। अरासीत्।

राख्—(द्राख) राघ् (द्राघ्)

राज्—राजृ, भ्वा, उ। दीप्तिः।

शोभा। राजति। ०ते। तड़िदिव राजसि, गीतगो ५, १२। राजते भैमी सर्वाभरणभूषिता, भारत। रराज। रराजे। रेजे, पा ६, ४, १२५। ताम्रोत्पलानि रेजुः, भ २। राजिता। राजिष्यति। ०ते। अराजीत्। अराजिष्ट। रिराजिषति। ०ते। रारज्यते। रारष्टि। राजयति। अरराजत्। राजितः। राजनम्। राजा। राट्। वि—सुदीप्तिः। नभोगता देव्य इव व्यराजन्, भा ३, ४३। निर्, णिच्—निमेष्कनम्। नीराजना।

राध्—दि, प। संसिद्धिः।

निष्पत्तिः। राधोऽकर्मकादेव श्यन्। राध्यत्योदनः (सिध्यति)। कृष्णाय राध्यति (कृष्णस्य दैवं पर्य्यालोचयति), कौ १६८। कविरहस्ये सकर्मकादपि श्यन् दृश्यते। व्यञ्जनानि च राध्यति कौ ११४। रराध। रराधतुः। रराधिथ। राद्धा। राध्, स्वा, प। निष्पादनम्। राध्नोति ओदनम्, दुर्गा। रराध। रराधतुः। (हिंसायाम्) रेधतुः। रेधिथ, पा ६, ४, १२३। वानरा भूधरान् रेधुः, भ १४, १९। राद्धा। रात्स्यति। अरात्सीत्। अराद्धाम्। अरात्सुः। रिरात्सति। (हिंसायाम्) रिरत्सति, कौ २०३। रराध्यते। रराद्धि। णिच् राधयति। अरीरधत्। अयं चुरादिश्च, कौ १३८। आराधय सपत्नीकः सुरभीः सुताम्, र १, ८२। राद्धा। ०राध्य राद्धिः। राधनम्। राद्धम्। अप—अपराधः। द्रोहः। अनिष्टाचरणम्। हिंसा

यन्मद्यमपराध्यति, मा २, ११। स नापराध्नोति सिद्धानाम्, भारत। अभि, आ—आराधना। सेवा। गुरुराराधयामासुरुक्मम्, र १, ८५। अल्पः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः, हितो। इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्, कु २, ४०। वि—अपकारः। द्रोहः। विराद्ध एवं भवता विराद्धा बहुधा च नः, मा २, ४१।

राध्—रास्—(रास्ध) भ्वा, आ।

शब्दः। राध्यते। रासते।

रि—(पि) तु, प। गमनम्।

रियति। रिराय। रिर्यतुः। रेष्यति। अरैषीत्। रिरीषति। रेरीयते।

रिख्—'रिङ्ख्' (इख) भ्वा, प। गतिः।

रिङ्ख्—रिगि (अगि) भ्वा, प। गतिः।

रिच्—रिचिर्, रु, उ। विरेचनम्। शून्यीकरणम्। पौनःपुन्येन पुरीषोत्सर्गः, दुर्गा। लट् रिणक्ति। रिङ्क्तः। रिञ्चन्ति। रिणक्षि। रिङ्क्थे। रिञ्चाते। रिङ्क्ते रिपुर्यदाक्रान्तो धनैः, कवि ८८। रिणच्मि जलधेस्तोयम्, भ ६, ३६। लिङ् रिञ्चात्। रिञ्चीत। लङ् अरिणक्। अरिङ्क्ताम्। अरिञ्चन्। अरिङ्क्त। लिट् रिरेच। रिरिचे। लुट् रेक्ता। ल्रट् रेक्ष्यति। ॰ते। लुङ् अरिचत्, अरैक्षीत्। अरिचताम्, अरैक्ताम्। अरिचन्, अरैक्षुः। अरिक्त। अरिक्षाताम्। अरिक्षत। कर्मणि, रिच्यते। अरेचि। सन् रिरिक्षति। ॰ते। यङ् रेरिच्यते। रेरेक्ति। णिच् रेचयति। अरीरिचत्। रिच्, चु, प। १ वियोजनम्। २सम्पर्कः। रेचयति। रेचति। रेक्ता। रेक्ष्यति। मन्त्रैश्च रेचति। रेचयन्ति च यन्नारी लोचनान्यश्रुवारिभिः, कवि ८८। रिक्ता। ॰रिच्य। रिक्तः। रिक्तिः। रेचनम्। रेकः। रेचकः। अति—अतिरेकः। अतिशयः। स्वभाव एवातिरिच्यते, हितो। व्यति—व्यतिरेकः। अतिशयः। स्तुतिभ्यो व्यतिरिच्यन्ते दूरेण चरितानि ते, र १०, ३१। उद्—उद्रेकः। विरेकः।

रिज्—भ्वा, आ। भर्जनम्। रेजते, वो।

रिफ्—तु, प। १ कत्थनम्। श्लाघा। २युद्धम्। ३ निन्दा। ४हिंसा। ५दानम्। रिफति। रेफिता। रिह्, रिहति। गिरं न विप्रा मतिभी रिहन्ति, कौ १५१।

रिभ्—भ्वा, प। रवः। रेभति, वो।

रिफ् (ऋफ्) रिम्ब्, रिख् (रम्ब्)।

रिश्—(रुश्) तु, प। हिंसा।

रिशति। रिरेश। रिरिशतुः। रेष्टा। रेष्यति। अरिक्षत्। रिरिक्षति। रेरिश्यते। रेरेष्टि। रेशयति। अरीरिशत्।

रिष्—(कष्, रुष्) भ्वा, दि, प। हिंसा। रेषति। रिष्यति। रिरेष। रिरिषतुः। रेषिता, रेष्टा, पा ७, २, ४८। रेषिष्यति। अरेषीत्। दि, अरिषत्। रिरिषिषति। रिरे॰। रेरिष्यते। रेरेष्टि। रेषयति। अरीरिषत्।

रिह्—(रिफ्) भ्वा, प। वधः, वो।

री—रीङ्, दि, आ। १ श्रवणम्।

२ शरणम्, वो। री क्रिया, प। १गतिः। २ हिंसाशब्दः। ३ वधः, वो। रीयते। रिणाति। रिराय। रिर्य्यै। रेता। रेष्यति। ०ते। रीयात्। रेषीष्ट। अरेषीत्। अरेष्ट। णिच् रेपयति, पा ७, ३, ३६। क्ष, रीषः।

रीव्—रीङ्, भ्वा, उ। अङ्चसंवृत्योः।

रु—रुङ्, भ्वा, आ। १ गतिः।

२हिंसा। रु, अदा, प। रवः। लट् रवते। रौति। रवीति। रुतः। रुवीतः। रुवन्ति, पा ७, ३, ८८, ८५। लिङ् रुयात्, रुवीयात्। लङ् अरौत्। अरवीत्। लिट् रुराव। रुरविथ। रुरुवे। रुरुवुश्चाग्निवं शिवाः, भ १४, २१। लुट् रविता। लृट् रविष्यति। ०ते। आशिषि, रुयात्। रविषीष्ट। लुङ् अरावीत्। अराविष्टाम्। अरविषुः। अरविष्ट। (रोता, रोष्यति, अरौषीत्, वो)। सन रुरुषति। ०ते। यङ् रोरुयते। रोरवीति। रोरोति। णिच् रावयति। अरीरवत्, पा ७, ४, ८०। रावयामास लोकान् यत् तस्माद्रावण उच्यते, भारत। रुत्वा। ०रुत्य। रुतम्। रुतिः। रवः। रवणः। विरावः। संरावः। रविः। आ, वि—उच्चैःशब्दः। रोदनम। भ्राता विरौति ते, भ ५, ५४। विरौमि शून्ये, भ १८, २८।

रुच्—भ्वा, आ। १ दीप्तिः।

२अभिप्रीतिः। अन्यकर्त्तृकोऽभिलाषो रुचिः। देवदत्ताय रोचते मोदकः, पा १,४,३३। रुरुचे। रोचिता। अरुचत्। अरोचिष्ट, पा १, ३, ८१। रुरुचिषते। रुरोचिषते। यङ् निषेधः। णिच् रोचयति। ०ते। अरूरुचत्। ०त। नारोचयताऽऽत्मानम्, भ ८, ६४। यदि वासं रोचयेत गुरोः कुले, मनु २, २४३। रोचित्वा, रुचित्वा। रुचितः। रोचनम्। रुचिः। रोचना। रोकः। वि—दीप्तिः। विरुरुचे रुरुवेष्टितभूमिषु, र ९, ५१। व्यरुचन् कुमुदाकराः, भ ८, ६६।

रुज्—रुजो, तु, प। भङ्गः।

रोगः। रुजति रोगश्चीरस्य। नदी कूलानि रुजति, पा २, ३, ५४। तस्य धर्मरते रोगा न रुजन्ति प्रजामपि, कवि १९६। रुरोज। रुरुजुर्हरिराक्षसाः, भ १४, ४८। रोक्ता। रोक्ष्यति। रावणस्येह रोक्ष्यन्ति कपयो भीमविक्रमाः भ ८, १२०। अरौक्षीत्। अरौक्ताम्। अरौक्षुः। रुरुक्षति। रोरुक्ष्यते। रोरोक्ति। रोजयति। अरूरुजत्। रुज, चु, प। हिंसा। रोजयति, न रोजयति यः कश्चित्, कवि १९६। रुक्ता। रुग्नः। रोगः। रुजा। रोगी। धर्मारण्यं विरुजति गजः, शुक्र १, २१७। विरुग्नोद्यधाराग्रः कुलिशः, भ ५, २५।

रुट्—रुठ, भ्वा, आ। १ प्रतिघातः।

शोकादिना पतनम्। पुनर्हननम्। दुर्गा। २दीप्तिः, वो। रुट् (रुष्, चु, प। १रोषः। २दीप्तिः, वो। रोटते। रोठते, वो। अरुटत्। अरोटिष्ट, पा १, ३, ८१। रोटयति। रुठ, भ्वा, प। परिभाषणम्। रुठ् (उठ्) भ्वा, प। उपघातः। रोठति।

रुण्ट्—'रुण्ड्' भ्वा, प। स्तेयम्।

रुण्ट्—(लुण्ठ्) रुण्ठ् (मुण्ठ्)।

रुद्—रुदिर्, अदा, प। रोदनम्। अश्रुविमोचनम्। अश्रुविमोचनमात्रेऽकर्मकः। आक्रान्तविशिष्टरोदने तु सकर्मकः। रोदिति, पा ७, २, ७६। रुदितः। रुदन्ति। हि, रुदिहि। रुद्यात्। अरोदत्, अरोदीत्, पा ७, ३, ९८, ९९। अरुदिताम्। अरुदन्। अरोदः। अरोदीः। अरोदाद्राक्षसानीकमरोदद्भुजां पतिः, भ १७, ४८। रुरोद। रुरुदतुः। रुरोदिथ। रोदिता। रोदिष्यति। अरुदत्, अरोदीत्। अरुदताम्। अरोदिष्टाम्। अरुदन्, अरोदिषुः। नामग्राहमरोदात् सा भ्रातरौ, भ ५, ५। व्रजाश्वसिहि मा रुदः, भ ४, ३८। भावे, रुद्यते। अरोदि। रुरुदिषति, पा १, २, ८। यङ् रोरुद्यते। रोरोत्ति। णिच् रोदयति। अरूरुदत्। रुदित्वा। ०रुद्य। रुदितः। रोदनम्। रुद्रः। अनु—शोकः। अलिपङ्क्तिर्गरुशोकामनुरोदितीव माम्, कु ४, १५। उपा—विलापः। शोकः। कुमुद्वतीमुपारुरोदेव तीरतरुः, भ २, ४। प्र—उच्चैरोदनम्। राक्षस्यः प्रारुदन्नुच्चैः, भ १७, ७१।

रुध्—दि, आ। अभिलाषः।

अयमनुपूर्वः प्रयुज्यते। रुधिर्, रु, उ। आवरणम्। रोधः। लट् अनुरुध्यते। अनुरुध्यस्व मा अनुगच्छन्तम्, वीर ६३। रुणद्धि, पा ३, १, ८८। रुन्धः। रुन्धन्ति। रुणत्सि। रुन्धे। रुन्धाते। रुन्धते। रुणद्धि रोदसी कीर्त्या स्वधर्ममनुरुध्यते, कवि १५३। रुणद्धि सवितुर्मार्गम्, भ ६, ३५। यादवाम्भोनिधीन् रुन्धे वेलेव भवतः क्षमा, मा १, ५८। लिङ् धानि। लङ् अरुणत्। अरुन्धाम्। अरुन्धन्। अरुणः। अरुणत्। अरुन्धम्। अरुन्ध। अरुन्धाताम्। अरुन्धत। अरुन्ध किल स्त्री बल्लभस्य करमात्मकराभ्याम्, मा १०, ६०। लिट् रुरोध। रुरोधिथ। रुरुधे। तमुद्वहन्तं पथि भोजकन्यां रुरोध राजन्यगणः, र ७, ३५। लुट् रोद्धा। लृट् रोत्स्यति। ०ते। नानुरोत्स्ये जगन्नाथम् (कामयिष्ये), भ १६, २३। आशिषि, रुध्यात्। रुत्सीष्ट। लुङ् अरुधत्। अरौत्सीत्। अरौद्धाम्। अरौत्सुः। अरुद्ध। अरुत्साताम्। अरुत्सत। अरौत्सीत् स पुरीमिमाम्, मा २, ३८। पुरं नः परितोऽरुधत्, भ १५, १०। कर्मणि, रुध्यते। अरोधि। सन् रुरुत्सति। ०ते। यङ् रोरुध्यते। रोरोद्धि। णिच् रोधयति। अरूरुधत्। रुद्ध्वा। ०रुध्य। रुद्धः। रोधनम्। राधः। रोद्धा। रोद्धव्यम्। अनु—अनुवर्त्तनम्। अनुरोधोऽनुवर्त्तनमित्यमरः। यमनुरुध्यन्ते भवन्तोऽपि, अनर्घ ९। अव—अवरोधः। अवरुणद्धि गां व्रजम्, पा १, ४, ५१। शोकं चित्तमवारुधत्, भ ६, ८। आ—आवरणम्। बन्धुता शुचमारुणत्, भ १७, ४९। उप—निर्बन्धः। निवारणम्। निषेधः। आच्छादनम्। नाऽनैरन्यानुपरुरोध ४, ८३। रेणुरुपरुरोध सूर्य्यम्, र ७, ३९। त्वामुपरोद्धुं नाभ्युत्सहे, र ५, २२। नि—निरोधः। नियमनम्। न्यरुन्धन्नस्य पन्थानम्, भ १७, ४९। प्रति—प्रतिरोधः। वि—विरोधः। अनैक्यम्। श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी, स्मृतिः। सम्—प्रतिबन्धः। निय-

रुप्—(युपु) दि, प। विमोहनम्।

रुश्—तु, प। हिंसनम्।

रुशति। रुरोश। रोष्टा। रोक्ष्यति। अरुक्षत्। रुरुक्षति। रोरुश्यते। रोरोष्टि।

रुंग्—रुगि (अजि) चु, प। दीप्तिः। रुंगयति। रुंगति।

रुष्—(रुष) भ्वा, प। हिंसा।

रुष्, दि, चु, प। रोषः। क्रोधः। रोषति। रुष्यति, यस्मै रुष्यति तस्यामी कुलमेवाभिरोषति, कवि ८६। ततो ऽरुष्यदनर्दच्च रावणिः, भ १७, ४०। रुरोष। रुरुषतुः। रोषिता, रोष्टा, पा ७, २, ४८। रोषिष्यति। अरोषीत्। दि, अरुषत्। मा रुषोऽधुना, भ १५, १६। योऽहं सोऽप्यरुषच्छत्रोः, भ १५, ५२। रुरुषिषति। रुरो०। रोरुष्यते। रोरोष्टि। रोषयति। अरूरुषत्। रोषित्वा, रुषित्वा। ०रुष्य। रुषितः। रुष्टः, पा ७, २, २८। रोषणम्। रोषः। रुट्।

रुह्—भ्वा, प। १ बीजजन्म।

उत्पत्तिः। २ प्रादुर्भावः। स्फूर्त्तिः। रोहति। यादृशमुप्यते बीजं तादृग् रोहति, मनु ६, ३६। रुरोह। रुरुहतुः। रुरोहिथ। रोढा। रोक्ष्यति। अरुक्षत्। भावे, रुह्यते। अरोहि। रुरुक्षति। रोरुह्यते। रोरोढि। रोहयति। रोपयति, पा ७, १, ४३। अहल्येषु देशेषु वृक्षानरोपयन्, रामा। रूढ्वा। ०रुह्य। रूढः। रूढिः। रोहणम्। रोहः। रोढ्यम्। रोहणीयम्। अधि, आ—आरोहणम्। रथवरमधिरुह्य, भ ५, १०८। शैलमारुरोहाश्वसाधनः, र ४, ७४। (णिच्) आरोपणम्। आसञ्जनम्। धनूंष्यारोपयाञ्चक्रुराकरुरुक्ष रथादिषु, भ १४, ८। अव—अवतरणम्। तामवारोहयत् पत्नीम्, र १, ५५। प्र—उत्पत्तिः। न पर्वतायैः नलिनी प्ररोहति, मृच्छ १२३। प्रति—णिच् प्रतिरोपणम्। शत्रूनुद्धृत्य प्रतिरोपयन्, र १७, ४२। उत्खातान् प्रतिरोपयन्, नवरत्नम् ९। वि, सम्—जननम्। विरूढशष्पं गह्वरम्, र २, २६। प्रेमद्रुमाः संरुरुहुः, भ ११, ५।

रूक्ष्—अदन्तः। चु, प। पारुष्यम्। अस्निग्धीभावः। रूक्षयति केशः, दुर्गा।

रूप—अदन्तः। चु, प। रूपकरणम्। रूपदर्शनम्। रूपयति। अनु—अनुकरणम्। नि—निरूपणम्। स्वरूपकथनम्। निर्णयः। निश्चयः। दर्शनम्। अथ दायभागो निरूप्यते, दायभा २। न च रामं न्यरूपयत्, भ १७, ६५। इतस्ततो निरूपयद्भिः शावकाक्षीणि प्राप्तानि, हितो। वि—विरूपकरणम्।

रूष्—भ्वा, प। भूषणम्।

रूषति। रूष, अदन्तः। चु, प, वो। विस्फुरणम्। रूषयति। अरूरूषत्। रेणुरूषितः।

रेक्—रेक्क, भ्वा, आ। शङ्का।

रेज्—रेजृ (एजृ) भ्वा, आ। दीप्तिः।

रेट्—रेटृ, भ्वा, उ। कथनयाचनयोः।

रेप्—(मेपृ) भ्वा, आ। गतिशब्दयोः।

रेभ्—रेभृ, भ्वा, आ। शब्दः।

रेव्—'रेवृ' भ्वा, आ। प्लुतगतिः।

रेष्—रेषृ—भ्वा, आ, वो।
ह्रेकशब्दः। अव्यक्तशब्दः, वो। रेषते।
रै—भ्वा, प। शब्दः।
रायति। ररौ। ररतुः। राता।
रोड्—रौड्—रौट्—रोडृ,
भ्वा, प। १उन्मादः। २अनादरः, वो।
रोडति। रौडृ, रौटृ, वो। भ्वा, प।
अनादरः। रौडति। रौटति।

(ल)

लक्—चु, प। आस्वादनम्।
लक्ष्—चु, उ, वो। १दर्शनम्।
ज्ञानम्। २अङ्कनम्। चिह्नीकरणम्।
लक्ष् (श्रम) चु, आ। आलोचनम्।
लक्षयति। ०ते। चरितान्यस्य लक्षय,
भारत। अङ्गैर्लक्षैश्च तां गा लक्षयामास,
भारत। न चोभावप्यलक्ष्येताम्, भ
१७, १०६। लक्षयित्वा। ०लक्ष्य।
लक्षितः। लक्षणम्। लक्षणा। लक्षः।
लक्ष्यः। आ—आलोकनम्। ज्ञानम्।
मदनज्वानेयमालक्ष्यते, शकु ३, ४९।
उप—ज्ञानम्। अनुभवः। सम्यगुप-
लक्षितं भवत्या, शकु, १,१८३। (विशे-
षणम्) केशैरुपलक्षितः। (लक्षणया
बोधः) काकेभ्यो रक्ष्यतामन्नमित्यादौ
दध्युपघातकर्तृत्वेन ध्वादिरुपलक्ष्यते।
वि—विस्मयः विलक्षितस्मितसुधा-
मुग्धाननः, गीतगो २, १९। सम्—
सम्यग्दृष्टिः। परीक्षा। हेम्नः संल-
क्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा,
र १, १०।

लख्—लङ्ख्, लाङ्ख्, भ्वा, प। गतिः।
लग्—लगे, भ्वा, प। सङ्गः।
मेलनम्। लगति। हंसस्य पश्चाल्लगति
स्म, नै ३, ८। ललाग। लेगतुः। ल-
गिता। (ए) अलगीत्। लगयति, घ-
टादिः। लग्, चु, प, वो। १ स्वादः।
२ प्राप्तिः। क्त, लग्नः संयुक्ते। अन्यत्र
लगितः।

लङ्—लगि, (अगि) भ्वा, प।
१ गतिः। २ खञ्जः, वो। लङ्गति।
ललङ्ग। लङ्गिता।

लङ्घ्—लघि, भ्वा, प। १ शोषणम्।
अल्पीकरणम्। २ गतिः, दुर्गा। लघि,
भ्वा, आ। १गतिः। लङ्घनम्। २भोजन-
निवृत्तिः। उपवासः। लङ्घति। ०ते।
न लङ्घति गुरोराज्ञां न लङ्घयति
यः स्थितिम्। यं व्याधिरतिदोषाग्निं
कदाचिच्च न लङ्घति॥ कवि ६७।
ललङ्घ। ०ङ्घे। लङ्घिता। अलङ्घीत्।
अलङ्घिष्ट। अन्ये त्वलङ्घिषुः शैलान्,
भ १५, ३२। लिलङ्घिषति। ०ते।
लालङ्घ्यते। लालङ्घ्यधि। अघि (कुप)
चु, प। १लङ्घनम्। २ दोषः। लङ्घ-
यति। अललङ्घत्। गिरिमलङ्घयत्, र
४,५२। यशो भवद्गुरुर्लङ्घयितुं ममो-
द्यतः, र ३, ४८। उद् ।—उल्लङ्घ-
नम्। हेलोल्लङ्घितवाहिनीपतिः। व्यल-
ङ्घ्यं गोष्पदवत् समुद्रम्, महाना ५,
६९, ७३।

लच् (लञ्च्)।
लज्—लज्ज्, ओलजी, ओलस्जी।
तु, (भ्वा, वो), आ। लज्जा। व्रीड़ा।
लजते। लज्जते। लज्जते न रसना तव,

नै ५, ११७। लेजे। ललज्जे। लेजिरेऽन्ये पराजिताः, भ १४, १०५। लज्जिता। लज्जिता। अलज्जिष्ट। अलज्जिष्ट। लाजयति। लज्जयति। लज् (जल) चु, प। अपवारणम्। लाजयति। लज्जित्वा। ०लज्जा। लग्नः। लज्जितमिति लज्जाशब्दात्तारकादित्वादितच्। विगलितलज्जितेति जयदेवकविप्रयोगस्तु दुःसाध्यः, गीतगो १, ३२। जीविताशौति लज्जितेति रघौ १२, ७५। कर्तरि क्त इति मल्लिनाथोक्तमपि चिन्त्यम्। सा चौरकण्ठं तं वत्सं लज्जयन्तो न लज्जिता, वीर ६६। लज्जा।

लज्—लञ्ज, लजि, भ्वा, प।

१भर्जनम्। २भर्त्सनम्, वो। लजति। लञ्जति। लजि (कुप) चु, प। दीप्तिः। लञ्जयति। लज, लञ्ज, अदन्तौ। चु, प। दीप्तिः। लजयति। लञ्जयति।

लट्—भ्वा, प। १ बाल्यम्।

व्यामोहः। २ कथनम्। लटति। लाटः।

लड्—भ्वा, प। विलासः।

लडति। डलयोरैक्यस्मरणात् ललति इति स्वाम्यादयः, कौ ५५। विललन्ति धनैस्तृप्ताः, कवि १८५। ललाड। लडिता। अलडीत्, अलाडीत्। णिच् लडयति जिह्वाम्। जिह्वोन्मथने घटादिः। उन्मथनं ज्ञापनम्। जिह्वा शब्देन षष्ठीतत्पुरुषः, तृतीयातत्पुरुषो वा, लडयति जिह्वया, कौ ८५। वोपदेवमते, लड, भ्वा, प। १ पीडितीभावः। २ उत्क्षिप्तीभावः। ३ जिह्वाव्यापारः। लडति लता वायुना। लडति जिह्वा। लडति जिह्वां सर्पः दुर्गा। णिच् लडयति। लडयति त्वच मुल्लटत्यसून् (पीड़यति)। कपाटघ्नो मिन्दुः किरणलहरीमुल्लडयति (उत्क्षिपति), अनर्घ ५१। कैलासगिरिमुल्लडयति (चालयति), अनर्घ १७०। तावत् खरः प्रखरमुल्लडयाञ्चकार (उत्पपात, मा ५, ७। लड्, चु, प। १ उपसेवा। अत्यन्तपालनम्। लालनम्। २ कम्पनम्। लाड़यति। लालयति। लालयत्यखिलाः प्रजाः, कवि १०३। लालयेत् पञ्चवर्षाणि पुत्रम्। बालकमुपलालयन्, शकु ७, ८९। लड्, चु, आ। १ ईप्सा। २ लाभः। लाडयते। लड, लाड, अदन्तौ। चु, प। आक्षेपः। लडयति। लाडयति।

लण्ड्—लडि। (ओलडि) चु, प।

उत्क्षेपणम्। लण्डयति। लण्डति। (ओ) लण्डितः। लण्ड्णः, दुर्गा। लडि, चु, प, वो। कथनम्। लण्डयति। लण्डति।

लप्—(रप) भ्वा, प। कथनम्।

लपति, लपति स्निग्धया वाचा, कवि १८४। लप रे, शकु ५, ८। ललाप। लेपतुः। लेपिथ। लपिता। लपिष्यति। अलपीत्, अलापीत्। अलापिष्टाम्। अलापिषुः। लिलपिषति। लालप्यते। लालप्ति। लापयति। अलीलपत्, अललापत्, दुर्गा। लपित्वा। ०लप्य। लपितः। लपनम्। अनु—मृदुर्भाषणम्। अप—अपलापः। अपह्नवः। अपललाप पाण्डुताम्, नै १, १५। अभि—अभिलापः। मनसा सङ्कल्पयति वाचोऽभिलपति, स्मृतिः।

आ—आलापः। प्र—प्रलापः। प्रलपत्येष वैधेयः, शकु २, ३८। वि—विलापः। परिदेवनम्। पत्नी विलपति करुणम्, रत्ना १, ७। बन्धूवं विललाप सः, भ ६, ११। १४, १०१। सम्—मिथोभाषणम्।

लभ्—डुलभष्, भ्वा, आ। प्राप्तिः।

लाभः। लभते, लभतेऽर्थं ततो भूमिम, कवि २०८। पुत्रं लभस्वात्मगुणानुरूपम्, र ५.३४। लेभे। लब्धा। लप्स्यते। लप्सीष्ट। अलब्ध। अलप्साताम्। अलप्सत। सोऽलब्ध ब्रह्मणः शस्त्रम् भ १५.८६। कर्मणि, लभ्यते। अलम्भि, अलाभि, पा ७, १, ६८। सन् लिप्सते, पा ७, ४, ५४। क्षतां लिप्सामहे, भ ७, ८८। यङ् लालभ्यते। लालभीति, पा, ७, १, ६४। लालब्धि। लम्भयति। अललम्भत्। कर्मणि, अलम्भि, अलाभि, पा ७, १, ६८। लब्ध्वा। ०लभ्य। लब्धः। लब्धिः। लम्भनम्। लाभः। आलम्भः। विप्रलम्भः। सुलभः। लभ्यः। आलभ्यः। (डु) लबृम्भिमः। (ष्)लभा। णिच्, लम्भयित्वा। लम्भितः। लम्भनम्। आ—स्पर्शः। हिंसा। गामालभ्य विशुध्यति, मनु ११, २०२। गावश्चालेभिरे भटः, भ १४, ८१। गामालभेत। आलभ्या गौः, पा ७, १, ६५। उपा—भर्त्सनम्। उच्चैरुपालब्ध स केकयीम्, भ ३, ३०। समा—स्पर्शः। अनुलेपनम्। समालेभे (अनुलेपनं क्षतम्), भ १४, ८२। उप—लाभः। उपलब्धिः। अनुभवः। न चोपलेभे वणिजां पणाया, भ ३, २७। उपलभ्या विद्या, पा ७, १, ६६। विप्र—विप्र-

लम्ब्—लबि (अवि) भ्वा, आ। १ शब्दः।

२ अवस्रंसनम्। लम्बनम्। लम्बते। ललम्बे। लम्बिता। लम्बिष्यते। अलम्बिष्ट। अलम्बिषाताम्। अलम्बिषत। लिलम्बिषते। लालम्ब्यते। लालम्प्यति। लम्बयति। अललम्बत्। को लम्बयेदाहरणाय हस्तम्, र ६, ७५। लम्बित्वा। ०लम्ब्य। लम्बितः। लम्बनम्। अव—अवलम्बनम्। आश्रयः। ययौ तदीयामवलम्ब्य चाङ्गुलिम्, र ३, २५। जनस्त्वामवलम्बते, भ १८, ४१। आ—आलम्बनम्। आश्रयः। आदानम्। आललम्बे महास्त्राणि, भ १४, ८५। नालम्बते दैष्टिकताम्, मा २, ८६। वि—विलम्बः। विलम्बते, विड्म्बते। प्रभातकल्पां रजनीं व्यड्म्बयत् (अनुचकार), इति प्रदीपः। विड्म्बयन्तं शितिवाससस्तनुम्, भा १, ६।

लभ्—लभि, भ्वा, आ, वो। शब्दः।

लय्—(रय) भ्वा, आ। गतिः।

लर्ब् (अर्ब्) भ्वा, प। गतिः।

लल्—चु, आ। लल, अदन्तः।

चु, प, वो। ईप्सा। प्रामुमिच्छा। लालयते। ललयति। लल् (लड्)।

लश्, लष् (लस्)।

लष्—भ्वा, उ। १ कान्तिः। २ इच्छा। स्पृहा। लषति। ०ते। लषति। ०ते पा ३,१,७०। ललाष। लेषे। लषिता लषिष्यति। ०ते। अलाषीत्, अलषीत् अलषिष्ट। लिलाषिषति। ०ते लालष्यते। लालष्टि। लाषयति। अलौ लषत्। लषित्वा। लषितः। अभि-

अभिलाषः। कामना। अभिलष्यति साधूनामुदयं सर्वतोदयः। साधुलोकोऽपि निःसीमं तस्याभिलषते प्रियम्॥ कवि २२५। तेन दत्तमभिलेषुरङ्गना मुखासवम्, र १९, १२। भा ९, ५१।

लस्—भ्वा, प। १ श्लेषणम्।

२ क्रीड़ा। लसति। ललास। लेसतुः। लसिष्यति। अलसीत्, अलासीत्। लस्, लश् लष्, चु, प। शिल्पयोगः। लास्यम्। लासयति। लासयन्ति रसाभिज्ञा यस्याग्रे भरतोपमाः, कवि १८५। लाशयति, लाषयति, (वो)। लसित्वा। लसितः। उद्—उल्लासः। हर्षः। स्फूर्त्तिः। णिच्—उत्तोलनम्। उल्लास्य कालकरवालम्। परस्परोल्लासितशस्त्रपल्लवे, न १, ६८। वि—विलासः। क्रीड़ा। स्फूर्त्तिः। विलसति हंसो, छन्दो २२, १। इतस्ततो विलसन्ति मणिसानुरागाः (प्रसरन्ति), मा ४, २७। प्रेम विलसति, मा १५, १४। विलासः। विलासी।

ला—अदा, प। १ दानम्।

२ ग्रहणम्। लाति। लालौ। ललुः खड्गान्, भ १४, २२। लाता। लास्यति। अलासीत्। अलासिष्टाम्। वियद्गतां शशिमलासीत्, भ १५, ५३।

लाख्—(द्राख्) लाघ् (द्राघ्)।

लाज्—लाञ्ज्, लाजि, भ्वा, प।

१ भर्ज्जनम्। २भर्जनम्। पाकविशेषः। लाजति। लाञ्जति। लाजाः।

लाञ्छ्—लाछि (लछ) भ्वा, प।

लक्षणम्। चिह्नीकरणम्। लाञ्छति। ललाञ्छ। ललाञ्छतुः। लाञ्छितम्। लाञ्छनम्।

लाड् (लड्)।

लाभ—अदन्तः। चु, प। प्रेरणम्।

लिख्—तु, प। अक्षरविन्यासः। लेखनम्। चित्रीकरणम्। लट् लिखति। लिखति यदि शारदा सर्वकालमिति पुष्यदन्तः। लिखाधिलीलागृहभित्तिकावपि, नै १, ३८। लिट् लिलेख। लिलिखतुः। लिलेखिथ। लिलिखिव। लिलेख भैमी नखलेखनीभिः, नै ६, ६२। लुट् लेखिता। लृट् लेखिष्यति। लिखिष्यतीति संचिन्यसारे। लुङ् अलेखीत्। अलेखिष्टाम्। अलेखिषुः। मूर्ध्ना दिवमिवालेखीत्, भ १५, २२। कर्मणि लिख्यते। अलेखि। सन् लिलिखिषति, लिलेखिषति। पा १, २, २६। यङ् लेलिख्यते। णिच् लेखयति। अलीलिखत्। लिखित्वा, लेखित्वा। °लिख्य। लिखितः। लेखनम, लिखनम्। लेखः। लेखकः। लिखितव्यम्, लिखनीयम्, लेखनीयम्। लिख्यम्, लेख्यम्। अयं विभाषया कुटादिः, दुर्गा। टनादौ बहुलमिति पद्मनाभः। अभि, आ—कर्षणम्। चित्रीकरणम्। हृदयवल्लभोऽभिलिख्य रतिपतिव्यपदेशेनापकृतः, रत्ना २, ८८। रतिव्यपदेशेन सागरिकामालिखति, रत्ना २, २६। उद्—उल्लेखः। कर्षणम्। भेदः। अभिलापः। शिलाः खुराग्रैः समुल्लिखन्, कु १, ५७। मासपक्षतिथीनामुल्लेखनमकुर्वाणो न फलभाग् भवेत्, स्मृतिः। वि—विलेखनम्। कर्षणम्। चित्रीकरणम्। पादेन विलिलेख पीठम्, र ६, १५। काक-

स्तस्योपरि स्थित्वा चक्षा किमपि विलिखतु, हितो।

लिङ्*—लिखि, भा, प, वो। गतिः।

लिङ्—लिगि (अगि) भ्वा, प।

गतिः। लिगि, चु, प। चित्रीकरणम्। लिङ्क्यति। लिङ्कति। लिङ्क्यति शब्दं स्त्रीपुंनपुंसकैः शाब्दिकः, दुर्गा। आ—आलिङ्गनम्। लक्ष्मीमालिङ्कति स्नेहाद्यः। आलिङ्क्यति रत्नांशुजालैश्च मणिकुट्टिमम्, कवि २४१। आलिलिङ्गयौवितः, भ १४, १२।

लिप्—तु, उ। उपदेहः। वृद्धिः।

लेपनम्। लिम्पति। ०ते, पा ७, १, ६८। लिम्पतीव तमोऽङ्गानि, मृच्छ २७। रम्यैर्लिम्पेत वर्णकैस्तम्, भ १८, ११। न मां कर्माणि लिम्पन्ति, गी ४, ४। लिलेप। लिलिपतुः। लिलिपे। चन्दनेन लिलेप सः, भ १४, ८४। लेप्ता। लेप्स्यति। ०ते। लिप्यात्। लिप्सीष्ट। अलिपत्। अलिपत। अलिप्त, पा ३, १५३, ५४। अलिपेताम् अलिप्साताम्। अलिपन्त। अलिप्सत। तस्यालिपत शोकाग्निः स्वान्तं काष्टमिव ज्वलन्। अलिप्तेवानिलः शीतः, भ ६, २२। कर्मणि, लिप्यते। अलेपि। लिप्यते न स पापेन, गी ५, ८। लिलिप्सति। ०ते। लेलिप्यते। लेलेप्ति। लेपयति। अलीलिपत्। लिप्ता। ०लिप्य। लिप्तः। लेपनम्। लेपः। लेप्तुम्। अव—अवलेपः। गर्वः। भार्गव अति हि नामावलिप्यते, वीर ४१। आ, उप, वि—लेपनम्। ओषधीभिः शरीरमालिपन्, भ १५, १०८। शुचिं देशं गोमयेनोपलेपयेत्, मनु ५, २०६। व्यलिपन्न गन्धैः, भ ३, २०।

लिश्—दि, का। अल्पीभावः।

लिश्, तु, प। गतिः। लिश्यते। लिशति। लिलेश। लिलिशे। लेष्टा। लेक्ष्यति। ०ते। लिश्यात्। लिक्षीष्ट। अलिक्षत्। अलिक्षत। अलिक्षाताम्। लिलिक्षति। ०ते। लेलिश्यते। लेलेष्टि। लेशयति। अलीलिशत्। लेशः।

लिह्—अदा, उ। आस्वादनम्।

लेहनम्। लट् लेढि। लीढः। लिहन्ति। लीढे। लिक्षे। लीढ्वे। लेढि मेषजवच्चित्यं कः पथ्यानि, भ १८, ७। लोट् लेढु। लीढि। लेहानि। लीढाम्। लिङ् लिह्यात्। लिहीत। श्वा लिह्याद्धविः, मनु ७, २१। लङ् अलेट्। अलीढ। लिट् लिलेह। लिलिहे। लुट् लेढा। लृट् लेक्ष्यति। ०ते। आशिषि, लिह्यात्। लिक्षीष्ट। लुङ् अलिक्षत्। अलिक्षत। अलीढ। अलिक्षाताम्। अलिक्षन्त। अलिक्षावहि। मन् लिलिक्षति। ०ते। यङ् लेलिह्यते। लेलेढि। णिच् लेहयति। अलीलिहत्। लीढ्वा। ०लिह्य। लोढः। लेहनम्। लेहः। लेह्यः। लेढव्यः। लिट्। अव—अवलेहनम्। आ—वेधनम्। सेनान्यमालीढलिवासुरास्त्रैः, र २, २७।

ली—लीङ्, दि, आ। ली, क्रया, प।

श्लेषणम्। लीनभावः। लट् लीयते। लिनाति। लिनाति धर्म एवासौ नेन्द्रियार्थेषु लीयते, कवि २६०। उत्थाय हृदि लीयन्ते दरिद्राणां मनोरथाः,

ह्रितो। लिट् ललौ। लिलाय, पा ६, १, ५१। लिल्यतुः। लिलयिथ, लिलेथ, आत्वे ललिथ, ललाथ। लिल्ये। लुट् लेता, लाता। लृट् लेष्यति। ०ते। लास्यति। ०ते। आशिषि, लीयात्। लेषीष्ट, लासीष्ट। लुङ् अलैषीत्। अलासीत्। अलेष्टाम्। अलासिष्टाम्। अलेषुः। अलासिषुः। अलेष्ट। अलास्त। अलेषाताम्, अलासाताम्। अलेषत, अलासत। भावे, लीयते। अलायि। ध्वाङ्क्षैः शिरसि लीयते, भ १८, १३। सन् लिलीषति। ०ते। यङ् लेलीयते। लेलयीति। लेलेति। णिच् (स्नेहद्रवे) विलीनयति विलाययति विलालयति विलापयति वा घृतम्। लौहं विलापयति। जतु विलाययति, कौ १८४। पा ७, ३, ३९। पूजाभिभववञ्चनेषु आत्मनेपदम्, पा १, ३, ७। जटाभिर्लापयते (पूजामधिगच्छति)। श्येनो वर्त्तिकामुल्लापयते (अभिभवति)। बालकमुल्लापयते (वञ्चयति)। लौ, च्, प। द्रवीकरणम्। लाययति। लयति। विलयत्यवलानाञ्च हृदयं मदनव्यथा, कवि १८६। लेता। लेष्यति। लीत्वा। ०लाय, ०लीय। लीनः। लयनम्, लानम्। लयः, लायः। लेतुम्, लातुम्। लेता, लाता। लेतव्यम्, लातव्यम्। अप—न्यग्भावनम्। न्यक्करणम। अपलापयमानः शत्रून्, भ ८, ४४। उद् (णिच् का) प्रतारणम्। अभिभवः। पूजा। नि—पतनम्। निलिल्ये मूर्ध्नि गजोऽस्य, भ १४, ७६। प्र—अदर्शनम् सह मेघेन तडित् प्रलीयते, कु ४, ३३। वि—प्रणाशः। श्लेषणम्। न भुवि व्यलीयत (नातिष्ठत्), मा १, १२। [illegible]। द्रवीकरणम।

लुञ्च्—लुन्च्, लुन्चु, भ्वा, प।

अपनयनम्। अपकारणम्। उत्पाटनम्। लुञ्चति। लुलुञ्च। केशान् लुलुञ्चुः, भ ३, २२। लुञ्चिता। लुञ्चिष्यति। अलुञ्चीत्। अलुञ्चिष्टाम्। अलुञ्चीत् कर्णनासिकम्, भ १५, ५७। लुञ्चित्वा, लुञ्चित्वा, पा १, २, २। लुञ्चितः। लुक्।

लुञ्ज्—लुजि (कुप) चु, प। दीप्तिः।

लुञ्जयति। लुजि, चु, प। (तुजि)।

लुट्—भ्वा, दि, प। १ विलोड़नम्। लोटनम्। सम्बन्धीभावः, वो। लुट् (रुट) भ्वा, आ। १प्रतिघातः। १दीप्तिः, वो। लोटति। ०ते। लुठ्यति। लुठ्यन्ति भूमौ, भ १८, ११। लुठ्यन् सशोको भुवि, भ ३, ३२। लुलाट। लुलुटे। लोटिता। लोटिष्यति। ०ते। अलोटीत्। अलुटत्। अलोटिष्ट। दि, अलुटत्। लुट् (कुप) चु, प। दीप्तिः। लुट्, चु, प। सञ्चूर्णनम्। लोटयति। अलूलुटत्। लुठ्यत्यट्टालकान् दुर्गान् कवचानि च लोटति। रिपूणां लोटयत्याजौ कुञ्जराणां घटाञ्च यः॥ कवि १०७।

लुठ्—(उठ्) भ्वा, प। उपघातः।

लुठ् (रुठ) भ्वा, आ। प्रतिघातः। पतनम्। विचेष्टनम्। लोठति। ०ते। क्वचित् कार्य्ये न लोठति, कवि ४६। लुलोठ। लुलुठे, लुलुठे पुष्पकोदरे, भ १४, ५४, ३०। लोठिता। लोठिष्यति। ०ते। लुठ्यात्। लोठिषीष्ट अलोठीत्। अलुठत्। अलोठिष्ट, अलोठिष्ठ भूपृष्ठे, भ १५, ५६। अस्य रंहस शाखिनोऽलुठन्, भ १५, २५

लुठ्, तु, प। संश्लेषणम्। सम्बन्धीभावः, दुर्गा। लुठति। मणिर्लुठति पादेषु, हितो। हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले, दर्पणः। लुलोठ। लुलुठिथ। लुठिता। लुठिष्यति। अलुठीत्। अलुठिष्टाम्। अलुठिषुः। लुठ्, वु, प, वो। चौर्य्यम्। लोठयति।

लुड्—भ्वा, प। विलोडनम्।

मन्थनम्। लोडति। लुड्, तु, प, वो। १ संवरणम्। २ श्लेषः। लुडति। लुडिता।

लुण्ट्—लुटि (रुटि) भ्वा, प।

स्तेयम्। लुण्टति। लुण्ट्, चु, प, वो। १अवज्ञा। २चौर्य्यम्। लुण्टयति। लुण्टति। दन्त्यनकारप्रकृतिः। टयोगान्मूर्द्धन्यः। तेन भ्वादिपक्षे यगादौ तल्लोपे लुण्यते इति दुर्गादासः।

लुण्ठ्—लुण्ठ्, लुठि, लुडि (रुठ) भ्वा, प। १स्तेयम्। २गतिः। लुठि, भ्वा, प। १आलस्यम्। २प्रतिघातः। लुण्ठति। लुण्डति। लुण्ठ्, लुण्ड्, चु, प। स्तेयम्। यो लुण्ठति परद्रव्यं तच्छिरो लुण्ठयत्यसौ, कवि ४६। लुण्ठयति, कौ १७२। लुण्डयति।

लुन्थ्—लुथि (क्रुथि) भ्वा, प।

१ हिंसा। २ संक्लेशनम्। लुन्थति लुन्थिता।

लुप्—लुपु (युपु) दि, प।

विमोहनम्। व्याकुलीकरणम्। आलोभावः, दुर्गा। लुप्यति। पातुं लुप्यति लावण्यं नेत्राञ्जनपुटेन यः, कवि १७३। लुलोप। लोपिता। लोपिष्यति। तु, उ। छेदनम्। उच्छेदनम्। लोपः। लुम्पति। °ते, पा ७, ४, ५९। यो न लुम्पति पूर्वेषां स्थितिम्, कवि १७३। लुलोप। लुलुपे। लोप्ता। लोप्स्यति। °ते। लुप्यात्। लुप्सीष्ट। अलुपत्। अलुप्त। अलुप्साताम्। अलुप्सत। कर्मणि, लुप्यते। अलोपि। तस्य भागो न लुप्यते, मनु ९, २, ११। तेषामेकः शिष्यते अन्ये लुप्यन्ते, पा १, २, ६१। लुलुप्सति। °ते। यङ् (भावगर्हायाम्) लोलुप्यते, पा ३, १, ३४। लोलोप्ति। लोपयति। अललुपत्, अलुलोपत्। लुप्त्वा। °लुप्य। लुप्तः। लोपः। लोप्तव्यम्। लोप्तुम्। मांमान्योष्ठावलोप्यानि, भ ५, १४। युवधैर्य्यलोपिनं गुणोत्करमशृणोत्, नै १, ४२।

लुभ्—भ्वा, दि, प गार्ध्यम्।

आकाङ्क्षा। लोभः। लुभ्, तु, प। विमोहनम्। आकुलीकरणम्। भ्वादेराकृतिगणत्वात्। लोभति इत्यप्याहुः, कौ १४३। लोभति। लुभ्यति। लुभति। लुभत्यर्थे च कामे च धर्मे लुभ्यति यः सदा, कवि २६५। लुलोभ। लुलुभतुः। लुलोभिथ। लुलुभिव। तथापि रामो लुलुभे न गायाम्, महाना। लोब्धा, लोभिता, पा ७, २, ४८। लोभिष्यति। अलोभीत्। अलोभिष्टाम्। अलोभिषुः। दि, अलुभत्। लुलुभिषति, लुलो°। लोलुभ्यते। लोलोब्धि। लोभयति। अलूलुभत्। (विमोहने) लुभित्वा, लोभित्वा। लुभितः। विलुभिताः केशाः, अन्यत्र लुब्ध्वा, लुभित्वा, लोभित्वा। लुब्धः। लुब्धवान्, पा, ७, २, ५४। लोभनम्। लोभः। लोभ्यम्, लोभि-

लोभितुम्। लोभी। लोचनलोभनीया शस्यपङ्क्तिः, भ २, १३। कुसुममिव लोभनीयं यौवनम्, शकु।

लुम्ब्—लुबि (तुबि) भ्वा, प।

अर्दनम्। लुबि (तुबि) चु, प। १अदर्शनम्। २अर्दनम्, वो। लुम्बति। लुम्बयति।

लुल्—(लुड्) भ्वा, प। विलोडनम्।

चलनम्। लोलति। रोषो लोलति स्म वचनेषु बधूनाम्, मा १०, ३६। क्त, लुलितम्। वनं लुलितपल्लवम्, भ ८, ५६। लुलिताङ्गरागः, र १६, ५८।

लुष्—भ्वा, प, वो। स्तेयम्।

लुह्—भ्वा, प, वो। लिप्सा।

लोहति। लुलोह। लोढा। अलुचत्।

लू—लङ्, क्रया, उ। छेदनम्।

लट् लुनाति, पा। लुनीतः। लुनन्ति। लुनीते। लुनाते। लुनते। लुनीहि चन्दनम्, मा १, ५। लिङ् लुनीयात्। लुनीत। लङ् अलुनात्। अलुनीत। शरासनज्या मलुनाद् विडौजसः, र ३, ५८। लिट् लुलाव। लुलविथ। लुलुवे। नासां तस्या लुलाव, भ ८, ८०। लुट् लविता। लृट् लविष्यति। ०ते। आशिषि, लूयात्। लविषीष्ट। लुङ् अलावीत्। अलाविष्टाम्। अलाविषुः। अलविष्ट। अलविषाताम्। अलविषत। लोकानलावीत्, भ २, ५३। कर्मणि, लूयते। अलावि। कर्मकर्त्तरि, अलावि। अलविष्ट केदारः स्वयमेव। सन् लुलूषति। ०ते। यङ् लोलूयते। लोलोति। णिच् लावयति। अलीलवत्, पा ७, ४, ८०। लिलावयिषति। लवित्वा। ०लूय। लूनः। लूनिः। लवनम्।

लष्—(रूष्) भ्वा, प। भूषणम्।

लूषति। लूष्, चु, प। १हिंसा। २स्तेयम्।

लेप्—लेष्ट (मेष्ट) भ्वा, आ। गतिः।

लैष्—(पैष)।

लोक्—लोक्ल, भ्वा, आ। दर्शनम्। लोकते। लुलोके। लोकिता। अलोकिष्ट। ओक्ल, चु, प। दीप्तिः। लोकयति। अलुलोकत्। अव, आ—आलोकनम्। आलोकन्ते यमबला नालोकयन्ति यस्य ताः, कवि २४८। अथालुलोके तपोवनम्, भ २, २४। आलोकयाञ्चक्रुरिवादरेण, भ २। वि—विलोकनम्। विलोकयन्त्यो वपुः (स्वार्थे णिच्), र २, ११।

लोच्—लोचृ, (लोक्ल) भ्वा, आ। दर्शनम्। पर्य्यालोचनम्। प्रणिधानम्। लोचते। लुलोचे। लोचिता। अलोचिष्ट। लोचृ (लोक्ल) चु, प। दीप्तिः। कथनमिति रमानाथः। लोचयति। अलुलोचत्, पा ७, ४, २। आ—आलोचनम्। आलोचते सदा नीतिमालोचयति सत्क्रियाम्, कवि २४८। इत्यालोच्य हिरण्यकविवरसमीपं गताः, हितो। आलोचयन्ती विस्तारमभ्रसाम्, भ ७, ४०। नृपः पूर्वं मवालुलोचे, भ १, २३। चेमङ्कराणि कार्य्याणि पर्य्यालोचयताम्, भ ६, १०५। सम्—समालोचनम्।

लोड्—लोट्—लोड्—(रोड्) भ्वा, प। उन्मादः। लोडति। लोटति। लोडति, वो।

लोष्ट्—(गोष्ट) भ्वा, आ। सङ्घातः। राशीकरणम्। लोष्टते। लुलोष्टे। लोष्ट्रम्।

ख्वी—ख्वी—क्या, प, वो। श्लेषणम्। ख्वीनानि। ख्विनाति।

ख्वी, क्या, प, वो।

गतिः। ख्विनाति। ख्वीनातीत्यपि।

(व)

वच्—भ्वा, प। १ कोपः। २ सङ्घातः।

वख्—वङ्ख्—वखि (उख) भ्वा, प। गतिः। वखति। ववखतुः। वङ्खति।

वङ्क—वकि, भ्वा, आ। १ कौटिल्यम्। वक्रीभावः। वक्रीकरणम्, दुर्गा। २गतिः, वो। वङ्कते। ववङ्के। अवङ्किष्ट।

वङ्ग—वगि (अगि) भ्वा, प। गतिः। खञ्जः, वो। वङ्गति। ववङ्ग। वङ्गिता।

वङ्घ्—वघि (अघि) भ्वा, आ। १गतिः। २ गत्यारम्भः। जवः, वो। ३ आक्षेपः। निन्दा। ४ आरम्भः। वङ्घते।

वच्—अदा, प। परिभाषणम्।

कथनम्। लट् वक्ति। वक्तः * * अयमन्तिपरो न प्रयुज्यते, बहुवचनपर इत्यन्ये। झिपर इत्यरुरे, कौ १२०। वक्ति अन्यवचनस्थानभिधानमाचष्टे इति प्रदीपः। वक्षि। वक्थः। वच्मि। हितं मित्रञ्च यो वक्ति, कवि ८४। लोट वक्तु। वक्ताम्। * * वग्धि। लिङ् वच्यात्। लङ् अवक्। अवक्ताम्। लिट् उवाच, पा ६, १, १७, ऊचतुः। ऊचुः। उवचिथ, उवक्थ। ऊचिव। उवाच दशमूर्द्धानं वचः, भ ५, ७६। लुट् वक्ता। लृट् वक्ष्यति। आशिषि, उच्यात्। लुङ् अवोचत्, पा ७, ४, २०। अवोचताम्, र ३, ४६। लिङादौ ब्रूधातोरात्मनेपदे, ऊचे। वक्ष्यते। वक्षीष्ट। कर्मणि, उच्यते। अवाचि। एतद्देवानां युगमुच्यते, मनु १, ७१। अहं युनाऽथ क्षितिपः शुभंयुरूचे वचः, १, २०। सन् विवक्षति। यङ् वावच्यते। वावक्ति। णिच् वाचयति। अवीवचत्। वच्, चु, प। परिभाषणम्। वाचनम्। पाठः। सन्देशः। स्वस्तिवाचनम्। वाचयति। वचति। न वचत्यनृतं वचः। नानादेशसमुद्भूतां वाचयत्यखिलां लिपिम्, कवि ८४। ववाच। ववांचतुः। वक्ता। अवाचीत्। अयं सेट् इति भट्टमल्लः। विप्रानवाचयन् (स्वस्तिवाचनं कारितवन्तः), भ १७, १। कथनीयमवीवचत्, भ ६, ४६। उक्ता। ०उच्य। उक्तः। उक्तिः। वचनः। वाक्। वक्तुम्। वक्तव्यम्। वचनीयम्। वाच्यम्। वक्ता। वाक्। वचः। ऊचिवान्। अनूचानः। णिच्, वाचयित्वा। ०वाच्य। वाचितः। वाचनम्। वाचकः। वाचयिता। अनु—अनुवादः। निर्—निरुक्तिः। व्याख्या। प्र—कथनम्। वर्णनम्। प्रति—प्रतिवचनम्।

वज्—भ्वा, प। गमनम्।

वजति। ववाज। ववजतुः। वेजतुरिति चान्द्राः। वजिता। अवजीत्, अवाजीत्। वज्, चु, प। १संस्करणम्। २ गतिः। पक्षादिना बाणसंस्कार इति प्राचः। मार्गणसंस्कारयोरिति केचित्। वाजयति पक्षैर्बाणं काण्डकारः, दुर्गा।

वञ्च्—वन्चु (चन्चु) भ्वा, प।

गतिः। वञ्चति। वञ्चन्ति च शरच्चन्द्रं शुचयो दिशु तद्गुणा, कवि १७८। ववञ्च। ववञ्चुराहवक्षितिम्, भ १४, ७४। वञ्चिता। वञ्चिष्यति। वञ्च्यात्।

अवञ्चीत्। अवञ्चिष्टाम्। विवञ्चिषति। वनीवच्यते, पा ७, ४, ८४। वनीवङ्क्ति। वनीवक्तः। वञ्चयति। अहिं वञ्चयति (परिहरति)। वन्चु, चु, आ। विप्रलम्भः। प्रतारणम्। वञ्चना। वञ्चयते। मूर्खास्त्वामववञ्चन्त, भ १५, १५। वचित्वा, वञ्चित्वा, पा १, २, २४। चिच् वञ्चयित्वा। वञ्चितः। वञ्चनम्। वञ्चना। वञ्चयितव्यम्। वञ्चनीयम्। न वञ्चनीयाः प्रभवोऽनुजीविभिः, भा १, ४। (उ) वञ्चित्वा, वञ्क्ता। वञ्क्तः।

वट्—भ्वा, प। वेष्टनम्।

वटति। ववाट। ववटतुः। वटिष्यति। अवटीत्, अवाटीत्। अयं वर्ग्यादिरपि। बटति। बेटतुः। बाटयति। परिभाषणे घटादिः, वटयति। वट अदन्तः (वण्ट)। वटः। वाटकः। वाटः। वटुः। वटिका।

वठ्—भ्वा, प। स्थौल्यम्। सामर्थ्यम्।

वण्—(अण) भ्वा, प। शब्दः।

वणति। ववाण। ववणतुः। अयं वर्ग्यादिरपि। बेणतुः। वणिता। अवणीत्, अवाणीत्। वाणयति। अवीवणत्, अववाणत्।

वण्ट्—वटि, भ्वा, चु, प।

विभाजनम्। वण्टनम्। वण्टति। वण्टन्ति हाटकं विप्राः, कवि ७८। वण्टयति, वो। वट, वटि वण्ट अदन्तौ। चु, प। विभाजनम्। वण्ठनम्। वट वेष्टनेऽपि, वो। वटयति। वण्ठयति। वण्टापयति। वण्टयन्ति च रत्नानि भूमिं वण्टापयन्ति च, कवि ७८। वटि, वठि, भ्वा, आ। ऐकचर्य्या। सहायं विना आचरणम्। असहायगमनम्। वण्टते, क्वौ ५२। वण्ठते।

वण्ड्—वडि, भ्वा, आ। १ वण्टनम्। २ वेष्टनम्। वण्डते। ववण्डे। वण्डिता। वडि, चु, प, वो। विभागः। वण्डयति।

वद्—भ्वा, प। कथनम्।

लट् वदति। सत्यं वदति सर्वत्र, कवि ८८। दीप्तिसान्त्वनज्ञानोत्साहविवादप्रार्थनासु आत्मनेपदम्, पा १, ३, ४७। शास्त्रे वदते (भासमानो ब्रवीति) (सम्यग्बोधपूर्वकं वदति)। क्षेत्रे वदते (उत्साहमाविष्करोति)। लिट् उवाद। उवदिथ। ऊदिव। ऊदे। लुट वदिष्यति। °ते। आशिषि, उद्यात्। वदिषीष्ट। लुङ् अवादीत्। अवादिष्टाम्। अवादिषुः, पा ७, २, ३। अवदिष्ट। अवदिषाताम्। अवदिषत। कर्मणि, उद्यते। अवादि। सन् विवदिषति। °ते। यङ् वावद्यते। वावत्ति। णिच् वादयति। °ते। अवीवदत्। °ते। (वादनम्) अवादयन् वेणुमृदङ्गकांस्यम्, भ ३, ३४। भेरीश्चावीवदन् शुभा, भ १५। ४। वादयते मृदुवेणुम्, गीतगो। वद्, चु, उ। आत्मनेपदीति केचित्। १सन्देशवचनम्। कथनम्, वा। वादयति। °ते। वदति। °ते। सर्वस्य वदते हितम्। यत्र सत्यं न च हितं न वादयति तद्वचः, कवि ८८। ववाद। ववदे। वदिता। वद्यात्। वदिषीष्ट। उदित्वा। °उद्य। उदितः। उक्तिः। वदनम्। वादः। वदः। वदितुम्। वदिता। वादी। वादकः। वाद्यम्। अवद्यम्। अच्छोद्यम्। मृषोद्यम्। प्रियंवदः। वावदूकः। अनु—अनुवादः। निरमङ्ग-

वदति शुकस्ते, र ५, ७४। अनुवदते कठः कालापस्य, पा १, ३, ४९। उक्तमनुवदति। घोषस्यान्ववदिष्टेव लङ्का पूतक्रतोः पुरः, भ ८, २९। अप—अपवादः। निन्दा। अपवदति। ०ते। अपवदते धनकामो न्यायम्, पा १, ३, ७३। नार्त्तोऽप्यपवदेत् विप्रान्, मनु ४, २७३। नृभ्योऽपवदमानस्य (कुप्यतः), भ ८, ४५। अभि—णिच् अभिवादनम्। पादग्रहणम्। प्रणामः। सर्वानभिवादये वः, शुक ५, ७२। उप—सान्त्वना। प्रार्थना। प्रलोभनम्। भृत्यानुपवदते [प्रार्थयते प्रलोभयति वा, पा १, ३, ४७। कान्त्रिणोपावदिष्ट, भ ८, २८। परि—परिवादः। निन्दा। परिवदन्त्यांस्तुष्टो भवति दुर्जनः, भारत। प्र—कथनम्। कीर्त्तनम्। प्रवादः। वि—विरोधोक्तिः। विप्रवदति। ०ते, पा १, ३, ५०। प्रवदमानेस्तां संयुक्तां राज्ञसैः, भ ८, ३०। सम्—सहोच्चारणम्। सम्प्रवदन्ते ब्राह्मणाः। सम्प्रवदन्ति खगाः, पा १, ३, ४८। प्रति—प्रतिवचनम्। तान् प्रत्यवादीदथ राघवोऽपि, भ २, २८। वि—विवादः। क्षेत्रे विवदन्ते, पा १, ३, ४७। उभौ विवदेयातां स्त्रिया धने, मनु ८, १८१। केनचिद् व्यवदिष्ट न, भ ८, २८। सम्—संवादः। सादृश्यम्। षड्जसंवादिनीः केकाः, र १, ४०। वाचिकषड्क्रीन संवदेते इति भाष्यम्। विसम्—विसंवादः।

वध् (हन्)।

वन्—भ्वा, प। सम्भक्तिः। सेवा।

वन (हन) भ्वा. प। शब्दः। वनु, भ्वा, प। १ याचनम्। २ हिंसा। अयन्तु कगवत् क्रियामात्रे इत्यन्ये। वनु, त, आ। चान्द्रमते परस्मैपदी। याचनम्। वनति। वनोति। वनुते। ववान। ववनतुः। ववने। वर्ग्यादिरपि। वेनतुः। वेने। वेनिषे इति चान्द्राः। वनिता। वनिष्यति। ०ते। अवनीत्, अवानीत्। अवनिष्ट। णिच् वानयति। भौवादिको वनुर्घटादिः। वनयति, वानयति। प्रवनयति। वन्, षु, प, वो। १ उपकारः। २ श्रद्धा। ३घातः। ४ शब्दः। ५ उपतापः। वानयति। वनति। अयं कश्चिन्न मन्यते, दुर्गा। (उ) वनित्वा, वत्वा। ०वत्य। वतः। वतिः।

वन्द्—वदि, भ्वा, आ।

१अभिवादनम्। नमस्कारः। २स्तुतिः। वन्दते। ववन्दे। वन्दिता। वन्दिष्यते। वन्दिषीष्ट। वन्दिषीष्ठा दिवौकसः, भ १८, २७। अवन्दिष्ट। अवन्दिषाताम्। अवन्दिषत। विवन्दिषते। वावन्द्यते। वावन्ति। णिच वन्दयति। अववन्दत। वन्दित्वा। ०वन्द्य। वन्दितः। वन्दनम् वन्दारुः। वन्दी।

वप्—डुवप्, भ्वा, उ। १वपनम्।

क्षेत्रे बीजप्रक्षेपणम्। २ गर्भाधानम् निषेकः। ३छेदनम्। मुण्डनम्। वपति ०ते। केशान् वपति। यदि वपति कृषाणः क्षेत्रमासाद्य बीजम्, स्मृतिः उवाप। ऊपतुः। उवपिथ, उवप्थ ऊपे। वप्स्यति। ०ते। उप्यात्। वप्सीष्ट। अवाप्सीत्। अवाप्साम्। अवाप्सुः अवप्त। अवप्साताम्। अवप्सत कर्मणि, उप्यते। अवापि। यादृशमुप्यां बीजम्, मनु ९, २६। विवप्सति ०ते। वावप्यते। वावप्ति। वाप

यति। अवीवपत्। उप्ता। ०उप्य। उप्तः। उप्तिः। वपनम्। वापः। (ङ) उप्त्रिमः। अनुप्त्रिमफलाशिनौ, भ ४, ३७। वप्तुम्। वप्ता। वापौ। वप्तव्यम्। बीजं न वप्तव्यम् परपरिग्रहे, मनु ९, ४२। नि, निर्—उत्सर्गः। दानम्। पिण्डदानं निवापः स्यादित्यमरः। निवपेः सहकारमञ्जरीः, कु ४, ३८। यमाय तं निरुवाप, भ १४, ८६। वत्सतरीं निर्वपन्ति, उत्तर १३४। आतिथ्यमेभ्यः परिनिर्विवप्सोः, भ ३, ४२। प्र—प्रक्षेपः। प्रणिवपति। प्रवपाणि वपुर्वक्त्रौ, भ २०, ३६। प्रति—विन्यासः। मौलिं प्रत्यूपुः पद्मरागेण, र १७, २७। प्रत्युप्तः।

वभ्र्—बभ्र् (अभ्र) भ्वा, प। गतिः।

वम्—टुवम्, भ्वा, प। उद्गिरणम्।

वमनम्। वमति। फणी पीत्वा क्षीरं वमति गरलम्। ववाम। ववमतुः, पा ६, ४, १२६। भागवृत्तौ तु वेमतुरित्याद्युदाहृतम्। तद् भाष्यादौ न दृष्टम्, कौ ८८। ववमतुः, वेमतुः, वो। वेमू रुधिरमिति चण्डी, दुर्गा। वमिता। वमिष्यति। अवमीत्। अवमिष्टाम्। अवमिषुः, रक्तमवमिषुर्मुखैः, भ १५, ६२। विवमिषति। वंवम्यते। वंवन्ति। वमयति। वामयति। उद्वमयति, घटादिः। (ड, वो) वमित्वा, वान्त्वा। वान्तः। वान्तिः। भावारम्भयोः वान्तम्, वमितम्। वमनम्। वमः। वामः। वमिः। (टु) वमथुः। वमितव्यम्। उद्—उद्वमनम्। कथनम्। सा वरावुद्ववाम, र १२, ५।]

वय्—(अय) भ्वा, आ। गतिः।

वयसे। ववये। वयितासे।

वर—अदन्तः। चु, प। ईप्सा।

वरयति। कन्या वरयते रूपम्।

वर्च्—भ्वा, आ, दीप्तिः। वर्चते।

वर्ण—अदन्तः। चु, प। १वर्णक्रिया। रञ्जनम्। २ विस्तारः। वर्णनम्। ३ स्तुतिः। ४ उद्योगः, वो। ५ दीपनम, वो। सुवर्णं वर्णयति। प्रतिमां वर्णयति। कथां वर्णयति। तन्तुं वर्णयति (विस्तारयति)। हरिं वर्णयति (स्तौति)। वर्णयति (उद्युङ्क्ते दीप्यते वा), दुर्गा। वर्ण (चूर्ण) चु, प। १ वर्णनम्। २ प्रेरणम्। ३ रागः, वो। वर्णयति। निर्—दर्शनम्। निर्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणमित्यमरः। शकुन्तलां निर्वर्ण्य, शकु १, १८२।

वर्ह्—चु, प। १छेदनम्। २पूरणम्। वर्हयति। वर्हयत्यरिवीराणां क्रान्त्वा मूर्द्धानमाहवे, कवि ८०। वर्हनं छेदने इत्यमरः।

वर्ष्—भ्वा, प, वो। गतिः। बधः।

वर्ष—बर्ष्—भ्वा, आ। स्नेहनम्।

वर्ह् (बर्ह्)।

वल्—वल्ल्—भ्वा, आ। १संवरणम्। २सञ्चरणम्। वलते। वल्लते। वलतेऽभिमुखं तव, मा ६, ११। वलन्राधां राधाम्। त्वदभिसरणरभसेन वलन्तो, गीतगो १, २६, ६, ३। इत्यादौ परस्मैपदमपि। ववले। ववलिरे (अरिष्टताः) मा ६, ३८। वलिता। अवलिष्ट। अवलिषाताम। अवलिषत।

णिचे् वलयति, वालयति, घटादिः। कुवलयं वलयन् मरुदाववौ, मा ६, ३। सम्—संवलनम्। मिश्रणम्। ऋषिवित्रिषः संवलिता विरेजिरे, मा १, २१। तिमिरसंवलितेव दीप्तिः, भा ५, ४८। वलिः। वल्लिः। बालः।

वल्क्—चु, प। उक्तिः। वल्कयति।

वल्ग्—(अगि) भ्वा, प। गतिः।

प्लुतगतिरिति भट्टमल्लः। वल्गति। ववल्ग। ववल्गुश्च पदातयः, भ १४, ६। वल्गिता। अवल्गीत्।

वल्ग्—'बल्भ्' भ्वा, आ। भोजनम्।

वल्ग्ल, वल्ग्ल, अदन्ती। चु, प। १छेदः। २पवित्रीकरणम्। वल्ग्लयति। वल्ग्लयति। पल्ग्लयति, पल्ग्लयति, वो।

वल्ह् (बल्ह्) वल्ह् (बल्ह्)।

वल्ह्—भ्वा, आ, वो।

वश्—अदा, प। १ कान्तिः।

२इच्छा। स्पृहा। अयं छान्दसः, को १२६। लट् वष्टि। उष्टः। उशन्ति। जयाय सेनान्यमुशन्ति देवाः, कु ३,१५। हि, उड्ढि। वशानि। लिङ् उश्यात्। लङ् अवट्। औष्टाम्। औशन्। अवशम्। लिट् उवाश। ऊशतुः। उवशिथ। ऊशिव। लुट् वशिता। लृट् वशिष्यति। आशिषि, उश्यात्। लुङ् अवशीत्, अवाशीत्। सन् विवशिषति। यङ् वावश्यते, पा ६, १, २। वावष्टि। णिच् वाशयति। अवीवशत्। उशित्वा। ०उश्य। उशितः। उष्टिः। वशनम्। वाशः। वशितुम्। वशः। वश्यः। उशीरम्।

वष्—(कष) भ्वा, प। हिंसा।

वस्—भ्वा, प। निवासः।

लट् वसति। वसति वने वनमाली, गीतगो ५, ८। लिट् उवास। ऊषतुः, पा ८, ३, ६०। उवसिथ, उवस्थ। उवास पर्णशालायाम्, भ ४, ७। लुट् वस्ता। लृट् वत्स्यति, पा ७, ४, ४८। लृङ् अवत्स्यत्। आशिषि, उष्यात्। लुङ् अवात्सीत्। अवात्ताम्। अवात्सुः। भावे, उष्यते। अवासि। सन् विवत्सति। यङ् वावस्यते। वावस्ति। णिच् वासयति। ०ते। अवीवसत्। ०त। यस्यां वासयते सीताम्, भ ८, ६४। उषित्वा, पा १, २, ७। ०उष्य। राघवः प्रोष्य पापेयान्, भ ५, ८१। तत्र तामुषित्वा रजनीं, भारत। उषितः, पा ७, २, ५२। उष्टिः। वसनम्। वासः। वस्तुम्। वस्तव्यम्। वसतिः। अधि, अनु, आ—वासः। अधिष्ठानम्। ग्राममधिवसति, पा १, ४, ४८। सहासनं गोत्रभिदाध्यवात्सीत्, भ १, ३। दण्डकानध्यवत्तां यौ, भ ५, ६। सोऽध्यवात्सीच्च गां इतः, भ १५, ६८। शून्यमन्ववसद्गृहम्, भ ५, ७५। गृहस्थाश्रममावसेत्, मनु ३, २। उप—निवासः। भोजनवृत्तिः। उपवासः। ग्राममुपवसति, पा १, ४, ४८। एकादशीमुपवसन्ति निरम्बुभक्षाः। नि—निवासः। वनेषु वासते येषु निवसन्, भ ४, ८। निर्—णिच्—निर्वासनम्। प्रवासनम्। प्र—विदेशावस्थानम्। प्रवासः। णिच्—निर्वासनम्। भूपतेरपि तयोः प्रवत्स्यतोर्नेत्रयोरुपरि वाष्पविन्दवः, र ११, ४। ताम् प्रवासयेद् दण्डयित्वा, मनु ८, १२३। आ-

सयति यः क्रुद्धः कुलं विद्विषाम्, कवि १४। परि—क्त, पर्य्युषितम्। प्रति—निवासः। तस्य कोटरे जरद्भवनामा गृध्रः प्रतिवसति, हितो। वि—वासः। णिच्—निर्वासनम्। पित्रा यौ विवासितौ, भ ४, ३५। वस्, अदा, आ। आच्छादनम्। परिधानम्। लट् वस्ते। वसाते। वसते। वस्से। वध्वे। लिट् ववसे। वसनं ववसे, मा ६, ७५। लुट् वसिता। लृट् वसिष्यते। लुङ् अवसिष्ट। सन् विवसिषते। यङ् वावस्यते। वावस्ति। वसित्वा। ०वस्य। वसितम्। वसनम्। वस्त्रम्। वासः। वासांसि वसित्वा, भ ३, ४५। नि, वि—परिधानम्। निवध्व माध्वम्, भ ३, ४४। मनोरमे न व्यवसिष्ट वस्त्रे, भ ३, २०। निवासयति यश्चित्रं चीनांशुकम्, कवि १४। वसु, दि, प। स्तम्भः। नक्षत्रतारहितो भावः, दुर्गा। दर्पः। वस्यति। यो वस्त्यरिषु, कवि १४। ववास। ववसतुः। अयं वर्ग्यादिरित्येके। वेसतुः। वसिष्यति। अवसत्। अवसत्, अवसीत्, अवासीत् (वो)। वस, चु, प। १स्नेहः। प्रीतिः। २छेदः। ३अपहरणम्। ४बधः, दुर्गा। वासयति। अवीवसत्। वस, अदन्तः। चु, प। निवासः। वसयति।

वस्क—वष्क्—वङ्क् (ककि) भ्वा, आ। गतिः। वस्कते। वष्कते। वङ्कते।

वस्त्—चु, आ। अर्दनम्। वस्तयते।

वह्—भ्वा, उ। प्रापणम्।

वहनम्। धारणम्। वायो र्गतिः। स्यन्दनम्। लट् वहति। ०ते। नदी वहति, की २४७। तं जनमसत्यसन्धं वसुधे कथं वहसि, हितो। वहते विश्वतारातिर्बहुरूपस्य यः स्त्रियम्, कवि २११। वीर भरं वहासुम्, भ २, ५१। लिट् उवाह। उवोढ़। उवहिथ। जहे, पा ६, १, १७। लुट् वोढ़ा, पा ३,१,१२। लृट् वक्ष्यति। ०ते। आशिषि उह्यात्। वक्षीष्ट। लुङ् अवाक्षीत्। अवोढ़ाम्। अवाक्षुः। अवोढ़। अवक्षाताम्। अवक्षत। अवोढ़ुम्। युवां भुवनस्य भारं दोर्भिरवोढम्, भ २, २७। कर्मणि, उह्यते। अवाहि। वस्वधा तथोहे, भ ३, ३८। जह्रिरे। मूर्ध्नि सिद्धार्थाः, भ १४, ९१। सन् विवक्षति। ०ते। यङ् वावह्यते। वावोढि। णिच् वाहयति। अवीवहत्। क्षिप्रं वाहय रथम्। वाहये तरिम्,भारत। स वाह्यते राजपथः शिवाभिः, १६, १२। जह्वा। उह्य। जढः। जढिः। वहनम्। वाहः। वोढुम्। वोढा। वाहौ। वाहकः। ०वाट्। वोढव्यम्। वाह्यम्। वह्यम्। वहति मलयसमीरे, गीतगो ५, २। अति—णिच्—अतिवाहनम्। नरपतिरतिवाहयाम्बभूव त्रियामाम् र ९, ७०। अप—उत्सारणम्। अपोवाह वासोऽस्या मारुतः, भारत। आ—उत्पादनम्। धान्यं शाकञ्च वासांसि गुरवे (दत्त्वा) प्रीतिमावहेत्, मनु २, २४६। उद्—विवाहः। धारणम्। उद्वहेत द्विजो भार्य्याम्, मनु ३, ४। उद्वूढलोकचिन्तया, भा १०, ३६। उद्वहन् परिघं गुरुम्, भ ९, ७। तमुद्वहन् धरणिधरेन्द्रगौरवम्, भागवतम्। निर्—निर्वाहः। उक्षि निर्वहति, र, टी, ८, ७५। नगाधिराजत्वं निर्वोढुम्, कु, टी १, २। सर्वथा सत्यवचने देहो न निर्वहेत्, भागवतटीका ८, १९, ३२। प्र—वहनम्। प्रवाहः। गम्भीराः प्रव-

ह्नयः, भ १७, ६३। वि—विवाहः। व्यूढरचना। चमूं व्यूढां द्रुपदपुत्रेण, गी १, ३। सम्—णिच्—संवाहनम्। अङ्गमर्दनम्। संवाहयामि चरणौ, शकु ३, १२८।

वंह् (बंह्)।

वा—अदा, प। १ गतिः।

वायोर्गतिः। २ हिंसा। अयं वर्ग्यादिश्च। लट् वाति। वातः। वान्ति। न वाति वायुस्तत्पार्श्वे, कु २, ३५। वाति वातः पुरे यस्य तावन्मात्रेण भीतवत्, कवि २१४। वासि वात यतः क्रान्ता, महाना ४, २८। लङ् अवात्। अवाताम्। अवान्, अवुः। वायवोऽवान् सुदुःसहाः भ १७, ८। लिट् ववौ। ववतुः। ववित्थ,ववाथ। वविव। लुट् वाता। लृट् वास्यति। लुङ् अवासीत्। अवासिष्टाम्। वायवोऽवासिषुर्भीमाः, भ १५, २६। सन् विवासति। वा, चु, प। १ सुखाप्तिः। २ गतिः। ३ सेवा। वापयति। अवीवपत्। वात्वा। ०वाय। वातः। वातिः। वानम्। वायुः। आ—समन्ततो वायुसञ्चलनम्। आववुर्वायवो घोराः, भ १४, ८७। निर्—निर्वाणम्। शीतलत्वम्। निर्वृतिः। निर्वाणो मुनिबुद्धादौ निर्वातस्तु गतेऽनिले इत्यमरः। तस्य वपुर्जलार्द्रपवनैर्न निर्ववौ, मा १, ६५। निरवात् क्षणानुः, राघ वपा ८, ४२। दीपनिर्वापकोऽन्धः स्यात्, स्मृतिः।

वाञ्छ्—वाञ्छि (काङ्क्षि) भ्वा, प।
आकाङ्क्षा। वाञ्छति।

वाच्छ्—वाच्छि, भ्वा, प। वाच्छा। च्छतुः। वाच्छिता। अवाच्छीत्। अवाच्छिष्टाम्। वाच्छित्वा। ०वाच्छ्य। वाच्छितः। वाच्छनम्। वाच्छा। वाच्छनीयम्। समवाच्छन्नाशिषः, भ १७, ५३। न राति रोगिणेऽपथ्यं वाच्छतेऽपि भिषक्तमः, स्मृतिः।

वाड् (बाड्)।

वात—अदन्तः। चु, प। १ गतिः। २ सेवा। ३ सुखम्। वातयति। अववातत्। गतिसुखमिति रमानाथः। वातयति पान्थं वातः।

वाध् (बाध्) बाधृत् (बृत्)।

वाश्—वाश्, वाशृ, वाष्ट्, दि, आ।
शब्दः। तिरश्चां शब्दः। टन्त्यान्तोऽयमपि, दुर्गा। वाश्यते। वाश्यते। ववाशे। ववाशिरे शिवाः, भ १४, १४। क्रुद्धाश्चा ववाशिरे,भ १४,७६। वाशिता। वाशिष्यते। अवाशिष्ट। विवाशिषति। वावश्यते। वावाष्टि। वाशयति। अववाशत्। उद्—आह्वानम्। उद्वाश्यमानः पितरम्, भ ३, ३२।

वास—अदन्तः। चु, प। उपसेवा।
गुणान्तराधानम्। वासयति वस्त्रं चन्दनः। शश्वद्वासयति व्रजन् दशदिशः कस्तूरिकामौरभैः, कवि १४। छेदे चन्दनतरु र्वासयति मुखं कुठारस्य, हितो।

वाह्—वाह्ट (जेह्ट) भ्वा, आ। प्रयत्नः।
वाहते। वर्ग्यादिश्च। वाहते। वाहते वाहिनीं हन्तुं बाहुभ्यामाहवेषु यः, कवि २११। ववाहे। वाहिता। असौन् वाहयाञ्चक्रुः (व्यापारितवन्तः), भ १४,२३। क्त, (प्रतिज्ञाभ्युपयोः) वाढम्।

विच्—विचिर्, ह्वा, वो, रु, उ।

पृथक्करणम्। वेवेक्ति। वेविक्ते। विनक्ति। विङ्क्ते। वेवेक्ति वेदान्तं शास्त्राभ्यासेन सर्वदा। विविनक्ति च शत्रूणामाजौ सन्नहनञ्च यः, कवि १३४। अवेवेक्। अवेविक्त। अविनक्। अविङ्क्त। विवेच। विविचे। योधान् जीवितेन विवेच,भ १४, १०२। वेक्ता। वेक्ष्यति। ०ते। अविचत्, अवैक्षीत्। अविक्त। विविक्षति। ०ते। वेविक्ष्यते। वेवेक्ति। वेचयति। अवीविचत्। वि—पृथक्करणम्। विवेचना। विविनक्ष्मि दिवः सुरान्, भ ६, ३६। धर्माधर्मौ व्यवेचयत्, मनु १, २६।

विक्—तु, प। गमनम्।

विक्षायति। ०ते,वो,पा ३,१, ३८। विक्षति,वो। यत्र विक्षति तदभ्यूहः। यत्र विक्षायति स्वयम्, कवि १२०। विक्षायाञ्चकार। विविक्ष, पा ३, १, ३। विक्षायिता, विक्षिता। विक्, (कुप) चु, प। दीप्तिः। विक्षयति।

विज्—विजिर्, ह्वा, उ। पृथग्भावः। वेवेक्ति। वेविक्तः। वेविजति। वेविक्ते। वेविजाते। वेविजते। वेविज्यात्। वेविजीत। अवेवेक्। अवेविक्ताम्। अवेविजुः। विवेज। विवेजिथ, कौ ११३। विविजे। वेक्ता। वेक्ष्यति। ०ते। अविजत, अवैक्षीत्। विविक्षति। ०ते। वेविज्यते। वेवेक्ति। वेजयति। अवीविजत्। विजी, तु, आ। प्रायेणायमुत्पूर्वः प्रयुज्यते। ओ विजी, रु, प। १ भयम्। उद्वेगः। २ चलनम्। उद्विजते। विनक्ति। विङ्क्तः। विञ्जन्ति। विङ्ग्धि। अविनक्। अविङ्क्ताम्। अविञ्जन्। विवेज। विविजे। विविजिथ। विजिता, पा, १, २, २। विजिष्यति। ०ते। अविजीत्। अविजिष्ट। यमान्नोदविजिष्ठाः, भ ६, ६८। भावे, विज्यते। अवेजि। विविजिषति। ०ते। विजित्वा। ०विज्य (ईओ) विग्नः। विक्तिः। वेजनम्। वेगः। विजितुम्। विजितव्यम्। वेजनीयम्। मनो नोद्विजते यस्य। उद्विनक्ति च संसारात्, कवि १४८।

विट्—भ्वा,प। १शब्दः। २आक्रोशः।

आक्रोशवाची ओष्ठ्यादि रिति माधवाचार्यः। दन्त्यादिरिति वोपदेवाचार्याः। वेटति। विवेट। वेटिता। अवेटीत्। वेटः। विटः। विटपः।

विड्—भ्वा, प, वो। आक्रोशः।

विडम्ब—अदन्तः। चु, प।

अनुकरणम्। विडम्बयति विडम्बयन्तं शितिवाससस्तनुम्। मा १, ६। (वि—डम्ब)।

वित्त—अदन्तः। चु, प, वो। त्यागः।

वित्थ्—वेत्थ्, वित्थृ, वेत्थृ, भ्वा, आ।

याचनम्। वेत्थते। वेत्थते। 'वित्थृ' वेधते।

विद्—अदा, प। ज्ञानम्। बोधः।

लट् वेत्ति। वित्तः। विदन्ति। वेत्सि। वित्थः। वित्थ वेत्थ। विद्वः। विद्मः। पक्षे वेद। विदतुः। विदुः। वेत्थ। विदथुः। विद। वेद। विद्व। विद्म, पा ३, ४, ८३। तस्य ताड़का वेत्ति विक्रमम्, भ ५, ३४। सर्वं भवान् वेद, र २, ४३। लोट् वेत्तु। वित्ताम्। विदन्तु। पक्षे विदाङ्करोतु। विदाङ्कुरुताम्। विदाङ्कुर्वन्तु, पा ३, १, ४१। विदाङ्कुर्वन्तु रामस्य हृत्तम्, भ ६, ४। लिङ् विद्यात्। लङ् अवेत्।

अवित्ताम्। अविदुः। अविदन्, पा ३, ४, १०६। अवेः। अवेत्, पा ८, २, ७५। लिट् विदाञ्चकार। विदाञ्चक्रतुः, पा ३, १, ३८। पक्षे, विवेद। विविदतुः। विदाञ्चकार वेदेहीं रामादन्यनिरुत्सुकाम्, भ ६, १। विविदुर्नेन्द्रजिन्मार्गम्, भ १४, ४८। लुट् वेदिता। लृट् वेदिष्यति। लुङ् अवेदीत्। अवेदिष्टाम्। अवेदिषुः। कर्मणि, विद्यते। अवेदि। सन् विविदिषति, पा १, २, ८। यङ् वेविद्यते। वेवेत्ति। णिच्, वेदयति। अवीविदत्। विदित्वा। ०विद्य। विदितः। वित्तिः। वेदनम्। वेदः। वेदितुम्। आ—णिच्, आवेदनम्। ज्ञापनम्। आवेदितो द्विजेन, र ५,२३। नि—णिच्, निवेदनम्। सम्—ज्ञानम्। संवित्ते, कौ २४६। संविदते। संविद्रते, पा ७, १, ७। के न संविद्रते वायो मैनाकादि यथा सखा, भ ८, १७। संवित्तः सहयुध्वानो तच्छक्तिं खरदूषणौ (सकर्मकत्वान्नात्मने-पदम्), भ ५, ३७।

विद्, दि, आ। विद्यमानता। सत्ता। विद्यते। स्वर्गे विद्यस्व, भ २०, ३२। विविदे। वेत्ता। वेत्स्यते। वेत्सीष्ट। अवित्त। अवित्साताम्। अवित्सत। विवित्सते। ज्ञ, विज्ञम्। विद्लृ तु, उ। लाभः। प्राप्तिः। ज्ञानम्। विन्दति। ०ते, पा ७, १, ५६। सीता संस्कर्त्तारं न विन्दति, उत्तर २३७। विन्देम देवतां वाचम्, उत्तर १। नक्षत्रैर्विन्दते दिशः, भारत। विवेद। विविदे। व्याघ्रभूत्यादिमतेऽयं सेट्, चान्द्रादिमतेऽनिट्, कौ ३१। वेदिता, वेत्ता। वेदिष्यति। ०ते। वेत्स्यति। ०ते। विद्यात्। वेदिषीष्ट। वित्सीष्ट। अविदत्। अवेदिष्ट। अवित्त। विविदिषति। ०ते। विवित्सति। ०ते। विदित्वा, वित्त्वा। वित्तं धनप्रतीतयोः अन्यत्र विन्नः, पा ८, २, ५८। विविदिवान्, विविद्वान्, पा ७, २, ६८। अधि—अधिवेदनम्। अधिकविवाहः। णिच्, निवेदनम्। उत्सर्गः। दे राज्यञ्च तस्मै न्यवेदयत् र १५, ७०। निर्—निर्वेदः। आत्मावज्ञा। निर्विदे ३, १२४। परि—परिवेदनम् ज्येष्ठवर्जं दाराग्निलाभः। दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते परिवेत्ता स विज्ञेयः परिवित्तिः पूर्वजः॥ मनु ३, १७१।

विद्, रु, आ। विचारणम्। मीमांसा विन्ते। विन्दाते। विन्दते। विन्त्से मां विन्ते निष्पराक्रमम्, भ ६, ३८ विन्दीत। अविन्त। अविन्दाताम् अविन्दत। विविदे। वेत्ता। ज्ञ, विज्ञ वित्तः, पा ८, २, ५६। विद्, चु, आ ड, वो। १चेतनम्। ज्ञानम्। २आख्यानम्। ३वासः। ४स्थैर्य्यम्, वो। ५व्यथ दुर्गा। वेदयति। ०ते। वेत्ति सर्वाणि शास्त्राणि गर्वो यस्य न विद्यते। विन्ते धर्मं सदा सद्भिस्तेषां पूजाञ्च विन्दति कवि २५।

विध्—तु, प। १ विधानम्।

२ छिद्रीकरणम्। विधितच्छिद्रितं विद्धे इत्यमरः। कर्णवेधः, दुर्गा। विधति। विवेध। वेधिता। वेधिष्यति अवेधीत्। विधित्वा, वेधित्वा। विधितः। वेधनम्। वेधः। विधिः वेधाः। विध् (विथ्)।

विप्—चु, प, वो। क्षेपः।

विल्—तु, प, वो। आच्छादनम्। परिधानम्। भेदनमिति प्रदीपः।

विलति। विवेल। वेलिता। अवेलीत्। विल्, चु, प। भेदनम्। वेलयति। विलम्। विलः।

विश्—तु, प। प्रवेशः।

अन्तर्गमनम्। विशति। विवेश। विविशतुः। विवेशिथ। विवेश कश्चित्तपोवनम्, कु ५,३०। वेष्टा। वेक्ष्यति। अविक्षत्। अविक्षत् सदः, भ ११, ४५। विविक्षति। वेविश्यते। वेवेष्टि। वेशयति। अवीविशत्। विष्ट्वा। ०विश्य। विष्टः। विष्टिः। वेशनम्। वेष्टनम्। वेष्टव्यम्। आ—प्रवेशः। गौरीगुरोर्गह्वरमाविवेश, र २, ६। उप—उपवेशनम्। उपाविक्षदथान्तिके, भ १५, ८। नि—प्रवेशः। अवस्थानम्। णिच्—मन्निवेशनम्। स्थापनम्। निविशते, पा १, ३, १७। रामशालां न्यविक्षत: भ ४, २८। निवेशयामास सैन्यं नर्मदारोधसि, र ५, ४२। निवेशयामास मधु द्विरेफान् नामाक्षराणीव, कु ३, २७। अभिनि—अभिनिवेशः। मनोनिवेशः। निर्—निवेशः। उपभोगः। क्रीडारसं निर्विशतीव बाल्ये, कु १, २६। परि—णिच्, परिवेशनम्। अन्नाद्युपसमर्पणम्। वेष्टनम्। प्र—प्रवेशः। स हृदङ्गजान्तरं प्रविश्य, र ३, ५६। सम्—संवेशः। निद्रा। संविष्टः कुशशयने निशां निनाय, र २, ८५। क्रमेण सुप्ता मनु संविवेश, र १, २४।

विष्—विषु (जिषु) भ्वा, प।

सेचनम्। वर्षणम्। वेषति। विवेष। विविषिथ। विविषिव। वेष्टा। वेक्ष्यति। अविक्षत्। विविक्षति। वेविष्यते। वेवेष्टि। वेषयति। अवीविषत्। वेषित्वा, विष्ट्वा। विष्टः। वेषणम्। विष्लृ—क्ना, उ। आ, वो। व्याप्तिः। वेवेष्टि। वेविष्टः। वेविषति। वेविष्टे। वेवेष्टि विष्टपं सर्वं कीर्त्तिर्यस्य, कवि १९१। वेविष्यात्। वेविषीत। हि, वेविड्ढि। अवेवेट्। अवेविष्टाम्। अवेविषुः। अवेविषम्। अवेविष्ट। विवेष। वेष्टा। अविषत्। (अविक्षत्, वो)। अविक्षत। अविक्षाताम्, पा ७, ३, ९२। अविक्षन्त। विषः। वेषः। परिवेषः। वेष्णो नटः। विष्णुः। परि—णिच्, परिवेषणम्। अन्नाद्युपसमर्पणम्। वेष्टनम्। उपनीय मांसानि परिवेषयेत्, मनु ३, २२८। विष्—क्ना, प। विप्रयोगः। विश्लेषः। विष्णाति। विष्णीयात्। विष्णाति विषवत् प्राणानसौ, कवि १९१। हि, विषाण। अविष्णात्।

विष्क्—चु, आ। हिंसा। विष्कयते।

विष्क, अदन्तः। चु, प। दर्शनम्। विष्कयति। वेक्ष वेक्ष विख इत्यपि केचित्।

वी—अदा, प। २ गमनम्।

२ व्याप्तिः। ३ इच्छा। ४ क्षेपणम्। ५ खादनम्। ६ गर्भग्रहणम्। वेति। वीतः। वियन्ति। वियन्ति वीरमन्तानं हृदो यस्य कुलाङ्गना, कवि १८८। हि, वीहि। वीयात्। अवेत। अवीताम्। अवियन्। अव्यन् इत्येके। विवाय। विव्यतुः। वेता। वेष्यति। अवैषीत्। अवैष्टाम्। अवैषुः। विवीषति। वेवीयते। वेवयीति। वेवेति। वाययति वापयति वा गां पुरोवातः (गर्भं ग्राहयति), प्रा ६, १, ५५।

वीज्—भ्वा, आ। १ गतिः।

२ कुञ्जनम्। वीजते। नायं वहुसञ्चातः।

वीज, अदन्तः। चु, प। वीजनम्। वायुसञ्चालनम्। वीजयति। तं वीजयाम पद्मैः नै १, २२। वीज्यते स संसुप्तश्चामरैः, कु २, ४२। सख्यो शकुन्तलां वीजयतः। शकु।

वीर्—अदन्तः। चु, आ, वो।

शौर्यम्। उद्यमः। वीरयते। अविवीरत।

वुङ्—वुगि (ञुगि) भ्वा, प। त्यागः।

वुष्ट् (विष्ट्)।

वृ—वृञ्, भ्वा, स्वा, क्रया, वो, उ।

वरणम्। प्रार्थना। वृञ्, स्वा, उ। आवरणम्। रोधः। वृङ्, क्रया, आ। सम्भक्तिः। सेवा। लट् वरति। ०ते। वृणोति। वृणुते। वृणाति, वो। वृणीते। वृणते विमृष्यकारिणं सम्पदः, भा २, ३,। हि, वृणु वृणीहि। वृणुयाद्वृत्विजम्, मनु ७, ७८। लङ् अवृणोत्। अवृणुत। अवृणात्। अवृणीत। वृणीतेऽध्वरे। तेजोभि र्जगदावृणोति वरति ज्ञातीन् यथार्हं धनैः। सत्कीर्त्तिश्च वृणाति यो वरयति क्षेमं यशो व्रीयते। युद्धे वारयति द्विषो निवरते नित्यं प्रियोपद्रवम्॥ कवि ११। लिट् ववार। वव्रतुः। ववरिथ, कौ १४६। वव्रुव। वव्रे। वव्रुषे। वव्रुवहे, पा ७, २, १३। ववार रामस्य वनप्रयाणम्, भ ३, ६। यदेव वव्रे तदपश्यदाहृतम्, र ३, ६। लुट् वरीता, वरिता। लृट् वरीष्यति। ०ते। वरिष्यति। ०ते, पा ७, २, ३८। आशिषि, व्रियात्। वरिषीष्ट, वृषीष्ट, पा ७, २, ३८। लुङ् अवारीत्। अवारिष्टाम्। अवारिषुः। अवरिष्टः, अवरीष्ट। अवृत, पा ७, २, ४२। कर्मणि, व्रियते। अवारि। अवारिषाताम्। अवरीषाताम्, अवरिषाताम्, अवृषाताम्। सन् विवरीषति। ०ते। विवरिषति। ०ते। वुवूर्षति। ०ते, पा ९, २, ४१। ७, १, १०२। यङ् वेव्रीयते। वोवूर्य्यते। वर्वर्त्ति। णिच् वारयति। अवीवरत्। वृञ्, च, उ। प, वो। १ आवरणम्। २वारणम्। वारयति। ०ते। यवेभ्यो गां वारयति, पा १, ४, २७। प्रविशन्तं न कश्चिदवारयत्, भारत। वृत्वा। वृत्य। वृतः। वृतिः। वरणम्। वारः। वरः। वरीतुम्, वरितुम्। णिच् वारयित्वा। ०वार्य्य। वारितः। वारणम्। वारयितुम्। वृतस्त्वं पात्रेसमितैः (वेष्टितः), भ ५, १०। अप—गोपनम्। विदू—अपवार्य्य, रत्ना २, १७२। आवरणम्। गोपनम्। रोधः। आवरीतुमिवाकाशं वरितुं वीनिवोत्थितम्, भ ९, २४। प्रा—परिधानम्। प्रावृवूर्षु र्मृगाजिनम्, भ ५, ४९। नि—णिच्, निवारणम्, निर्—निर्वृतिः। वि—विवरणम्। व्याख्यानम्। प्रकाशनम्। विवृखतो शैलसुतापि भावम्, कु ३, ६८। अमू स्तं विवृखते, नै १, २७। परि—वेष्टनम्। प्रति—निवारणम्। निषेधः। सम्—संवरणम्। गोपनम्। निरोधः। संवरिषीष्टा स्वं शत्रोः पराक्रमम्, भ ९, २७। संवुवूर्षुः खमाकूतम्, भ ९, २६।

वृक्—(कुक) भ्वा, आ। आदानम्।

वर्कते। वृकः। वर्करः।

वृच्—भ्वा, आ। वरणम्। वृचते।

वृच्—वृचौ, क, प, वो। १वृतिः।

२वर्जनम्, दुर्गा। वृणक्ति। वर्चिता।

वृज्—वृजौ, अदा, आ। क, प।

१वर्जनम्। २वृजिः, वो। वृक्तः। वृजाते। वृजते। वृणक्ति। वृङ्क्तः। वृञ्जन्ति। वृणक्षि वृजीनैः सङ्गं वृक्ते च वृषलैः सह। वर्जयत्यनार्जवोपेतं यो वर्जयति दुर्जनैः॥ कवि २७। लङ् अवृक्त। अवृजाताम्। अवृजत। अवृणक्। अवृङ्क्ताम्। अवृञ्जन्। लिट् ववर्ज। वव्रजे। वर्जिता। वर्जिष्यति। ॰ते। अवर्जीत्। अवर्जिष्ट। विवर्जिषति। ॰ते। वरीवृज्यते। वर्वर्क्ति। वृजी, चु, प। वर्जनम्। वर्जयति। वर्जति। वर्जित्वा। (इ) वृक्तः। वर्जनम्। वर्गः। णिच् वर्जयित्वा। ॰वर्ज्य। वर्जितः। वर्जयितव्यः। अप—अपवर्जनम्। दानम्। आ—आवर्जनम्। आनमनम्। दानम्। आवर्ज्य शाखाः, र १६, १९। हविरावर्जितमग्निषु, र १, ६२। परि, वि—परित्यागः।

वृञ्ज्—वृजि (वृजी) अ॰, आ।

वर्जनम्। वृङ्क्ते। वव्रञ्जे। वृञ्जिता।

वृण्—वृणु, त, उ, वो। भक्षणम्।

वृणोति। वृणुते। वर्णोति। वर्णुते।

वृण् (वृण) तु, प। प्रीणनम्। वृणति। ववर्ण। ववृणे। वर्णिता। (गु) वर्णित्वा, वृत्वा।

वृत्—वृतु, भ्वा, आ। वर्त्तनम्।

स्थितिः। विद्यमानता। वर्त्तते। ववृते। ववृतिषे। निर्व्याज मिज्या ववृते, भ २, ३७। पितरि ववृतिरे क्रियाः र १२, ५६। वर्त्तिता। वर्त्तिष्यते। वर्त्स्यति पा ७, २, ५९। उग्रं वर्त्तिष्यते यमः, भ १६, १७। अवर्त्तिष्यत। अवर्त्स्यत्। वर्त्तिषीष्ट। अवृतत्। अवर्त्तिष्ट। अवर्त्तिषाताम्। अवर्त्तिषत। भावे, वृत्यते। अवर्त्ति विवर्त्तिषते। विवृत्सति, पा १, ३, ८२। सौतान्तिके विवृत्सन्, भ ८, ६७। यङ् वरीवृत्यते। वर्वृतीति, वरिवृतीति, वरीवृतीति। वर्वर्त्ति, वरिवर्त्ति, वरीवर्त्ति। णिच् वर्त्तयति। अवीवृतत्, अववर्त्तत्। वृतु, चु, प। दीप्तिः। वर्त्तयति। वर्त्तति। १यापनम्। २पालनम्। करणम्। ३जीवनम्। जीविका। ४वर्णनम्। एते कविसम्प्रदायप्रयुक्ता अर्था णिजन्तस्य वृते ग्रंथाः। (उ)वर्त्तित्वा। वृत्त्वा। ॰वृत्य। वृत्तः। वृत्तिः। णिच् वर्त्तितः। वृत्तम् अधीतम्, पा ७, २, २६। वर्त्तनम् वर्त्तः। वर्त्तितुम्। अति—अतिवर्त्तनम्। अतिक्रमः। उल्लङ्घनम्। अपत्यलोभात् या स्त्री भर्त्तारमतिवर्त्तते, मनु ५, १६१। अनु—अनुवर्त्तनम्। अनुगमनम्। अनुरोधः। सेवा। सहगमनम्। प्रजास्तमनुवर्त्तन्ते समुद्रमिव सिन्धवः, मनु ८, १७५। अनुरोधोऽनुवर्त्तनमित्यमरः। अप—अपवर्त्तनम्। संक्षिप्तीकरणम्। व्यवकलनम्। प्रतिनिवृत्तिः। तस्मादपावर्त्तत दूरकृष्टा, र ६, ८५। व्यव—निवृत्तिः। व्यपवर्त्तत एषः वीरः, उत्तर १७५। अभि—अभिमुखगमनम्। आगमनम्। जगामास्तं दिनकरो रजनी चाभ्यवर्त्तत, रामा। आ—आवर्त्तनम्। आगमनम्। धेनु रावर्त्तते वनात्, र १, ८३। णिच् आवर्त्तनम्। दुग्धादिपाकः। आवृत्तिः। चण्डीं शतमावर्त्तयेद् यस्तु, स्मृतिः। अपा, उपा—निवृत्तिः। व्या—व्यावृत्तिः। उद्—उद्वर्त्तनम्। अतिरेकः। विलेपनम्। उद्वर्त्तनोत्सादने ङे इत्यमरः। उद्वर्त्तयामि देवि त्वां नाना सुगन्धिद्रव्येण, स्मृतिः। उद्वृत्तम्। नि—निवृत्तिः। स त्वं निवर्त्तस्व विहाय लज्जाम्, र २, ४०। निर्—

निष्पत्तिः समाप्तिः। प्र—प्रवर्त्तनम्। प्रवर्त्तनं प्रकृतिहिताय पार्थिवः, शकु ७, २११। वि—विवर्त्तनम्। परिवर्त्तनम्। घूर्णनम्। भ्रमणम्। वाग्वेवों व्यवीवृतत्, उत्तर २१२। सम्—सत्ता। भावः। उत्पत्तिः। खिन्नाङ्गुलिः संवर्तते कुमारी, र ७, २२। वृतु, वावृतु, दि, आ। १वरणम्। सेवा, वो। वृत्यते। ववृते। वर्त्तिष्यते। अवर्त्तिष्ट। वावृत्यते। वावृताञ्चक्रे। वावर्त्तिष्यते। अवावर्त्तिष्ट। वावृत्यमाना सा रामशालां न्यविक्षत भ ४, २८। वृत—वृतौ, तु, प। हिंसा। ग्रन्थः। इति प्रदीपः।

वृध्—वृधु, भ्वा, आ। वृद्धिः।

वर्द्धते। यस्य श्रीर्वर्द्धते नित्यं योऽर्थैं वर्द्धयति द्विजान्, कवि ८०। वर्द्धते ते तपः, भ ६, ६८। ववृधे। ववृधिषे। वर्धिता। वर्धिष्यते। वर्त्स्यति, पा ७, २, ५९। अवर्द्धिष्यत। अवर्त्स्यत्, पा १, ३, ८२। आशिषि, वर्द्धिषीष्ट। अवर्द्धिष्ट। अवृधत्। क्षुद्रस्यावृधत्, भ १५, १९। विवर्द्धिषते। विवृत्सति। वरोवृध्यते। वरोवर्द्धि। वर्द्धयति। अवोवृधत्, अववर्द्धत। वृधु, (कुप) च, प। दौप्तिः। वर्द्धयति। वर्द्धति। (उ, वर्द्धित्वा, वृद्ध। वृद्धः। (णिच् वर्द्धितः)। वृद्धिः। वर्द्धनम्। वर्द्धितुम्। वर्द्धिष्णुः। सम्—णिच्, संवर्द्धना। प्रतिपालनम्।

वृश्—दि, प। वरणम्।

वृश्यति। ववर्श वर्शिता। अवृशत्।

वृष्—वृषु (पृषु) भ्वा, प।

१सेचनम्। वर्षणम्। २हिंसा। ३क्लेशः। ४ गर्भग्रहणम्। ५ऐश्वर्य्यम्, वो। वर्षति। गर्जति वारिदपटली वर्षति नयनारविन्दमवलायाः। ववर्ष। वव्रषतुः। ववर्षिथ। वर्षिता। वर्षिष्यति। अवर्षीत्। अवर्षिष्टाम्। विवर्षिषति। वरीवृष्यते। वरीवर्ष्टि। वृष्, चु, आ। १ शक्तिबन्धः। २गर्भाधानम्। ३ऐश्वर्य्यम्, वो। वर्षयति। ०ते। अवोवृषत्। ०त। (उ) वर्षित्वा, वृष्ट्वा। ०वृष्य। वृष्टः। वृष्टिः वर्षणम्। वर्षम्। वर्षा। वर्षुकः। द्यौर्ववुष्टा पुष्पचयम्, भ २, ३७। वृषः। वृषा।

वृह्—वृंह्—वृहिर्, वृहि, (वृह)

भ्वा, प। १वृद्धिः। २शब्दः। वृहि, भ्वा आ, वो। वृद्धिः। वर्हति। वृंहति। ०ते। यस्य वर्हति नित्यं श्रीर्दानं शक्तिश्च वृंहति। वृंहन्ति सिंहवद् यस्य द्विषा दृष्टारिवारणम्॥ कवि ८५। ववर्ह। वव्रंह। वव्रंहे। वव्रंहिरे गजपतयः (आत्मनेपदं चिन्त्यम् टी), मा १७, ३१। वर्हिष्यति। वृंहिष्यति। ०ते। अवृहत्। अवर्हीत्। अवृंहीत्। अवृंहिष्ट। वृहि (कुप) चु, प। दौप्तिः। वृंहयति। वृंहति, वो। वृंहितं करिगर्जितमित्यमरः। वृह्, भ्वा, प, वो। वृद्धिः। वर्हति। वर्हिता। अवर्हीत्। वृह्, तु, प। उद्यमः। वृहति। ववर्ह। वव्रहतुः। ववर्हिथ। ववर्ढ। वव्रहिव, वव्रह्व। वर्हिता, वर्ढा। वर्हिष्यति, वर्ढ्यति। अवर्हीत्, अवृहत्। अयं वर्म्यादिरपि। शक्तिमुदवृहद् गुरुम्, भ १७, ९०। वर्हिषः। वर्ही।

वृ—वृञ्, क्रया, उ। वरणम्।

प्रार्थना। स्वीकारः। वृ, क्रया, प। १ वरणम्। २भरणम्। स्वट् वृणाति।

वृणीतः। वृणन्ति। वृणीते। वृणाते। वृणते। पुत्र वरं वृणीष्व, र २, ६२। लङ् अवृणात्। अवृणीत। लिट् ववार। ववरिथ। ववरे। लुट् वरिता, वरीता। लृट् वरिष्यति। ०ते। वरीष्यति। ०ते। आशिषि, वूर्य्यात्। दन्त्योष्ठपूर्वोऽपि ओष्ठापूर्वो भवति। वरिषीष्ट, वूर्षीष्ट, पा ७, २, ११। लुङ् अवारीत्। अवारिष्टाम्। अवारिषुः। अवरिष्ट, अवूर्ष्ट। कर्मणि, वूर्य्यते। अवारि। सन् विवरिषति। ०ते। विवरीषति। ०ते। वुवूर्षति। ०ते। यङ् वोवूर्य्यते। वावर्ति, णिच् वारयति। अवीवरत्। वूर्त्वा। ०वूर्य्य। वूर्णः। वूर्णिः। वरणम्। वरः। वारः। वरितुम्, वरीतुम।

वे—वेञ्, भ्वा, उ। तन्तुसन्तानः। वस्त्रनिर्माणम्। वयति। ०ते। यज्ञः पटं वयति स्म तद्गुणैः, नै १, १२। लिट् ववौ। ववतुः। ववियथ, ववाथ। ववे। पक्षे, उवाय, पा २, ४, ४१। जयतुः, जवतुः, पा ६, १, ३८, ३९। उवयिथ। जये, जवे। खमूयु र्वसुधा भूवुः सायका रज्जुवत्तताः, भ १४, ४८। लुट् वाता। लृट् वास्यति। ०ते। आशिषि, जयात्। वासीष्ट। लुङ् अवासीत्। अवासिष्टाम्। अवास्त। अवासाताम्। कर्मणि, जयते। अवायि। सन् विवासति। ते। यङ् वावायते। वावेति, वावाति। णिच् वाययति, पा ७, ३, ३७। अवीवयत्। उत्वा। ०वाय, पा ६, १, ४१। उतः। उतिः। (जतमिति तु जयो इत्यस्य रूपम्), पा ६, ४, २। वानम्। वायः। वातुम्। वाता। वायकः। वायी। तन्तुवायः। वातव्यम्। वानीयम्। प्र—वेधनम्। ग्रन्थनम्। एकार्थतन्तुप्रोतामाला, मा २, ९२। ग्रथ्यप्रोतं मुनिपुत्रम्, र ८, ७५। वेच्च—वेचौ. अदन्तौ, दर्शने इति केचित्।

वेण्—वेन्, वेणृ, वेट्, भ्वा, उ।

१गतिः। २ज्ञानम्। ३चिन्ता। ४निशामनम्। चाक्षुषज्ञानम्। ५वाद्यभाण्डस्य वादनार्थग्रहणम्। वादनम् दुर्गा। वेणति। ०ते। वेनति। ०ते। वेणिः।

वेथ् (विथ्)।

वेप्—टुवेपृ, भ्वा, आ। कम्पनम्। वेपते। हिमार्त्त इव वेपते, ग्रकु ५, १२८। विवेपे। वेपिता। वेपिष्यते। अवेपिष्ट। अवेपिषाताम्। णिच् वेपयति। अविवेपत्। वेपितः। (टु) वेपथुः। प्रवेपनम्। प्रवेपनीयम्। भूतजातं प्रवेपते, उत्तर १९८।

वेल्—वेल्ल्, वेल्ल, भ्वा प।

वेल्ट वेल्लृ वेल्ल् (केल्ट)। कम्पनम्। वेलति। वेल्लति। वेल्लति। उद्वेल्लन्ति कुम्भीनसाः, उत्तर ७७। वेल्लहलाकाघनाः, काव्यप्र।

वेल—अदन्तः। चु, प। कालोपदेशः। समयकथनम्। वेलयति। अविवेलत्

वेवी—वेवीङ्, क्रान्त्सः। अदा, आ।

१गतिः। २व्याप्तिः। ३इच्छा। ४क्षेपणम्। ५खादनम्। ६गर्भग्रहणम्। वेवीते। वेव्यते ऐप्, वेव्यै, पा १, १। वेव्याञ्चक्रे। वेविता। वेविष्यते। अवेविष्ट। वेवित्वा। आवेव्य। वेवितः। वेव्यनम्। वेव्यकः।

वेष्ट्—भ्वा, आ। वेष्टनम्। वेष्टते। विवेष्टे। वेष्टिता। अवेविष्ट।

विवेष्टिषते। वेवेष्यते। वेवेष्टि। वेष्टयति। अविवेष्टत्, अववेष्टत्, पा ७, ४, ६६। वेष्टयित्वा। ०वेष्य। वेष्टितः। वेष्टनम्।

वेस्—वेस्ट, भ्वा, प, वो। गतिः।

वेह्—वेह्ल (जेह्ल) भ्वा, आ। प्रयत्नः।

वर्ग्यादि रपि। वेहते। विवेहे। वेहिता।

वै—ओ वै (पै) भ्वा, प। शोषणम्।

वायति। उद्वायति यथा स्त्रीणां स्तेदार्द्रं वपुः, कवि २१४। ववौ। वाता। अवासोत्। णिच् धूनने। वाययति, पा ७, ३, ८८। अन्यत्र, वापयति। (ओ) वानः।

व्यच्—तु, प। प्रतारणम्।

विचति, पा ६, १६, १। विव्याच। विविचतुः, पा ६, १, १७। विव्यचिथ, विविचिथ, वो। व्यचिता, कौ १५०। (विचिता, विचिष्यति, अविचीत्, वो)। व्यचिष्यति। आशिषि, विच्यात्। अव्यचीत्। विव्यचिषति। वेविच्यते। वाव्यचीति। वाव्यक्ति। व्याचयति। विचित्वा। ०विच्य। विचितः। विचनम्। व्याकः। विचितुम्। विचिता। विचितव्यम्। व्याचकः। उरुव्यचाः।

व्यथ्—भ्वा, आ। १भयम्। २चलनम्। कम्पनम्। ३व्यथा। दुःखानुभवः वो। दुःखेन चलनम्। भयेन चलनम्, दुर्गा। व्यथते। विव्यथे, पा ७, ४, ६८। न विव्यथे तस्य मनः, भा १, २। व्यथिता। व्यथिष्यते। अव्यथिष्ट। अव्यथिषाताम्। मा व्यथिष्ठाः, र १४, ७२। भावे, व्यथ्यते, अव्यथि, अव्याथि। विव्यथिषते। वाव्यथ्यते। वाव्यत्ति। व्यथयति, घटादिः। अविव्यथत्। रथैनाविव्यथदरीन्, भ १५, ८६। व्यथित्वा। ०व्यथ्य। व्यथितः। व्यथनम्। व्यथा। व्यथितुम्।

व्यध्—दि, प। ताड़नम्। पीड़नम्।

वेधनम्। विध्यति, पा ६, १, १६। विव्याध। विविधतुः। विव्यद्ध, विव्यधिथ। विविधुः स्तोमरैः, भ १४, २४। व्यद्धा। व्यत्स्यति। आशिषि, विध्यात्। अव्यात्सीत्। अव्याद्धाम्। अव्यात्सुः। तमैन्द्रेण हृदयेऽव्यात्सीत्, भ १४, ६८। कर्मणि, विध्यते। अव्याधि। सन् विव्यत्सति। यङ् वेविध्यते। वाव्यद्धि। णिच् व्याधयति। अविव्यधत्। विद्ध्वा। ०विध्य। विद्धः। विद्धिः। व्यधनम्। व्याधः। व्यद्धम्। व्याद्धा। क्विप्, मृगावित्। अनु—सम्पर्कः। व्यापनम्। ग्रन्थनम्। इन्द्रनीले मुक्तामयी यष्टि रनुविद्धा, र १३, ५४। सरसिजमनुविद्धं शैवलेन, शकु १, ८३। अप—प्रत्याख्यानम्। निरासः। क्षेपः। प्रेरणम्। क्षणानुः प्रभाकरस्य अपविद्धशुचाविव, र १०, ७४। आ—क्षेपः। धारणम्। आविध्य च स्रजम्, भ २०, ११।

व्यप्—चु, प, वो। क्षयः। व्ययः।

व्यय्—भ्वा, उ। गतिः।

व्ययति। ०ते। यस्य न व्ययते पदम्। व्ययति स्वर्गलोकाय न कीर्त्तिः सुकृतात्मनः, कवि २२१। वव्याय। वव्यये। व्ययिता। व्ययिष्यति। ०ते। अव्ययीत्। अव्ययिष्ट। कोषांस्त्वमव्ययीः (त्यक्तवान्) भ १५, १७। व्यय्, चु, प। क्षेपणम्। व्याययति। व्यय, अदन्तः। चु, प। वित्तसंसुत्सर्गः। धनव्ययः।

व्ययति। अवव्ययत्। बहु व्ययति द्रव्यं तदर्थं यो व्ययत्यरीन्। व्ययते यदयशोविश्वं त्रैलोक्यादर्थतां गतम् ॥ कवि ११७।

व्युष्—वुष्, दि, प, । १ दाहः।

२ विभागः। व्युष्यति। वुष्यति। वुव्योष। व्योषिता। दाहार्थे,अव्योषीत्। विभागे तु, अव्युषत्, कौ १४२। अयमाष्ठादिः। व्युस् वुस् पुष्, पुस् इत्येके। व्युस्यति। व्युष्, प्युष्, पुस्, चु, प। उत्सर्गः। व्योषयति इत्यप्यन्ये।

व्ये—व्येञ्. भ्वा, उ। आच्छादनम्।

परिधानम्। लट् व्ययति। ०ते। लिट् विव्याय, पा ६, १, ४६। विव्यतुः। विव्ययिथ, पा ७, २, ६२। विव्याय। विव्यय। विव्यिव। विव्ये। लुट् व्याता। लृट् व्यास्यति। ०ते। आशिषि, वीयात्। व्यासीष्ट। लुङ् अव्यासीत्। अव्यासिष्टाम्। अव्यास्त। अव्यासाताम्। कर्मणि,वीयते। अव्यायि। सन् विव्यासति। ०ते। यङ् वेवीयते, पा ६, १, १८। वेवेति। वेवयीति। णिच् व्याययति, पा ७, ३, ३७। वीत्वा। ०व्याय। परिवीय, परिव्यय, पा ६, १, ४३, ४४। वीतः। वीतिः। व्यानम्। व्यायः। व्यातुम्। सम्—आच्छादनम्। आशाः संविव्युरम्बरविकाशि रजः, भ ५, ३।

व्रज्—(वज्) भ्वा, प। गतिः।

व्रजति। व्रजि इत्येके। व्रष्जति। वव्राज। व्रजिता। व्रजिष्यति। अव्राजीत्, पा ७, २, ३। विव्रजिषति। वाव्रज्यते। वाव्रज्मि। व्राजयति। व्रज्, चु, प, वो। २संस्कारः। २गतिः। व्राजयति। वज्, वाजयति इत्येके। परि—तीर्थभ्रमणम्। प्र—प्रव्रज्या। प्रव्रज्यानम्। चतुर्दशसमा रामं प्राव्राजयत्, र १२, ६। परिव्राट्। व्रजः। व्राजः। व्रज्या। प्रव्रजितः।

व्रण्—(अण) भ्वा, प। शब्दः।

व्रणति। वव्राण। व्रणिता। व्रण, अदन्तः। चु, प। गात्रविचूर्णनम्। अङ्गभेदः। व्रतम्। व्रणयति।

व्रस्—ओव्रस्चू, तु, प। छेदनम्।

व्रश्चति, पा ६, १, १६। वव्रस्च। वव्रश्चतुः। वव्रश्चिथ, वव्रष्ठ। वव्रश्चुः, भ १४, ७७। व्रश्चिता, व्रष्टा। व्रश्चिष्यति, व्रक्ष्यति। आशिषि, व्रश्चात्। अव्रश्चीत्, अव्राक्षीत्। अव्रश्चिष्टाम्, अव्राष्टाम्। अव्रश्चिषुः अव्राक्षुः। विव्रश्चिषति,विव्रक्षति। वरीव्रश्च्यते। वाव्रष्टि। वरीव्रश्चीति। व्रश्चयति। अविव्रश्चत्। व्रश्चित्वा, पा ७, २, ५५। व्रश्चित्वा तरून्, भ ८, ४१। ०व्रश्च। व्रश्चः, भ १२, ७५। व्रश्चनम्। व्रश्चनः। क्विप्, व्रश्चट्।

व्री—क्रया, प। व्रीङ्, दि, आ।

प्रार्थनम्। याचनम्। व्रिणाति। व्रीणाति, वा। व्रीयते। अयं गत्यर्थोऽपि। विव्राय। विव्रिये। व्रेता। व्रेष्यति। ०ते। अव्रेषीत्। अव्रेष्ट।

व्रीड्—दि, प। १प्रेरणम्। क्षेपणम्। २लज्जा। व्रीड्यति। विव्रीड। व्रीडिता। अव्रीडीत्। व्रीडित्वा। व्रीड़ितः। व्रीड़ा।

व्रीस्—व्रूस्, चु प, वो वधः।

व्रीसयति, व्रीसति। व्रूसयति, व्रूसति। व्रूषयति, व्रूषतीति कश्चित्।

ब्रुड्—(ब्रुड) तु, प। १ संवरणम्।
२ संवृतिः, वो। ३ निमज्जनम्, वो।
ब्रुडति। वव्रोड। ब्रुडिता। अव्रुडीत्।
ब्री—क्रया, प। गमनम्।
व्रिणाति। विव्राय। व्रेता। अव्रेषीत्। णिच् व्रेपयति, पा ७, ३, ३६। क्त, व्रीनः।

(श)

शक्—दि, उ। मर्षणम्। क्षमा।
शक्तिः। शक्ल्, खा, प। शक्तिः। सामर्थ्यम्। शक्नोति •ते हरिं द्रष्टुं भक्तः, को १३८। शक्नोति •ते दुःखं दीनः, दुर्गा। शक्नोति। शक्नुतः। शक्नुवन्ति। सर्वेषां शक्नुते वचः। शक्नोत्यशक्यमप्याजौ विजेतुं शक्नुतेऽप्यरीन्, कवि ६३। एतन्नते उभयपदी। शक्नुयात्। अशक्नोत्। शशाक। शेकिथ, शशक्थ। शेके। शशक्थ देवान् जेतुम्, भ ८, ४७। तां धर्त्तुं न शशाक, ने ६, ५२। न शेकतुः केलिरसादिरन्तुम्, ने ६, ५४। शक्ता। शक्ष्यति। •ते। आशिषि, शक्ष्यात्। शक्षीष्ट। दिवादिस्तु सेट् इति कश्चित्। तन्नते शकिता, शकिष्यति, •ते, को १३८। खादिर्नेट् इति क्रमदीश्वरः। खादिर्वेट् इति बोपदेवः। तन्नते, शकिता, शक्ता। अशकत्। अशक्त। न योद्धुमशकन् केचित्, भ १५, ४८। शिक्षति, ते, पा ७, ४, ५४। धनुषि, शिक्षते, को २४२। शाशक्यते। शाशकीति। शाशक्ति। णिच् शाकयति। अशीशकत्। शक्ता। •शक्य। शक्तः। शक्तः शकिनः घटः कर्त्तुमिति काशिका।
शक्तिः। शकनम्। शाकः। शक्तुम्। शक्यम्। तत् केकयौ सोढु मशक्नुवाना, भ ३, ६। शक्योऽस्य मन्युर्भवता विनेतुम्, प २, ४८। शक्या मखेनापि सुदोऽमराणाम् ने ६, ६८।
शङ्क्—शकि, भ्वा, आ। १ त्रासः।
भयम्। शङ्का। २संशयागोपः, वो। संशयः। शङ्कते। कुतोऽपि शङ्कते नासौ, कवि ६२। शशङ्के। शशङ्किषे। शङ्किता। शङ्किष्यते। अशङ्किष्ट। अशङ्किषाताम्। अशङ्किषत। नाशङ्किष्ट विवस्वतः, भ १५, ३८। बन्धूनशङ्किष्टासेदुषोऽपायम्, भ ३, २६। कर्मभावयोः, शङ्क्यते। अशङ्कि। शिशङ्किषते। शाशङ्क्यते। शाशङ्क्ति। शङ्कयति। शङ्कित्वा। •शङ्क्य। शङ्कितः। शङ्कनम्। शङ्का। शङ्कितुम्। शङ्कितव्यः। आ—आशङ्का। सन्देहः। आशङ्कमानो वैदेहीं खादिताम्, भ ६, ६।
शच्—भ्वा, आ। कथनम्। शचते।
शञ्च्—शचि, भ्वा, आ, वो। गतिः।
शट्—भ्वा, प। १रोगः। २भेदः।
३गतिः। ४अवसादः। शटति। शट्, चु, आ, वो। श्लाघा। शाटयते। शाटी। शाटकः।
शठ्—भ्वा, प। २ कैतवम्। शाठ्यम्। मित्रवञ्चनम्। २ हिंसा। ३संक्लेशनम्। दुःखानुभवः। शठति। शशाठ। शेठतुः। शठिता। अशठीत्, अशाठीत्। शठः।
शठ्, शाठ्, शाठि, चु, प। १असंस्करणम्। २ संस्करणम्, वो। ३ गतिः। ४ आलस्यम्, वो। शठ्, चु, आ। श्लाघा। शाठयति। •ते। शाठयति। शण्ठयति। सठ् शाठ् इत्येके। शठ

ख्ठ अदन्तौ। चु, प। सम्यग्भाषणम्। दुर्वचनम्, वो। सम्यग्भाव इत्यन्ये। शठयति। खठयति।

शण्—(चण) भ्वा, प। १ दानम्। २गतिः। शणति। शणयति। दाने घटादिः।

शण्ड्—शडि, भ्वा आ।

रोगसङ्घातयोः। शण्डते। शण्डः। पद्मशण्डः।

शद्—शदॢ्ल, भ्वा, तु, प। १गतिः।

२ शातनम्। छेदनम्। ३ विशीर्णता। पतनम्। पातनम्, दुर्गा। शीयते, पा ७, ३, ५८। १, ३, ६०। शीयते हृद्धिमानपि, भ १८, ९। अशीयत नृमांसादां वलं सुग्रीववाधितम्, भ १७, ७७। शशाद। शेदतुः। शेदिथ, शशत्थ। शत्ता। शत्स्यति। अशदत्। शिशत्सति। शाशद्यते। शाशत्ति। शातयति। अशीशतत्। जङ्घेऽशीशतद्बाणैः, १५, ६८। गतौ, तु, गाः शादयति गोपालः, पा ७, ३, ४२। आ—शद्, भ्वा, प, वो। गतिः। आशीयते। आशत्ता। आशात्सीत्। शत्रुः। शदः। शादः। शाद्वलः।

शप्—भ्वा, दि, उ। १ आक्रोशः।

विरुद्धानुध्यानम्। शापः। २ उपालम्भनम्। भर्त्सना। ३ शपथकरणम्। शपति। ०ते। शप्यति। ०ते। कृष्णाय शपते, कौ २४३। शरीरस्पर्शपूर्वकशपथे आत्मनेपदम्, तेन सख्यः शपामि यदि किञ्चिदपि स्मरामि इति सिद्धम्। देवाग्निगुरुभ्यः शपते न यः। दासीमपि न शप्यति, कवि १७७। मैथिल्यै चाशपत्, भ १७, ४८। सहस्रशोऽसौ शपथानशप्यत् (कृतवान्), भ ३, ३२। शशाप। शेपिथ। शेपे। त्वां शशाप सा, र १, ७७। शप्ता। शप्स्यति। ०ते। अशाप्सीत्। अशाप्ताम्। अशाप्सुः। अशप्त। अशप्साताम्। अशप्सत। अशप्त। निरूपवानोऽसौ सीतायै स्मरमोहितः, भ ८, ९४। ताभ्योऽशपत कामिनः भ ८, ३७। शिशप्सति। ०ते। शाशप्यते। शाशप्ति। शापयति। अशीशपत्। शप्ता। ०शप्य। शप्तः। शप्तिः। शपनम्। शापः। शप्तुम्। शप्तव्यम्। अभि—अभिशापः। परि—आक्रोशः। पर्य्यशाप्सीद्विष्टासौ, भ ४, ३३।

शब्द्—चु, प। १ आविष्कारः।

२भाषणम्। ३ शब्दः, वो। शब्दयति। सोपसर्गस्येवाविष्कारोऽर्थः प्रतिशब्दयति (प्रतिश्रुत माविष्करोति) प्रशब्दयति (गभीरमर्थं शिष्यः स्फुटीकरोति) दुर्गा। परं शब्दयति हाःस्थः, कवि १८४।

शम्—शमु, दि, प। उपशमः।

शान्तभावः। निवृत्तिः। शान्तीकरणम्, दुर्गा। शाम्यति, पा ७, ३, ७४। शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः, कु २, ४०। हृदं रजोऽशाम्यत्, भ १७, ६३। शशाम। शेमतुः। शेमिथ। शशाम दृष्टापि विना दवाग्निः, र २, १४। समस्तरोऽपि शशाम क्षितिपाललोकः, र ७, ३। शमिता। शमिष्यति। अशमत्। (अशमत्, अशमीत्, वो)। शिशमिषति। शंशम्यते। शंशम्ति। तेजांसि शंशमाञ्चक्रुः, भ १४, ६७। शमयति। अशीशमत्। शमयेदपि संग्रामे यो रविम्, भ ६, ९८।

शम, चु, आ, वो आलोचनम्। प्रणिधानम्, दुर्गा। शामयते। (ड) शमित्वा, शान्त्वा। ०शम्य। शान्तः। शान्तिः। णिच् शान्तः, शमितः, पा ७, २, २७। वरेण शमितं तत्तपः, कु २, ५६। शमी, पा ३, २, १४१। शमनम्। शमः। शमितुम्। उप—निवृत्तिः। विनाशः। नि—अवणम्। दर्शनम्। राज्ये तं निशम्य प्रतिष्ठितम्, र ४, २। प्रतिध्वनीनात्मकृतान् निशम्य, भ २, ६। अदर्शने घटादिः। प्रणयिनो निशमय्य स्वरम्, मा ६, १८। दर्शने तु, रूपं निशामयति। प्र—प्रणाशः। निवृत्तिः।

शम्ब्—(कम्ब) भ्वा, प। १हिंसा।

२ गतिः, वो। शम्ब् (षम्ब्) चु, प। सम्बन्धः।

शर्ब्—(अर्ब्) भ्वा, प। १ हिंसा।

२ गतिः, वो। शर्व् (अर्व) भ्वा, प। हिंसा। शर्वति। शर्वति।

शल्—भ्वा, प। १ गतिः।

२ वेगः, वो। शल्, भ्वा, आ। १चलनम्। २संवरणम्। आच्छादनम। शलति। ०ते। शलन्ते सद्गुणा नित्यं शलन्ति च सुरालयम्, कवि १०१। शशाल। शेले। अशालीत्। अशलिष्ट। शल्, चु, आ, वो। श्लाघा। शालयते। उद्—उच्छलनम्। प्रोच्छलच्छोणित,—मा ३, ६६। शलः। शलभः। शललुः। शलाका।

शलभ्—न्वा, आ। श्लाघा। शलभते।

शव्—भ्वा, प। १गतिः। २विकारः।

शश्—भ्वा, प। प्लुतगतिः। शशति। शेशतुः। शेशिथ। शशः।

शष्—(कष) भ्वा, प। वधः। शषति।

शस्—शसु, भ्वा, प। हिंसा।

शसति। शशास। शशसतुः, पा ६, ४, १२६। शशंस बहून् योधान्, भ १४, १०३। शंसिता। अशंसीत्, अशांसीत्। शश् (सस्) विशसत्यृत्पथस्थितान्, कवि २२। शस्यम्। शस्तम्।

शंस्—शंसि, भ्वा, आ। १ इच्छा।

२आशीः। इष्टार्थशंसनम, वो। नित्यमाङ्योगः। आशंसते। आशंसन्ते समितिषु सुरा जयम्, शकु २, ८८। आशशंसे। आशिषश्चाशशंसिरे, भ १४, ८०। आशंसिता। आशंसिष्ट। आङ्रहितोऽपि दृश्यते। यः शंसते सतां वृत्तिम्, कवि २२।

शन्सु, भ्वा, प। १ स्तुतिः। प्रशंसा।

२ हिंसा। शंसति। न मे [illegible]या शंसति कश्चिदीप्सितम् र ३, ५। शशंस। शशंसतुः। शशंस वाचा पुनरुक्तयेव, र २, ६८। शंसिता। शंसिष्यति। शस्यात्। अशंसीत्। अशंसिष्टाम्। अशंसिषुः। कर्मणि, शस्यते। अशंसि। शिशंसिषति। आशस्यते। आशंसन्ति। शंसयति। अशशंसत्। शंसित्वा, शस्त्वा। ०शस्य। शस्तः। शस्तिः। शंसनम्। शंसः। नृशंसः। अभि—अभिशापः। अपवादः। आ—कथनम्। आशंसता बाणगतिं वृषाङ्के, कु ३, १४। प्र—प्रशंसा। प्राशंसीत्तं निशाचरः, भ १५, ६५।

शंस् शंस्त, (संस् संस्त)।

शाख्—शाखृ, भ्वा, प। व्याप्तिः।

शाखति। (ऋ) अशशाखत्। शाखा।

शाङ्—शाङृ, भ्वा, आ। श्लाघा।

शान्—भ्वा, उ। तेजनम्।

तीक्ष्णीकरणम्। शीशांसति ०ते शस्त्रम्, पा ३, १, ६। अन्यत्र शानयति। शीसांसते खड्गलतां शानयत्याशुगान् नित्यम्, कवि ७६।

शान्त्व् (सान्त्व्)।

शार—अदन्तः। चु, प, वो। दौर्बल्यम्।

शाल्—शाल्ल, भ्वा, आ, वो। श्लाघा।

शालते। शशाले। धनशाली। यस्य संग्रामशौण्डत्वं शालन्ते बाहुशालिनः, कवि १०१।

शास्—शासु, अदा, प।

अनुशासनम्। उपदेशः। शासनम्। आज्ञा। लट् शास्ति। शिष्टः, पा ६, ४, ३४। शासति। शास्ति य आज्ञया राज्ञः स सम्राट् इत्यमरः। न किंसखा साधु न शास्ति योऽधिपम्, भा १, ५। शास्त्यरीन् धर्ममाशास्ते, कवि २२। हि, शाधि, पा ६, ४, ३५। लिङ् शिष्यात्। लङ् अशात्। अशिष्टाम। अशासुः। अशात्। अशाः। कुरु निःसंशयं लोक मित्यशात, र १५, ७८। लिट् शशास। शशासतुः। उर्वीं शशासैकपुरी मिव, र १, ७०। लुट् शासिता। लृट् शासिष्यति। आशिषि, शिष्यात्। लुङ् अशिषत्। राज्ञो राज्य मशिषत, र १८, ५६। कर्मणि, शिष्यते। अशासि। सन् शिशासिषति। यङ् शेशिष्यते। शाशास्ति। णिच् शासयति। अशशासत्, पा ७, ४, २। (ड) शासित्वा, शिष्ट्वा। ०शिष्य। शिष्टः। शिष्टिः। शास्तिरित्यौणादिकः। शासनम्। पौरवे वसुमतीं शासितरि, शकु १, १४०। द्वौ शास्तारौ त्रिलोकेऽस्मिन् धर्माधर्मौ प्रकीर्त्तितौ। इत्यादौ तु औणादिकत्वेन सिद्धिः। शासु, भ्वा, अदा, आ। १ इच्छा। २ आशीः। इष्टार्थाशंसनम् वो। नित्य माङ्योगः। आशासते, वो। आशास्ते। आशासाते। आशासते। श्रियमाशासते लोलाम्, भ ५, १६। आशासत ततः शान्तिम्, भ १७, १। आशशासे। आशासिता। आशासिष्यते। आशासिषीष्ट। आशासिष्ट। (ड) आशासित्वा, आशास्त्वा। पञ्चमस्वरानुबन्धसामर्थ्यात् न ल्यप् इति गोविन्दभट्टः। उदनुबन्धफलं छन्दस्येव इति धातुप्रदीपः। आशास्तः। आशासनम्। क्विप्, आशीः। अनु—अनुशासनम्। आ—आदेशः। कथनम्। रक्षांसि रक्षितुं सीतामाशिषत्, भ ६, ४। वृत्तं लक्ष्मणायाशिषत्, भ ६, २७। प्र—प्रकृष्टशासनम्। वेणे राज्यं प्रशासित, मनु ८, ६६।

शि—शिज्, स्वा, उ। तनूकरणम्।

तीक्ष्णीकरणम्। अस्त्रादेस्तेजनम्। शिनोति। शिनुतः। शिन्वन्ति। शिनुते। शिशाय। शिशयिथ, शिशेथ। शिश्ये। शेता। शेष्यति। शेष्यति। ०ते। अशैषीत्। अशेष्ट। शिशीषति। शेशीयते। शेशेति। शाययति। अशीशयत्। शित्वा। ०शित्य। शितः। निशितः। सम्—संशितः। संशितव्रतः। नि—निशिनोत्यसिपुत्रिकाम्, कवि ७६।

शिच्—भ्वा, आ। शिक्षा।

विद्याग्रहणम्। शिक्षते। मरुत् किमप्यापि शिक्षते, नै १, ७२। अशिक्षतास्त्रं पितुरेव मन्त्रवत्, र ३, ३१। शिक्षा। शैक्षः।

शिङ्ग्—शिघि, भ्वा, प। आघ्राणम्। शिङ्गति। शिशिङ्ग। शिङ्गिता। अशिङ्गत्। शिरस्युपशिशिङ्ग तम्, भ १४, ५२। तं मूर्ध्न्युपाशिङ्गत्, भ १७, ८५।

शिञ्ज्—शिजि, अदा, चु, वो, आ। अव्यक्तध्वनिः। शिञ्जते। अशिञ्जत। शिशिञ्जे। शिञ्जिता। अशिञ्जिष्ट। शिञ्जयते। शिञ्जते। घण्टां दीर्घं शिशिञ्जिरे, भ १४, ४। शिञ्जानपतत्रिसंघः, भ ३, ४६। स्वनिते वस्त्रपर्णानां भूषणानाञ्च शिञ्जितम्—इत्यमरः। तालैः शिञ्जद्बलयशुभगैरित्यादौ परस्मैपदमपि। शिञ्जितम्। शिञ्जा।

शिट्—(सिट्) भ्वा, प। अनादरः। तं शेटति निरीक्ष्य यः, कवि २७०।

शिल्—सिल्—षिल्, तु, प। उच्छ्रम्। कणैश्च आदानम्। कनिशाद्यर्जनम्। उद्धृतशस्यशेषाहरणम्। शिलति। सिलति। षिलति। शिला।

शिष्—(कष) भ्वा, प हिंसा। शिष्ल्ट, रु, प। विशेषणम्। विशेषकरणम्। उपरञ्जनम, दुर्गा। लट् शेषति। निःशेषं शेषति क्रोधात् प्रतिपक्षक्षमापतीन्। एकः शेषति योऽशेषभूतानां भरणे ध्रुवम्॥ कवि १८२। शिनष्टि। शिष्टः। शिंषन्ति। हि, शिण्टि। शिनषाणि। लिङ् शिंष्यात्। लङ् अशिनट्। अशिंष्टाम्। अशिंषन्। लिट् शिशेष। शिशिषतुः। शिशिषिम्। लुट् शेष्टा। लृट् शेक्ष्यति। लुङ् अशिक्षत्। रु, अशिषत्। कर्मणि, शिष्यते। अशेषि। तेषा मेकः शिष्यते अन्ये लुप्यन्ते, पा, १, २, ६१। शिशिक्षति। शेशिष्यते। शेशेष्टि। शेषयति। अशीशिषत्। शिष्, चु, प। असर्वोपयोगः। परिशेषोक्करणम्। शेषयति। शेषति। शेष्टा। अशिक्षत्। शिष्टा। ०शिष्य। शिष्टः। शिष्टिः। शेषणम्। शेषः। शेष्टुम। शेष्टव्यम्। अव—अवशेषः। उद्—उच्छिष्टम्। वि—विशेषः। विधिरहो विशिनष्टि मनोरुजम, उत्तर १४८। अस्मात् काणो विशिष्यते। णिच्—अतिशायनम्। विशेषयति विशेषति सम्पत्त्या भूपं विधिः, दुर्गा। विशिनष्टि स्मरं मूर्त्या श्रिया शक्रं विशेषति। विशेषयति यो वाग्मी वाचा वाचस्पते र्वचः॥ कवि ८१। मदनमपि गुणैर्विशेषयन्ती, मृच्छ ११७। निर्—निःशेषयति यः शत्रून्। निःशेषयति दानेन भाण्डागारं दिने दिने, कवि, १६१।

शी—शीङ्, अदा, आ। शयनम्। स्वप्नः॥ शेते, पा ७, ४, २१। शयाते। शेरते, पा ७, १, ६। शेषे। शयीत। अशेत। अशयाताम्। अशेत सा बाहुलतोपधायिनी, ५, १२। शिश्ये। शिश्यिषे। शयिता। शयिष्यते। शयिषीष्ट अशयिष्ट। अशयिषाताम्। अशयिषत। भावे, शय्यते। अशायि शय्यन्ते शयनिकाः (शयितुं याच्यन्ते) संक्षिप्तसारम्। शिशयिषते। शाशय्यते ७, ४, २२। शेशय्यीति। शेशेति शाययति। अशीशयत्। शयित्वा ०शय्य। शयितः। शयनम्। शयितुम् शयनीयम्। शयितव्यम्। शय्या शयानः। शयालुः। शयुः। अति—अतिक्रमः। अतिवर्त्तनम्। पूर्वान् महाभाग तथातिशेषे, र ५, १४। वचो वाचा

तिशय्यते, मा २०, २३ । अधि—अधिष्ठानम् । ग्राम मधिशेते, पा १, ४, ४६ । वनं सिंहोऽधिशेते, भ १०, ३५ । वाहनान्यधिशिश्यिरे (आरूढवन्तः), भ १४, ७४ । अनु—अनुशयः । द्वेषः । सम्—संशयः । संशय्य कर्णादिषु तिष्ठते यः, भा ३, १४ ।

शीक्—शीक, भ्वा, आ । १ सेचनम् ।

२ गतिः, वो । शीकते । शिशीके । शिशीके शोणितं व्योम, भ १४, ७६ । शीकिता । अशीकिष्ट । सीक, सीकते । शीक्, सीक्, चु, प । १ दीप्तिः । २ आमर्शनम् । स्पर्शः । ३ क्षमेति भट्टमल्लः । ४ सेकः, वो । शीकयति । सीकयति । चन्द्रावतीतरङ्गादाः शीकयन्ति च यद्दपुः (वायवः स्पृशन्ति), कवि १८३ । शीकरः ।

शीभ्—शीभृ, भ्वा, आ । कत्थनम् ।

शील्—भ्वा, प । समाधिः । प्रवृत्तिः । सेवानुभावनम् । शीलति । यः शीलति सदा धर्मम्, कवि २४५ । शील—अदन्तः । चु, प । १ उपधारणम् । अभ्यासः । २ अतिशायनम् । अतिशयकरणम् । शीलयति । अशिशीलत् । शीलय नीलनिचोलम्, गीतगो ५, ११ । दलशीलितशयनम् (कृतम्), गीतगो ८, ६ । निशि गहनं शीलितम्, गीतगो ७, ४ । अनुशीलनम् । परिशीलनम् । शीलम् । शीले भवा प्रवृत्तिः शैली ।

शु—भ्वा, प । गति रित्येके ।

शुक्—भ्वा, प, वो । गतिः ।

शोकति । शुकः । शुक्तः ।

शुच्—भ्वा, प । शोकः ।

पुत्रादे रदर्शनाद् दुःखानुभवः, दुर्गा । शुचिर् ईशुचिर्, वो । दि, उ । १ पूतीभावः । २ शुद्धिः । ३ क्लेदः । आर्द्रीभावः । ४ भेदः, वो । शोचति । शुच्यति । ०ते । वह्नि राचमन स्नानप्रायश्चित्तैश्च शुच्यति, कवि २१८ । न शोचति सदाचारो यो मृतानपि बान्धवान्, कवि १०६ । किं शोचतेऽभ्युदये वतास्मान् भ ३, १२ । पापगोचरमात्मानमशोचन्, भ ७, ८० । शुशोच । शुशुचे । एन मद्रे स्तनया शुशोच, र २, ३७ । शोचिता । शोचिष्यति । ०ते । अशोचीत् । अशोचिष्टाम् । अशोचिषुः । रावणोऽशोचीत्, भ १५, ७१ । (इर्) अशुचत्, अशोचीत् । अशोचिष्ट । कर्मणि, शुच्यते । अशोचि । शुशुचिषति । ०ते । शुशोचिषति । ०ते । शोशुच्यते । शोशोक्ति । शोचयति । अशूशुचत् । शोचित्वा, शुचित्वा । ०शुच्य । शुचितः । (ई) शुक्तः । शोचनम् । शोकः । शोचितुम् । शोचितव्यम् । शोचनीयम् । शुक् । शुचिः । अनु—अनुशोचनम् । गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः, गी २, ११ ।

शुच्—चुच्, भ्वा, प । १ अभिषवः ।

अवयवशिथिलीकरणम् । २ सुरास्नानम् । ३ स्नानम् । (पीड़नम्, मन्थनम्, दुर्गा) शुच्यति । चुच्यति । शुशुच्य । शुचिता । अशुचीत् । शुची, चुची, वो । क्त, शुक्तः, चुक्तः ।

शुठ्—शुण्ठ्—शुठि, भ्वा, प ।

प्रतिघातः । गत्याघातः । शुठि, भ्वा, प । शोषणम् । शुष्कीभावः । शोठति । शु-

ण्ठति। शुठ्, चु, प। आलस्यम्। शुठि, चु, प। शोषणम्। शुष्कीकरणमिति रमानाथः। शुष्कीभावः, दुर्गा। शोठयति। शुण्ठयति, शुण्ठति। शुण्ठः। शुण्ठी।

शुण्ड्—शुडि, भ्वा, प। १ खण्डनम्। २ प्रमर्दनम्। शुण्डति। शुशुण्ड। शुण्डिता।

शुध्—दि, प। शौचम्। शुद्धिः।

शुध्यति। ध्यानाच्छुध्यति यन्मनः, कवि ३०। रजसा शुध्यते नारी नदी वेगेन शुध्यति, मनु ५, १०८। शुशोध। शुशुधतुः। शोद्धा। शोत्स्यति। अशुधत्। शुशुत्सति। शोशुध्यते। शोशोद्धि। शोधयति। अशूशुधत्। (उच्चूलनम्) राजा गौड़ेन्द्रः कण्टकं शोधयति, दर्पणः १४। (ऋणोद्धारः। अशुद्धिसंशोधनम्)। परि—णिच्, ऋणोद्धारः। कण्टकाद्यपसारणम्। भ्रमादिसंशोधनम्। राज्ञे देयं भागं परिशोधयति, पा १, ३, ३६। तत् सर्वं परिशोधयन्तु गीतगोविन्दनः, गीतगो १२, २८। वि—शुद्धिः। परिसंस्करणम्।

शुन्—तु, प। गतिः। शोनिता।

शुन्ध्—भ्वा, प। उ, वो। शुद्धिः।

शुन्धति। ०बे। यो मां शुन्धति सत्त्वेन शुध्यते तपसा तनुम्, कवि २०। शुशुन्ध। ०न्धे। शुन्धिता। शुन्ध्यात्। शुन्धिशीष्ट। शुन्ध्, चु, प। अयमात्मनेपदीति केचित्, दुर्गा। शौचकर्म। शोधनम्। शुन्धयति। शुन्धति। शुन्धिता।

शुभ्—भ्वा, आ। दीप्तिः। शोभा। शोभते। शोभते रूपसम्पत्तौ, कवि ४१। शुशुभे। शोभिता। शोभिष्यते। अशुभत्। अशोभिष्ट, पा १, ३, ९१। शुशुभिषते, शुशोभिषते। भृशार्थे यङ्निषेधः। पौनःपुन्ये तु, शोशुभ्यते, कौ २०६। शोभयति। अशूशुभत्। शुभ् शुन्भ्, सुम् सुन्भ्, भ्वा, प। १भाषणम्। कथनम्। २भासनम्। दीप्तिः। ३ हिंसा। शोभति, शुम्भति। सोभति, सुम्भतीति कश्चित्। शोभनम्। शोभा। शुभम्। शुम्भम्। शुम्भः। निशुम्भः। शुभ् शुन्भ्, तु, प। शोभा। शुभति, शुम्भति। नत्वोपेऽपि तुम्, कौ १५१। शुभति स्फोरया स्त्रिया, कवि ४१।

शुल्क—चु, प। १ अतिसर्जनम्। वर्जनम्। २कथनम्। ३ सृष्टिः, वो। शुल्कयति।

शुल्ब्—चु, प। १मानम्। २सृष्टिः, वो।

शुष्—दि, प। शोषणम्।

स्नेहरहितीभावः। शुष्यति। शुशोष। शुशुषतुः। शोष्टा। शोक्ष्यति। अशुषत्। शुशुक्षति। शोशुष्यते। शोशोष्टि। शोषयति। अशूशुषत्। शोषय मनःसिञ्चनापम्, गीतगो १२, ५। शुष्ट्वा। ०शुष्य। शुष्कः, पा ८, २, ५१। शोषणम्। शोषः। शोष्टुम्। शोष्टव्यम्। परि, वि, सम्—अतिशोषणम्। परिशुष्यन् महाक्रदः, भ १०, ४१। जड्डंशोषं तृणवद्विशुष्कः, भ ३, १४,। प्रतापसंशोषितशत्रुपङ्कः, र ६, ३६। शूर्—सूर्—शूरी, सूरी, दि, आ। १हिंसा। २स्तम्भनम्। जड़ीभावः। शूर्यते।

शूर्पः । शूर, अदन्तः । चु, आ । विक्रमः । उद्यमः । शूरयते । अशुशूरत ।

शूर्प् (शूर्ष) चु, प । मानम् ।

शूल्—भ्वा, प । १ रोगः । २ शब्दः । ३सङ्घातः । शूलति । शुशूल । शूलिता ।

शूष्—भ्वा, प । प्रसवः । शूषति ।

शृध्—शृधु (स्रधु) भ्वा, उ ।

उन्दनम् । क्लेदनम् । आर्द्रीभावः । शर्धति । °ते । अशर्धत् । अशृधे । शर्धिता । अशर्धीत् । शृधु, भ्वा, आ । कुत्सितशब्दः । अपानशब्दः । शर्धते । अशृधे । शर्धिता । शर्त्स्यति । शर्धिष्यते । शर्धिष्यते । अशर्त्स्यत् । अशर्धिष्यत, पा ७, २, ५८ । अशृधत् । अशर्धिष्ट । शिशृत्स्यति । शिशर्धिषते पा १,३,८२ । शरीशृध्यते । शरीशर्धि । शृधु, चु, प । २प्रसहनम् । २प्रहसनम् । शर्धयति । शर्धति । अशशर्धत् । अशीशृधत् । शर्धित्वा । शृद्धा । शृद्ध ।

शॄ, क्रया, प । छननम् । क्लेदनम् ।

शृणाति । शृणीतः । शृण्वन्ति । शृणाति मद्यान्, भा १४, १३ । परशुः सर्वशस्त्रास्त्रं शृणातु,वीर ४,३ । अशारः । अशरतुः, पा ७, ४, ११ । अशरुः, पा ७, ४, १२ । अशरिव, अशिव । शरिता, शरीता । शरिष्यति, शरीष्यति । शीर्य्यात् । अशारीत् । कर्मणि, शीर्य्यते । अशारि । शिशरिषति, शिशरीषति, शिशीर्षति । शेशीर्य्यते । शारयति । शारयति । अशीशरत् । शीर्णः । शीर्णिः ।

शेल्—शेल्ल (पेल्ल) भ्वा, प । १गतिः । २क्रमः । वो । शेलति । शेल्ल । शेलति ।

शेव् (सेव) ।

शै—श्यै—शॅ, भ्वा प । पाकः ।

शायति । शायति । शायति, वो । अशी । शाता । शास्यति । अशासीत् । श्यै, श्यपयति । पाके घटादि रिति प्रदीपः ।

शो—दि, प । तनूकरणम् ।

अल्पीकरणम् । श्यति, पा ७, ३, ७१ । शश्यौ । शश्यतुः । शाता । शास्यति । अशासीत्, अशात्, पा २, ४, ७८ । अशासिष्टाम्, अशाताम् । शिशासति । शाशायते । शाययति, पा ७, ३, ३७ । शात्वा । °शाय । शितः, शितवान् । शातः, शातवान्, पा ७, ४, ४१ । व्रते नित्यं संशितं व्रतम् (सम्यक् सम्यादितम्) । संशितो ब्राह्मणः (व्रतविषयकयत्नवान्), कौ ३५८ । नि—निशानम् । तेजनम् । न्यश्यन् शस्त्राणि, भ १९, ४ । नमुच्यत निशातासिम्, भ ५, ४६ । मा १, ४५ ।

शोण्—शोणृ, भ्वा, प । १ वर्णः । रागः । रक्तीभावः । २ गतिः । शोणति । शुशोण । शोणिता । अशोणीत् । शोणा ।

शोट्—शोड्—भ्वा, प । मर्दः ।

वः शोटति सभामध्ये, कवि २७० ।

स्रुत्—स्रुत्—स्रुतिर्, स्रुतिर्, भ्वा, प । क्षरणम् । आसेचनम् । वा । स्रोतति । स्रोतति । धाराः स्रोतन्ति, उत्तर ११३ । लिट् सुस्रोत । सुस्रुततुः । सुस्रोत ब्रह्मिनां रक्तम्, भ १४, ४० । स्रोतिता । स्रोतिष्यति । (दर) अस्रुतत्, अस्रोतीत् । रक्तमस्रोतिषुः क्षुधाः, भ १५, ५१ । सुस्रोतिषति, सुस्रुतिषति । सोस्रुत्यते । सोस्रोत्ति । सोस्रोतयति । अस्रस्रात ।

अथ्—भ्वा, प। बध इति कश्चित्।

अथति। अथयति, घटादिः।

अथील्—अथील् (मील) भ्वा, प। निमेषः।

अथे—अथेङ्, भ्वा, आ। गतिः।

अथायते। अथाथे। अथास्त। क्तः, अथानः अथीतः स्वर्गः। अथीनं घृतम्, पा ८, २, ४७। आ—अथेषणम्। पथ-आख्यानकर्टमान्, र ४, २५।

अथ्—स्रथ्—श्रथ्, अकि, स्रकि। अकि (सेक) भ्वा, आ। गतिः। अथ्नते। स्रथ्नते।

अथ्, अगि (अगि) भ्वा, प। गतिः।

अथ्—भ्वा, प। दानम्।

अथति। अथयति, घटादिः। अभ्यि-अथत्, अशश्राथत्। अथ्, चु, प। दानम्। आथयति। विश्राणनं वित-रच मित्यमरः। विश्राणयति यः श्रीमान् विप्रेभ्यो विपुलं वसु। विश्रथन्ति च तेऽभ्यर्थे सत्यवाचः सदाशिषः॥ कवि १७०।

अथ्—(क्रथ) भ्वा, प। हिंसा।

अथति। अथयति, घटादिः। अथ्, चु, प। १प्रयत्नः। २मोक्षणम्। ३प्रति-हर्षः। अतिहर्षः। आथयति शिशुं पुनः पुनर्हर्षयति, दुर्गा)। अथ्, चु, प। १मोक्षणम्। २हिंसा। ३बन्धः। वो। आथयति। अथयति। अथ (सार) अदन्तः। चु, प। दौर्बल्यम्। अथयति॥ काव्यं आथयति स्फुटार्थमधुरं गद्यञ्च पद्यं सदा भावालङ्कृतिपेशलं अथ-यति खट्टाचरं नाटकम्। अथ्नाति ग्रन्थितावदानचरितः ग्रन्थं विचित्रञ्च

अन्थ्—अति, भ्वा, आ। ग्रैथिक्यम्।

अन्थ् (ग्रन्थ्) क्रया, प। सन्दर्भः। अन्थनम्। रचना। अन्थ्, क्रया, प १विमोचनम्। २प्रतिहर्षः। अन्थते अग्रन्थ्। अन्थिता। अग्रन्थिष्ट अथ्नाति। अथ्नीतः। अथ्नन्ति। अथ्नी यात्। अग्रथ्नात्। लिट् अग्रन्थ। अग्र न्थतुः। हरदत्तादीनां मते, अग्रन्थाथ ग्रन्थेथतुः। ग्रन्थिथ। उक्तमे तु अग्रन्थाथ अग्रन्थ, इति माधवः। तत्र मूल मृग्यम्, क्वौ १६७। अन्थिता। अन्थि ष्यति। अग्रन्थीत्। अग्रन्थिष्टाम् अग्रन्थिषुः। अन्थ्, चु, प। सन्दर्भः रचना। बधः, वा। अन्थयति। अ न्थति। अथित्वा, अन्थित्वा, पा १, २ २३। सन्दर्भो रचना गुम्फः अन्थ ग्रन्थनं समा इति हेमचन्द्रः।

अम्—अमु, दि, प। १तपस्या। २खेदः। अमः। क्लान्तिः। आम्यति पा ७, ३, ९४। अग्रमाम। अग्रमतुः। वीरौ अग्रमतु र्नच, भ १४, ११०। अमिता। अमिष्यति। अग्रमत्। नाग्र मद् घ्नन् ध्नवङ्कमान्, भ १५, ४८। अग्रमिषति। अंग्रम्यते। अंग्रन्ति। अमयति। हस्तिकारमते, विश्रामयति धुर्य्यान् विश्रामय, र १, ५४। रजो विश्रामयन् राज्ञां क्षत्रशून्येषु मौलिषु, र ४, ८५। (उ) अमित्वा, आन्त्वा। ०अम्य। आन्तः। आन्तिः। अमः। श्रमणः। श्रमौ, पा ३, २, १४१। आश्रमः। विश्रमः। विश्राम इति चान्द्रः। परि—परिश्रमः। अर्थे परि-श्राम्यसि वा किमित्यम्, ने ३, १३। वि—विश्रामः। किं विश्राम्यसि क्षण-भोगिभवने, भोतगो ६, १२। विश्राम-

श्रम् (स्रम्भ्)।

श्रा—अदा, प। १पाकः। २खेदः। घर्मार्त्तभावः, वो। श्राति। श्राति श्रेष्ठं हविः, कवि १६। श्रश्रौ। श्राता। श्रास्यति। श्रायात, श्रेयात्। अश्रासीत्। शिश्रासति। शाश्रायते। शाश्राति, शाश्रेति। पाके घटादिः। श्रपयति चरुम् (विक्लेदयति)। पाकादन्यत्र, श्रापयति (खेदयति)। क्त, श्राणः। क्षीरहविषोः पाके, श्रृतम्, पा ६, १, २७।

श्राम—अदन्तः। चु, ए, वो। मन्त्रः। गुप्तोक्तिः। अभिमुखीकरणम्। श्रामयति। रजो विश्रामयन् इति दुर्गा।

श्रि—श्रिञ्, भ्वा, उ। सेवा।

आश्रयः। श्रयति। ०ते। शिश्राय। शिश्रयिथ। शिश्रिये। तरुच्छायां शिश्रिये, र ३, ७०। श्रयिता। श्रयिष्यति। ०ते। आश्रिषि, श्रीयात्। श्रयिषीष्ट। अशिश्रियत। ०त, पा ३, १, ४८। शैलं न्वशिश्रियद्रामा, भ ६, १७। कर्मणि, श्रीयते। अश्रायि। शिश्रयिषति। ०ते। शिश्रीषति। ०ते, पा ७, २, ४८। शेश्रीयते। शेश्रयीति. शेश्रेति। आश्रयति। अशिश्रियत्। श्रित्वा, पा ७, २, ११। ०श्रित्य। श्रितः। श्रितवान्। श्रयणम्। श्रयः। श्रयितुम्। श्रयिता। श्रयितव्यम्। श्रयणीयम्। श्रीः। आ—आश्रयः। अवलम्बनम्। क्षतो भूतलमाश्रिताय, भ१९, १११। कल्पतरुच्छाया माश्रिता, र १, ७६। उद्—उच्छ्रायः। उन्नमनम्। प्रश्रयः। प्रणयः। स्पर्द्धा। सम्—आश्रयः।

श्रिष्—श्रिषु, (षु, षु) भ्वा, प।

दाहः। श्रेषति। श्रेषित्वा, श्रिषित्वा, श्रिष्ट्वा।

श्री—श्रीञ्, क्रया, उ। पाकः।

श्रीणाति। श्रीणीते। शिश्राय। शिश्रिये। श्रेता। अश्रैषीत्। अश्रेष्ट। श्रेयः।

श्रु—भ्वा, प। १श्रवणम्। २गतिः।

शृणोति, पा ३, १, ७४। शृणुतः। शृण्वन्ति। शृणवः, शृण्वः। श्रु, गतौ श्रवति। रेफरहितोऽप्ययमिति केचित्। श्रवति, दुर्गा। हि, शृणु। शृणुयात्। लङ् अशृणोत्। अशृणुताम्। अशृण्वन्। शुश्राव। शुश्रुवतुः। शुश्रोथ। शुश्रुष, पा ७, २, १३। शुश्राव घोषं न जनीवजन्यम्, भ ३, २७। लुट् श्रोता। लृट् श्रोष्यति। श्रूयात्। लुङ् अश्रौषीत्। अश्रौष्टाम्। अश्रौषुः। कर्मणि, श्रूयते। अश्रावि। नवीनमश्रावि तवानमाद्दिम्, नै ८, ४१। कृतानि चाश्रोषत षट्पदानाम्, भ २, १०। सन् (सेवा) गुरुं शुश्रूषते, पा १, ३, ५७। शुश्रूषस्व गुरुम्, शकु ४, १५८। शोश्रूयते। शोश्रवीति। शोश्रोति। श्रावयति। अशुश्रवत्, अशिश्रवत् पा ७, ४, ८१। शुश्रावयिषति, शिश्रावयिषति। दृष्टान्त मशिश्रवत्, भ ५, ५१। श्रुत्वा। ०श्रुत्य। श्रुतः। श्रुतिः। श्रवणम्। श्रवः। श्रोतुम्। श्रोतव्यम्। आ, प्रति—प्रतिज्ञा। विप्राय गा माश्रृणोति, पा १, ४, ४०। आशुश्रूषन् वार्त्ताम्, भ ८, ३६। कामं राज्ञे प्रतिश्रुत्य [illegible]

सम्—(अकर्मकादात्मनेपदम्) संशृणुते, को २४७। स्तिताच्च यः संशृणुते स किंप्रभुः, भा १, ५। संशृणोति न चोक्तानि, भ ५, १८। क्रोष्टून् मम शृणोत् रसनः, भ ६, ५। रक्षांसीति पुरापि संशृणुमहे इति मुरारिप्रयोगः १६२ प्रामादिकः, को २४७।

श्रेक् (सेक्) श्रे (श्रै)।

श्रोण—श्रोण्, भ्वा, प। संघातः।

श्रोणति। श्रोणिः।

श्रङ्—श्लकि (सेक) भ्वा, आ। गतिः।

श्रङ्—श्लगि (अगि) भ्वा, प। गतिः।

श्रथ—(अश्र) अदन्तः। चु, प। कार्श्यम्।

श्रथते दीर्घसंसारग्रन्थिः, कवि १६८।

श्राख्—श्राखृ, (शाखृ) भ्वा, प। व्याप्तिः।

श्राघ्—श्राघृ, भ्वा, आ। कत्थनम्।

श्राघा। प्रशंसा। श्राघते देवदत्ताय, पा १, ३, ३४। अश्राघे। श्राघिता। श्राघिष्ये केन, भ १८, ४। अश्राघिष्ट। अश्राघिषाताम्। श्राघयति। अशश्राघत्। श्राघमानः परस्त्रीभ्यः, ८, ३७। श्राघा।

श्लिष्—श्लिषु (प्लुषु) भ्वा, प। दाहः।

श्लेषति। शिश्लेष। श्लेषिता। अयं सेट्। श्लिष्, दि, प। आलिङ्गनम्। प्रत्यासत्तिः। योगः। श्लिष्यति। यः श्लिष्यति प्रियां प्रेम्णा श्लेषति द्विषतां पुरम्, कवि ६१। श्लिष्यति कामपि, गीतगो १, ४६। श्लिष्यति वृक्षं लता, दुर्गा। शिश्लेष। शिश्लिषतुः। श्लेष्टा। श्लेष्यति। अश्लिषत्, पुषादिः। आलिङ्गने त. अश्लिषत्, या ३, १, ४६। कर्मणि, श्लिष्यते। अश्लेषि। अश्लिषाताम्। अश्लिषाः। अश्लिषम्। शिश्लिषति। शेश्लिष्यते। शेश्लेष्टि। श्लेषयति। अशिश्लिषत्। श्लिष्, चु, प। श्लेषणम्। योगः। श्लेषयति। दुःश्लेषाण्यपि कार्याणि धिया श्लेषयति चतुरात्, कवि ६१। श्लिष्टा। श्लिष्य। श्लिष्टः। श्लेषणम्। श्लेषः। श्लेष्टुम्। आ—आलिङ्गनम्। योगः। वि—विश्लेषः। वियोगः। गिरो विश्लेष, भ १४, ३४। प्र—प्रश्लेषः। वियोगः। सम्—संयोगः। समश्लिषत् जतुकाष्ठम्।

श्लाक्—श्लोक्, भ्वा, आ। संघातः।

श्लथनम्। श्लथमानस्य व्यापारः। अस्मिन्नकर्मकः। को ४७। श्लथयितव्यापारः। छन्दोबद्धवाक्यरचनम्, दुर्गा। श्लोकते। शुश्लोके। श्लोकिता। अश्लोकिष्ट। श्लोकयति। अशश्लोकत्। श्लोकः।

श्लोण्, श्लोणृ (श्रोणृ) भ्वा, प। संहतिः।

श्वङ्क, श्वकि (कृकि) भ्वा, आ। गतिः।

श्वच्—श्वचृ—श्वचि, भ्वा, आ। गतिः। श्वज् श्वजि शचि इत्येके। श्वचते। श्वचते। श्वजते। श्वजते। शश्वचे।

श्वठ—अदन्तः। चु, प, वो। दुर्वाक्यम्। सम्यग्भाषणमिति रमानाथः। सम्यग्भाग इत्यप्येके। श्वठ, श्वठृ (शठ)।

२गतिः। ३ दीप्तम्। तद्वः। श्वभ्रयति।

श्वर्त्त्—(स्वर्त्त)।

श्वल्,—श्वल्ल्, भ्वा, प। शीघ्रगतिः।

श्वल्क्—(वल्क्) चु, प। कथनम्।

श्वस्—अदा, प। प्राणनम्।

श्वासः। जीवनम्। श्वसिति, पा ७, २, ७३। श्वसितः। श्वसन्ति। पुंसि विश्वसिति कुत्र कुमारी, नै ५, ११०। श्वस्यात्। हि, श्वसिहि। अश्वसत्, अश्वसीत्, पा ७, ३, ९८, ९९। अश्वसिताम्। अश्वसन्। शश्वास। शश्वसतुः। श्वसिता। श्वसिष्यति। अश्वसीत्। अश्वसिष्टाम्। अश्वसिषुः, पा ७, २, ५। शिश्वसिषति। शाश्वस्यते। शाश्वस्ति। श्वासयति। अशिश्वसत्। श्वसित्वा। °श्वस्य। श्वस्तः। विश्वस्तः विश्वसितः आश्वस्तः आश्वसित इति कलापमुग्धबोधे। श्वस्तः श्वसित इति प्रदीपः। भावे, श्वस्तम् श्वसितमिति पद्मनाभः। श्वसनम्। श्वासः। श्वसितुम्। श्वसन् कटुरणम्, भ ३, १८। आ, सम्—आश्वासः। सान्त्वना। व्रजाश्वसिहि मा रुदः, भ ४, ३८। ततोऽक्रन्दीद दृशयोर्वस्तमाशिश्वसदिन्द्रजित्, भ १५, ९५। समाश्वसिहि समाश्वसिहि, शकु ६, २०३। उद्—उच्छ्वासः। अन्तर्मुखश्वासः। उच्छ्वास दीना, म १४, ५५। नि, निर्—निःश्वासः। बहिर्मुखश्वासः। दीर्घं निश्वस्य, शकु ६, १८७। वि—विश्वासः। विश्वस्से पक्षिगणैः समन्तात्, भ २, २५। न विश्वसेदविश्वस्ते मिति न श्वपो लुक्, कौ १२१। आश्वसेयुर्निशाचराः, इति भट्टिः। गच्छकार्य्यमनित्य मिति शिश्वम्, प्रदीपः। दीप्तिमतोऽपि विश्वसनीयताऽस्य वपुषः, शकु २, ९३।

श्वि—टुओश्वि, भ्वा, प। १गतिः।

२वृद्धिः। स्फीतिः। श्वयति। श्वित्। शुशाव, पा ६, १, ३०। शुशुवतुः। शुशविथ। पक्षे, शिश्वाय। शिश्वियतुः। शिश्वयिथ। शुशुवुः भुजाः, भ १४, ७९। श्वयिता। श्वयिष्यति। आशिषि, शूयात्। अशिश्वियत्, पा ३, १, ५८। अश्वत्, पा ७, ४, १८। अश्वयीत्, पा ७, ४, ५। रुदतोऽशिश्वियच्चक्षुराश्वाश्वार्थे तवाश्वयीत्, भ ६, १९। गर्भस्येङ्गावतां पक्षौ क्षत्तौ, भ ६, ३१। कर्मणि, शूयते। अश्वायि। शिश्वायिषति। शेश्वीयते। शोशूयते, पा ६, १, ३०। शेश्वयीति, शेश्वेति। श्वाययति। अशिश्वयत्, अशूशवत्, पा ६, १, ३१। शुशावयिषति, शिश्वाययिषति। श्वयित्वा। °शूय। (श्रो) शूनः। शूतिः। श्वयनम्। (टु) श्वयथुः। श्वयः। श्वा। उद्, सम्—स्फीतिः। सततरुदितोच्छूननयना। मांसोपभोगसंशूनः, भ ८, १६।

श्वित्—श्विन्द्—श्विता, श्विदि, भ्वा, आ। वर्णः। शुक्लीभावः। श्वेतते। यद् यशः श्वेतते दिक्षु श्विन्दते च सुरालये, कवि २३६। श्विन्दते। शिश्विते। श्वेतिता। श्वेतिष्यते। अश्वितत्। अश्वेतिष्ट, पा १, ३, ८१। सदस्तदश्वेति वेत्ति सः, उत्तरत्रे १२, २२। (आ) श्वितितम्। श्वित्तम्।

(ष)

षुक्—ष्वक्—ष्वष्क्—(कक्कि) भ्वा, आ। गमनम्। षुक्वते। ष्वक्वते।

व्यक्ते। युयुक्षे। वयक्षे। वव्यक्षे। यक्ष—व्यक्ष इत्यपि केचित्।

ष्टभ्—ष्टभि (स्कभि) भ्वा, आ। प्रतिबन्धः। ष्टभ्नते। टष्टभे। ष्टम्भिता।

ष्ठ्यै—भ्वा, प, वो। १ सङ्घातः।

२ शब्दः। ष्ठ्यायति। टष्ठ्यौ। ष्ठ्याता। ष्ठिव्—ष्ठिवु, भ्वा, दि, प। निरसनम्। निष्ठीवनम्। श्लेष्मादिवमनम्। फुत्कार इति भट्टमल्लः। ष्ठीवति, पा ७, ३, ७५। ष्ठीव्यति, पा ८, २, ७७। पीतमिन्दुं ष्ठीवामः, भ १२, १८। टिष्ठेव, तिष्ठेव, कौ ६९। टिष्ठिवतुः, तिष्ठिवतुः। राक्षसास्त्र नितिष्ठिवुः, भ १४, १००। ष्ठेविता। ष्ठेविष्यति। आशिषि, ष्ठीव्यात्। अष्ठेवीत्। अष्ठेविष्टाम्। अष्ठेविषुः। टिष्ठेविषति, तिष्ठेविषति। टिष्ठूषति, तुष्ठूषति। टेष्ठीव्यते, तेष्ठीव्यते। ष्ठेवयति। (उ) ष्ठेवित्वा, ष्ठूत्वा। ०ष्ठिव्य। ष्ठूतः। ष्ठूतिः। ष्ठेवनम्। ष्ठेवः। ष्ठेवितुम्। नि—निष्ठीवनम्। निष्ठेवनम्। रक्तं न्यष्ठीवत्, भ १७, १०। निष्ठूतः, मा ३, १०।

ष्ठीव्—ष्ठीवु, भ्वा, प, वो।

निरसनम्। ष्ठीवति। टिष्ठीव। ष्ठीविता। ष्ठीवित्वा, ष्ठूत्वा। ष्ठूतः। निष्ठीवनम्।

(स)

सग्—षगे, भ्वा, प। संवरणम्। सगति। सगिता। असगीत्। सगयति।

सघ्—षघ्, स्वा, प। हिंसा। सघ्नोति। सेघतुः। असघीत्, असाङ्क्षीत्। असाघ्क्षाम्। असाङ्क्षुः। भावे, सघ्यते। असघ्नि। सिसङ्घति। अभिषिषङ्घति। सासघ्यते। सासङ्घ्नि। सघ्नयति। असससघ्नत्। सङ्घा। ०सघ्य। सङ्घः। सङ्घिः। सङ्घनम्। सङ्घः। सङ्घुम्। सङ्घी। अनु—अनुषङ्गः। अन्वितस्य पुनरन्वयः। अभि—अभिषङ्गः। पराभवः। अव—योजनम्। अवसक्तः पितुः स्तोऽस्य मृतः स्कन्धे भुजङ्गमः, भारत। आ—आसक्तिः। योगः। आसस्रुः भयं तेषाम्, भ १४, १०८। भुजे स भूमेर्धुरं आससञ्ज, र २, ७४। चापमासज्य कण्ठे, कु २, ६४। प्र—प्रसङ्गः। आसक्तिः। प्रसजन्निन्द्रियार्थेषु नरः पतनमृच्छति, स्मृतिः। पितृमरणादावपि मांसभोजनं प्रसज्येत,

सङ्केत—अदन्तः। चु। आमन्त्रणम्। सङ्केतयति। सङ्केतितः।

सङ्ग्राम—अदन्तः। चु, आ। युद्धम्। सङ्ग्रामयते। असंसंग्रामत।

सच्—षच्, भ्वा, आ। १ सेवनम्। २ सेवनम्। षच्, भ्वा, उ। समवायः। राशीकरणम्। सचते। ०ते। सक्तः।

सज्ज्—सञ्ज्—सङ्ग।

षस्ज् षन्च् षन्ज्, भ्वा, प। गतिः। सज्जति। अयमात्मनेपदीति केचित्। सज्जते। आसज्जमानेषवः, भक्तु ३, २१२।

सञ्ज्—षन्ज्, भ्वा, प। सङ्गः। संश्लेषः। योगः। सजति, पा ६, ४, २५। ससञ्ज। ससञ्जतुः। ससञ्जुः फलरेणवो मत्तेभकटेषु, र ४, ४७। सङ्क्ता। सङ्क्ष्यति। सज्यात्। असाङ्क्षीत्। असाङ्क्ताम्। असाङ्क्षुः। भावे, मज्यते। असञ्जि। सिसङ्क्षति। अभिषिषङ्क्षति। सासज्यते। सासङ्क्ति। सञ्जयति। असससञ्जत्। सक्ता। ०सज्य। सक्तः। सक्तिः। सञ्जनम्। सङ्गः। सङ्क्तुम्। सङ्गी। अनु—अनुषङ्गः। अन्वितस्य पुनरन्वयः। अभि—अभिषङ्गः। पराभवः। अव—योजनम्। अवसक्तः पितुः स्तोऽस्य मृतः स्कन्धे भुजङ्गमः, भारत। आ—आसक्तिः। योगः। आससञ्ज भयं तेषाम्, भ १४, १०८। भुजे स भूमेर्धुरं आससञ्ज, र २, ७४। चापमासज्य कण्ठे, कु २, ६४। प्र—प्रसङ्गः। आसक्तिः। प्रसजन्निन्द्रियार्थेषु नरः पतनमृच्छति, स्मृतिः। पितृमरणादावपि मांसभोजनं प्रसज्येत,

सट्—षट्, भ्वा, प। अवयवः।

सट्—षट्ट्, च, प। हिंसा।

सठ् षठ् (शठ्)।

सत्र—अदन्तः। चु, आ।

सन्तानक्रिया।

सद्—षदॢ्, भ्वा, तु, प।

१भेदः। २गमनम्। ३अवसादनम्। विषादः। सीदति, पा ७, ३, ७८। न सीदति क्वचित् कार्य्ये, कवि ७७। तुदादौ सदे पाठः। शतरि नुम् विकल्पार्थः। सीदतो, सीदन्तो। न च वारावसीदताम्, भ १७, ८४। ससाद। सेदतुः। सेदिथ, सेदथ। अमदाः सेदुरेकस्मिन्नितम्बे निखिलागिरेः। (उप-विष्टाः), भ ७, ५८। सत्ता। सत्स्यति। असदत्। सिषत्सति। (भावगर्हायां यङ् सासद्यते, पा ३,१,३४। सासत्ति। सादयति। असीषदत्। (हिंसा) यैः सादिताः, र ७, ४४। सत्त्वा। ०सद्य। सन्न। सत्तिः। सदनम्। साद्यः। सत्तुम्। अव—अवसादः। सहतां क्रिया नित्या छिद्रे नैवावसीदति, भ र, २४। आ—षद्, चु, प। प्राप्तिः। ममनम्। सन्निकर्षः। आसादयति। विद्यानां पारम्, कवि ७७। आसाद। आसन्ना। आसात्मीत्। आसादितो कथं न गजैः, भ ३, ८५। सुखोवाप्तिकमासेदुः भ ', ११। उद्—क्षिप्, उन्मूलनम्। उदन्तनम्। उद्धर्त्तनोत्सादने ह इत्यमरः। उप—आसत्तिः। प्राप्तिः। उपसेदु र्दशग्रीवम्, भ ८, ८२। नि—उपवेशनम्। विवक्षायां निषीद, र २, ८८। न निषीदति पौरुषे, मा २, ८६। प्र—प्रसादः निर्मलीभावः। दिशः प्रसेदुः, र ३, १४। प्रसीद विश्राम्यतु वीरवज्रम्, कु २, ८। प्रति—प्रतिसीदति, पा ८, २, ६१। वि—विषादः। अक्लान्तार्था विषीदन्तः, भ ७, ८८। विषसाद, पा ८, ३, ११८।

सन्—षण्(वन) भ्वा, प। सम्भक्तिः।

सेवा। षणु, त, ङ। दानम्। सनति। सनोति। सनुते। ससान। सेने। सनिता। सनिष्यति। ०ते। सायात्, सन्यात्, पा ६, ४, ४२। सनिषीष्ट। असनोत्, असानीत्। असनिष्ट, असात, पा ६, ४, ४२। असनिष्टाः, असाथाः। कर्मणि, सायते, सन्यते। सिसनिषति, सिषासति, पा ७, २, ४९। संसन्यते, सासायते, पा, ६, ४, ४२। ससन्ति। सानयति। असीषणत्। (ङ) सनित्वा, सात्वा। सातः। सातिः। सतिः। सन्तिः, पा ६, ४, ४५।

सप्—षप्, भ्वा, प। १समवायः।

सम्बन्धः। २सम्यगवबोधः। सपति। सभाज—अदन्तः। चु, प। १प्रीतिः। २दर्शनम्। ३सेवनम्। सभाजयति। पुण्यश्लोकः सभाजयन्, उत्तर।

सम्—स्तम—षम्, ष्टम्, भ्वा, प।

१अवैकल्यम्। अविह्वलता। २वैकल्यम्, वो। समति। स्तमति। समन्ति यद्वियोगेन सीमन्तिन्यः सरातुराः, कवि २२३। षम्—अदन्तः। चु, प। वैक्लव्यम्। समयति।

सम्ब्—षम्ब्, भ्वा, प, वो। गतिः।

षम्ब्, च, प। सम्बन्धः। साम्ब, शम्ब इत्येके। सम्बति सम्बयति।

सय्—षय् (भय) भ्वा, आ। गतिः।

सर्ज्—षर्ज् (अर्ज) भ्वा, प।

अर्जनम्। सर्जति। ससर्ज।

सर्ब्—षर्ब् (कर्ब) भ्वा, प। गतिः।

षर्ब् (अर्ब), भ्वा, प। हिंसा। सर्बति। सर्बति।

सल्—षल् भ्वा, प। गतिः।

सस्—संस्—अस् षस्ति, अदा, प।

स्वप्नः। सस्ति। सस्तः। सस्ति। ससास। सेसतुः। ससिता। असासीत्, असासीत्। सन्ति, पा ८, २, २८। सन्तः। संस्सन्ति। संस्ति, संस्तः इत्येके, कौ १२७। संस्सि, पा ८, ४, ६५। ससंस्त। ससंस्ततुः। संस्तिता। असंस्तीत्। इमौ वैदिकौ। तालव्यादी इति कश्चित्।

सह्—षह्, भ्वा, आ। मर्षणम्।

सहनम्। क्षमा। शक्तिः। सहते। सेहे। यवनीमुखपद्मानां सेहे मधुमदं नभः, र ४, ६१। सहिता, सोढ़ा, पा ७, ४, ८। सहिष्यते। कथं सहिष्यते तत् प्रथमावलम्बनम्, कु ५, ६६। अपराधमिमं ततः सहिष्ये, शकु ३, ११८। सहिषीष्ट। असहिष्ट। असहिषाताम्। असहिषत। सिसहिषते। सासह्यते। सासहीति, सासोढ़ि। साहयति। असीषहत्। पर्य्यसीषहत्, पा ८, ३, ११६। सिसाहयिषति, पा ८, ३, ६२। षह्, चु, प। मर्षणम्। सहनम्। साहयति। सहति। स एवायं नागः सहति कलभेभ्यः परिभवम्। साहयत्याहवे क्षोभं सहति द्रविणव्ययम्। अन्यायं सहते नासौ सह्यति क्षितिरक्षणे॥ कवि ३१। सहित्वा, सोढ्वा। साढ्वा इति केचित्। ०सह्य। सोढः। सोढिः। सहनम्। साहः। सोढुम्, सहितुम्। सोढा। सहिता। सहिष्णुः। सोढव्यम्। सहितव्यम्। सहनीयः। दुःषहः। तुराषाट्। उद्—उत्साहः। राज्यधुरां प्रवोढुं कथं कनीयानहमुत्सहेय, भ १, ५४। क्षणमप्युत्सहते न मां विना, कु ४, ३६। परिषहते। निषहते। विषहते। पर्य्यषहत, पर्य्यसहत, पा ८, ७, ७१। परिसोढा। परिसोढुम्। परिसोढः, पा ८, ३, ११५। षह, षुह्, दि, प। लृप्तिः। २ क्षमा, वो। सह्यति। सुह्यति। सुषोह। असुहत्। सुहितम्। सौहित्यं तर्पणं लृप्तिरित्यमरः।

साट—अदन्तः। चु, प, वो।

प्रकाशनम्।

साध् (राध) षाध्, वो। दि, स्वा, प।

संसिद्धिः। निष्पत्तिः। निष्पादनेति गोविन्दभट्टः। साध्यति। साध्नोति। ससाध। ससाधतुः। समाधिथ। साद्धा। सात्स्यति। असात्सीत्। असाद्धाम्। असात्सुः। सिसात्सति, सिषात्सति। वो। सासाध्यते। सासाद्धि। साधयति। असीसधत्। (१सम्पादनम्। २ बधः। ३प्राप्तिः। ४परीक्षा। ५गमनम्। प्रायेण ण्यन्तकः साधि गमिस्थाने प्रयुज्यते, दर्पणः। साद्धा। ०साध्य। साद्धः। साधनम्। साद्धम्। णिच्, साधयित्वा। ०साध्य। साधितः। साधना। साधयितुम्। प्र—प्रसाधनम्। अलङ्करणम्। कण्टकशोधनम्। वैरनिर्य्यातनम्। प्रसाधितोऽलङ्कृतश्च भूषितश्च इत्यमरः। मेदिनी भोक्तुमेव भुजनिर्जितद्विषं न प्रसाधयितुमस्य कल्पिता, १८, ३।

सान्त्व्—षान्त्व्, चु, प। सान्त्वना। समाश्वासनम्। सान्त्वयति। त्वस्तान् सान्त्वयेः, भ १६, २४। चन्द्रकेतो बलानि सान्त्वय, उत्तर २०६। सान्त्व इत्येके।

साम—अदन्तः, हलन्तश्च, वो।

चु, प। सान्त्वना। प्रियकरणम्। समाश्वासनम्। सामयति।

साम्ब् (सम्ब्)।

सार—क्षप—अदन्तौ। चु, प।

दौर्बल्यम्। सारयति। क्षपयति।

सि—षिञ्, स्वा, क्रया, उ।

बन्धनम्। सिनोति। सिनाति। सिनुते। सिनीते। सिनुयात्। सिनीयात्। सिन्वीत। सिनौत। असिनोत्। असिनात्। असिनुत्। असिनीत। सिषाय। सिषयिथ, सिषेथ। सिष्ये। सेता। सेष्यति। ०ते। असैषीत्। असेष्ट। सिसीषति। ०ते। सेषीयते। सेषयीति। सेषेति। सायय्यति। असीषहत्। सित्वा। ०सित्य। सितः। सिनो ग्रासः स्वयमेव, पा ८, २, ४४। सयनम्। सेतुम्। निषितः। विषितः। विसिनोति। परिषितः। निषयः। परिषयः पा ८, ३, ७०।

सिच्—षिच्, तु, उ। क्षरणम्।

सेचनम्। सिञ्चति। ०ते, पा ७, १, ५८। सिषेच। सिषेचिथ। सिषिचे। सिषिचुरवनिमम्बुवाहाः, भा १८, १७। सेक्ता। सेक्ष्यति। ०ते। सिच्यात्। सिक्षीष्ट। असिचत्। असिचत, असिक्त, पा ३, १, ५३, ५४। असिचेताम्, असिक्षाताम्। असिचन्त, असिक्षत। कर्मणि सिच्यते। असेचि। सिसिक्षति। ०ते। परिषिषिक्षति। ०ते, कौ २०५। सेसिच्यते, पा ८, ३, ११२। अभिसेसिच्यते। सेसेक्ति। सेचयति। असीषिचत्। सिक्ता। रेतः सिक्ता स्त्रीषु, मनु ११, १७०। ०सिच्य। सिक्तः। आवासे सिक्तसंसृष्टे, भ ५, ६०। सेचनम्। सेकः। सेक्तम्। सेक्ता। सेक्तव्यम्। सेचनीयम्। अपि—क्षरणम्। अपि सिञ्चेः क्षणानौ त्वं दर्पम्, भ ८, ८२ (अभि—अभिषेचनम्। तर्पणम्। अभिषिञ्चति। अभ्यषिञ्चत्, पा ८, ३, ६३, ६५। स्नानाभ्यसिचताम्भोऽसौ तथाभ्यषिक्त वारीणि पितृभ्यः, भ ६, २३। इन्द्र जलैर्मामभ्यषिचत्, भ ६, २१। १५ २। राज्येऽभिषेच्ये सुतम्, भ, ३, २। सेनापत्ये मा मभिषिञ्च, भारत। उद्—उत्सेकः। गर्वः। न तस्योत्सिषिचे मनः, र १७, ३। नि—निषेकः। क्षरणम्। गर्भाधानम्। सुतं निषिञ्चन्नमिवामृतं त्वचि, र ३, २६।

सिट्—षिट्, भ्वा, प। अनादरः।

सिध—षिधु, षिध्, वो, भ्वा, प।

गतिः। सेधति। सिषेध। सेधिता। सेधिष्यति। असेधीत्। (उ) सेधित्वा, सिद्ध्वा। सिद्धः। षिध्, सिधितः, वो। गङ्गां विसेधति। अभिसेधति गाः, पा ८, ३, ११३। परि—वेष्टनम्। द्विषो घ्नन् परिषेधतः, भ ८, ८८। प्रति—प्रतिषेधः। शिष्यमकार्य्यात् प्रतिषेधति। षिधू, भ्वा प। १ शास्त्रम्। अनुशासनम्। २ माङ्गल्यम्। मङ्गलक्रिया। सेधति। सिषेध। सिषिधतुः। सिषेधिथ, सिषेद्ध। सिषिधिव, सिषिध्व।

सेद्धा । सेधिता । सेत्स्यति, सेधिष्यति । असैत्सीत् । असैद्धाम् । असैत्सुः । असेधीत् । असेधिष्टाम् । असेधिषुः । कर्मणि सिध्यते । असेधि । सिषित्सति । सिसिधिषति, सिसेधिषति । सेधिध्यते । सेधेद्धि । सेधयति । असीधिषत् । अप—खण्डनम् । पापमपसेधति, मनु, ११, १९८ । आ—अवरोधः । उद्—उत्सेधः । उच्चीभावः । नि, प्रति—निषेधः । निवारणम् । भूतगणान् न्यषेधीत्, भ १, १५ । शस्त्रं न्यषेधत् पावकास्त्रेण, भ १७, ८ः । तेन न्यषेधि शेषोऽप्यनुयायिवर्गः, र २, ४ । अनुष्ठानं कथं प्रतिषेधतु, उत्तर १८४ । षिधु, दि, प । संराद्धिः । निष्पत्तिः । ऊदितपाठः प्रामादिकः, कौ ११९ । सिध्यति । यत्ने कृते यदि न सिध्यति कोऽत्र दोषः, हितो । सिषेध । सिषेधिथ । सेद्धा । सेत्स्यति । असिधत् । सिषित्सति । सेधिध्यते । सेधेद्धि । णिच् । साधयति अन्नम्, पा ६, १, ४९ । पारलौकिके तु, सेधयति तापसं तपः । सेधित्वा, सिद्ध्वा । ०सिध्य । सिद्धः । सेधनम् । सेधः । सेद्धुम् । णिच्—साधयित्वा । ०साध्य । साधितः । साधनम् । साधयितुम् । साधकः । विसिध्यति, पा ८, ३, ६५ ।

सिव्—'सिवि', भ्वा, प । सेचनम् ।

सिभ्—सिम्भ्—षिभु, षिनभ्, भ्वा, प । हिंसा । सेभति । सिम्भति । सिषिम्भ ।

सिल्—(शिल्) ।

सिव् षिवु, दि, प । तन्तुसन्तानः । सीवनम् । तन्तुभिर्ग्रन्थनम्, दुर्गा । सीव्यति । तदयसूच्या मनोभवः सीव्यति दुर्यशःपटौ, नै १, ८० । खेदात्मक स्तन्तुरन्तर्मर्माणि सीव्यति, उत्तर १८२ । सिषेव । सिषिवतुः । सेविता । सेविष्यति । सीव्यात् । असेवीत् । असेविष्टाम् । कर्मणि, सीव्यते । असेवि । सिसेविषति । सुस्यूषति, पा ७, २, ४९ । सेषीव्यते । सेवयति । असीषिवत् । न्यसीषिवत्, भा ८, ११६ । (उ) सेवित्वा, स्यूत्वा । स्यूतम् । सेवनम् । सीवनं स्यूतिरित्यमरः ।

सीक् (शीक्) ।

सु—षु, भ्वा, अदा, प । १ प्रसवः ।

अभ्यनुज्ञा । २ ऐश्वर्यम् । भ्वादिगत्यर्थोऽपि । सवति । सौति । सुतः । सुवन्ति । सुषाव । सुषुवतुः । सुषविथ, सुषोथ । सोता । सोष्यति । असौषीत् । असौष्टाम् । असौषुः । षुञ्, भ्वा, उ वो । गतिः । षुञ्, स्वा, उ । १स्नानम् । २ स्नपनम् । ३ पीड़नम् । ४ सुरासन्धानम् । ५ योगः, वो । ६ मन्थनम् । सवति । ०ते । सुनोति । सुनुते । सुन्वहे, सुनुवहे । सुषाव । सुषुवे । सोता । सोष्यति । ०ते । सूयात् । सोषीष्ट । असावीत् । असाविष्टाम् । असाविषुः, पा ७, २, ७२ । असोष्ट । असोषाताम् । असोषत । सुसूषति । ०ते । सोषूयते । सोषवीति । सोषोति । सावयति । असूषवत् । सुत्वा । ०सुत्य । सुतः । सवनम् । सुत्वा । सुत्वानौ । सोमसुत् । राजसूयः । अभि—स्नानम् । त्रीन् वारानभिषुन्वते, अनर्घ, ३७ । ०षुणोति । ०असुणोत् । ०सुषाव । *सोष्यति । ०असोष्यत् । सुसूषति । ०सुसूः पा ८, ३, ११७ । सुतः उत्सवः ।

सुख—अदन्तः । चु, प । सुखकरणम् । सुखयति । एतावदवस्थापि मां सुखयति, शक्रु ३, ६० ।

सुट्—षुट् (अट्ट) चु, प । १अनादरः । २ तौच्छम् । अल्पीभावः । सुट्टयति ।

सुभ्, सुम्भ् (शुभ्) ।

सुर्—षुर्, तु, प । १ ऐश्वर्य्यम् । २ दीप्तिः । सुरति । सुषोर । सोरिता ।

सुह् (सह्)

सू—षूङ्, अदा, दि, आ । प्रसवः ।

प्राणिप्रसवः । जननम् । उत्पादनम् । लट् सूते । सुवाते । सुवते । सूयते । विरहलता पल्लवं सूते । लोट् सुवै । सुवावहै । सुवामहै, पा ७, ३, ८८ । लुङ् असूत । असुवाताम् । असुवत । असूत सद्यः कुसुमान्यशोकः, कु ५६, २० । असूत सा मेनाकम्, कु १, २० । लिट् सुषुवे । सुषुविषे । सुषुविवहे, को १, ३४ । लुट् सोता, सविता, पा ७, २, ४४ । लृट् सोष्यते, सविष्यते । आशिषि, सोषीष्ट, सविषीष्ट । लुङ् असोष्ट, असविष्ट । कर्मणि, सूयते । असावि । कौशल्यया ऽसावि सुखेन रामः, भ १, १४ । सन् सुसूषते, सोषूयते । सोषवीति । सोषोति । णिच् सावयति । असूषवत् । सुषावयिषति । सूत्वा । ०सूय । सूतः । दि, सूनः । सूतिः । ०षूतिः, पा ८, ३, ८८ । सवनम् । सवः । सोतुम्, सवितुम् । प्र—प्रसवः । प्रासोष्ट शत्रुघ्नम्, भ १, १४ । क्विप् प्रसूः । षू, तु, प । प्रेरणम् । सुवति । सुषाव । सुषुवतुः । सुषविथ । सविता । सविष्यति । असावीत् । असाविष्टाम् । अभिषुवति । परिषुवति, पा ८, ३, ६५ । सविता । सूतः ।

सूच—अदन्तः । चु, प । पैशुन्यम् । व्यक्तीकरणम् । सूचनम् । सूचयति । असुसूचत् । यङ् सोसूच्यते, कौ २०६ । मन्त्रो गुप्तहारो न सूच्यते, र १७, ५० ।

सूत्र—अदन्तः । चु, प । १ वेष्टनम् । २ विमोचनम् । ३ ग्रन्थनम् । सूत्रयति । असुसूत्रत् । यङ् सोसूत्र्यते, कौ २०६ ।

सूद्—षूद्, भ्वा, आ । २ क्षरणम् । २ निरासः, वो । निक्षेपः । सूदते । न सूदते मतिर्यस्य यः सूदयति शात्रवान्, कवि २५६ । सुषूदे । सूदिता । असूदिष्ट । सुसूदिषते । सोषूद्यते । सोषूत्ति । षूद्, चु, प । १ क्षरणम् । २ हननम् । ३ निरासः । ४ सञ्चरणम् । ५ छेदनम् । सूदयति । असूषुदत् । नि—निसूदनम् । हिंसनम् ।

सूर् (शूर्) ।

सूर्च्—षूर्च्, भ्वा । प । आदरः । अनादरः, वो । सूर्चति । सुषूर्च्छ । सुसूर्च्छ, वो । सूर्चिता । असूर्चीत् । अवहेलमसूर्चणमित्यमरः ।

सूर्च्छ्—(ईर्ष्य) भ्वा, प । ईर्ष्या । सूर्च्छति । सुसूर्च्छ । सषूर्च्छ, वो ।

सूष्—षूष् (शूष्) भ्वा, प । प्रसवः । सूषति । सुषूस ।

सृ—भ्वा, प । गतिः । सरति (वेगे धावति), पा, ७, २, ७८ । ससार । सस्रतुः । ससर्थ । सस्रुव । सर्त्ता । सरिष्यति, पा ७, २, ७० ।

स्त्रियात्। असार्षीत्। असार्ष्टाम्। असार्षुः। असरत्, वो, पा १, १, ५६। इह लुगभ्यस्था शासिना साहचर्य्यात् सर्त्तर्त्तौ जौहोत्यादिकावेव गृह्येते, तेन भ्वाद्यो नाङ्, कौ ८७। पद्मनाभमते भ्वादे रेवाङ् ऋसृशास्विति सूत्रनिर्देशात्। सिसीर्षति। सेस्रीयते। सर्सर्त्ति। सारयति। असीसरत्। सृ, चु, प। १ आस्तरणम्। २गतिः, वो सारयति। सृत्वा। ०सृत्य। सृतः। सृतिः। सरणम्। सरः। सारः। सर्त्तुम्। सर्त्तव्यम्। अनु—अनुसरणम्। अनुगमनम्। अप—अपसरणम्। पलायनम्। दूर मपसर न चेद्धन्तव्योऽसि मया, हितो। अभि—णिच्, अभिसारणम्। कान्तार्थिन्याः सङ्केतयानम्। एषा भवन्त मभिसारयितुमागता, मृच्छ २३०। उद्—णिच्, उत्सारणम्। दूरीकरणम्। उप—समीपगमनम्। निर्—निःसरणम्। निष्क्रमणम्। प्र, वि—व्याप्तिः। विसृत्वरो विसृमरस्त्यमरः। सम्—संसरणम्। देहधारणम्। भूतानि संसारयति चक्रवत्, मनु १२, १२४।

सृज्—तु, प, दि, आ। १ विसर्गः। त्यागः। २ निर्माणम्। करणम्। सृष्टिः। व्युद्भ्यां परस्त्यागार्थः। अन्यत्र तु करोत्यर्थः। सृजति। सृज्यते। भूतानि कालः सृजति, भारत। उपासनामेत्य पितुः स्व सृज्यते, नै १, ३४। संपूर्वोयमकर्मकः। सङ्गमार्थः। संसृज्यते सरसिजैरुणांशुभिर्न्निशापरिणामवायुः, र ५, ६८। कौ १३७। धनुषा बाणमसृजत्, र ११, ४४। ससर्ज। सस्रजतुः। ससर्जिथ, सस्रष्ठ, पा ७, २, ६८। सस्रजे। सस्रजिषे। ससर्ज गिरमात्मभूः, कु १, ५३। स्रष्टा, पा ७, ४, १६। स्रक्ष्यति। ०ते। सृज्यात्। सृक्षीष्ट। असार्क्षीत्, पा १, २, ११। असार्ष्टाम्। असार्क्षुः। असृष्ट। असृक्षाताम्। असृक्षत। असार्क्षुरस्त्रम्, भ ३, १७। असृष्ट योऽस्मान, भ ३, १३। कर्म्मणि, सृज्यते। असार्ज। सिसृक्षति। ०ते। सरीसृज्यते। सर्सृष्टिः। सर्जयति। असीसृजत्, असस्रजत्। सृष्ट्वा। ०सृज्य। सृष्टः। सृष्टिः। सर्जनम्। सर्गः। स्रष्टुम्। स्रष्टा। स्रष्टव्यम्। मर्जनीयम्। विश्वसृक्। अति—अतिसर्जनम्। दानम्। अव—निक्षेपः। अर्पणम्। उद्—उत्सर्गः। नि—परित्यागः। न स्वामिना तिसृष्टोऽपि शूद्रो दास्याद्विमुच्यते, मनु ८, ४१४। वि—विसर्जनम्। दानम्। त्यागः। मोचनम्। प्रेषणम्। विसर्जयेद् य मुतजन्महर्षितः, र ३, २०। लोकान् व्यसर्जयत्, भ २, ४३। विसृज शूद्रमुनौ कृपाणम्, उत्तर २, १०। सम्—संसर्गः। सङ्गतिः।

सृप्—सृप्ल्, भ्वा, प। गतिः। सर्पति। ससर्प। सस्रपतुः। असर्पिथ। सर्म्मा, स्रम्मा, पा ६, १, ५८। सर्म्मति, स्रम्मति। असृपत्, असार्षीत्। असार्प्सीत्, वो। असृपताम्, असार्ष्टाम्, असार्प्साम्। सिसृप्सति। सरीसृप्यते। सरीसर्त्ति। सर्पयति। असीसृपत, असस्रर्पत्। सृप्त्वा। ०सृप्य। सृप्तः। सर्पणम्। सर्पः। सर्प्तुम्। स्रप्तुम्। सर्पिः। अनु—अनुगमनम्। अप—अपसरणम्। तरुगह्वनेनापसर्पति, उत्तर २६८। उद्—विस्तारः। उल्लङ्घनम्। उप—समीपे गमनम्। प्र, वि—अभिगमनम्। वृद्धिः। कर्म प्रसर्पत्, भ २, २९। सम्। सम्—सञ्चारः।

स्रभ्—स्रम्भ—स्रिभ्—स्रिम्भ—

शृम्भु, शृन्भु, स्रिम्भु, स्रिन्भु, भ्वा, प। हिंसा। सर्भति। स्रम्भति। स्रेभति। स्रिम्भति।

मृ (स्रृ)।

सेक्—स्रेक्—श्रेक्—स्रेक्—

सेक्त, श्रेक्त, भ्वा, आ। गतिः। सेकते। अषोपदेशत्वान्न सः। सिसेके। को ४३।

सेल् (श्रेल्)।

सेव्—श्रेव्—षेट्ट, श्रेट्ट, (गेट्ट)

भ्वा, आ। ड, वो। सेवा। आराधना। भक्तिः। उपयोगः। आश्रयः। सेवते। श्रेवते। सेवति। ०ते, वो। नीचं मन्नद्यमपि सेवति नीचं एव। स्वाधीने विभवेऽप्यहो नरपतिं सेवन्ति किं मानिनः, दुर्गा। सिषेवे। सिषेविषे। तं पवनः सिषेवे, र २, १३। तं यान्तं क्रव्यादः सिषेविरे, भ १४, ८७। सेविता। सेविष्यते। सेविषीष्ट। असेविष्ट। असेविषाताम्। असेविषत। कर्मणि, सेव्यते। असेवि। सिसेविषते। सेषेव्यते। सेवयति। असिषेवत्। अयं दन्त्यादिश्च। असिसेवत्, वो। सेवित्वा। ०सेव्य। सेवितः। सेवनम्। सेवा। सेवितुम्। सेविता। सेवकः। सेवितव्यः। सेव्यः। सेव्या नितम्बाः किमु भूधराणां सुत सारसीरविलासिनीनाम्, काव्यप्रकाशः। आ—उपभोगः। यद्दायुः किरातैरासेव्यते, कु १, १५। नि—सेवा। आश्रयः। उपभोगः। पतित एव निषेव्य हि वारुणीम्, नै ४, ७०। निषेवते। विषेवते। परिषेवते। न्यषेवत। व्यषेषत। परिषिषेवे, पा ८, ३, ६३, ७०।

सै—षै—(त्ते) भ्वा, प। क्षयः।

सायति। ससौ। साता। सायात्। असासीत्। सिषासति। सिसासति, वो।

सो—षो, दि, प। अन्तकर्म।

विनाशनम्। स्यति, पा ७, ३, ७१। अभिष्यति, पा ८, २, ६५। ससौ। अभिससौ। साता। सास्यति। सेयात्, पा ६, ४, ६७। असात्। असासीत्, पा २, ४, ७८। असाताम्। असासिष्टाम्। कर्मणि, सीयते। असायि। सिषासति। सेषीयते, ६, ४, ६६। सासेति। साययति, पा ७, ३, ३७। सित्वा। ०साय। सितः। सितिः। सातम्। सायः। अव—अवसानम्। समाप्तिः। अवसेयाः कार्य्याणि धर्मेण पुरवासिनाम्, भ १९, २८। वचस्यवसिते, कु २, ५३। अध्यव—अध्यवसायः। उत्साहः। पर्य्यव—पर्य्यवसानम्। परिणामः। लोकान्तरं पर्य्यवसितासि, उत्तर १९२। प्रत्यव—प्रत्यवसानम्। भोजनम्। व्यव—व्यवसायः। उद्यमः। चेष्टा। पातुं व्यवस्यति। अनुव्यव—अनुव्यवसायः। बुद्ध्यर्थस्य पुनर्बोधः।

स्कन्द्—स्कन्दिर्, भ्वा, प। १ गतिः। २ शोषणम्। स्कन्दति। अस्कन्द। चस्कन्दतुः। चस्कन्दिथ, चस्कन्थ। स्कन्ता। स्कन्त्स्यति। चस्कन्त्स्यत। आशिषि, स्कद्यात्। (इर्) अस्कदत्, अस्कान्त्सीत्। अस्कदताम्, अस्कान्ताम्। अस्कदन्, अस्कान्त्सुः। कर्मणि, स्कद्यते। अस्कन्दि। चिस्कन्त्सति। चनोस्कद्यते, पा ७, ४, ८४।

चनोस्कन्ति। स्कन्दयति। न रेतः स्कन्देत् क्वचित्, मनु, २, १८०। अचस्कन्दत्। स्कन्त्वा, पा ६, ४, ३१। शम्भो मूर्द्ध्नि स्कन्त्वा भुवं गता गङ्गा, भ २२,११०। ०स्कन्द्य। स्कन्नः। स्कन्तिः। स्कन्दनम्। स्कन्दः। स्कन्तुम्। स्कन्तव्यः। अव—अवरोधः। आक्रमणम्। पुरीमवस्कन्द, मा १, ५१। दहति यदवस्कन्द्य हृदयम, उत्तर १४७। त्वमप्यपरः प्रभविष्णु रिव मामवस्कन्दयसि, वीर ४३। आ—अश्वगतिविशेषः। अभिगमनम्। पीड़नम्। सर्वानास्कन्दन् रिपून्, भ १७, ११। आस्कन्दन् लक्ष्मणं बाणैः, भ १७, ८२। परि—परिभ्रमणम्। परिस्कन्दति, परिष्कन्दति, पा ८,३,७४। परिस्कन्नः, परिष्कणः। परिष्कन्न इति केचित्। मेघनादः परिस्कन्दन् परिस्कन्दन्तमरिम्, भ ८,७५। प्र—पतनम्। रथात् प्रस्कन्द्य। तस्य रेतः प्रचस्कन्द, भारत। वि—परिभ्रमणम्। विस्कन्नः। विष्कन्तुम्, विस्कन्तुम्, पा ८, ३, ७३। विष्कन्तून् परिघेणाहन् कपिद्विषः, भ ९, ७४। स्कन्द् (स्कुन्द्)।

स्कन्द—स्कन्ध—अदन्तौ। चु,प,वो। समाच्छृतिः। स्कन्दयति। स्कन्धयति। स्कन्भ्—स्कभि, भ्वा, आ। प्रतिबन्धः। स्तम्भः। रुद्धीकरणम्। स्कन्भु,सौत्रधातुः। क्रया,प। १ रोधनम्। २ स्तम्भः। स्कम्भते। स्कम्भ्नाति। स्कम्भ्नोति, पा ३, १, ८२। चस्कम्भ। ०म्भे। स्कम्भिता, अस्कम्भीत्। अस्कम्भिष्ट। वि—प्रतिबन्धः। विष्कम्भ्नाति। विष्कम्भ्नोति। विस्कम्भते, पा, ८, ३, ७७। गृहीतो विस्कम्भितं समर्थोऽपि नाचलद् ब्रह्मगौरवात्, भ ९, ७७। विष्कम्भते प्रजारिष्टं विष्कम्भ्नाति परोदयम्। विस्कम्भ्नोति परोदर्योगं तपःशौर्य्यबलेन यः॥ कवि ८१।

स्कु—स्कुञ्, क्रया, उ। १ आप्लवनम्। २ आवरणम्। ३ उद्धारः। स्कुनाति स्कुनोति, पा ३, १, ८२। स्कुनीते। स्कुनुते। राम मस्कुनादिषुवृष्टिभिः, भ १७, ८२। चुस्कावे। चुस्कुवे। स्कोता। अस्कोषीत्। अस्कोष्ट। चुस्कूषति। ०ते। चोस्कूयते। चोस्कोति। स्कावयति। अचुस्कवत्। स्कुनाति च स्कुनीते च स्कुनोत्याप्लवनेऽपि च। स्कन्दते स्कुन्दते चापि षडाप्लवनवाचिनः॥ इति भट्टमल्लः। प्रत्यस्कुनोद्दशग्रीवम्, भ १७, ८३।

स्कुन्द्—स्कन्द्—स्कुदि, स्कदि, वो। भ्वा, आ। आप्रवणम् उत्प्लुत्य गमनम्। २ उद्धारः। स्कुन्दते। स्कन्दते, चुस्कुन्दे। स्कुन्दिता।

स्कुभ्—स्कुन्म्, सौत्रधातुः।

क्रया, प। १ रोधनम्। २ धारणम्, कौ १६४। स्कुभ्नाति, स्कुभ्नोति, पा ३, १, ८२। चुस्कुभ। स्कुम्भिता। स्कुभ्यात्। अस्कुभीत्।

स्खद्—भ्व, आ। १ स्खदनम्। विद्रावणम्। २ स्थैर्यमिति। रामः ३ पाटलमिति गोविन्दः। ४ क्लेशोत्पादनमिति गोयीचन्द्रः। ५ हिंसेति रमानाथः। स्खदते। अस्खदे। स्खदिता। स्खदयति, धटादिः। अवपरिभ्यान्तु, अवस्खादयति, परिस्खादयति। न्यासकारमते, अवस्खादयति, कौ ८६। अन्यत्र, प्रस्खदयति। कातन्त्र-

मते, अवपरिभ्यामेव घटादित्वम्। अवस्खदयति, परिस्खदयति।

स्खल्—भ्वा, प। १ सञ्चलनम्। २स्खलनम्। ३सञ्चयः, वो। स्खलति। दृढ़ः प्रेमा भग्नः सदसि रिव सन्धिं न लभते लभेतापि प्रायः स्खलति खलु यत्नै रपि धृतः, दुर्गा। यात्यकस्मात् स्खलन्तौ, महाना ३, १६। चस्खाल। चस्खलतुः। विवादश्चस्खाल वेला-स्वपि नार्णवानाम्, र १८, ४३। रथाः प्रचस्खलुः साश्वाः, भ १४, ८८। स्खलिष्यति। अस्खालीत्। चिस्खलिषति। चास्खल्यते। चास्खलति। स्खलयति। स्खालयति। स्खलित्वा। स्खलितः।

स्खड् (थुड्)।

स्तक्—ष्टक्, भ्वा, प। प्रतिघातः। स्तर्कति। तस्ताक। स्तकिता। स्तक-यति, घटादिः। अतिष्टकत्। अति-स्तकत्, वो।

स्तग् (स्थग)।

स्तन्—ष्टन्, भ्वा, प। शब्दः।

स्तनति। तस्तान। तस्तनुः घनाः, भ १४, ३०। स्तनिता। अस्तनीत्, अस्तानीत्। तिस्तनिषति। तस्तन्यते। तस्तन्ति। स्तनयति, स्तानयति। अतिष्टनत्। अतिस्तनत्, वो। स्तन—अदन्तः। चु, प। मेघशब्दः। स्तन-यति। अतस्तनत्। स्तनयित्नुर्बलाहक इत्यमरः। अभिनिःस्तनति मृदङ्गः, पा ८, ३, ८६। अभिष्टानः। वि—शब्दः। जग्मौ दध्यौ वितस्तान, भ १४, ६०।

स्तम्—ष्टम् (षम्) भ्वा, प।

१अवैकल्यम्। २ वैक्लव्यम्, वो। विह्व लीभावः। स्तमति। न च स्तमति शोकेन, कवि २४५। तस्ताम। स्त-मिता। अस्तमीत्। ष्टम्—अदन्तः। चु, प, वो। वैक्लव्यम्। स्तमयति। अत-स्तमत्।

स्तभ्—ष्टभि (स्कभि) भ्वा, आ,

स्तभः। जड़ीभावः। जड़ीकरणम्। प्रतिबन्धः। क्रियानिरोध इति भीमः। दोषवृद्धिरिति गोविन्दभट्टः। रुद्धी-करणम्, दुर्गा। स्तभ्नते। धनेन स्तभ्नते सर्वः स्तभ्नात्यन्यश्च विद्यया। धनविद्या-समृद्धोऽपि न स्तभ्नोति स सज्जनः। कवि ८२। तस्तम्भे। गात्रं तस्तम्भे (काष्ठवन्निश्चलमभूत्), भ १४, ५५। स्तम्भिता। अस्तम्भिष्ट। ष्ट, स्तम्भितः। स्तनभु (सौत्रधातुः) क्रया, प। उ, वो। १ रोधनम्। आवरणम्। २ निष्कोष-णम्। स्तम्भाति। स्तम्नोति, पा ३, १, ८२। स्तम्नोते। स्तम्भुते। हि, स्तभान, स्तम्भुहि। सोऽस्तम्नात्तत सुदुर्जयम्, भ १७, ४५। तस्तम्भ। तस्तम्भे। स्तू-म्भिता। अस्तम्भिष्ट। तेषां सामर्थ्य सोऽस्तम्नीत् विक्रम मस्य नास्तभन्, भ १५, ३१। तिस्तम्भिषति। ०ते। यङ् तास्तभ्यते। तास्तम्भीति। स्तम्भ-यति। अतस्तम्भत्। (ड) स्तम्भित्वा, स्तब्ध्वा। ०स्तभ्य। स्तब्धः। स्तब्धिः। स्तम्भनम्। स्तम्भः। स्तम्भितुम्। स्तम्भौ। स्तम्भिता। स्तम्भितव्यम्। स्तम्भ-नीयम्। स्तब्धा भयात्, भ १५, ३१। अव—आलम्बनम्। सामीप्यम्। अव-ष्टभ्नाति। अवष्टभ्नोति। अवतष्टम्भ। अवातस्तभत्। पय्यतस्तभद्, पा ८, ३, ११६। धनुरवष्टभ्य, उत्तर ७५। यष्टि-मवष्टभ्यास्ते, पा ८, २, ६८। अव-ष्टब्धा गौः (निरुद्धा समीपे आस्ते)। अभि—अभिभवः अभ्यष्टम्भात्। अभि-

तष्टभ्। उद्—उत्तम्भिता। उत्तम्भितुम्, पा ८, ४, ६१। उप—उपष्टभ्नाः। उपक्रमः। परि—निरोधः। परिष्टभ्नाति। पर्य्यतस्तभ्नात्, पा ८, ३, ६७, ११६। नि, प्रति—अभिभवः। प्रतिबन्धः। निस्तब्धः। प्रतिस्तब्धः, पा ८, ३, ११४। बाहुप्रतिष्टभ्यविक्षुब्धमन्दः, र २, ३२। अप्रतिस्तब्धविक्रान्त मनिस्तब्धो मरुद्गवे, भ ६, ८८। वि—निवारणम्। अवलम्बनम्। आक्रमणम्। विष्टभ्नाति। विष्टभ्नोति। व्यष्टभत्, व्यष्टभ्नोत्। न व्यष्टभात्, भ ६, ७२। विसाढवन्त मन्त्राणि व्यतस्तभत्, भ, ६, ८१। सम्—संस्तम्भनम्। निरोधः। संस्तभ्यात्मान मात्मना, गी ३, ४६।

स्तिघ्—ष्ठिघ्, स्वा, आ।

आस्कन्दनम्।

स्तिप्—स्तेप्—ष्टिप्, ष्टेप् (तिप्) भ्वा, आ। क्षरणम्। स्तेप्, चु, प। क्षेपः।

स्तिम्—स्तीम्—ष्टिम्, ष्टीम् (तिम्) दि, प। आर्द्रीभावः। स्तिम्यति। स्तीम्यति। तिष्टेम। स्तेमिता। क्त, स्तिमितः। किञ्चित्प्रकाशस्तिमितोग्रतारे नेत्रे:, कु ३, ४७। स्तिमितो निश्चलार्द्रयो रिति मेदिनी।

स्तु—ष्टुञ्, अदा, उ। स्तुतिः।

प्रशंसा। लट् स्तौति। अभिष्टौति। स्तुतः। स्तुवीतः। स्तुते। स्तुवीते। लिङ् स्तुयात्। स्तुवीत। लङ् अस्तौत्। अस्तवीत्। अभ्यष्टौत्। पर्य्यष्टौत्। पर्य्यस्तौत्। अस्तुत। अस्तुवीत्। स्तौषि शत्रूंश्च नः सदा, भ ५, १५। लिट् तुष्टाव। तुष्टोथ। तुष्टुव, पा ७, २, १३। तुष्टुवे। लुट् स्तोता। स्तविता, वो। स्तोष्यति। ०ते। आशिषि, स्तूयात्। स्तोषीष्ट। लुङ् अस्तावीत्। अस्ताविष्टाम, पा ७, २, ७२। अस्तोष्ट। अस्तोषातान्। अस्ताविषः सरा रामम्, भ १५, ७०। कर्म्मणि स्तूयते। अस्तावि। सन्। तुष्टूषति। ०ते, पा ८, ३, ६१। तोष्टूयते। तोष्टौति। णिच् स्तावयति। स्तुत्वा। ०स्तुत्य। स्तुतः। स्तुतिः। स्तवनम्। स्तवः। स्तोत्रम्। स्तुत्यर्थम्। प्रस्तावः। संस्तावः स्कन्दागानाम्। परि—स्तेयः। परिस्तौति (चरति), भा २, ७। प्र—प्रारम्भः। प्रस्तावः। प्रतुष्टुवुः कर्म्म ततः, भ २, २८। प्रास्ताविद्रामसंकथाम्, भ ८, १०३। प्रस्तूयतां भोः, उत्तर ६। सम्—संस्तवः। परिचयः। असंस्तुतेषु भयेषु जायेत मृत्यो रपि पक्षपातः, भा ३, २१।

स्तुच्—ष्टुट्, भ्वा, आ। प्रसादः।

ष्णुच् इत्येके। अयं सेचनार्थः, वो।

स्तुभ्—ष्टुभ्, ष्टुभु, वो। भ्वा, आ। स्तम्भ। जड़ीभावः। जड़ीकरणम्। क्रियानिरोध इति भौमः। दोषवृद्धिरिति गोविन्दभट्टः। स्तोभते। तुष्टुभे। स्तोभिता। विष्टोभते।

स्तुम्—स्तुन्भु (सौत्रधातुः)। क्र्या, प।

उ, वो। १आवरणम्। रोधनम्। २निष्कोषणम्। स्तुभ्नाति। स्तुभ्नोति, पा ३, १, ८२। स्तुम्नीते। स्तुभ्नुते।

स्तूप्—ष्टूपिर्, स्तूपिर्, दि, प, वो। चु, प। उच्छ्रायः। राशीकरणम्।

स्तूयति। तुष्टूप। स्तूपिता। अस्तूपीत्, अस्तूपत्, । स्तूप्, तुस्तूप। अतुस्तूपत्।

स्तृ—स्तृञ्, स्ना, उ। आच्छादनम्।

स्तृ, स्ना, प, वो। १प्रीतिः। २रक्षा। ३प्राणनम्। स्तृणाति। स्तृणुते। स्तृणुयात्। स्तृणीत। अस्तृणात्। अस्तृणीत। तस्तार। तस्तरे। तस्तरिथ, तस्तर्थ। तस्तरे। शिरोभि र्महीं तस्तार, र ४, ६३। स्तर्त्ता। स्तरिष्यति। °ते। स्तर्य्यात्। स्तरिषीष्ट, स्तृषीष्ट। अस्ताषीत्। अस्ताष्टाम्। अस्ताषुः। अस्तरिष्ट, अस्तृत, पा ७, २, ४३। कर्म्मणि, स्तर्य्यते। अस्तारि। तिस्तीर्षति। °ते। तास्तर्य्यते। तास्तर्त्ति। स्तारयति। अतस्तरत्। अतिस्तरत्। भूमिमतस्तरद्भतैः, भ १५, १४८। स्तृत्वा। °स्तृत्य। स्तृतः। स्तृतिः। स्तरणम्। स्तरः। आ, परि—आस्तरणम्। परितस्तरः, भ १४, ११। वि—विस्तारः। शब्दसमूहे तु विस्तरः। आसने विष्टरः।

स्तृच् (स्तृच्) भ्वा, प। गतिः।

स्तृह्—स्तृह (स्तृह) तु, प। बधः।

स्तृहति। तस्तर्हं। तस्तृहतुः। तस्तर्हिथ, तस्तर्ढ। स्तर्हिता, स्तर्ढा। स्तर्हिष्यति, स्तर्ष्यति। अस्तर्हीत्, अस्तृक्षत्। स्तृह स्तृह, वो। स्तृहति। अस्तृहीत्, अस्तृक्षत्।

स्तृ—स्तृञ्, क्रया, उ। आच्छादनम्।

स्तृणाति। स्तृणीते। स्तृणीयात्। स्तृणीत। अस्तृणात्। अस्तृणीत। तस्तार। तस्तरे। स्तरिता, स्तरीता। स्तरिष्यति, स्तरीष्यति। स्तीर्य्यात्। स्तरिषीष्ट, स्तीर्षीष्ट, पा ७, २, ३८। अस्तारीत्। अस्तारिष्टाम्। अस्तारिषुः। अस्तरिष्ट, अस्तरीष्ट, अस्तीर्ष्ट, कौ १६५। तिस्तरिषति। °ते। तिस्तरीषति। °ते। तिस्तीर्षति। °ते। तस्तीर्य्यते। तास्तर्त्ति। स्तारयति। अतस्तरत्, पा ७, ४, ६५। स्तीर्त्वा। °स्तीर्य्य। स्तीर्णः। स्तीर्णिः। स्तरणम्।

स्तृह् (स्तृह) स्तेप् (स्तिप्)।

स्तेन—अदन्तः। चु, प। चौर्य्यम्।

स्तै—ष्टै, भ्वा, प। १वेष्टनम्। २शोभा। स्तायति।

स्त्यै—ष्ट्यै, भ्वा, प। १शब्दः। २सङ्घातः। °शब्दसङ्घातः। स्त्यायति। यत्कीर्त्तिः स्त्यायति त्रिलोकी, कवि ४०। क्त, स्त्यानः। प्रस्तीतः। प्रस्तीमः, पा ८, २, ५४। संस्त्यानः। स्त्री।

स्त्रोम—अदन्तः। चु, प। श्लाघा।

स्थग्—ष्ठगे, स्थगे, वो। (षगे) भ्वा, प। संवरणम्। गोपनम्। स्थगति। तस्थाग। स्थगिता। (ण) अस्थगीत्। णिच् स्थगयति, घटादिः। स्थगयन्ति जलदाः, मा ४, २४। (स्थग आच्छादने इति चौरादिकः) मल्लीनाथः। स्थगयति मोहः, उत्तर ११७। स्थगिता रजोभि र्दिशः, भ १२, ६९।

स्थल्—भ्वा, प। स्थितिः। स्थलति।

स्था—ष्ठा, भ्वा, प। अर्थविशेषे आ।

स्थितिः। गतिनिवृत्तिः। अवस्थानम्। विद्यमानता। तिष्ठति। °ते, पा ७, ३, ७८। चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान्, हितो। सा देवता नररूपेण तिष्ठति, मनु ७, ८। क स्तष्ठे

दये तयोः, चण्डी। तस्थौ। परितस्थौ। तस्थिथ, तस्थाथ। तस्थिव। तस्थे। तस्थौ सिमंग्रामयिषुः भ ३, ४७। स्थाता। स्थास्यति। ०ते। स्थेयात्, पा ६, ४, ६७। स्थासीष्ट। स्थेयाः पितेव धुरि पुत्रिणाम्, र १, ८२। अस्थात्, पा २, ४, ४७। अस्थाताम्। अस्थुः। अस्थित। अस्थिषाताम्। अस्थिषत, पा १, २, १७। भावकर्मणोः, स्थीयते, पा ६, ४, ६६। स्थायिता। स्थायिष्यते। स्थायिषीष्ट। अस्थायि। अस्थायिषाताम्। तिष्ठासति। ०ते, पा ७, ४, ६१। तेष्ठीयते, पा ६, ४, ६६। तास्थाति। तास्थेति। स्थापयति। अतिष्ठिपत्, पा ७, ४, ५। स्थित्वा। ०स्थाय। स्थितः। स्थितिः। स्थानम्। स्थायः। स्थातुम्। स्थायी। स्थाता। ०स्थः। स्थातव्यम्। स्थानीयम्। स्थेयम्। स्थास्नुः। तस्थिवान्। स्थावरः। स्थायुकम्। (आशयप्रकाशने) गोपी कृष्णाय तिष्ठते, पा १, ३, २३। (सन्देहनिर्णयार्थं मात्रयणे) संगत्य कर्णादिषु तिष्ठते यः (सन्दिग्धार्थे कर्णादीन् निर्णेतृत्वेनाश्रयति), भा ३, १४। अधि—अधिष्ठानम्। प्राप्तिः। आरोहणम्। ग्राम मधितिष्ठति, पा १, ४, ४६। जनो निकायं तेऽधितिष्ठति, भ ६, १६। माधिष्ठा निर्जनं वनम्, भ ८, ७८। शाखिनः केचिदध्यष्ठुः, १५, ३१। रथोऽध्यष्ठोयत रामेण, भ १७, ८८। अनु—अनुष्ठानम्। करणम्। यस्य शैलाधिपत्यं प्रजापतिः स्वय मन्वतिष्ठत्, कु १, १७। अव—अवस्थितिः। अवतिष्ठते, पा, १, ३, २२। क्षण मवतिष्ठस्व, भ ८, ११। न शासने ऽवास्थित यो गुरूणाम्, भ ३, १४। व्यव—व्यवस्था। इति धर्मा व्यवस्थितः, मनु १०, ६८। क्षुदि व्यवस्थाप्य समाधिवश्यं मनः, कु ३, ५०। आ—(प्रतिज्ञायाम् शब्दं नित्य मातिष्ठते, को १४३। आश्रयः करणम् अवलम्बनम्। संयमे यत्न मातिष्ठेत्, मनु २, ८८। समाधि मास्थाय, कु ५, २। उद्—उत्थानम्। उत्पत्तिः। यत्नः। उद्योगः। मुक्तावुत्तिष्ठते, पा १, ३, २४। पीठादुत्तिष्ठति। शाखाच्छत मुत्तिष्ठति। उत्तिष्ठमानं सिद्धार्थं, भ ८, १२। उदस्थादासनात्, भ १५, ७। उत्थानम्। उत्थितः, पा ८, ४, ६१। प्रत्युत्थानम्। एनं प्रत्युत्थायाभिवादयेत्, मनु २, १८। उप—उपस्थितिः। भोजनकाले उपतिष्ठते, पा १, ३, २६। (मन्त्रकरणपूजनम्) ऐन्द्राग्नं गार्हपत्यमुपतिष्ठते, पा १, ३, २५। (एकचर्य्या) पति मुपतिष्ठति यौवनेन। विनयादुपास्थुः भ ३, ४३। (देवपूजा) आदित्य मुपतिष्ठते, को १४४। न त्राम्बकादन्य मुपास्थितासौ, भ १, ३। (सङ्गमः) गङ्गा यमुनामुपतिष्ठते। (मित्रकरणम्) रथिको रथिकानुपतिष्ठते। (वर्त्मगतिः) अथ पन्थाः काशी मुपतिष्ठते। लिप्सयोपगमनम्) भिक्षुकः प्रभु मुपतिष्ठति। ०ते, को २२४। प्र—प्रस्थानम्। प्रतिष्ठते, पा १ ३, २२। प्रास्थिषता द्रौन्द्रम्, भ ७, १०२। आश्रमाय प्रतस्थे, भ २, २४। प्रति—प्रतिष्ठा। संस्थापनम्। अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितम्, किरा०। वि—अवस्थानम्। वितिष्ठते, पा १, ३, २२। सम्—संस्थितिः। अवस्थानम्। सन्तिष्ठते, पा १, ३, २२। न तस्य वाक्ये सन्तिष्ठते जनः मृच्छ २९।

स्थुड् (थुड्)।

स्थूल—अदन्तः। चु, आ। प, वो।

परिवृंहणम्। वृद्धिः। स्थूलयति।

स्नस्—णसु, दि, प। निरसनम्।

स्ना—णा, अदा, प। शौचम्।

स्नानम्। स्नाति। स्नाति गङ्गाजलैर्नित्यम्, कवि २१९। स्नायात्। अस्नात्। अस्नुः। अस्नान्। सस्नौ। सस्नतुः। स्नाता। स्नास्यति। स्नेयात्। स्नायात्। अस्नासीत्। अस्नासिष्टाम्। अस्नासिषुः। सिस्नासति। सास्नायते। सास्नाति। सास्नेति। स्नपयति। स्नापयति। प्रस्नापयति। अभिस्नपत्। स्नपयति हृदयंगं दृष्टिः, उत्तर। स्नात्वा। ०स्नाय। स्नातः। स्नातिः। स्नानम्। स्नाता। स्नानीयम्। निस्नातः शास्त्रेषु नदीस्नातः, पा ८, ३, ८९।

स्निह्—चु, प। १ स्नेहः। २ गतिः।

स्निह्—ष्णिह्, दि, प। प्रीतिः।

स्नेहः। स्निह्यति। नच स्निह्यति कस्यचित्, भ १८, ९। सिस्नेह। सिस्निहतुः। सिस्निहिथ, सिस्नेग्ध, सिस्नेढ। स्नेग्धा, स्नेढा, स्नेहिता, पा, ७, २, ४५। ८, २, ३३। स्नेक्ष्यति, स्नेहिष्यति। अस्निहत्। सिस्नेहिषति, सिस्निहिषति, सिस्निक्षति। सेस्निह्यते। सेस्नग्धि, सेस्नेढि। स्नेहयति। अभिस्निहत्। स्निह्, चु, प। स्नेहनम्। स्निग्धोभावः। स्नेहयति वर्त्तिका तैलेन, दुर्गा। स्नेहयत्यात्मबन्धुषु, कवि २४४। स्नेहित्वा, स्निहित्वा, स्निग्ध्वा, स्नेढ्वा। ०स्निह्य। स्निग्धः। स्नेढः। स्नेहनम्। स्नेहः। स्नेहितुम्। स्नेग्धुम्, स्नेढुम्। क्विप् स्निक्, स्निट्, ष्णिक्।

स्नु—णु, अदा, प। प्रस्रवणम्।

स्नावः। स्नौति। स्नुतः। स्नुवन्ति। सुस्नाव। सुस्नुवतुः। सुस्नुविथ। सुस्नुविव। स्नविता, पा ७, २, ३९। स्नविष्यति। स्नुयात्। अस्नावीत्। अस्नाविष्टाम्। अस्नाविषुः। कर्मणि, प्रस्नूयते। प्रस्नोता, पा ७, २, ३९। प्रस्नोष्यते। प्रस्नोषीष्ट। प्रास्नावि। प्रस्नुते गौः स्वयमेव। प्रास्नोष्ट गौः स्वयमेव, पा ३, १८९। सुस्नूषति। सोस्नूयते। सोस्नवीति। सोस्नोति। स्नावयति। असुस्नवत्। स्नुत्वा। ०स्नुत्य। स्नुतः। स्नुतिः। स्नवनम्। स्नवः। स्नवितुम्।

स्नुच् (सुच्)।

स्नुस्—ष्णुस्, दि, प। १अदनम्।

२आदानम्। ३अदर्शनम्। स्नुस्यति।

स्नुह—ष्णुह्, दि, प। उद्गिरणम्।

२वमनम्। स्नुह्यति। सुस्नोह। सुस्नोहिथ, सुस्नोग्ध, सुस्नोढ। सुस्नुहिव, सुस्नुह्व। स्नोहिता, स्नोग्धा, स्नोढा। स्नोहिष्यति, स्नोक्ष्यति। अस्नुहत्।

स्नै—ष्णै, भ्वा, प। वेष्टनम्।

स्नायति। णिच् स्नपयति। स्नापयति।

स्यन्द्—स्यदि, भ्वा, आ।

किञ्चिच्चलनम्। ईषत्क्षम्यनम्। स्यन्दनम्। स्फुरणम्। स्यन्दते। स्यन्दते दक्षिणो भुजः, मृच्छ २०४। पस्यन्दे। पस्यन्दे वामनयनं जानकीजामदग्न्ययोः, महाना २, २८। स्यन्दिता। स्यन्दिष्यते। अस्यन्दिष्ट। अस्यन्दिषाताम्। अस्यन्दिषत। अस्यन्दिष्टाक्षि वामम्, १५, २७।

पिस्यन्दिषते। पास्यन्द्यते। पास्यन्ति। स्यन्दयति। अपस्यन्दत्। स्यन्दित्वा। ०स्यन्द्य। स्यन्दितः। स्यन्दनम्। स्यन्दः। स्यन्दनः। परिवि—परिस्यन्दनम्। स भीमेन परामृष्टो व्यस्यन्दत यथा प्राणं विचकर्ष च पाण्डवम्, भारत।

स्पर्ध्—भ्वा, आ। सङ्घर्षः।

पराभिभवेच्छा। स्पर्द्धा। स्पर्द्धते। पस्पर्द्धे। स्पर्द्धिता। स्पर्द्धिष्यते। अस्पर्द्धिष्ट। अस्पर्द्धिषाताम्। अस्पर्द्धिषत। अस्पर्द्धिष्ट रामेण सह मः, भ ५, ६५। पिस्पर्द्धिषते। पास्पर्द्ध्यते। पास्पर्द्धि। स्पर्द्धयति। अपस्पर्द्धत्। स्पर्द्धित्वा। ०स्पर्द्ध्य। स्पर्द्धितः। स्पर्द्धा। स्पर्द्धितृम्। आ—आस्पर्द्धा। स्पर्द्धनः।

स्पश्—स्पर्श्—चु, आ। १ग्रहणम्।

२श्लेषणम्। स्पाशयते। स्पर्शयते। स्पश्, भ्वा, च। १स्पर्शनम्। २पीडनम्। ३ग्रन्थनम्, वो। २ स्पशति। ०ते। स्पशः।

स्पर्ष् (पर्ष्)।

स्पृ—स्ना, प। १प्रीतिः। २ पालनम्।

३चलनम्। ४जीवनम्। स्पृणोति। पस्पार। स्मृ, स्मृणोति। इमौ छान्दसावित्याहुः, कौ १४७। प्रदीपमते स्कृ।

स्पृश्—तु, प। स्पर्शः। आमर्शनम्।

स्पृशति। पस्पर्श। पस्पृशतुः। पस्पृशिथ। पस्पृशिव। हस्तेन पस्पर्श तदङ्गमिन्द्रः, कु ३, २१। स्प्रष्टा, स्पर्ष्टा, पा ६, २, ५८। स्पृच्यति, स्पर्क्ष्यति। अस्प्राक्षीत्, अस्पार्क्षीत्, अस्पृक्षत्, कौ १०४। अस्प्राष्टाम्, अस्पार्ष्टाम्, अस्पृक्षताम। अस्प्राक्षुः, अस्पार्क्षुः, अस्पृक्षन्। कर्मणि, स्पृश्यते। अस्पर्शं। पिस्पृक्षति। परिस्पृश्यते। परीस्पर्ष्टं। स्पर्शयति। अपस्पर्शत्। अपिस्पृशत्। (दानम्) स्पर्शनं प्रतिपादन मित्यमरः। गाः कोटिशः स्पर्शयता घटोघ्नोः, र २, ४८। स्पृष्ट्वा। ०स्पृश्य। स्पृष्टः। स्पृष्टिः। स्पर्शनम्। स्पर्शः। स्प्रष्टुम्। स्पर्ष्टुम्। उप—उपस्पर्शः। आचमनम्। उपस्पर्श स्वाचमन मित्यमरः।

स्पृह—अदन्तः। चु, प। ईप्सा।

प्राप्तीच्छा। स्पृहा। लोभः। स्पृहयति। पुष्पेभ्यः स्पृहयति, पा १, ४, ३६। स्पृहयति च बिभेति प्रेमतो बालभावात्, मद्दाना २, ४४। तव जनन्यै स्पृहयाम्बभूव, मद्दाना २, १८। स्पृहा। स्पृहनीयः। स्पृहयालुः।

स्फट्—स्फाण्ट्, स्फटि, भ्वा, प, वो।

विशरणम्। भेदः। स्फटति। स्फण्टति। स्फटितम्, दुर्गा। स्फटः। स्फटा। स्फण्ड् (स्फण्ट्) स्फर्, स्फल् (स्फुर्)।

स्फल् (स्फुल्) तु, प। सञ्चलनम्।

स्फूर्त्तिः। स्फलति। पस्फाल। स्फालिता। आ—आस्फालनम्। चालनम्। ताडनम्। ऐरावतास्फालनकर्कशेन हस्तेन, कु ३, २२। आस्फालितवल्लकीगुणः, मा १, ८। धनु रास्फालितम्, मद्दाना १, ३२। आस्फालितं यत् प्रमदाकराग्रैः, र १३, १३।

स्फाय्—स्फायी (श्फाय्यी) भ्वा, आ।

वृद्धिः। स्फायते। अस्फायतास्य वीरत्वम्, भ १७, ५०। पस्फाये। तयोः पस्फाये शस्त्रलाघवम्, भ १५, १०८। स्फायिता। अस्फायिष्ट। अस्फास्त, वो। णिच् स्फावयति। अपिस्फवत्, पा

६, ३, ४१। अपिस्फवच्च बन्धूनां विक्रमम्, भ ४, ३३। स्फायित्वा। ०स्फाय्य। स्फीतः, स्फातः, वो। स्फीतवान्, पा ६, १, २२। स्फायनम्। स्फायः। स्फायितुम्। स्फातिः। स्फातिर्वृद्धावित्यमरः। स्फोति रिति णिजन्तात् स्फीतशब्दात् इः, कौ ४४९। यन्निम्बानां परिणतफलस्फीतिरास्वादनीया। काव्यप्रकाशः।

स्फिट्—चु, प। १हिंसा।

२आवरणम्। ३बधः। ४अनादरः। स्फेटयति।

स्फिड्—(षट्) चु, प। हिंसा।

स्फुट्—स्फुटिर्, भ्वा, प।

१विशरणम्। भेदनम्। २विकसनम्, दुर्गा। स्फुट्, भ्वा, आ। तु, प। विकसनम्। प्रफुल्लीभावः। स्फोटति। ०ते। स्फुटति। अस्फुटद्विमण्डलम्, भ १७, ८। यस्योद्यानतटे स्फुटन्ति मतलं वल्लीषु पुष्पच्छटाः, स्फोटन्ते नवकुड्मलानि कुटजाः प्रायेषु वृक्षेषु च। स्फोटन्ति द्विषतां शिरांसि महसा यस्याप्रियं कुर्वतां, प्रेयस्यास्फोटयति स्फुठन् दशदिशः कुर्वंस्खरैः पूरिताः॥ कवि १३। पुस्फाट। पुस्फोटिथ। तु, पुस्फुटिथ। पुस्फुटे। मनो मे न यत् पुस्फोट सहस्रधा, भ १४, ६। तुरङ्गाः पुस्फुटुर्भीताः, भ १४, ७६। स्फोटिता। तु, स्फुटिता। स्फोटिष्यति। ०ते। तु, स्फुटिष्यति। लुङ् (इर्) अस्फुटत्, अस्फोटीत्। अस्फोटिष्ट। तु, अस्फुटीत्। अस्फुटिष्टाम्। प्रासोऽस्फोटीत् तस्योरसि, भ १५, ७७। पुस्फुटिषति। ०ते। पुस्फोटिषति। ०ते। पोस्फुट्यते। पोस्फुट्टि। स्फोटयति। अपुस्फुटत्। स्फुट् (चट) चु, प। भेदनम्। स्फोटयति। स्फुट्, तु, प, वो। हिंसा। बाहुताडनम्। आङ्पूर्वोऽयं मिति दुर्गादासः। आस्फोटयति। बाहू चास्फोटयच्छनैः, भारत। कैचिदास्फोटयाञ्चक्रुः, भ ३, २८। स्फोटित्वा, स्फुटित्वा। ०स्फुट्य। स्फुटितः। स्फुट्टिः। स्फोटनम्, स्फुटनम्। स्फोटः। स्फोटितुम्। स्फुटितुम्। स्फुटः। स्फुटताम् (पलायमानानाम्), भ १०, ८। स्फुट्—अदन्तः। चु, प। विस्फुरणम्। विकसनम्। स्फुटयति। अपुस्फुटत्।

स्फुड् (चुड़)।

स्फुड्—चु, प, वो। अनादरः।

स्फुण्ट्—स्फुटि, भ्वा, प। विशरणम्। भेदः। स्फुण्टति। पुमस्फुण्ट। स्फुण्टिता। स्फुटि स्फुड़ि स्फुड़ि, चु, प, वो। नर्म। परिहासः स्फुण्टयति। स्फुण्डयति। स्फुण्डयति। स्फुड़ि, भ्वा, आ, वो। विकसनम्। स्फुण्डते।

स्फुर्—स्फुल्, स्फुर्, स्फल्—तु, प।

१स्फुरणम्। स्फूर्त्तिः। प्रकाशः। दीप्तिः। २सञ्चलनम्। कम्पनम्। स्यन्दनम्। स्फुल्लतिः सञ्चाराथः, वो। स्फुरति। स्फुलति। स्फरति। स्फलति। सप्तर्षिमण्डलं स्फुरति, मा ११, ३। सव्यं नेत्रं स्फुरति, मृच्छ २७४। स्फुरतु कुचकुम्भयो रुपरि मणिमञ्जरी, गीतगो १०, ६। पुमस्फोर। पुमस्फुरतुः। पुस्फुरिथ। चारु पुमस्फोर बाहुः, भ २, २७। पुमस्फुरुर्वृषभाः परम्, भ ४, ८। स्फुरिता। स्फुरिष्यति आशिषि, स्फूर्य्यात्। अस्फुरीत्। अस्फुरिष्टाम्। पुस्फुरिषति। पोस्फूर्य्यते। पोस्-

फोर्त्तिं। स्फोरयति। स्फारयति, पा ६,१, ५४। अपुस्फरत्। अपुस्फुरत्। धनुरपुस्फुरद् गुरु, भ १५, ८८। निःष्फुरति, निःस्फुरति। निष्फलति, निःस्फुलति, पा ८, ३, ७६। वि—कम्पनम्। विसफुरति, विष्फुरति। विस्फारयन् धनुः। क्रोधविस्फारितेक्षणः, भारत। स्फुरित्वा। ०स्फर्य्य। स्फुरितः। स्फुर्त्तिः। स्फुरणम्। स्फारः। स्फालः, पा ६, १, ४७। स्फुरितुम्। स्फुल् (स्फुर्)।

स्फूर्च्छ्—स्वूर्च्छ्—स्फूर्छ्, स्वुर्च्छ्, भ्वा, प।

विस्तृतिः। स्फूर्च्छति स्वूर्च्छति, वो। पुस्फुर्च्छ्। स्फूर्च्छिता। (आ) स्फूर्च्छितम्, स्फूर्णम्। क्विप् स्फूः, स्फूरौ। स्फुर्च्छति प्रदीपमते स्फूरौ।

स्फूर्ज्—ट्रोस्फुर्जा, भ्वा, प।

वज्रनिर्घोषः। वज्रकर्त्तृकशब्दः। स्फूर्जति। पुस्फूर्ज। स्फूर्जिता। अस्फूर्जीत्। पुस्फूर्जिषति। पोस्फूर्ज्यते। पास्फूर्क्ति। स्फूर्जयति। (आ) स्फूर्जितम्, स्फूर्णम्। स्फूर्णः। (ट्) स्फूर्जथुः।

स्मि—स्मिङ्, भ्वा, आ। ईषद्धसनम्।

स्मयते। सिस्मिये। स्मेता। स्मेष्यते। अस्मेष्ट। अस्मेषाताम्। अस्मेषत। मित्स्मयिषते, पा ७, २, ७४। सेस्मीयते। सेस्मयीति। स्मापयति। स्मि, चु, आ। अनादरः। जुगुप्सा। स्माययते। स्मित्वा। ०स्मित्य। स्मितः। स्मितिः। स्मयनम्। स्मयः। स्मेतुम्। स्मायी। स्मेता। स्मेरः। काकुत्स्थ ईषत् स्मयमानः, भ २, ११। वि—विस्मयः। व्यस्मयन्त प्लवङ्गमाः, भ १७, ७०। उद्दीप्य को भुवि न विस्मयते नगेशम्, मा ४, ९। तयोः प्राविक्षेन विसिस्मये लोकः, र ५, ६८। चिच् (प्रयोजकात् स्मये) विस्मापयते, पा १, ३, ६८। ६, १, ५७। अन्यत्र, विस्मापयति। रामं विस्मापयेत कः, भ ५, ५८। मनुष्यवाचा विस्मापयन् राजानम्, र २, ३३।

स्मिट्—चु, पा। १अनादरः।

२स्नेहः, वो। स्मेटयति। असिस्मिटत्।

स्मील् (श्मील्)

स्मृ—भ्वा, प। चिन्ता। ध्यानम्। स्मरणम्। स्मरति। मातरं स्मरति, मातुः स्मरति, पा २, ३, ५२। सस्मार। मस्मरतुः, पा ७, ४, १०। सस्मर्थ। सस्मरिव। सस्मार वारणपतिः, मा ५, ५०। यानं सस्मार कौवेरम, भ ४, १४५। स्मर्त्ता। स्मरिष्यति। स्मर्य्यात्, पा, ४, २८। अस्मार्षीत्। अस्मार्ष्टाम्। अस्मार्षुः। अस्मार्षीद् ब्रह्मास्त्रम, भ १५, ९४। कर्मणि, स्मर्य्यते। स्मृषीष्ट। स्मरिषीष्ट, पा ७, २, ४३। सुस्मर्षते, पा १, ३, ५७। मास्मर्य्यते। मास्मर्त्ति। स्मारयति। उत्कण्ठापूर्वकस्मरणे घटादिः। स्मरयति। अमस्मरत, पा ७, ४, ९५। गुरुः शिष्यं शास्त्रं स्मारयति, दुर्गा। तेन शस्त्र मस्मार्य्यत सः, भ ७, १०८। स्मृत्वा। स्मृत्य। स्मृतः। स्मातः। स्मरणम्। स्मर्त्तुम्। स्मर्त्ता। स्मारकः। तद्दानं सात्त्विकं स्मृतम्, गी ७, २०। तेन नारायणः स्मृतः, मनु १, १०। वि—विस्मरणम्। अस्मिन् क्षणे खलु विस्मृतं मयैतत्, शकु १, १८। शस्त्राणां व्यस्मरन्, भ १७, १०। स्मृ (स्मृ)।

स्यन्द्—स्यन्दू, भ्वा, आ। स्रवणम्। क्षरणम्। स्यन्दते। सस्यन्दे। सस्यन्दिषे। सस्यन्त्से। सस्यन्दे शोणितं व्योम, भ १४, ८८। स्यन्दिता, स्यन्ता। स्यन्दिष्यते। स्यन्त्स्यसि। ०ते, पा ३, १, ८२। ध्वान्तं रवेः स्यन्त्स्यति, भ १३, ७७। तीव्रं मेघैः स्यन्दिष्यते, भ १६, ७। अस्यन्दिष्यत। अस्यन्त्स्यत्। ०त। स्यन्दिषीष्ट, स्यन्त्सीष्ट। अस्यदत्। अस्यन्दिष्ट, अस्यन्त। अस्यन्दिषाताम, अन्दन्त्साताम्। अस्यन्दिषत, अस्यन्त्सत। सिस्यन्दिषते। सिस्यन्त्सति। ०ते। मास्यद्यते। मास्यन्ति। स्यन्दयति। असस्यन्दत्। स्यन्दित्वा, स्यन्त्वा, पा ६, ४, ३१। ०स्यन्द्य। स्यन्त्रः। स्यन्तिः। स्यन्दनम्। स्यन्दः। स्यन्दितुम्। स्यन्तुम। स्यन्दो। स्यन्दनः। अभि—द्रवोभावः। क्षरणम्। अभिस्यन्देत हृदयम्, उत्तर १८७। अभिस्यन्दते अभिष्यन्दते दुग्धम्। निस्यन्दते निष्यन्दते मधु। परिस्यन्दते परिष्यन्दते घृतम्। विस्यन्दते विष्यन्दते तैलम्। ०स्यन्दते मत्स्यः, पा ८, ३, ७२।

स्यम्—स्यमु, भ्वा, प। तु, प, वो।

शब्दः। स्यमति। सस्याम। सस्यमतुः। स्येमतुः, पा ६, ४, १२५ सस्यमुरश्विवाः खगाः, भ १४, ८३। हरिराक्षसाः स्येमुः, भ १४, ७७। स्यमिता। स्यमिष्यति। अस्यमीत्। सिस्यमिषति। सेसिम्यते, पा ६, १, १८। स्यमयति। असिस्यमत्। स्यम्, चु, आ। वितर्कः। स्यामयते। स्यामयति, वो। स्यम, अदन्तः। चु, प, वो। शब्दः। स्यमयति।

स्रङ् (अच्)।

स्रभ, अभ्—स्रन्भु, अन्भु। भ्वा, आ। प्रमादः। अनवधानता। स्रभते। अभते। सस्रभे। स्रम्भिता। अस्रम्भिष्ट। स्रन्भु, भ्वा, आ। विश्वासः। शङ्कारहितौभावः। प्रायेणायं विपूर्वः। विस्रभ्नते। तालव्यादि रय मित्येके। विश्रभते। लुङ् अस्रभत्। अस्रम्भिष्ट। (ड) स्रम्भित्वा, स्रब्ध्वा। स्रब्धः। स्रभणम्। स्रभः। विस्रभः।

स्रंस्—स्रन्सु (ध्वन्सु) भ्वा, आ।

अवस्रंसनम्। च्युतिः। अधःपतनम्। स्खलनम्। भ्रंशः। प्रसन्नौभावः, वो। तालव्यान्त इति कश्चित्। स्रंसते। गाण्डावं स्रंसते हस्तात्, गो १, ३०। सस्रसे। स्रंसिता। स्रंसिष्यते। अस्रसत्, पा १, ३, ८१। ३, १, ५५। अस्रसिष्ट (प्रमादे, अस्रंसिष्ट, वो)। नास्रसत् करिणां ग्रैवम्, र ४, ४८। अस्रसदाहतः। तेऽस्रंसषताकुलाः, भ १५, ८। भावे स्रस्यते। अस्रंसि। सस्रंसे शरबन्धन, भ १४, ७२। सिस्रंसिषते। सनीस्रस्यते, पा ७, ४, ८४। सनीस्रस्ति। स्रमयति। अमस्रंसत्। बातोऽपि नास्रंसय दंशुकानि वाणिनीनाम्, र ६, ९५। (ड) स्रमित्वा, स्रस्त्वा। ०स्रस्य। स्रस्तः। स्रस्तिः। स्रंसनम्। स्रंसः। स्रस्तां नितम्बात् काञ्चीम्, कु, २, ५५।

स्रंह्—स्रन्हु, भ्वा, आ, वो।

विश्वासः। स्रंहते। सस्रंहे।

स्रिभ्, स्रिभ् (स्रभ्)।

२शोषणम्। स्रेभ्यति। सिस्रेव। स्रेविता। क्विप् स्रू, स्रवी, पा ६, ४, २०।

स्रु—भ्वा, प। १गतिः। २प्रवाहः।

३ स्मरणम्, वो। स्वति। सुस्राव। सुस्रुवतुः। सुस्रोथ। सुस्रुवुः, पा ७, २, १३। शक्रमूत्रं सुस्रुवुर्भयात्, भारत। स्रोता। स्रोष्यति। स्रुयात्। असुस्रुवत्, पा ३, १, ४८। शोणितं मसुस्रुवत्, भ १५, ५६। असूषति। सोस्रूयते। सोस्रोति। स्रावयति। असुस्रवत्, असिस्रवत्। सुस्रावयिषति, सिस्रावयिषति, पा ७, ४, ८१। स्रुत्वा। ०स्रुत्य। स्रुतः। स्रुतिः। स्रवणम्। स्रावः। स्रवः। स्रोतुम्।

स्रेक् (सेक्) स्रै (शै)।

स्वङ्—स्वकि (कंकि) भ्वा, आ। गतिः।

स्वङ्ग्—स्वगि, भा, प, वो। गतिः।

स्वञ्ज्—ष्वन्ज्, भ्वा, आ। परिषङ्गः। आलिङ्गनम्। स्वजते, पा ६, ४, २५। भ्रातरं मस्वजत, र १३, ७०। सस्वजे, सस्वञ्जे। सस्वजिषे, सस्वञ्जिषे। स्वङ्क्ता। स्वङ्क्ष्यते। स्वङ्क्षीष्ट। असस्वङ्क्त। असस्वङ्क्षाताम्। असस्वङ्क्षत। सिस्वङ्क्षते। सास्वज्यते। सास्वङ्क्ति। स्वञ्जयति। नि, वि, परि—आलिङ्गनम्। परिष्वजते। पर्य्यष्वजत, पर्य्यस्वजत, पा ३, ७०, ७१। परिषस्वजे, परिषस्वञ्जे, कौ १०२। अभ्यष्वजत। अभिषिष्वङ्क्षते।

स्वठ् (शठ्)।

स्वद्—स्वर्द्—ष्वद्, स्वर्द्, भ्वा, आ। आस्वादनम्। अनुभवः। रुचिः। अयमनुभवे सकर्मकः। रुचावकर्मकः। प्रीतिकरणम्। रसोपादानम्, दुर्गा। स्वदते। स्वर्दते। स्वदते वारिधारा (रोचते), नै ३, ८१। स्वदस्व हव्यानि (अनुभव)। स्वदते विविधं स्वादु, कवि ११८। सस्वदे। स्वदिता। स्वदिष्यते। असूदिष्ट। सिस्वदिषते। सास्वद्यते। सास्वत्ति। ष्वद्, चु, प। १ आस्वादनम्। रसोपादानम्। २ क्लेदनम्, वो। स्वादयति। असिष्वदत्। स्वादयन्तः फलरसम्, भ ७, ४०। आस्वादयति सर्वेषां विषयाणां सुखानि यः, कवि ११८।

स्वन् (ध्वन्) भ्वा, प। शब्दः।

स्वनति। सस्वान। सस्वनतुः। स्वेनतुः, पा ६, ४, १२५। वानराः स्वेनुः, भ १४, ७०। पूर्णाः पेराः सस्वनुः, भ १४, ३। स्वनिता। असूस्वनोत्, असास्वनोत्। सिस्वनिषति। संस्वन्यते। संस्वन्ति। स्वनयति। स्वानयति, वो। असिस्वनत्। भूषणार्थो घटादिः। अन्यत्र, स्वानयति घण्टाम्। अव, वि—सशब्दभोजनम्। अवष्वणति। विष्वणति। अवाष्वणत्। व्यष्वणत्। शब्दार्थं तु विस्वनति मृदङ्गः, पा ८, ३, ६८। अवषष्वाण। विषष्वाण, पा ८, ३, ६८। आ—शब्दः। मृदङ्गा धीर मास्वनुः, भ १४, ४। क्त, आस्वान्तः, आस्वनितः, पा ७, २, २८। स्वन, अदन्तः। चु, प, वो। शब्दः। स्वनयति।

स्वप्, ञिष्वप्, अदा, प। शयनम्। निद्रा। स्वपिति, पा ७, २, ७६। स्वपितः। स्वपन्ति। स्वपिषि। स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपैति ते, काव्यप्रकाशः। स्वपन्ति बान्धवा मे (दीर्घनिद्रां प्रविशन्ति), भ १८, ११। स्वप्यात्। असूस्वपत्, असुष्वापीत्, पा ७, ३, ८८, ८९। असूस्वपिताम्। असूस्वपन्। असूस्वपः। असूस्वपीः। सुष्वाप। सुषुपतुः। सुष्वपिथ, सुष्वप्थ। सुषुपिव। सुषुपुः कृता;

(भूमौ पतिताः), भ १४, १०१। स्वप्ना। स्वप्स्यति। सुप्यात्। अस्वाप्सीत्। अस्वाप्ताम्। अस्वाप्सुः। भावे, सुप्यते। अस्वापि। सुषुप्सति, पा १, २, ८। सोषुप्यते, पा ६, १, १८। सास्वप्ति। स्वापयति। असूषुपत्, पा ६, १, १८। कोटी बाणे रसूषुपत्, भ १५, ९८। सुष्वापयिषति। सुप्ता। सुप्य। सुप्तः। सुप्तिः। स्वपनम्। स्वापः। स्वप्नः। स्वप्नम्। स्वप्नक्। सु—सुषुप्तिः। सुप्ष्वाप। सुषुषुपतुः, पा ८, ३, ८८। सुस्वप्ना। सुषुप्यात्। सुषुप्तः। विषुप्तः। निःषुप्तः। दुःषुप्तः।

स्वर—अदन्तः। चु, प। आक्षेपः।

स्वर्त्—चु, प। १गतिः। २तङ्कः, वो। सभयस्थितिः। स्वर्त्तयति। ग्रुवर्त्त इत्येके।

स्वर्द (स्वद्)।

स्वल्—ष्वल्ल (पेल्ल) भ्वा, प। गतिः।

स्वस्क्—भ्वा, आ, वो। गतिः।

स्वाद्—भ्वा, आ। स्वाद् (स्वद्) चु, प। आस्वादनम्। स्वादते। सस्वादे। स्वादयति। असिस्वदत्। सिस्वादयिषति।

स्विद्—जिष्विदा, भ्वा, आ।

१स्नेहनम्। २ मोचनम्। ३मोहनम्। स्वेदते। सिष्विदे। स्वदिता। स्वेदिष्यते। अस्विदत्। अस्वेदिष्ट, पा १, ३, ९९। स्विन्नं स्वेदितमस्य। ष्विदा, दि, प। गात्रप्रक्षरणम्। घर्मच्युतिः। स्नेहादयोऽपि, वो। स्विद्यति। न च स्विद्यति तस्याङ्गं व्यायामार्जितमेदसः, कवि २१२। सिष्वेद। सिष्विदतुः। सिष्वेदिथ। स्वेत्ता। स्वेत्स्यति। अस्विदत्। प्रपलायिषता स्विदन्, भ १५, ५०। मन् सिष्वित्सति, दिवादिरनिट्। सिस्वेदिषते, सिस्विदिषते। सेष्विद्यते। सेष्वेत्ति। स्वेदयति। असिष्विदत्, सिस्वेदयिषति, पा ८, ३, ६२। स्वेदित्वा, स्वित्त्वा। स्विन्नं स्वेदितं तेन, पा १,२,१९। ७, २,१६। स्वन्निः। स्वेदनम्। स्वेदा। स्विन्नाङ्गुलिः संवहते कुमारी, र ७, २२। स्विन्नमवमुदाहृतम्, स्मृतिः। स्विद्यतेस्तु स्विदितः क्तौ ३५४।

स्वृर्च्छ् (स्फूर्च्छ्)।

स्वृ—भ्वा, प। १ शब्दः। २उपतापः। स्वरति। सस्वार। सस्वरतुः। सस्वरिथ, सस्वर्थ। सस्वरिव। सस्वरिम। स्वरिता, स्वर्त्ता, पा ७, २, ४४। स्वरिष्यति। स्वर्य्यात्, पा ७, ४, २९। अस्वारीत्। अस्वारिष्टाम्। अस्वारिषुः। अस्वार्षीत्। अस्वार्ष्टाम्। अस्वार्षुः। सिस्वरिषति। सुष्वूर्षति, पा ७, २, ४९। सास्वर्य्यते। सास्वर्त्ति। स्वारयति। असिस्वरत्। ग्रन्थं संस्वरिषीष्टाः प्रधने, भ ९, २८।

स्वृ—क्रया, प। हननम्। स्वृणाति।

स्वेक् (सेक्)।

(ह)

हट्—भ्वा, प। दीप्तिः। हटति। हाटः। हाटकम्।

हठ्—भ्वा, प। १प्रकृतिः। २ शाठ्यम्। ३बलात्कारः। ४काले बन्धनम्, वो। हठति। जहाठ। हठिता। अहठीत्, अहाठीत्। हठः।

हद्—भ्वा, आ। पुरीषोत्सर्गः। मलत्यागः। उभयपदीति कश्चित्। हदते। ०ति। जहदे। हत्ता। हत्स्यते। हत्सीष्ट। अहत्त। अहत्साताम्

अहत्सत । जिहत्सते । जाहत्यते । जाहन्ति । हादयति । अजीहदत । हन्त्रः ।

हन्—अदा, प । १ हिंसा ।

२गतिः । ३प्रहारः । ताड़नम् । गतौ न प्रयुज्यते । सुरस्रोतस्विनो मेघ हन्ति (याति) सम्प्रति सादरम् इत्यादौ असमर्थत्वदोषः । हन्ति । हतः । घ्नन्ति, पा ७, ३, ५४ । हंसि । हि, जहि, पा ६, ४, ३६ । मा धर्मं जहि, भारत । हन्यात् । अहन् । अहताम् । अघ्नन् । अहनम् । भूयस्तमहन्, भ, ८, ३२ । जघान । जघ्नतुः । जघनिथ, जघन्थ । तान् जघान, भ ७, ३१ । विशिखेन कुम्भे जघान, र ५, ५० । जघ्नु रमुं कटाक्षैः, मा ३, १६ । हन्ता । हनिष्यति, पा ७, २, ७० । बध्यात, पा २, ४, ४२ । अबधीत् । अबधिष्टाम् । अबधिषुः, पा २, ४, ४३ । आबधिष्ट । आबधिषाताम् । आबधिषत । आहत । आहसाताम् । आहसत, पा २, ४, ४४ । कर्मणि, हन्यते । जघ्ने । हन्ता, घानिता । घानिष्यते तेन महान् विपत्तः, भ १, २२ । घानिषीष्ट, बधिषीष्ट । अघानि, अबधि । अबधिषाताम्, अहसाताम्, अघानिषाताम् । अबधिषत, अहसत, अघानिषत । अघानि ताड़का तेन, भ ५, ४० । जिघांसति, पा ६, ४, १६ । जङ्घन्यते । (हिंसायाम्) जेघ्नीयते, कौ २०८ । जङ्घन्ति । घातयति । स्वार्थे णिच्, कौ १७७ । पा, ७, ३, ३२ । अजीघतत् । हत्वा । ०हत्य । हतः । हतिः । हननम् । घातः । बधः । हन्तुम् । हन्ता । घातौ । घातकः । घातुकः । बध्यः । घात्यः । हन्तव्यः । हननीयः । जघ्निवान्, जघन्वान्, पा ७, २, ६८ । साक्षिभि र्हा हता भूयो हृदयानामुदेजयैः, भ ६, ७८ । अन्तः—अन्तर्हन्यते । अन्तर्घ्नन्ति, पा ८, ४, २२४ । अन्तर्घनो देशः । अप—अपघातः । ध्वंसनम् । अपहन्ति शक्तिम्, उत्तर ५५ । अभि—आघातः । प्रहारः । वादनम् । अव—कण्डनम् । आ—आघातः । प्रहारः । वादनम् । आहते स्वं वनः । लुङ् आहत, पा १, २, १४ । १, ४, ४४ । गाण्डीवी कनकशिलानिभं भुजाभ्या माजघ्ने विषमविलोचनस्य वक्षः, भा ११, ६३ । आत्मनेपदं चिन्त्यम् । तूर्य्यमाजघ्नुरन्ये भ १, २७ । व्या—आघातः । प्रतिबन्धः । न क्वचिद् व्याहन्यन्ते, उत्तर २२७ । उप—उपघातः । विघातः । हविर्हेयङ्गवीनञ्च नाप्युपघ्नन्ति राक्षसाः, भ ५, १२ । अनुपघ्नन पितृद्रव्यम्, मनु ९, २०८ । नि—निहननम् । वादनम् । बलं तस्य निहन्ति, भ ८, २० । कोणे मैर्य्यो निजघ्निरे, भ १४, १२ । प्रणि—चौरस्य प्रणिहन्ति । चौरस्य०निप्र० । चौरस्य निहन्ति, पा २, ३, ५६ । राक्षसानां प्रणिहनिष्यति, भ ८, १२१ । ब्रह्मद्विष स्ते प्रणिहन्मि, भ २, ३५ । परा—आघातः । प्रहारः । प्र—निहननम् । प्रहन्मि, प्रहन्मि, पा ८, ४, २३ । प्रहणात् । प्राघानिषत रक्षांसि येन, भ ९, १०२ । वि—विघातः । विघ्नन्ति रक्षांसि वने क्रतूंश्च, भ १, १९ । नार्हसि मे प्रणयं विहन्तुम्, र २, ५८ । सम्—सङ्घातः । योगः । संहत्य हस्तौ, मनु २, ७१ ।

हर्म्—(द्रम) भ्वा, प । गतिः ।

हय्—भ्वा, प । १गतिः । २क्षमः । ३ भक्तिः । ४शब्दः । हयति । जहाय ।

हर्य्, भ्वा, प। १ गतिः। २ कान्तिः। हर्यति। जहर्य। हर्यिता। अहर्यीत्।

हल्—भ्वा, प। विलेखनम्। कर्षणम्। हलति। जहाल। हलिता।

हस्—हसे, भ्वा, प। हसनम्। अपूर्वप्रतीत्या कपोलस्य विकसितीकरणम्। उपहासः। उपहासे सकर्मकः। हसति। हसन्ति साधव स्त्रीरत्नम्, दुर्गा। जहास। जहसतुः। हसिता। हसिष्यति। (ए) अहसीत्, पा ७, २, ५। जिहसिषति। जाहस्यते। जाहस्ति। हासयति। अजीहसत्। हसित्वा। ०हस्य। हसितः। हसनम्। हासः। हसितुम्। हास्यं वचस्तद् यदहं विवक्षुः, र २, ४३। हसन्त्यमन्तर्बल मर्वतां रवेः, नै १, ६१। अव, उप—उपहासः। परि—परिहासः। प्र, वि—अतिहासः। विहसति युवतिसभा तव सकला, गीतगो ८, ५।

हा—ओहाक्, ह्वा, प। त्यागः। जहाति। जहितः। जहीतः, पा ६, ४, ११६। जहति। जहाति दुर्जनैः सङ्गम्, कवि २५८। हि, जहिहि, जहीहि, जहाहि, पा ६, ४, ११७। जह्यात्, पा ६, ४, ११८। अजहात्। अजहिताम्, अजहीताम्। अजहुः। जहौ। जहतुः। जहिथ, जहाथ। जहिव। हाता। हास्यति। हेयात्। अहासीत्। अहासिष्टाम्। अहासिषुः। कर्मणि, हीयते। अहायि। जिहासति। जेहीयते, पा ६, ४, ६६। जाहेति। जाहाति। हापयति। अजीहपत्। हित्वा। ०हाय। हीनः। हानिः। हातुम्। हातव्यम्। हेयः। ओहाङ्, ह्वा, आ। गतिः। जिहीते। जिहाते। जिहते। जिहीते सज्जनाश्रयम्, कवि २५९। अजिहीत। अजिहाताम्। अजिहत। जहे। जहिषे। हाता। हास्यते। हासीष्ट। अहास्त। अहासाताम्। अहासत। कर्मणि, हायते। जिहासते। जाहायते। जाहेति। हात्वा। हानः। उप—आगमनम्। उपाजिहीथा न महीतलं यदि, मा १, ३७। उद्—उदयः। उज्जिहीते हिमांशुः, महाना ४, ३५।

हि—स्वा, प। १गतिः प्रेरणम्। २वृद्धिः। वर्द्धने विरलप्रयोगः, दुर्गा। हिनोति। हिनुतः। हिन्वन्ति। हिनुयात्। अहिनोत्। जिघाय, पा ७, २, ५६। जिघ्यतुः। हेता। हेष्यति। हीयात्। अहैषीत्। अहैष्टाम्। अहैषुः। कर्मणि, हीयते। अहायि। गदातंन जिघ्ये, भ १४, ३१। जिघोषति। जेघीयते। जेघेति। हाययति। अजीहयत्, पा ७, २, ५६। हित्वा। ०हित्य। हितः। हितिः। हयनम्। हेतुम्। हेतुः। प्र—प्रेरणम्। अनीकं प्रजिघाय योद्धुम्, भ १४, १। शङ्कां कृथा मा प्रहिणु स्वसूनुम्, भ १, २१। प्रहिणोमि, पा ८, ४, १५। वानराय प्राहैषीत् परिघम्, भ १५, १२१।

हिक्क—भ्वा, उ। अव्यक्तशब्दः। हिक्का। हिक्कयति। ०ते। हिक्क्, ट्, आ। हिंसा।

हिट्—भ्वा, प। आक्रोशः।

हिण्ड्—हिडि, भ्वा, आ। १गतिः। २अनादरः। हिण्डते। जिहिण्डे। हिण्डन्ते च तथा रात्रौ, कवि १११।

हिन्दोल हिल्लोल (आन्दोल)।

हिन्व्—हिवि (जिवि) भ्वा, प। प्रीणनम्। हिन्वति।
हिल्—तु, प। भावकरणम्। अभिप्रायसूचनम्। हिलति। हेलिता।
हिष्क्—(विष्क्)।
हिंस्—हिसि (तृह) रु, प। हिंसा। हिनस्ति। हिंस्तः। हिंसन्ति। हिनस्मीन्द्रस्य विक्रमम्,भ ६,३८। हिंस्यात्। अहिनः अहिनत् दिपि मस्तः सिपि वा। रत्नमाला१६५। अहिंस्ताम्। अहिंसन्। जिहिंस। जिहिंसतुः। मदर्थेऽरोन् जिहिंसिथ, भ १४, ५७। हिंसिता। हिंसिष्यति। अहिंसीत्। अहिंसिष्टाम्। अहिंसिषुः। जिहिंसिषति। जेहिंस्यते। जेहिंस्ति। हिंसि, चु, प। हिंसा। हिंसयति। हिंसति, वो। अजिहिंसत्। हिंसित्वा। ०हिंस्य। हिंसितः। हिंसनम्। हिंसा। न हिनस्ति तृथा जन्तून् तृणान्यपि न हिंसति। त मेव हिंसय त्येकं यस्तदाज्ञां विलङ्घयेत्॥ कवि ५९।
हु—ह्वा, प। १दानम्। प्रक्षेपः। वैधे आधारे देवतोद्देश्यकहविस्त्यागः। होमः। २अदनम्। ३आदानम्। ४प्रीणनम्। लट जुहोति पा २. ४, ७५। जुहुतः। जुह्वति। हि, जुहुधि। जटाधरः सन् जुहुधीह पावकम्, भा१.४४। लिङ् जुहुयात्। लङ् अजुहोत्। अजुहुताम्। अजुहुः। लिट् जुहवाञ्चकार, पा ३,१,३९। जुहाव। जुहवाञ्चक्रतुः, जुहुवतुः। पुरो रामस्य जुहवाञ्चकार ज्वलने वपुः, भ। लृट् होता। लृट् होष्यति। आशिषि, हूयात्। लुङ् अहौषीत्। अहौष्टात्। अहौषुः। यो मन्त्रपूतां तनु मप्यहौषीत्, र १३,४५। कर्मणि, हूयते। अहावि। सन् जुहूषति। यङ् जोहूयते। जोहवीति। जोहोति। णिच् हावयति। अजूहवत्। हुत्वा। ०हुत्य। हुतः। हुतिः। हवनम्। हावः। हवः। होतुम्। होता। हविः। होतव्यम्। हवनीयम्। हव्यम्। त्वमेव हव्यं होता च, कु २. १५। आ—आहुतिः।
हुड्—ह्रुड्, होड्, हुड्, ह्रुड्, होड्, भ्वा, प। आ, वो। गतिः। होडति। ०ते। हुड्, तु, प वो। १मज्जनम्। २संहतिः। हुडति जुहोड। हुडिता। अहुडीत्।
हुण्ड्—हुडि, भ्वा, आ। १सङ्घातः। राशीकरणम्। राशीभावः। २वरणम्। स्वीकारः। ३हरणम्। हुण्डते। जुहुण्डे। हुण्डिता। हुण्डा हुण्डनम्।
हुल्—(श्रल भ्वा, प। १गतिः। २आच्छादनम्, वो। होलति। जुहोल।
ह्रुड (हुड)।
ह्रुर्च्छ्—हुर्च्छा, भ्वा, प। कौटिल्यम्। अपसरणम्। ह्रुर्च्छति। जुह्रुर्च्छ। ह्रुर्च्छिता। (आ) ह्रुर्च्छितं ह्रुर्णम् तेन। ह्रुः। ह्रुरी।
हृ—हृञ्, भ्वा, उ। १हरणम्। प्रापणम्। २ स्वीकारः। ३ स्तेयम्। ४नाशनम्। हृ, भ्वा, प। संवरणम्। हरति। ०ते। जहार। जहर्थ। जह्रिव। जह्रे। हर्त्ता। हरिष्यति। ०ते। ह्रियात्। हृषीढ्वम्। अहार्षीत्। अहार्ष्टाम्। अहार्षुः। कर्मणि, ह्रियते। अहारि। अहारिषाताम्, अहृषाताम्। जिहीर्षति। ०ते। यङ् जेह्रीयते। जर्हरीति, जरि, जरी०। जहर्त्ति, जरि०, जरी०। हारयति। ०ते। अजीहरत्। ०त। हृत्वा। हृत्य। हृतः। हृतिः। हरणम्। हारः। हरः। हर्त्तम्।

हर्त्ता । हारी । हारकः । ०हृत् । ०हरः । हर्त्तव्यम् । हरणीयम् । हार्य्यम् । व्यति—व्यतिहारः । विपर्य्ययः । अनु—अनुहरणम् । अनुकरणम् । पैत्तक मश्वा अनुहरन्ते माल्कं गावः । अप—अपहरणम् । अभ्यव—अभ्यवहारः । भोजनम् । व्यव—व्यवहारः । आ—आहरणम् । आनयनम् । उदा—उदाहरणम् । प्रत्युदा—प्रत्युदाहरणम् । व्या—व्याहारः । उक्तिः । समा—समाहारः । संग्रहः । उद्—उद्धारः । उप—उपहारः । निर्—निर्हरणम् । परित्यागः । प्रेतवहनादि । तस्य—निर्हरणादीनि सम्परेतस्य कारयित्वा, भागवतम् । परि—परित्यागः । प्र—प्रहारः । आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुं मनागसि, शकु । निर्दयश्च प्रजहर्तुः, भ १४, १०० । वि—विहारः । सम्—संहारः । संक्रियता सस्त्रम्, उत्तर ६ । उपसञ्—उपसंहारः । समापनम् । उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । प्रहाराहारसंहारविहारपरिहारवत् ॥

हृष्—हृषु, भ्वा, प । १अलीकम् ।

मिथ्याकरणम् । २हर्षः । चित्तोत्साहः । वो । हृष्, दि, प । तोषः । आह्लादः । हर्षः । लोमहर्षः । हर्षति । हृष्यति । स्त्रियं दृष्ट्वापि शत्रूणां न प्रहर्षति यस्तथा । यथा प्रहृष्यति श्रुत्वा सत्कवीनां सुभाषितम् ॥ कवि २०६ । जहर्ष । जहृषतुः । जहर्षिथ । जहृषुः, भ १५, ७ । हर्षिता । हर्षिष्यति । भ्वा, अहर्षीत् । अहृषदित्यन्ये । दि, अहृषत्, अहर्षीत्, वो । अहृषतां तौ, भ १५, १०४ । अनिशं शब्द मश्रौषं ततो लोमानि मेऽहृषन्, भारत । जिहर्षिषति । जरोहृष्यते । जहर्षि । हर्षयति । अजहर्षत्, अजीहृषत् । (ष) हृषित्वा, हृष्ट्वा । ०हृष्य । हृष्टः । प्रहृष्टमना मृगान्तिकं चलितः, हितो । (लोमसु) हृष्टाः हृषिताः केशाः । हृष्टं हृषितं केशैः, अन्यत्र हृषितः, पा ७, २, २९ । हृष्टो विप्रः । विस्मितः प्रतिहतो वा । हृष्टो वृषभ इत्यत्र हृष्टिशब्दात् मत्वर्थीयोऽत् इति संक्षिप्तसारम् । णिच् हर्षितः । विसर्जयेद् यं सुतजन्महर्षितः, र ३, २० । हर्षणम् । हर्षः । हर्षितुम् । हर्षितव्यम् ।

हेट्—भ्वा, प । बाधनम् । पीड़नम् ।

हेठ्—भ्वा, प । हेठ् (एट्) भ्वा, आ ।

विबाधा । शाठ्यम् । हेठति । ०ते । जिहेठ । ०ठे । हेठिता । अहेठीत् । अहेठिष्ट । हेठयति । अजिहेठत् । हेठ, तु, प, वो । १भूतप्रादुर्भावः । २ पवित्रीकरणम् । हेठति । (हेठ् हेट्) ।

हेड्—भ्वा, प । वेष्टनम् ।

हेडति । जिहेड । हेडिता । णिच् हिड़यति । अजीहिडत्, घटादिः । कर्मणि, अहिडि, अहौडि, अहेडि । हेल इत्येके । हेलति ।

हेडृ—होडृ, भ्वा, आ । अनादरः ।

हेडते । होडते । अयं गत्यर्थोऽपि । हेडते शीलमस्यत्वा बान्धवानपि तान् कविः, कवि १११ ।

हेढ्—(हेठ्, खच) क्रया, प ।

भूतप्रादुर्भावः । हेढ्नाति । हेठ्नाति । हेट्नाति, को १६८ ।

हेष्—क्ष्वेष्, हेषृ, क्ष्वेषृ (रेषृ) भ्वा, आ ।

अश्वकर्त्तृशब्दः । क्ष्वेषा । हेषते । क्ष्वेषते । जिहेषे । हया जिहेषिरे, भ १४, ५ । मा १७, ३१ । हेषिता । अहेषिष्ट । हेषयति । अजिहेषत् । क्ष्वेषा । हेषा । होड—(हुड्, हेड्) होड(क्रुड्) ।

क्ष्—क्ष्ड्, अदा, आ। अपनयनम्। अपक्ष्वः। चौर्यम्, वो। देवदत्ताय क्ष्ते, पा १, ४, ३४। क्ष्वाते। क्ष्वते। क्ष्वीत। अक्ष्त। अक्ष्वाताम्। अक्ष्वत। जुक्ष्वे। क्ष्ोता। क्ष्ोष्यते। क्ष्ोषीष्ट। अक्ष्ोष्ट। अक्ष्ोषाताम्। अक्ष्ोषत। यमस्याक्ष्ोष्ट विक्रमम्, भ १५, ८८। जुक्ष्वते। जोक्ष्यते। जोक्ष्ोति। क्ष्वाययति। क्ष्वा। ०क्ष्त्य। क्ष्तः। क्ष्तिः। क्ष्वनम्। क्ष्वः। क्ष्तुम्। अप—अपक्ष्वः। अपलापः। गोपनम्। गुणानपक्ष्वेऽस्माकम्, भ ५, ४४। अपक्ष्वानस्य जनाय निजामधीरताम्, नै १, ४९। नि—अपक्ष्वः। अपनयनम्। अशप्त निक्ष्वानोऽमौ सीतायै, भ ८, ३४। विभवमदेन निक्ष्तक्ष्ोः, भ १०, ३६।

क्ष्ल् (क्ष्ल्)

क्ष्ग्—क्ष्ल्ग् क्ष्गे, क्ष्लगे (षगे)। भ्वा, प। संवरणम्। आच्छादनम्। क्ष्गति। क्ष्लगति। जक्ष्ाग। क्ष्गिता। (ए) अक्ष्गोत्, अक्ष्लगोत्। क्ष्गयति, क्ष्लगयति, घटादौ।

क्ष्प् (क्ष्ल्प्)।

क्ष्स्—(तुम्) भ्वा, प। १शब्दः। २ क्ष्ासः। अल्पीभावः। क्ष्सति। आयु क्ष्सति पादशः, मनु १, ८३। जक्ष्ास। जक्ष्सतुः। क्ष्सिता। अक्ष्सीत्, अक्ष्सासीत्। क्ष्ासयति। अजिक्ष्सत्। एकैकं क्ष्ासयेत् पिण्डं क्षणे शुक्ले च वर्द्धयेत्, मनु ११, २१६। क्ष्सितं स्मरभाषितम् भ १०, ६। क्ष्स्नम्।

क्ष्ाद्—भ्वा, आ। अव्यक्तशब्दः। वाद्यादिघोषः। क्ष्ादते दुन्दुभिः। जक्ष्ादे। जक्ष्ादे पटहै भृशम्, भ १४, ४। क्ष्ादिता। अक्ष्ादिष्ट। क्ष्ादः। क्ष्दः।

क्ष्ी—क्ष्ा, प। लज्जा।

जिक्ष्ेति। जिक्ष्ीतः। जिक्ष्ियति। जिक्ष्ेथतिष्ठन यदि तातवाक्ये, भ ३, ५३। जिक्ष्ेति नीचमङ्क्ष्यः, कवि५८। जिक्ष्ीयात्। अजिक्ष्ेत्। अजिक्ष्ीताम्। अजिक्ष्ियुः। जिक्ष्ियाञ्चकार, पा ३, १, ३८। जिक्ष्ाय। जिक्ष्ियतुः। जिक्ष्ियिथ, जिक्ष्ेथ। न विभाय जिक्ष्ाय, भ ५, १०२। क्ष्ेता। क्ष्ेष्यति। क्ष्ीयात्। अक्ष्ैषीत्। अक्ष्ैष्टाम। अक्ष्ैषुः। क्ष्पयति, पा ७, ३, ३६। अजिक्ष्िपत्। क्ष्ित्वा। ०क्ष्ाय। क्ष्ीतः, क्ष्ीणः। क्ष्ीतिः। क्ष्यणम्। क्ष्ीः। क्ष्ेतुम्। क्ष्ीणा च क्ष्ष्टा च बभाण भैमी, नै ३, ६७।

क्ष्ीक्—भ्वा, प। लज्जा। क्ष्ीक्ष्ति।

क्ष्ूड्—क्ष्ड्, क्ष्ोड्, क्ष्ोड्, क्ष्ड्, भ्वा, आ। गतिः। क्ष्ोडते। क्ष्ूडते।

क्ष्ेप्—क्ष्ेपृ, भ्वा, आ। गतिः।

क्ष्ेषृ (क्ष्ेष्)।

क्ष्ोड् (क्ष्ुड्) क्ष्ल्ग् (क्ष्ग्)

क्ष्ल्प्—'क्ष्प्'—चु, प। कथनम्।

क्ष्ल्स्—(तुम) भ्वा, प। शब्दः।

क्ष्ाद्—क्ष्ादो, भ्वा, आ। १ सुखम्। अक्ष्ादः। २ अव्यक्तशब्दः। क्ष्ादते। जक्ष्ादे। क्ष्ादिता। अक्ष्ादिष्ट। णिच् क्ष्ादयति। अजिक्ष्ादत्। वने तं न त्वजिक्ष्ादत्, भ ६, २२। क्ष्ादित्वा। ०क्ष्ाद्य। (ई) क्ष्यः, पा ६, ४, ८५। क्ष्ादनम्। क्ष्ादः। अक्ष्ादः।

ह्वल्—ह्वल्, भ्वा, प । चलनम् । ह्वलति । ह्वलति । प्राह्वलत् क्षितिमण्डलम्, भ १७, १०० । जह्वाल । जह्वलतुः । ह्वलिता । अह्वालीत् । ह्वलयति, ह्वालयति, प्रह्वलयति । ह्वलयति, ह्वालयति, पह्वलयति । विह्वलोह्वलयन् भुवम्, भ ६, ४५ ।

ह्वृ—भ्वा, प । कौटिल्यम् । वक्रीकरणम् । ह्वरति । जह्वार । जह्वरतुः । जह्वर्थ । ह्वर्त्ता । ह्वरिष्यति । ह्वर्यात्, पा ७, ४, २८ । अह्वार्षीत् । अह्वार्ष्टाम् । जुह्वूर्षति । जाह्वर्य्यते । जाह्वर्त्ति । ह्वारयति, अजिह्वरत् ।

'ह्व'—क्रया, प । ह्वर्च्छनम् । कौटिल्यम् । ह्वृणातीति कश्चित् ।

ह्वे—ह्वेञ् भ्वा, उ । १ स्पर्द्धा । पराभिभवेच्छा । आह्वानम् । २शब्द । लट् ह्वयति । ०ते । लिट् जुहाव । जुहोथ, जुहविथ । जुहुवे, पा ६, ८, ३३ । तां पार्वतीति नाम्ना जुहाव, कु १, २६ । लुट् ह्वाता । लृट् ह्वास्यति । ०ते । आशिषि, ह्वयात् । ह्वासीष्ट । लुङ् अह्वत्, पा ३, १, ५२ । अह्वत, अह्वास्त, पा ३, १, ५४ । कर्मणि, ह्वयते । अह्वायिषाताम्, अह्वासाताम् । सन् जुह्वषति । ०ते । यङ् जोह्वयते । जोहवीति, जोहोति, पा ६, १, २२ । णिच् ह्वाययति, पा ७, ३, ३७ । अजूहवत्, पा ६, १, ३२ । काण्वादीनां वेति झस्वविकल्पः अजह्वावत् को १८२ । जुह्वावयिषति । ह्वत्वा । ०ह्वय । ह्वतिः । ह्वानम् । ह्वातुम् । ह्वाता । ह्वायकः । ह्वातव्यः । आह्वः । आहावः । आ—स्पर्द्धा । पा १, ३, ३१ । (आह्वानम्) पुत्रमाह्वयत । रैवतक सेनापति स्तावदाह्वयताम्, शकु २, २१ । शत्रूनाह्वास्त चाह्वे, भ १५ २८ । उच्चैरसौ राघवमाह्वत, भ २, ५१ । सर्पास्त्र माजुहाव, भ १४, ४४ । उप, नि, वि, सम्—कथनम् । आह्वानम् । उपह्वयते, पाह्व, ३, ३० । यत्नादुपाह्वये प्रीतं संह्वयस्व विवक्षितम्, भ ८, १७ । प्र—विनयः । तदौद्वत्यं क्वापि व्रजति विनयः प्रह्वयति माम्, उत्तर १४६ ।

सम्पूर्णम् ।

ग्रन्थारम्भे यमीशं बहुविधविपदाशङ्कया संश्रितोऽहं
सोऽयं सर्वान्तरस्थः सुकृतिपरवशः श्रद्धयाराधितो मे ।
अस्य ग्रन्थस्य पारं तटमिव जलधेर्मा मनैषीद् दयावान्
ग्रन्थान्ते तं सहस्रं परिचितकरुणं लब्धकामो नमामि ॥

शाण्डिल्यगोत्रसम्भूतरामरत्नस्य धीमतः ।
तनीयेन तनूजेन हरिनाभिनिवासिना ॥
रामतारणविप्रेण बालकानां हितैषिणा ।
नागाङ्काभ्रमिते शाके संस्कृतो गणदर्पणः ॥

पाणिनीयो धातुपाठः ।

अथ भूवादयः परस्मैपदिनः ।

(भू सत्तायाम् ।) (१)
अक अग कुटिलायां गतौ ।
अक्ष् व्याप्तौ ।
अगि इगि तगि त्वगि मगि रगि रिगि लगि लिगि वगि वल्ला श्वगि श्लगि गत्यर्थाः ।
अज गतिक्षेपणयोः ।
अट पट गतौ ।
अड उद्यमे ।
अड्ड अदृड अभियोगे ।
अण कण क्वण धण ध्वण भण भ्रण मण रण वण व्रण शब्दार्थाः ।
अत सातत्यगमने ।
अति अदि बन्धने । (२)
अन्चु गतिपूजनयोः ।
अभ्र भभ्र वभ्र गत्यर्थाः ।
अम गतिशब्दसंभक्तिषु ।
अर्घ मूल्ये ।
अर्घ अर्घ हिंसायाम् ।
अर्च पूजायाम् ।
अर्ज षर्ज अर्जने ।
अर्द गतियाचनपीड़ासु ।
अर्व गतौ ।
अर्व शर्व षर्व हिंसायाम् ।
अर्ह पूजायाम् ।
अल भूषणपर्याप्तिवारणेषु ।
अव रक्षण-गति-कान्ति-प्रीति-तृप्त्यवगमप्रवेश-श्रवणस्वाम्यर्थ-याचन क्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभाग-वृद्धिषु ।
आङ्क्षि आयामे ।
इ गतौ । केचिदिमं दीर्घं पठन्ति ।
इख इखि ईखि उख उखि णख णखि मख मखि रख रखि लख लखि वख वखि त्रख त्रखि गत्यर्थाः । रिख मिखि इति केचित् ।
इट किट कटी गतौ । (३)
इदि परमैश्वर्ये ।
इवि व्याप्तौ ।
ईर्ष्य ईर्ष्य सूर्ष्य ईर्ष्यार्थाः
ईष उञ्छे ।
उत्त सेचने ।
उछी उञ्छे । (४)
उछि विवासे । (५)
उठ रुठ लुठ उपघाते । ऊठ इत्येके ।
उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः । जुर्वी इत्येके ।
उष दाहे ।
उहिर् तुहिर् दुहिर् अर्दने ।
ऊष रुजायाम् ।
ऋ गतिप्रापणयोः ।
एजृ कम्पने ।
ओखृ द्राखृ धाखृ धाखृ राखृ लाखृ शोषणालमर्थयोः ।
ओणृ अपनयने ।

(१) भू सत्तायामित्यस्य भूवादियोगसिद्ध्यर्थमादौ पाठः । एवमन्यत्रापि बोध्यम् ।

(२) अतीति तान्तं द्रविड़ाः पठन्ति । आर्य्यादयस्तु दान्तमिति धनपालः । उभयमपि मैत्रेयस्वामिकाश्यपादयः । अति अदि इदि विदि गड़ि पञ्चैते न तिङ्विषया इति काश्यपादयः । अन्ये तु तिङमपीच्छन्ति ।

(३) ईकारः ख्योदितो निष्ठायामिण्निषेधार्थः । केचित्तु इदितं मत्वा नुमि कृते कण्टतीत्यादि वदन्ति, कौ ५३ ।

(४) उञ्छः कणश आदानम् । कणिशाद्यर्जनं शिलमिति यादवः ।

(५) विवासः समाप्तिः । प्रायेणायं विपूर्वः ।

कखे हसने ।
कगे नोच्यते । (६)
कटे वर्षावरणयोः । चटे इत्येके ।
कठ कृच्छ्रजीवने ।
कड मदे । कडि इत्येके ।
कड्ड कदृड कार्कश्ये ।
कण रण गतौ ।
कदि क्रदि क्लदि आह्वाने, रोदने च ।
कनि दीप्तिकान्तिगतिषु ।
कम्ब खम्ब गम्ब घम्ब चम्ब तम्ब नम्ब पम्ब वम्ब मम्ब शम्ब षम्ब सम्ब हिंसायाम् ।
कर्ज व्ययने ।
कर्ट कुत्सिते शब्दे । कुत्सित-कुत्सितशब्दे ।
कर्व खर्व गर्व घर्व चर्व पर्व बर्ब मर्व लर्व शर्व षर्व गतौ ।
कर्व खर्व गर्व दर्पे ।
कश शब्दे ।
कष खष जष झष मष रिष रुष वष शष शिष हिंसार्थाः ।
कस गतौ ।
काङ्क्षि माङ्क्षि वाञ्छि काङ्क्षायाम् ।
किट खिट त्रासे ।
कित निवासे, रोगापनयने च ।
कील बन्धने ।
कुच शब्दे तारे ।
कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु । अयं ज्वलादिः ।
कुन्च क्रुन्च कौटिल्याल्पीभावयोः ।
कुज खुज स्तेयकरणे ।
कुटि वैकल्ये । कुडि च ।
कुठि प्रतिघाते ।
कुथि पुथि मथि लुथि हिंसासंक्लेशनयोः ।
कुवि आच्छादने ।
कुल संख्याने, बन्धुषु च । (७)
कूज अव्यक्ते शब्दे ।
कूल आवरणे ।
कृवि हिंसाकरणगतिषु ।
कृष विलेखने ।
केल क्ष्वेल्ल खेल्ल चेल्ल वेल्ल वेल्ल चलने ।
कै गै शब्दे ।
कर्क्ष हर्क्षने । (८)
कथ क्लथ क्वथ श्रथ हिंसार्थाः । क्लथ इत्येके ।
क्रमु पादविक्षेपे ।
क्रीड़ विहारे ।
क्रुश आह्वाने, रोदने च
क्लिदि परिदेवने ।
क्लथे निष्पाके ।
क्वर सञ्चलने ।
क्षि क्षये । (९)
क्षीज अव्यक्तशब्दे ।
क्षीवु क्षेवु निरसने । क्षिः इत्येके ।
क्षै जै षै क्षये ।
खज मन्थे ।
खजि गतिवैकल्ये ।
खट काङ्क्षायाम् ।
खद स्थैर्यहिंसाभक्षणेषु ।
खर्ज पूजने च ।
खर्द दन्दशूके । (१०)
खल सञ्चये ।
खाद भक्षणे ।
खे खदने । (११)
खोर्क् खोल्क् गतिप्रतिघाते ।
गज मदने च । चाद शब्दे ।
गड़ सेचने ।
गड़ि वदनैकदेशे ।
गद व्यक्तायां वाचि ।
गर्ज शब्दे ।
गर्द नर्द शब्दे ।
गम्ल्क् गतौ ।

(६) नोच्यते इति अस्य अयमर्थ इति विशिष्य नोच्यते क्रियासामान्यार्थत्वात् क्रियामात्रेऽनेकार्थत्वादिति केचित् ।

(७) संख्यानं सङ्घातः । बन्धुशब्देन तद्व्यापारः सम्बन्धोऽभिधीयते ।

(८) हर्क्षनं कौटिल्यम् । (९) अकर्मकः । अन्तर्भावितण्यर्थस्तु सकर्मकः ।

(१०) दंश हिंसादिरूपायां दन्दशूकक्रियायामित्यर्थः । दंशने एवन्तु नोक्ताक्षीत्यार्थस्य ग्रहो न स्यादिति प्रदीपः । (११) खदनं स्थैर्यम्, हिंसनञ्च ।

गल अदने ।
गुज गजि गृज गृजि मुज मुजि शब्दार्थाः ।
गुजि अव्यक्ते शब्दे ।
गुपू रक्षणे ।
गुर्वी उद्यमने ।
गृ घृ सेचने ।
ग्लुचु ग्लुचु स्तेयकरणे । ग्लुच् गतावपि ।
ग्लुन्च् गतौ ।
ग्लै ग्लै हर्षक्षये । (१२)
घघ हसने ।
घस्लृ अदने ।
घुषिर् विशब्दने । (१३)
घृषु सङ्घर्षे ।
घोर्ट् गतिचातुर्ये । घोर्ट् इत्येके ।
घ्रा गन्धोपादाने ।
चक तृप्तौ । घटादिः ।
चण शण श्रण दाने । श्रण गतावित्यन्ये ।
चदि आह्लादे ।
चन हिंसायाम् ।
चन्चु तन्चु त्वन्चु त्रुचु त्रुन्चु ल्लुचु ल्लुन्चु वन्चु गत्यर्थाः ।
चप सान्त्वने ।
चमु छमु जमु झमु अदने । जिमु इत्येके ।
चर गतिभक्षणयोः ।
चर्च झर्च परिभाषणतर्जनयोः ।
चर्व अदने ।
चल कम्पने ।
चह परिकल्कने । (१४)
चिट परप्रेष्ये ।
चिती संज्ञाने ।
चिल्ल शैथिल्ये,भावकरणे ।(१५
चुटी अल्पीभावे ।
चुड्ड चुड्ड भावकरणे ।
चुड़ी अल्पीभावे ।
चुप मन्दायां गतौ ।
चुबि वक्त्रसंयोगे ।
चुल्ल भावकरणे । (१६)
चूष पाने ।
च्युतिर आसेचने । (१७) च्युतिर् इत्येके ।
जज जजि युद्धे ।
जट झट संघाते ।
जप जल्प व्यक्तायां वाचि । जप मानसे च । (१८)
जर्ज जर्त्स झर्भ परिभाषणतर्जनयोः ।
जल घातने । (१९)
जि जये । (२०)
जि जि अभिभवे । (२१)
जिवि दिवि धिवि ष्टिवि प्रीणनार्थाः ।
जिषु मिषु विषु सेचने ।
जीव प्राणधारणे ।
जु वेगेन गतौ ।
जुगि युगि वगि वर्जने ।
ज्वर रोगे ।
ज्वल दीप्तौ ।
टल टुल वैकल्ये । वैक्लव्ये इति पाठान्तरम् ।
ढुनढ अन्वेषणे ।
णट नृतौ । (२२)
णट नृतौ । घटादिः ।
णद अव्यक्ते शब्दे ।
णम प्रह्वत्वे शब्दे च ।
णल गन्धे । वस्त्रने इत्येके ।
णिश्च चुम्बने ।
णिदि कुत्सायाम् । (२३)
णिश समाधौ ।

(१२) हर्षक्षयो धातुक्षयः । (१३) विशब्दनं प्रतिज्ञानम् । ततोऽन्यस्मिन्नर्थे इत्येके । शब्दे इत्यन्ये पेठुः । (१४) परिकल्कनं दम्भः, शाठ्यञ्च ।

(१५) भावकरणमभिप्रायसूचनम् ।

(१६) भावकरणमिति बोपदेवः ।

(१७) सेचनमार्द्रीकरणम् । आङीषदर्थेऽभिव्याप्तौ च ।

(१८) मानसं हृदयोच्चारणम् । (१९) घातनं हिंसाम् ।

(२०) जय उत्कर्षप्राप्तिः । अकर्मकोऽयम् ।

(२१) अभिभवो न्यूनीकरणं न्यूनीभवनञ्च । आद्ये सकर्मकः, द्वितीयेऽकर्मकः । अध्ययनात् पराजयते, शत्रुं पराजयते । (२२) नृतिर्नाट्यम् वाक्यार्थाभिनयो नाट्यम् । घटादौ तु नृतिर्नृत्तम् नृत्यञ्च । पदार्थाभिनयो नृत्तम्, गात्रावक्षेपमात्रं नृत्यम् ।

(२३) णोपदेशो वैचित्र्यार्थः । वा निंशनिञ्चनिन्दामिति विकल्प इति प्रदीपः ।

तक हसने ।
तकि कृच्छ्रजीवने ।
तक्ष त्वचने । (२३)
तक्षू त्वक्षू तनूकरणे ।
तट उच्छ्राये ।
तप सन्तापे ।
तर्ज भर्त्सने ।
तर्द हिंसायाम् ।
त्सर छद्मगतौ ।
तिल गतौ । तिल्ल इत्येके ।
तुज हिंसायाम् ।
तुजि पालने बलने च ।
तुड् तोड़ने । तुड्ड इत्येके ।
तुप तुन्प तुप तुन्प हिंसार्थाः ।
तुफ तुन्फ तुफ तुन्फ हिंसार्थाः ।
तुवि लुवि अर्दने ।
तुस रस क्वस क्लस शब्दे ।
तूल निष्कर्षे । (२४)
तूष तुष्टौ ।
तृक्ष तृक्ष णक्ष गतौ ।
तॄ प्लवनतरणयोः ।
तेज पालने ।
त्यज हानौ ।
त्रदि चेष्टायाम् ।
त्वगि कम्पने ।
दधि पालनवर्जनयोः ।
दन्श दशने । (२५)
दल विशरणे ।
दह भस्मीकरणे ।
दाण दाने ।
दान खण्डने ।
दु द्रु गतौ ।
दृशिर् प्रेक्षणे ।
दृह दृहि दृंहि वृद्धौ । दृहि शब्दे च । दृहिर् इत्येके ।
देप् शोधने ।
दै न्यक्करणे ।
द्रम क्रम क्रीम् गतौ । क्रीम् शब्दे च ।
द्राक्षि ध्राक्षि ध्वाक्षि धोरवाग्निते च । चात् काङ्क्षायाम् ।
द्रै स्वप्ने ।
दॄ स्थगनादरयोः ।
धवि रवि रिवि गत्यर्थाः ।
धूप सन्तापे ।
धृज धृजि ध्रज ध्रजि ध्वज ध्वजि गतौ ।
धेट् पाने ।
धा शब्दाग्निसंयोगयोः ।
ध्यै चिन्तायाम् ।
ध्वन शब्दे ।
ध्रु स्थैर्ये । अयं कुटादौ गत्यर्थोऽपि ।
ध्रै क्षयौ ।
ध्वन खन शब्दे ।
ध्वृ ह्वर्च्छने । (२६)
(टु) नदि समृद्धौ ।
नील वर्णे । णील इति कातन्त्राः ।
पक्ष परिग्रहे ।
पठ व्यक्तायां वाचि ।
पत्लृ गतौ ।
पथे गतौ ।
पर्प गतौ ।
पल गतौ ।
पर्व पुर्व मर्व पूरणे ।
पा पाने ।
पिट शब्दसंघातयोः ।
पिठ हिंसासंक्लेशनयोः ।
पिवि मिवि णिवि सेचने सेवने इति तरङ्गिण्याम्
पिस्ल पेस्ल गतौ ।
पील प्रतिष्टम्भे । (२७)
पीव मीव तीव नीव स्थौल्ये
पुल महत्त्वे ।
पुष पुष्टौ ।
पूल सङ्घाते ।
पूष वृद्धौ ।
पृषु वृषु सेचनहिंसाक्लेशने
पेल्ल फेल्ल शेल्ल गतौ पेल्ल प्वेल्ल इत्येके ।
पै वै शोषणे ।

(२३) त्वचनं संवरणं त्वचो ग्रहणञ्च । परिग्रह इत्येके ।
(२४) निष्कर्षः निष्कोषणम् । तच्चान्तर्गतस्य बहिर्निःसारणम् ।
(२५) उपदेशे नान्तोऽयम् । रषाभ्यामिति णत्वम् । नोपदेशफलन्तु यङ्लुकि दन्दश्नन्ति । दशने इति सामर्थ्यान्नलुक् । दशनं दंष्ट्राव्यापारः पृषोदरादिः । अतएव निपातनादित्येके । तस्याप्यत्रैव तात्पर्यम् अर्थनिर्देशस्य आधुनिकत्वात्, कौ १०४ दशि दर्शनदंशनयोरित्यत्र कौ १७६ ।
(२६) ह्वर्च्छनं कौटिल्यम् । (२७) प्रतिष्टम्भो रोधः ।

पैणृ लैणृ गतिप्रेरणश्लेषणेषु ।
पौट्टृ बन्धे ।
प्रुषु प्लुषु स्निषु स्लिषु दाहे ।
फक्क नीचैर्गतौ । (२८)
फण गतौ निःस्नेहे च ।
फल निष्पत्तौ ।
(ञि) फला विशरणे ।
फुल्ल विकसने ।
बद स्थैर्य्ये ।
बल प्राणने, धान्यावरोधने च ।
बिट शब्दे ।
बिट आक्रोशे ।
बिदि अवयवे । भिदि इति पाठान्तरम् ।
बुक्क भषणे । (२९)
बुध अवगमने ।
भट भृतौ ।
भर्व हिंसायाम् । भर्भ इत्येके ।
भष भर्त्सने । (३०)
भूष अलङ्कारे ।
भ्रमु चलने ।
मघि मण्डने ।
मडि भूषायाम् ।
मथे विलोडने । (३१)
मन्थ विलोडने ।
मर्व मदनिवासयोः ।
मव बन्धने ।
मन्थ बन्धने ।
मश मिश शब्दे, रोषकृतौ च ।
मह पूजायाम् ।
मिह सेचने ।
मील श्मील स्मील ष्मील निमेषणे । (३२)
मुक्ष प्रमादे ।
मुट मर्दने ।
मुडि पुडि खण्डने ।
मुण्ड मर्दने ।
मुर्वी बन्धने ।
मुर्च्छा मोहसमुच्छ्रययोः ।
मूल प्रतिष्ठायाम् ।
मूष स्तेये । मुष इत्येके ।
मूष हिंसायाम् । जूष भूष इत्येके ।
मृषु सेचनसहनयोः ।
म्ना अभ्यासे ।
म्रच्च संघाते । मृच्च इत्येके ।
मेड्ट उन्मादे ।
म्लेक्ष अव्यक्ते शब्दे ।
म्लेट्टृ उन्मादे ।
यभ मैथुने । जभ च ।
यम उपरमे ।
यौट्टृ सम्बन्धे ।
रक्ष पालने ।
रच्च रोषे । संघाते इत्येके ।
रगे शङ्कायाम् ।
रट रठ परिभाषणे ।
रद विलेखने । (३३)
रप लप व्यक्तायां वाचि ।
रफ रफि गतौ ।
रह त्यागे ।
रहि गतौ ।
रुटि लुटि स्तेये ।
रुठ परिभाषणे ।
रुठि लुठि स्तेये गतौ च ।
रुडि लुडि स्तेये इति कश्चित् ।
रुह बीजजन्मनि, प्रादुर्भावे च ।
रूष लूष भूषायाम् ।
रै शब्दे ।
रोड्ट लोड्ट उन्मादे ।
रोड्ट अनादरे ।
लगे सङ्गे ।
लघि शोषणे गतौ च ।
लक्ष लाक्षि लक्षणे ।
लज लजि भर्जने ।
लट बाल्ये ।
लड विलासे ।
लस श्लेषणक्रीडनयोः ।
लाज लाजि भर्त्सने च ।
लुट विलोडने ।
लुठि आलस्ये प्रतिघाते च ।
लुड लुल विलोडने ।
लुन्च अपनयने । लुन्चु इत्येके ।
वच्च रोषे । संघाते इत्येके ।
वज व्रज गतौ ।
वट वेष्टने ।

(२८) नीचैर्गतिर्मन्दगमनमसदृव्यवहारश्च ।
(२९) भषणं शब्दः । (३०) भर्त्सनमिह शब्दः ।
(३१) विलोड़नं प्रतिघातः ।
(३२) निमेषणं सङ्कोचः पक्ष्मभिश्चक्षुरावरणम् । (३३) विलेखनं भेदः ।

वट भट परिभाषणे। (३४)
वटि विभाजने।
वठ स्थौल्ये।
वद व्यक्तायां वाचि।
वन षण सम्भक्तौ।
वनु च नोच्यते।
वनु व्यापारहिंसयोरित्येके।
(ट्) वम उद्गिरणे।
वस निवासे।
वाछि इच्छायाम्।
विट शब्दे।
विट आक्रोशे।
शट कृजाविषरणगत्यवसादनेषु।
शठ कैतवहिंसासंक्लेशनेषु।
शदृल्ल गतिस्खलनिशातनेषु।
शदृल्ल शातने, अयं विशीर्णतायामपि, क्वौ ६०।
शल चुल गतौ।
शव गतौ। दन्त्योष्मान्तः।
शश प्लुतगतौ।
शसु हिंसायाम्।
शन्सु स्तुतौ। (३५)
शाखृ शाखृ व्याप्तौ।
शिघि आघ्राणे।
शिट शिट अनादरे।
शील समाधौ।
शुक गतौ।
शुच शोके।
शुच्च चुच्च अभिषवे। (३६)
शुठ शुठि प्रतिघाते।
शुठि शोषणे।
शुड़ि खण्डनविमर्दनयोः।
शुन्ध शुद्धौ।
शुभ शुन्भ भाषणे। भासने चेत्येके। हिंसायामित्यन्ये।
शूल रुजायाम्, संघोषे च। संघाते चेत्येके।
शूष प्रसवे। षूष इत्येके। सूष इति च।
शै पाके।
शोण वर्णगत्योः।
शौटृ गर्वे।
श्रुतिर स्वरणे। यकाररहितोऽप्ययम्। (३७)
श्रु श्रवणे गतौ च।
श्रोण संघाते। श्लोण च।
श्वल श्वल्ल आशुगमने।
(ट्भो) श्वि गतिवृद्ध्योः।
षगे षगी क्षगे क्षगी संवरणे।
षञ्ज सङ्गे।
षट अवयवे।
षदृल्ल विशरणगत्यवसादनेषु।
षप समवाये। (३८)
षम ष्टम अवैकल्ये।
षल गतौ।
षस्ज गतौ।
षिधु गत्याम्।
षिधू शास्त्रे माङ्गल्ये च। (३९)
षिभु षिन्भु हिंसायाम्।
षु प्रसवैश्वर्ययोः। (४०)
षृभु षृन्भु हिंसायाम्।
ष्टक प्रतिघाते।
ष्टन वन शब्दे।
ष्टै वेष्टने शोभायाञ्च।
ष्ट्रै शब्दसंघातयोः।
ष्ठा गतिनिवृत्तौ।
ष्ठिवु निरसने।
ष्णै वेष्टने।
(जि) ष्विदा अव्यक्ते शब्दे। जिष्विडा जिष्विदा इत्येके।
सुभ सुन्भ भासने, हिंसायाञ्च। भाषणे इत्येके।
सूर्च्छ आदरे। (४१)
सृ गतौ।
सृप्ल गतौ।
स्कन्दिर् गतिशोषणयोः।
स्खल सञ्चलने।
स्त्यै ष्ट्यै शब्दसंघातयोः।

(३४) वट वेष्टने भट भृतावितिपठितयोः परिभाषणे मिथ्यार्थोऽनुवादः।
(३५) अयं दुर्गतावपीति दुर्गः। शंसो घातुक इत्यमरः।
(३६) अभिषवः अवयवानां शिथिलीकरणम्, सुरायाः सन्धानं वा, स्नानञ्च।
(३७) दन्त्यादिरयमुपदेशे इच्छत इति प्रदीपः।
(३८) समवायः सम्बन्धः, सम्यगवबोधो वा। (३९) शास्त्रं शासनम्।
(४०) प्रसवोऽभ्यनुज्ञानम्।
(४१) अनादरे इति क्वचित्कोऽपपाठः। • अवज्ञा अवहेलनमसूर्च्छणमित्यमरः।

स्थल स्थाने ।
ष्ठै ष्ठै वेष्टने शोभायाञ्च ।
स्फुर्च्छा विस्तृतौ ।
(टु ओ) स्फुर्जा वज्रनिर्घोषे ।
स्फुटिर् विशरणे। स्फुटि इत्यपि ।
स्मृ चिन्तायाम् ।
स्यमु शब्दे ।
स्रमु गतौ ।
स्वृ शब्दोपतापयोः ।
हट दीप्तौ ।
हठ प्रतिशठत्वयोः । बलात्कारे चेत्येके ।
हय गतौ क्षमे भक्तिशब्दयोश्चेत्येके ।
हर्य गतिकान्त्योः ।
हल विलेखने ।
हसे हसने ।
हिट आक्रोशे ।
हुड् हुडृ हेड गतौ ।
हुर्च्छा कौटिल्ये ।
हृ संवरणे ।
हृषु अलीके ।
हेट बाधे ।
हेठ विबाधायाम् ।
हेड वेष्टने ।
ह्रीछ लज्जायाम् ।
ह्रृ कौटिल्ये ।
ह्वल ह्वल चलने ।

इति शव्विकरणा भूवादयः परस्मैपदिनः समाप्ताः ।

अथ भूवादय आत्मनेपदिनः ।

अकि लक्षणे ।
अघि मघि वघि गत्याक्षेपे । गत्यारम्भे चेत्येके । मघि कैतवे च ।
अट्ट अट्ट अतिक्रमहिंसयोः ।
अटि गतौ ।
अवि रवि लवि शब्दे ।
अभि शब्दे ।
अय चय तय णय पय मय वय गतौ ।
अहि गतौ ।
ईक्ष दर्शने ।
ईज गतिकुत्सनयोः । ईजि इत्येके ।
ईष गतिहिंसादर्शनेषु ।
ईह चेष्टायाम् ।
उड कुड खुड गुड घुड डुड शब्दे । झुड व्रुड इत्येके ।
उर्द माने क्रीड़ायाञ्च ।
ऊयी तन्तुसन्ताने ।
ऊह वितर्के ।
ऋज गतिस्थानार्जनोर्जनेषु ।
ऋर्ज भृजी भर्जने ।

एजृ भ्राजृ भ्रेजृ दीप्तौ । रेजृ इत्येके । (१)
एठ हेठ विबाधायाम् । (२)
एध वृद्धौ ।
एषृ जेषृ णेषृ प्रेषृ गतौ ।
कक लौल्ये । (३)
ककि टिक टीक टौक तिक तीक तौक वकि त्रौक वकि मस्क वस्क व्यक ख्वकि गत्यर्थाः ।
कच बन्धने ।
कचि काचि दीप्तिबन्धनयोः ।
कठि मठि शोके । (४)
कडि मदे ।
कथि श्लाघायाम् ।
कत्थ श्लाघायाम् ।
कदि क्रदि क्लदि वैक्लव्ये । वैकल्ये इत्येके । कद क्रद क्लद इत्यन्ये ।
कपि चलने ।
कप्र वर्णे ।
कमु कान्तौ ।
कल शब्दसंख्यानयोः ।
कल्क भक्ष्ये शब्दे । (५)
कास्र दीप्तौ । दन्त्यान्तोऽपि । कास्र शब्दकुत्सायाम् ।
कुक्क ष्टक्क आदाने ।
कुडि दाहे ।

(१) इह भ्राजृ इत्यस्य पाठो व्रस्चादिषत्वाभावार्थः । तत्र राजिमाहचर्य्यात् फणादेरेव ग्रहणम्, कौ ८७ । (२) विबाधा श्लाघाम् ।
(३) लौल्यं गर्वस्यापत्यञ्च । (४) शोक इहाध्यानम् ।
(५) अशब्दे इति स्वामी । अशब्दस्तूष्णीम्भावः ।

क्षुर्द खुर्द गुर्द गुद क्रीड़ायामेव। (६)
क्षू सामर्थ्ये।
केपृ गेपृ ग्लेपृ कम्पने, गतौ च।
केव्र क्लेव्र खेव्र गेव्र ग्लेव्र पेव्र मेव्र म्लेव्र शेव्र षेव्र सेचने।
क्ष्वीं शब्दे, उन्दे च।
क्षप क्षपायां गतौ।
क्लिदि परिदेवने (७)
क्लीव्र अधार्ष्ट्ये।
क्लेश अव्यक्तायां वाचि। बाधनेऽपि।
क्वजि गतिदानयोः।
क्ष्मूष सहने।
क्ष्वीव्र मदे।
क्षुभ सञ्चलने।
क्ष्मायीं विधूनने।
खड़ि खञ्जे।
गर्ह गल्ह कुत्सायाम्।
गाङ् गतौ।
गाध्र प्रतिष्ठालिप्सयोः ग्रन्थे च।
गाह्र विलोड़ने।
गुप गोपने। (८)
गर्ह्र गर्हणे ग्लहे च।
गेव्र ग्लेव्र पेव्र मेव्र म्लेव्र शेव्र षेव्र सेवने, को ६६।
गेषृ अन्विच्छायाम्। (९) ग्लेषृ इत्येके।
गोष्ट लोष्ट संघाते।
ग्रथि कौटिल्ये।
ग्रस ग्लसु अदने।
ग्लेपृ दैन्ये।
घट चेष्टायाम्।
घट्ट चलने।
घणि घुणि घृणि ग्रहणे।
घुट परिवर्त्तने।
घुण घूर्ण भ्रमणे।
घुषि काम्तिकरणे। घषि इत्येके।
चक तृप्तिप्रतिघातयोः।
चडि कोपे।
चेष्ट चेष्टायाम्।
च्युङ् च्यड् प्रुङ् प्लुङ् गतौ।
जभी जृभि गात्रविनामे।
जुट युट भासने।
जेह्र वाह्र वेह्र प्रयत्ने। (१०) जेहृतिर्गत्यर्थोऽपि।
ज्योङ् नियमव्रतादेशोपनीतिषु।
डोङ् विहायसा गतौ।
णम कौटिल्ये।
णास रास शब्दे। राशू इति दुर्गः।
तडि ताड़ने।
तायृ सन्तानपालनयोः।
तिज निशाने, क्षमायाञ्च।
तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणार्थाः। तेपृ कम्पने च।
तुड़ि तोड़ने। (११)
तुभ णभ हिंसायाम्। आद्योऽभावेऽपि।
रेव्र देव्र देवने।
त्रपूष लज्जायाम्।
त्रैङ् पालने।
(त्रि) त्वरा संभ्रमे। (१२)
दक्ष हठौ, शीघ्रार्थे च।
दक्ष गतिहिंसनयोः। (१३)
दद दाने।
दध धारणे।
दय दानगतिरक्षणहिंसादानेषु।
दीक्ष मौण्ड्यज्योपनयननियमव्रतादेशेषु।
देङ् रक्षणे।
द्यूत दीप्तौ।
द्राष्ट राष्ट लाष्ट सामर्थ्ये। ध्राष्ट इत्यपि केचित्।
द्राङ् ध्राङ् विशरणे।
द्राह्र निद्राक्षये। निश्चेप इत्येके।
द्रेक्ष ध्रेक्ष शब्दोत्साहयोः। (१४)

(६) क्रीड़ायामेवेत्येवकारादन्यत्रार्थनिर्देशे नियमोऽनुमीयते इति प्रदीपः।
(७) परिदेवनमिह शोकः। अयमकर्मकः।
(८) गुपेर्निन्दायामित्यादौ गुपादिष्वनुबन्धकरणसामर्थ्यात् सन्नन्तादात्मनेपदम्।
(९) अन्विच्छा अन्वेषणम्। (१०) बाह्र केवलोष्ठ्यादिः। वेह्र दन्त्योष्ठ्यादिः। उभावप्योष्ठ्यादौ इत्येके। दन्त्योष्ठ्यादौ इत्यपरे।
(११) तोड़नं दारणं हिंसनञ्च। (१२) आकारोपादानं वैचित्र्यार्थमिति प्रदीपः।
(१३) अर्थविशेषे मित्त्वार्थोऽयमनुवादः। (१४) उत्साहो दृढिरीदित्यञ्च।

धुच्च धिच्च सन्दीपनक्लेशनजीवनेषु ।
धृङ् अवध्वंसने ।
ध्वन्सु भ्रन्सु स्रन्सु अवस्रंसने । ध्वन्सु गतौ च भ्रन्शु इत्यपि केचित् पेठुः ।
नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु ।
पचि व्यक्तीकरणे ।
पड़ि गतौ ।
पण व्यवहारे स्तुतौ च । पन च । (१५)
पर्द कुत्सिते शब्दे । (१६)
पिडि सङ्घाते ।
पूङ् पवने ।
पूयो विशरणे दुर्गन्धे च ।
पेव मेट्ट सेवने ।
पेट्ट प्रयत्ने ।
(अ) प्यायो स्फायी वृद्धौ ।
प्यैङ् वृद्धौ ।
प्रथ प्रख्याने ।
प्रस विस्तारे ।
प्लिह गतौ ।
बध बन्धने ।
बाध आप्लावे । (१७)
बाधृ लोडने ।
भंड परिहासे । (१८)
भदि कल्याणे सुखे च ।
भल भल्ल परिभाषणहिंसादानेषु ।
भाम क्रोधे ।
भाष व्यक्तायां वाचि ।
भास दीप्तौ ।
भिक्ष भिक्षायामलाभे लाभे च ।
भुड़ि भरणे ।
भ्यस भये ।
टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ । ह्रौ दन्त्यान्तावपि ।
मकि मण्डने ।
मच मचि कल्कने । (१३)
मचि धारणोच्छ्रायपूजनेषु ।
मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु ।
मल मल्ल धारणे ।
मान पूजायाम् ।
(ञ) मिदा स्नेहने ।
मुठि पालने ।
मुडि मार्जने ।
मृद हर्षे ।
मूङ् बन्धने ।
मेङ् प्रणिदाने । (२०)
मेषृ रेषृ लेषृ गतौ ।
स्वद मर्दने ।
यती प्रयत्ने ।
रघि लघि गतौ । लघि भोजननिवृत्तावपि ।
रभ राभस्ये ।
रभि शब्दे ।
रमु क्रीडायाम् ।
रय गतौ । लय इत्येके ।
रुङ् गतिरेषणयोः । (२१)
रुच दीप्तावभिप्रीतौ च ।
रुट लुट लुठ प्रतिघाते ।
रेक्ष शङ्कायाम् ।
रेभृ शब्दे ।
रेवृ प्लवगतौ । (२२)
रेषृ हेषृ क्ष्वेषृ अव्यक्ते शब्दे । रेषृ वृक्कशब्दे । अपरौ अश्वशब्दे ।
(ङ) लभष् प्राप्तौ ।
लोक दर्शने ।
लोचृ दर्शने ।
वकि कौटिल्ये ।
वटि एकचर्य्यायाम् (२३)
वठि एकचर्य्यायाम् ।
वडि विभाजने । मडि च ।
वदि अभिवादनस्तुत्योः ।
वर्च दीप्तौ ।
वर्ष स्नेहने । दन्त्यौष्ठ्यादिः । पर्ष इत्येके । (२

(१५) स्तुतावित्येव सम्बध्यते पृथङ्निर्देशात् ।
(१६) कुत्सितशब्दोऽपानशब्दः । (१७) आप्लावः स्नानम् ।
(१८) परिहासः सनिन्दोपालम्भनं परिभाषणम् ।
(१९) कल्कनं दम्भः शाठ्यञ्च । कथने इत्येके ।
(२०) प्रणिदानं विनिमयः प्रत्यर्पणञ्च ।
(२१) रेषणं हिंसा ।
(२२) प्लवगतिः प्लुतगतिः ।
(२३) एकचर्य्या असहायगमनम् ।
(२४) दन्त्यौष्ठ्यादौ । केचित्तु अनयोरौष्ठ्यादित्वमाहुः ।

वर्ह वल्ह परिभाषण-हिंसाच्छादनेषु ।
बल वल्ल संवरणे, सञ्चरणे च ।
बल्भ् भोजने । दन्त्यौष्ठ्यादिः ।
वहि महि वृद्धौ ।
विथृ वेथृ याचने ।
वृञ्च वरणे ।
वृतु वर्त्तने ।
वृध वृद्धौ ।
(ट्) वेष्ट कत्थने ।
वेष्ट वेष्टने ।
व्यथ भयचलनयोः ।
शकि शङ्कायाम् ।
शच व्यक्तायां वाचि च ।
शठि रुज [illegible], संघाते च ।
शल चलनसंवरणयोः ।
शल्भ कत्थने ।
(आङ) शसि इच्छायाम् ।
शाडृ श्लाघायाम् ।
शिल्प विद्योपादाने ।
शीक सेचने । दन्त्यादिरित्येके ।
शीभृ कत्थने । चीभृ च ।
शुभ दीप्तौ ।
शृधु शब्दकुत्सयोः ।
श्येङ् गतौ ।
श्रथि शैथिल्ये ।
श्रन्थु स्रन्थु प्रमादे ।
श्लाघृ कत्थने ।
श्लोक संघाते । (२५)
श्वच श्वचि गतौ ।
श्वित्रा वर्णे ।
श्विदि श्वैत्ये ।
षच सेचने, सेवने च ।
षस्ज गतौ ।
षह मर्षणे ।
षूद क्षरणे ।
ष्टुच प्रसादे ।
ष्टुभु स्तम्भे ।
ष्विड ईषद्धसने ।
ष्वन्ज परिष्वङ्गे ।
ष्वद ष्वर्द आस्वादने ।
(ञि) ष्विदा स्नेहनमोचनयोः । स्नेहनमोहनयोरित्येके । ञिष्विदा इत्येके ।
सेक स्रेक स्रकि अकि ऋकि गतौ ।
स्कभि स्तभि प्रतिबन्धे (२६)
स्कुदि आप्रवणे । (२७)
स्खद स्खदने । (२८)
स्खदि किञ्चिच्चलने ।
स्पर्द्ध संघर्षे ।
स्फुट विकसने ।
स्फुडि विकसने ।
स्यन्दू स्रवणे ।
स्रन्भु विश्वासे ।
स्वाद आस्वादने ।
हद पुरीषोत्सर्गे ।
हिडि गत्यनादरयोः ।
हुडि वरणे । (२९)
हुडि संघाते ।
हेडृ होडृ अनादरे ।
ह्राद अव्यक्ते ।
ह्रेषृ गत्याम् ।
ह्लादौ सुखे च । च अव्यक्ते शब्दे ।

शब्विकरणा भूवादय आत्मनेपदिनः समाप्ताः ।

अथ भूवादय उभयपदिनः ।

अनच्चु गतौ याचने च अचु इत्येके । अचीत् परे । (१)
अस गतिदीप्त्यादानेषु अयं षान्तोऽपि ।
ऋष आदानसंवरणयोः ।
क्लिदि परिदेवने ।
खन् अवदारणे ।
गुह संवरणे ।

(२५) सङ्घातो ग्रन्थः । स चेह ग्रथ्यमानस्य व्यापारो ग्रन्थितुर्वा । आद्येऽकर्मकः द्वितीये सकर्मकः ।

(२६) केचिदस्य टकार औपदेशिक इत्याहुः । तन्मते, ष्टभ्नते । टष्टम्भे ।

(२७) आप्रवण-सुतप्लवनमुद्वरणञ्च । (२८) स्खदनं विद्रावणम् ।

(२९) वरणं स्वीकारः । हरणमित्येके ।

(१) अनच्चु गतावस्य पाठे कर्त्राभिप्राये क्रियाफलेऽपि परस्मैपदमिति प्रदीपः पूर्वपाठोऽस्य कर्त्राभिप्राये क्रियाफलेऽपि परस्मैपदार्थः ।

चते चदे याचने ।
चष भक्षणे ।
चाय् पूजानिशामनयोः ।
चीङ् आदानसंवरणयोः ।
क्षष हिंसायाम् ।
झष आदानसंवरणयोः ।
णिट णेट कुत्सासन्निकर्षयोः ।
णीञ् प्रापणे ।
त्विषः दीप्तौ ।
दान् खण्डने आर्जवे च ।
दासृ दाने ।
धावु गतिशुद्ध्योः ।
धूञ् कम्पने ।
धृञ् धारणे ।
(डु) पचष् पाके ।
प्रोथृ पर्य्याप्तौ ।
(उ) बुन्दिर् निशामने ।
भज सेवायाम् ।
भृञ् भरणे ।
भेषृ भये । गतावित्येके ।
भक्ष भुक्ष अदने । भुक्ष इत्येके । भृक्ष इत्यपरे । भक्ष इत्यपरे इति क्वचित् पाठः ।
म्रेषृ म्लेषृ गतौ ।
माङ् माने ।
मिट मेट मेधाहिंसनयोः । थान्ताविमाविति स्वामी, धान्ताविति न्यासः ।
मृधु म्रुधु उन्दने ।
मेङ् सङ्गमे च ।
यज देवपूजासङ्गतिकरणदानेषु ।
(टु) याचृ याञ्चायाम् ।
रञ्ज रागे ।
राजृ दीप्तौ ।
रेट परिभाषणे ।
लष कान्तौ ।
(डु) वप बीजसन्ताने । (२) अयं छेदनेऽपि ।
वह प्रापणे ।
बुधिर् बोधने ।
वेञ् तन्तुसन्ताने ।
वेषृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु । नान्तोऽप्ययम् (३) ।
व्यय गतौ ।
व्येञ् संवरणे ।
शप आक्रोशे । (४)
शान तेजने ।
श्विञ सेवायाम् ।
वच समवाये ।
स्पश बाधनस्पर्शनयोः । (५)
हिक्क अव्यक्ते शब्दे ।
हृञ् हरणे (६)
ह्वेञ् स्पर्द्धायां शब्दे च ।
शब्विकरणा भ्वादयः उभयपदिनः समाप्ताः ।

अथादादयः परस्मैपदिनः ।
अद भक्षणे ।
अन प्राणने ।
अस भुवि ।
इक् स्मरणे ।
इण् गतौ ।
उर्णुञ् आच्छादने ।
कु शब्दे ।
(टु) क्षु शब्दे ।
क्षु तेजने ।
ख्या प्रकथने ।
चकास दीप्तौ ।
जक्ष भक्षणहसनयोः ।
जागृ निद्राक्षये ।
ण्णु स्तुतौ ।
दरिद्रा दुर्गतौ ।
दाप् लवने ।
दिह उपचये । उभय पदी ।
दुह प्रपूरणे । उभयपदी ।
द्रु अभिगमने ।
द्वा कुत्सायां गतौ ।
द्विष अप्रीतौ । उभयपदी ।
पां रक्षणे ।
प्रा पूरणे ।
ष्मा भक्षणे ।
ब्रूञ् व्यक्तायां वाचि ।
भा दीप्तौ ।

(२) बीजसन्तानः क्षेत्रे बीजविकिरणम्, गर्भाधानञ्च ।
(३) वादित्रस्य वाद्यमाण्डस्य वादनार्थमादानं वादित्रग्रहणम् ।
(४) आक्रोशो विरुद्धानुध्यानम् । (५) स्पर्शनं ग्रथनम्, वो ।
(६) हरणं प्रापणम् । स्वीकारः क्षेयः नाशनञ्च ।

मा माने ।
मृजू शुद्धौ ।
या प्रापणे । (१)
यु मिश्रणे, अमिश्रणे च ।
रा दाने ।
रु शब्दे ।
रुदिर् अश्रुविमोचने ।
ला आदाने । दाने इति चन्द्रः ।
लिह आस्वादने । उभयपदी ।
वच परिभाषणे ।
वश कान्तौ ।
वा गतिगन्धनयोः ।
विद ज्ञाने ।
वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु । ईं चेत्येके । (२)
शासु अनुशिष्टौ ।
श्रा पाके ।
श्वस प्राणने ।
षस स्वस्ति स्वप्ने । छान्दसौ ।
षु प्रसवैश्वर्य्ययोः । (३)
ष्टुञ् स्तुतौ ।
ष्णा शौचे ।
ष्णु प्रस्रवणे ।
(ञि) स्वप शये ।
हन हिंसागत्योः ।
इति अदादयः परस्मैपदिनः ।

अथादादय आत्मनेपदिनः ।
आस उपवेशने ।
इङ अध्ययने । नित्यमधिपूर्वः ।
ईड स्तुतौ ।
ईर गतौ ।
ईश ऐश्वर्य्ये ।
कसि गतिशासनयोः (१)
चक्षिङ् व्यक्तायां वाचि ।
अयं दर्शनेऽपि (२) । अयमनिदित्येके । तालव्यान्तोऽपि ।
णिजि शुद्धौ ।
णिसि चुम्बने ।
दीधीङ दीप्तिदेवनयोः । छान्दसः ।
पिजि वर्णे । पृजोत्येके (३)
पृची सम्पर्चने ।
वेवीङ् वेतिना तुल्ये । (४) छान्दसः ।
ह्वजी वर्जने । ह्वजि इत्येके ।
वस आच्छादने ।
(आङ) शासु इच्छायाम् ।
शिजि अव्यक्ते शब्दे ।
शीङ स्वप्ने ।
ष्ठूङ प्राणिगर्भविमोचने ।
ह्नुङ् अपनयने ।
इत्यदादय आत्मनेपदिनः ।

अथ जुहोत्यादयः ।
(हु दानादनयोः ।)
ऋ सृ गतौ ।
(डु) दाञ् दाने ।
(डु) धाञ् धारणपोषणयोः ।
णिजिर् शौचपोषणयोः । उभयपदी ।
पॄ पालनपूरणयोः । ह्रस्वान्तोऽयमिति केचित् ।
(जि) भी भये ।

(१) प्रापणमत्र गतिः । (२) प्रजनं गर्भग्रहणम् । असनम् ।

(३) प्रसवोऽभ्यनुज्ञानम् । (१) अयमनिदित्येके । तालव्यान्तोऽप्यनिदित् ।

(२) इकारोऽनुदात्तो युजर्थः । चकार उच्चारणार्थ इति केचित् । छन्दसि नुड़ागमार्थ इत्येके । वेदेषु उच्चारणार्थ इत्यन्ये । अत्र बहवस्तु तृतीयस्वरो भ्रमकारितः, किन्तु चतुर्थस्वरानुबन्धोऽयम् । निष्ठाया इन्निषेधार्थ इति दुर्गादासः । चक्षिङो ङित्करणेनानुदात्तेत्वनिमित्तस्यात्मनेपदस्यानित्यत्वम् । अतएव, तर्जयन्निव केतुभिरिति रघुः ४, २९ । स्फायन्निर्मोकसन्धीत्यादि, कौ ११२ ।

(३) सम्पर्चने इत्येके । उभयत्रेत्यन्ये । अव्यक्ते शब्दे इतीतरे ।

(४) वीधातुसमानार्थोऽयम् । गत्यादयश्च तदर्थाः ।

(टुडु) भृत्यधारणपोषणयोः, दानेऽपीत्येके।
माङ माने, शब्दे च।
विजिर् पृथग्भावे। उभयपदी।
विष्लृ व्याप्तौ। उभयपदी।
(ओ) हाक त्यागे।
(ओ) हाङ गतौ।
हु दानादनयोः। आदाने चेत्येके। प्रीणनेऽपीति भाष्यम्। (१)
ह्री लज्जायाम्।
जुहोत्यादयः समाप्ताः।

अथ दिवादयः परस्मैपदिनः।
(दिवु क्रीड़ादौ।)
अस क्षेपणे।
इष गतौ।
उच समवाये।
ऋधु वृद्धौ।
कुथ पूतिभावे। (२)
कुप क्रोधे।
कुस संश्लेषणे। कुश इत्येके।
कृश तनूकरणे।
क्लसु ह्वरणदीप्त्योः। (३)
क्रुध क्रोधे।
क्लमु ग्लानौ।
क्लिदू आर्द्रीभावे।
क्षमू सहने।
क्षिप प्रेरणे।
क्षुध बुभुक्षायाम्।
क्षुभ सञ्चलने।
(ञि) ष्विदा स्नेहनमोचनयोः।
गुध परिवेष्टने।
गुप व्याकुलत्वे।
गृधु अभिकाङ्क्षायाम्।
छो छेदने।
जसु मोक्षणे।
जृष् भृष् वयोहानौ।
डिप क्षेपे।
णश अदर्शने।
णह बन्धने। उभयपदी।
तमु काङ्क्षायाम्।
तसु उपक्षये। दसु च।
तिम ष्टिम ष्टोम आर्द्रीभावे।
तुभ णभ हिंसायाम्।
तुष प्रीतौ।
तृष प्रीणने। (४)
(ञ) तृष पिपासायाम्।
त्रसी उद्वेगे।
दसु उपशमे। (५)
दिवु क्रीड़ाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु।
दुष वैकृत्ये।
दृप हर्षमोहनयोः। (६)
दृ विदारे।
दो अवखण्डने।
द्रह जिघांसायाम्।
नृती गात्रविक्षेपे।
पुथ हिंसायाम्।
पुष पुष्टौ।
पुष्प विकसने।
प्लुष दाहे। (७)
प्लुस दाहे।
भृशु भ्रन्शु अधःपतने।
भ्रमु अनवस्थाने।
मदी हर्षे।
मसी परिणामे। परिमाणे इत्येके। समीत्येके।
(ञ) मिदा स्नेहने।
मुच खण्डने।
मुह वैचित्त्ये।
मृग अन्वेषणे।
मृष तितिक्षायाम्। उभयपदी।
यसु प्रयत्ने।
युप रुप लुप विमोहने।
रध हिंसासंराद्धयोः। (८)
रन्ज रागे। उभयपदी।
राध साध संसिद्धौ।

(१) दानस्नेह प्रक्षेपः। स च वैधे आधारे हविषश्चेति स्वभावाल्लभ्यते।
(२) पूतिभावो दौर्गन्ध्यम्। (३) ह्वरणं कौटिल्यम्।
(४) प्रीणनं तृप्तिस्तर्पणञ्च। (५) उपशम इति णिजन्तस्य रूपम् तेन सकर्मकोऽयम्। न तु शमिवदकर्मकः। (६) मोहनं गर्वः।
(७) अयं पुषादिः। व्युष दाहे प्लुष वेति परत्र पाठः सिजर्थः। तद् भ्वादिपाठेन गतार्थमिति सुवचम्। (८) संराद्धिर्निष्पत्तिः।

ष रिष हिंसायाम्।
ट विलोड़ने।
भ गार्द्ध्ये। (८)
ष्टु स्तम्भे।
ष्म प्रेरणे।
स उत्सर्गे।
ग्र वरणे।
ष्णुष दाहे प्लुष च।
ष्णुष विभागे। वुष च।
ग्रध ताड़ने।
ीड चोदने लज्जायाञ्च।
ाक्ष विभाषितो भर्षणे। (९)
ाप आक्रोशे। उपयपदौ।
ुचिर् पूतीभावे। उभयपदौ। (१०)
ुध शौचे।
ुष शोषणे।
ो तनूकरणे।
श्रमु तपसि, खेदे च।
श्लेष आलिङ्गने।
ाह ष्णुह उद्गिरणे।
ष्वेडु संराद्धौ। (११)
ष्वेदु तन्तुसन्ताने।
ो अन्तकर्मणि।
ष्ठेवु निरसने। केचिदिहेमं न पठन्ति।
ष्णसु निरसने।
ष्णुह प्रीतौ।

ष्णसु अदने। आदाने इत्येके। अदर्शने इत्यपरे।
ष्णुह उद्गिरणे।
ष्ठिवु गतिशोषणयोः।
खिदा गात्रप्रक्षरणे (२क्ष)
ह्रुष तुष्टौ।
इति श्यन्विकरणा दिवादयः परस्मैपदिनः।

अथ दिवादय आत्मनेपदिनः।

अण प्राणने। दन्त्यान्तोऽयमित्येके।
ईङ् गतौ।
काशृ दीप्तौ।
क्लिश उपतापे।
खिद दैन्ये।
गूरी धूरी हिंसामत्योः।
घूरी जूरी हिंसावयोहान्योः।
घूरी दाहे।
जनी प्रादुर्भावे।
डीङ विहायसा गतौ।
तप ऐश्वर्य्ये वा। (१)
तॄरी त्वरणहिंसयोः।
दीङ क्षये।
दीपी दीप्तौ।
दूङ परितापे।
धीङ आधारे।
पद गतौ।
पीङ पाने।
पूरी आप्यायने।
प्रीङ प्रीतौ। अयं सकर्मकः।
विद सत्तायाम्।
बुध अवगमने।
मन ज्ञाने।
मीङ हिंसायाम्।
युध सम्प्रहारे।
रीङ श्रवणे।
(अनोः) रुध कामे।
लिश अल्पीभावे।
लीङ श्लेषणे।
वाशृ शब्दे।
वृतु वरणे। वर्तृ वरणे इत्येके
व्रीङ वृणोत्यर्थे।
शूरी हिंसास्तम्भनयोः।
सूङ प्राणिप्रसवे।
इति श्यन्विकरणा दिवादय आत्मनेपदिनः।

अथ स्वादयः।

(षुञ अभिषवे।)
अशू व्याप्तौ, सङ्घाते च।
अयमात्मनेपदी।
आप्लृ व्याप्तौ।

(८) गार्द्ध्यमाकाङ्क्षा। (९) विभाषित इत्युभयपदीत्यर्थः। शक्नोति शक्नुते हरिं द्रष्टुं भक्तः, कौ १३९। (१०) पूतीभावः क्लेदः।
(११) संराद्धिर्निष्पत्तिः। (२) प्रक्षरणं घर्मच्युतिः। अयं जीदिति न्यासकारादयः। नेति हरदत्तादयः।
(१) अयं धातुरैश्वर्य्ये वा तङ्श्यनौ लभते। अन्यथा तु श्यन्विकरणपरस्मैपदीत्यर्थः।

ऋधु वृद्धौ ।
क्रुञ हिंसायाम् ।
क्षि हिंसायाम् ।
चिञ चयने ।
तिक तिग गतौ, आस्कन्दने च ।
त्रप व्रीणने ।
दन्भु दम्भे ।
(टृ) दु उपतापे ।
ध्रुञ कम्पने । दीर्घान्तोऽप्ययम् ।
(ञि) धृषा प्रागल्भ्ये ।
पॄ प्रीतौ ।
(ङु) मिञ प्रक्षेपणे ।
व्रज वरणे ।
शक्लृ शक्तौ ।
शिञ निशाने ।
श्रु श्रवणे । अयं स्वादौ पठितः ।
षघ हिंसायाम् ।
षिञ बन्धने ।
षुञ अभिषवे । (१)
ष्टिघ आस्कन्दने । अयमात्मनेपदीः ।
स्तृञ आच्छादने ।
स्पृ प्रीतिपालनयोः । प्रीतिचलनयोरित्यन्ये । चलनं जीवनमिति स्वामी ।
हि गतिवृद्धयोः ।

इति श्रुविकरणाः स्वादयः ।

अथ तुदादयः परस्मैपदिनः ।

(तुद व्यथने ।)

इल प्रक्षेपणयोः ।
इषु इच्छायाम् ।
उछि उञ्छे ।
उछी विवासे ।
उज्झ उत्सर्गे ।
उब्ज आर्जवे ।
उभ उन्भ पूरणे ।
ऋच स्तुतौ ।
ऋछ गतीन्द्रियप्रलयमूर्त्तिभावेषु ।
ऋफ ऋन्फ हिंसायाम् ।
ऋषी गतौ ।
कड़ मदे ।
किल श्वेलक्रीड़नयोः ।
कुच सङ्कोचने ।
कुट कौटिल्ये ।
कुड़ बाल्ये ।
कुण शब्दोपकरणयोः ।
कुर शब्दे ।
कुड घनत्वे ।
कृती छेदने ।
कॄ विक्षेपे ।
क्रुड भृड निमज्जने ।
क्षि निवासगत्योः ।
क्षिद परिघाते ।
क्षुर विलेखने ।
खुर छेदने ।
गु पुरीषोत्सर्गे ।
गुज शब्दे ।
गुड रक्षायाम् ।
गुफ गुम्फ ग्रन्थे ।
गॄ निगरणे ।
घुट प्रतिघाते ।
घुण घूर्ण भ्रमणे ।
घुर भीमार्थशब्दयोः ।
चर्च जर्ज भर्भ परिभाषणभर्त्सनयोः ।
चल विलसने ।
चिल वसने ।
चुट छुट छेदने ।
चुड ब्रड स्फुड संवरणे ।
चृती हिंसाग्रन्थनयोः ।
छुप स्पर्शे ।
छुर छेदने ।
जुट बन्धने ।
जुड गतौ । जुन इत्येके ।
जुड बन्धने ।
डिप क्षेपे ।
णिल गहने ।
णुद प्रेरणे । (१)
णॄ स्तवने ।
तिल स्नेहे ।
तुट कलहकर्मणि ।
तुड तोड़ने ।
तुण कौटिल्ये ।
तुप तुन्प तुफ तुन्फ हिंसायाम् ।
त्रप त्रन्फ त्रसौ । त्रफ इत्येके ।
त्रुछ स्तृछ त्रन्छ हिंसार्थाः ।
त्रुट छेदने ।

(१) अभिषवः स्नपनम् पीड़नं स्नानं सुरायाः सन्धानञ्च । (१) यद्यपि णुद उभयपदी वक्ष्यते तथापि कर्त्तृगामिनि फलेऽपि परस्मैपदार्थमिह पाठः ।

ख्च संवरणे।
थुड स्थुड संवरणे। खुड़ क्षुड इत्येके।
ट्टप ट्टन्फ उत्क्लेशे।
ट्टभी ग्रन्थे।
ट्रुण हिंसागतिकौटिल्ये।
धि धारणे।
ध्रु विधूनने।
ध्रू गतिस्थैर्ययोः। ध्रुव इति पाठान्तरम्।
पि रि गतौ।
पिश अवयवे।
पुट संश्लेषणे।
पुड उत्सर्गे।
पुण कर्मणि शुभे।
पुर अग्रगमने।
पृड़ मृड़ सुखने।
पृण प्रीणने। हृण च।
प्रक्ष क्षोभायाम्।
बिल भेदने।
बृह उद्यमने।
भुजो कौटिल्ये।
भ्रुड संहृतिसंहत्योः।
(टु) मस्जो शुद्धौ।
मिज उत्क्लेशे।
मिल श्लेषणे।
मिष स्पर्द्धायाम्।
मुट आक्षेपप्रमर्दनयोः।
मुण प्रतिज्ञाने।
मुर संवेष्टने।
मृण हिंसायाम्।

मृण आमर्शने। (२)
रिफ किलकिलत्वनयुद्धनिन्दा-हिंसादानेषु।
रुजो भङ्गे।
रुशं रिश हिंसायाम्।
लिख अक्षरविन्यासे।
लिश गतौ।
लुठ संश्लेषणे।
लुभ विमोहने। (३)
विक्ष गतौ।
विध विधाने।
विल संवरणे। (४)
विश प्रवेशने।
व्यच व्याजीकरणे।
(श्नो) व्रस्च्लृ छेदने।
शिल शिल उञ्छे।
शुन गतौ।
शुभ शुन्भ शोभार्थे।
षदॢ विशरणगत्यवसादनेषु।
षुर ऐश्वर्यदीप्त्योः।
षू प्रेरणे।
सृज विसर्गे।
स्पृश संस्पर्शने।
स्फुर स्फुल सञ्चलने।
स्फुर स्फुरणे। स्फर स्फल इत्येके।
हिल भावकरणे।

इति तुदादयः परस्मैपदिनः।

अथ तुदादय आत्मनेपदिनः।

कुङ कूङ शब्दे।
गुरी उद्यमने।
जुषी प्रीतिसेवनयोः।
टृङ आदरे।
धृज अवस्थाने।
पृज व्यायामे।
मृङ प्राणत्यागे।
(श्नो) लजी श्नी लस्जी क्रीड़ायाम्।
(श्नो) विजी भयचलनयोः। प्रायेणायमुत्पूर्वः।

इति तुदादय आत्मनेपदिनः।

अथ तुदादय उभयपदिनः।

कृष विलेखने।
क्षिप प्रेरणे।
णुद प्रेरणे।
तुद व्यथने।
दिश अतिसर्जने।
भ्रस्ज पाके।
मिल सङ्गमे। (१)
मुच्लृ मोक्षणे।
लिप् उपदेहे। (२)
लुप्लृ छेदने।

(२) आमर्शनं स्पर्शः।
(३) विमोहनमाकुलीकरणम्।
(४) दन्त्योष्ठ्यादिः पवर्गीयादिरित्यन्ये।
(५) मिल संश्लेषण इति पठितस्य पुनः पाठः कर्त्रभिप्राये तङर्थः।

विदृल्ल लाभे।
सिच क्षरणे।
इति शविकरणास्तुदादयः।

अथ रुधादयः परस्मै-पदिनः।

(रुधिर् आवरणे।)

अन्ज व्यक्तिमर्षणकान्ति-गतिषु।
(ञि) इन्धी दीप्तौ। आत्मने-पदी।
उन्दी क्लेदने।
क्लृती वेष्टने।
खिद दैन्ये। आत्मने-पदी।
तन्चु सङ्कोचने।
ल्टह हिंसि हिंसायाम्।
पिष्ल्ल सञ्चूर्णने।
पृची सम्पर्के।
भन्जो आमर्दने।
भुज पालनाभ्यवहारयोः।
विद विचारणे। आत्मने-पदी।
(ओ) विजी भयचल-नयोः।
ह्रजी वर्जने।
शिष्ल्ल विशेषणे।

इति रुधादयः परस्मै-पदिनः।

अथ रुधादय उभय-पदिनः।

ष्णुदिर् सम्प्रेषणे।
ष्णिदिर् स्नैधीकरणे।
(उ) कृदिर् दीप्तिदेव-नयोः।
(उ) ल्टदिर् हिंसानाद-रयोः।
भिदिर् विदारणे।
युजिर् योगे।
रिचिर् विरेचने।
रुधिर् आवरणे।
विचिर् पृथग्भावे।

इति रुधादयः।

अथ तनादय उभय-पदिनः।

(तनु विस्तारे।)

ऋणु गतौ।
(डु) क्लञ्ज करणे।
क्षणु हिंसायाम्। क्षिणु च।
घृणु दीप्तौ।
तनु विस्तारे।
ल्टणु अदने।
मनु अवबोधने। आत्मने-पदी।
वनु याचने। आत्मने-पदी।
षणु दाने।

इदि तनादयः।

अथ क्रयादयः परस्मै-पदिनः।

(डु क्रीञ् द्रव्यविनिमये।)
अश भोजने।
इष आभीक्ष्ण्ये। (१)
ऋ गतौ।
कुन्थ संश्लेषणे। संक्लेशे इत्येके। कुन्थेति दुर्गः।
कुष निष्कर्षे।
कॄ हिंसायाम्।
कॄञ् हिंसायाम्।
(डु) क्रीञ् द्रव्यविनिमये।
क्रूञ् शब्दे।
क्लीश् विबाधने।
क्लीष् हिंसायाम्। क्लिष् इत्येके।
क्षुभ सञ्चलने।
खच भूतप्रादुर्भावे। खव इत्येके। हेढ च। (२)
गुध रोषे।
गॄ शब्दे।
ग्रन्थ ग्रन्थ सन्दर्भे।
ग्रह उपादाने। उभय-पदी।
जॄ वयोहानौ। भॄ इत्येके। धॄ इत्यन्ये।
ज्ञा अवबोधने।
ज्या वयोहानौ।
तुभ णभ हिंसायाम्।
दूञ् हिंसायाम्।
द्रु विदारणे।
धूञ् कम्पने।

(२) उपदेहो हविः। (पूः धूः) (१) आभीक्ष्ण्यं पौनःपुन्यम् भृशार्थो वा।
(२) भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः।

उध्रस उञ्छे । उकार इत् । उकारो धात्वव-यव इत्येके ।
नृ नये ।
पुष पुष्टौ ।
पूञ पवने ।
पॄ पालनपूरणयोः ।
प्रीञ तर्पणे कान्तौ च । (१)
प्रुष प्लुष स्नेहनसेवन-पूरणेषु ।
प्ली गतौ ।
बन्ध बन्धने ।
बृञ वरणे ।
बॄ वरणे । भरणे चेत्येके ।
भृ भर्त्सने । भरणेऽपि ।
भ्री भये । भरणे इत्येके ।
मन्थ विलोड़ने ।
मीञ हिंसायाम् ।
मुष स्तेये ।
मृद क्षोदे । मृड च ।
अयं सुखेऽपि ।
मॄ हिंसायाम् ।
युञ बन्धने ।
री गतिरेषणयोः । (२)
ली श्लेषणे ।
लूञ छेदने ।
विष विप्रयोगे ।
वृङ सम्भक्तौ ।
व्री वरणे ।
वॄ वरणे ।
शॄ हिंसायाम् । अन्य विमोचनप्रतिहर्षयोः ।
श्रीञ पाके ।
षिञ बन्धने ।
स्कुञ आप्लवने ।
स्तृञ् आच्छादने ।
इति भ्वादिकरणाः क्रयादयः ।

अथ चुरादयः परस्मै-पदिनः ।

(चुर स्तेये ।)

अजि अहि जिवि तड नट नल दमि पुटि भृशि महि रवि रहि रुठ रुशि रुसि लघि लजि लडि शोक भासार्थाः । (३)
अट्ट षुट्ट अनादरे । अयं दोपधः ।
अन्च् विशेषणे ।
अम रोगे ।
अक स्तवने । तपने इत्येके ।
अर्च पूजायाम् ।
अर्ज प्रतियत्ने । अयमर्थान्तरेऽपि ।
अर्द हिंसायाम् । उभयपदी ।
अर्ह पूजायाम् ।
आप्लृ लम्भने । उभयपदीत्येके ।
इल प्रेरणे ।
ईड स्तुतौ ।
ईर क्षेपे ।
ऊर्ज बलप्राणनयोः ।
ओलडि उत्क्षेपणे । ओकार इदित्येके । उकारादिरयमित्यन्ये ।
कट वर्णे ।
कठि शोके । उत्पूर्वोऽयमुत्कण्ठायाम् ।
कड़ि खड़ खड़ि भेदने ।
कण निमीलने ।
कल विल क्षेपे ।
कीट वर्णे ।
कुट्ट छेदनभर्त्सनयोः । पूरणे इत्येके ।
कुडि रक्षणे ।
कुद्रि अनृतभाषणे ।
कुप कुगि कुसि गुप घट घटि चीव णद तव तुजि त्रसि दशि धू पट पिजि पिसि पु पुथ मजि मिजि ल लुजि लुट लोक लो वर्ह वल्ह विक्ष वृतु वृ वृहि भासार्थाः ।
कुवि आच्छादने । कुभि इत्येके ।
'कुप युतौ चित्रे कम्पने च
कृत संशब्दने ।
(आङः) क्रन्द सातत्ये ।
क्षजि कृच्छ्रजीवने ।
क्षपि क्षान्त्याम् ।
क्षल शौचकर्मणि ।

(१) कान्तिः कामना । (२) रेषणं वृकशब्दः ।
(३) भासार्था दीप्तार्थाः । भाषार्था इति पाठे भाषायां येऽर्थास्ते तेषां धातूनां भाषार्थाः । अनेकार्था इति केचित् ।

खट्ट संवरणे।
खुड़ि खण्डने।
गज मार्ज शब्दार्थौ। मर्च च।
गर्ज गर्द शब्दे।
गर्ध अभिकाङ्क्षायाम्।
गर्ह विनिन्दने।
गुड़ प्रेरणे।
गुड़ि वेष्टने। रक्षणे इत्येके। कुठि इत्यन्ये। चूर्णीकरणेऽपि। गुठि इत्यपरे।
गुर्द पूर्व निकेतने।
ग्रन्थ बन्धने। ग्रन्थ इत्येके।
ग्रस ग्रहणे।
घट सङ्घाते। हन्त्यर्थश्च।
घट्ट चलने।
घुषिर् विशब्दने।
घृ प्रस्रवणे। स्रावणे इत्येके।
चक्क चक्क व्यथने। चिक्क इत्येके।
चट स्फुट भेदने।
चन श्रद्धोपहननयोरित्येके।
चपि गत्याम्।
चर संशये।
चर्च अध्ययने।
चल भृतौ।
चह परिकल्कने। चप इत्येके।
चिञ चयने।
चिति स्मृत्याम्।
चुट छेदने।
चुटि छेदने।
चुट्ट पुट्ट अल्पीभावे।
चुद सञ्चोदने।
चुर स्तेये।
चुल समुच्छ्राये।
चूट छेदने।
चूण सङ्कोचने।
चूर्ण पेषणे।
चूर्ण वर्ण प्रेरणे। वर्ण वर्णन इत्येके।
चृप क्लृप दृप सन्दीपने।
चुस सहने। हसने चेत्येके। चुस इत्येके।
क्लृद अपवारणे। उभयपदी। क्लृदि संवरणे।
क्लृर्द वमने।
क्लृदी सन्दीपने।
जभि नाशने।
जल अपवारणे। लज इत्येके।
जसि रक्षणे। मोक्षणे इति केचित्।
जसु हिंसायाम्।
जसु ताड़ने।
जुड प्रेरणे।
जुष परितर्कणे। (१)
जॄ वयोहानौ। जि च।
ज्ञप ज्ञाने ज्ञापने च। ज्ञप मिच्च।
ज्ञा नियोगे।
टकि बन्धने।
डिप क्षेपे।
तड आघाते।
तनु श्रद्धोपकरणयोः। उपसर्गाच्च दैर्घ्ये।
तप दाहे।
तल प्रतिष्ठायाम्।
तसि भूष अलङ्करणे।
तिज निशाने।
तिल स्नेहने।
तुजि पिजि हिंसाबलादाननिकेतनेषु। तुज पिजेति केचित्। लजि लुजि इत्येके।
तुल उन्माने।
तुवि लुवि अदर्शने। अर्दने इत्येके।
त्रप त्रपौ। सन्दीपने इत्येके।
त्रस धारणे। ग्रहणे इत्येके। वारणे इत्यन्ये।
दल विदारणे।
दिवु मर्दने।
दुल उत्क्षेपे।
दृभ सन्दर्भे।
दृभी भये।
धक्क नक्क नाशने।
धूज कम्पने।
धूस कान्तिकरणे। धूष इत्येके। धूश इत्यपरे।
धृष प्रसहने।
उधृस उञ्छे। उकारो धात्ववयव इत्येके। नेत्यन्ये।
नट अवस्यन्दने। (२)

(१) परितर्कणमूहो हिंसा वा। (२) अवस्यन्दनं नाट्यम्।

पच्च परिग्रहे ।
पचि विस्तारवचने ।
पड़ि पसि नाशने ।
पथि गतौ ।
पश बन्धने ।
पाल रक्षणे ।
पिक्क कुट्टने ।
पिडि संघाते ।
पिस गतौ ।
पीड अवगाहने ।
पुष धारणे ।
पुल महत्त्वे ।
पुस अभिवर्द्धने ।
पुस्त वुस्त आदरानादरयोः ।
पूज पूजायाम् ।
पूरी आप्यायने ।
पूल संघाते । पूर्ण इत्येके । पूण इत्यन्ये ।
पृजि क्लृच्छ्रजीवने ।
पृथ प्रक्षेपे । पथ इत्येके ।
पॄ पूरणे ।
प्रथ प्रख्याने ।
प्रीञ तर्पणे ।
बध संयमने । बन्धेति चान्द्रः ।
बल प्राणने ।
बल भेदने ।
बुक्क भाषणे ।
बुट हिंसायाम् ।
ब्रूस बर्ह हिंसायाम् ।
भक्ष अदने ।
भज विश्राणने ।
भडि कल्याणे ।
भुवोऽवकल्कने । अवकल्कनं मिश्रीकरणमित्येके । चिन्तनमित्यन्ये । क्वपेश्च ।
मडि भूषायाम् । हर्षे च ।
मान पूजायाम् ।
मार्ग अन्वेषणे ।
मिदि स्नेहने ।
मी गतौ ।
मुच प्रमोचने । मोदने च ।
मुट सङ्घूर्णने ।
मुद संसर्गे ।
मुस्त संघाते ।
मूल रोहणे ।
मृजू शौचालङ्कारयोः ।
मृष तितिक्षायाम् । उभयपदी ।
मोक्ष असने । (१)
म्लेच्छ म्लेच्छने ।
म्लेछ अव्यक्तायां वाचि ।
यत निकारोपस्कारयोः ।
यत्रि सङ्कोचे ।
यम च परिवेषणे । (२)
यु जुगुप्सायाम् ।
युज पृच संयमने ।
रक लग आस्वादने । रग इत्येके । रघ च ।
रह त्यागे ।
रिच वियोजनसम्पर्चनयोः ।
रुज हिंसायाम् ।
रुष रोषे । रुट इत्येके ।
लड उपसेवायाम् ।
लक्ष दर्शनाङ्कनयोः ।
लस शिल्पयोगे ।
ली द्रवीकरणे ।
लिगि चित्रीकरणे ।
लुट सङ्घूर्णने ।
लुण्ठ स्तेये । लुण्ड इत्येके ।
लूष हिंसायाम् ।
वच परिभाषणे ।
वज मार्गणसंस्कारगत्योः ।
वटि विभाजने । वडि इत्येके ।
वद सन्देशवचने । उभयपदी । आत्मनेपदी इत्येके ।
वर्ष छेदनपूरणयोः ।
वल्क श्वल्क परिभाषणे ।
वस स्नेहच्छेदापहरणेषु ।
वा सुखाप्तिगतिसेवासु ।
वृजी वर्जने ।
वृञ आवरणे ।
श्वठ श्वठ असंस्कारगत्योः । श्वठि इत्येके ।
शब्द उपसर्गादाविष्कारे च । चादु भाषणे ।
शिष असर्वोपयोगे ।
शीक सीक आमर्षणे । चीक च ।
शुठ आलस्ये ।
शुठि शोषणे ।

(१) असनं क्षेपणम् । (२) परिवेषणमिह वेष्टनम् ।

शुन्ध शौचकर्मणि।
शुल्क अतिस्पर्शने।
शुल्ब माने। शूर्प च।
शृधु प्रहसने।
श्रण दाने। प्रायेणायं विपूर्व:।
श्रथ प्रयत्ने। प्रस्थाने इत्येके।
श्रथ मोक्षणे। हिंसायामित्येके।
श्रन्थ ग्रन्थ सन्दर्भे।
श्लिष श्लेषणे।
श्वट स्फिट चुवि हिंसायाम्।
(आङ:) षद पद्यर्थे।
षम्ब सम्बन्धने। शम्ब च। साम्ब इत्येके।
षह मर्षणे।
षान्त्व सामप्रयोगे।
षूद क्षरणे।
ष्टुप समुच्छ्राये।
ष्णिह स्नेहने। स्फिट इत्येके।
ष्वद आस्वादने। आद इत्येके।
सृ आस्तरणे।
स्निट स्नेहगत्यो:।
स्फिट त्वत्याम्। बधे अनादरे चेत्येके।
स्फुडि परिहासे, स्फुटि इति पाठान्तरम्।
स्मिट अनादरे।
स्मिङ अनादरे।
स्वर्त्त गत्याम्। ग्रहभ्र च।
हिंसि हिंसायाम्।
ह्लप व्यक्तायां वाचि। क्लप इत्येके।

इति चुरादय: परस्मैपदिन:।

—

अथ चुरादय आत्मनेपदिन:।

कुट्ट प्रमापने।
कुत्स अवक्षेपणे।
कुत्स कुत्सितशब्दे।
कूट आप्रदाने। अवसादने इत्येके।
कूण सङ्कोचे। कण च।
गल स्रवणे।
गूर उद्यमने।
गृ विज्ञाने। गट इत्यन्ये।
चित सञ्चेतने।
डप डिप संघाते।
तन्त्रि कुटुम्बधारणे। चान्द्रास्तु धातुद्वयमिति वदन्ति।
तर्ज भर्त्स तर्जने।
तूण पूरणे।
त्रुट छेदने। कुठ इत्येके।
दंश दंशने।
दस दर्शनदंशनयो:। दस इत्येके।
दिवु परिकूजने।
निष्क परिमाणे।
भल आभण्डने।
'भृ प्राप्तौ'।
भ्रूण आशाविशङ्कयो:।
मद तृप्तियोगे।
मन स्तम्भे।
मन्त्रि गुप्तपरिभाषणे।
यत्न पूजायाम्।
यु जुगुप्सायाम्।
लल ईप्सायाम्।
वञ्चु प्रलम्भने।
वस्त गन्ध अर्दने।
विद चेतनाख्यानविवासेषु।
विष्क हिंसायाम्। हिष्क इत्येके।
वृष शक्तिबन्धने। (१)
शठ श्लाघायाम्।
शम लक्ष आलोचने।
स्पश ग्रहणसंश्लेषणयो:।
स्यम वितर्के।

इति चुरादय आत्मनेपदिन:।

—

अथ अदन्तासुरादय:।

अङ्क पदे लक्षणे च।
अङ्ग च।
अघ पापकरणे।
अन्ध दृष्टिप्रघाते।
अर्थ उपयाच्ञायाम्।
अवधीर अवज्ञायाम्।
अंश अंस विभाजने।
अंस समाघाते।
आन्दोल हिन्दोल हिल्लोल दोलने।
ऊण परिहाणे।

(१) वृषशक्तिबन्धनं प्रजननसामर्थ्यम्। वृषशक्तिबन्धश्च।

कत्र शैथिल्ये।
कथ वाक्यप्रबन्धे। (१)
कल गतौ संख्याने च।
कुण गुण ग्राम आमन्त्रणे। कुण गुण केतने च। कुण सङ्कोचनेऽपि।
कुमार क्रीड़ायाम्। कुमाल इत्येके।
कुह विस्मापने।
कूट परितापे। परिदाहे इत्यन्ये। आमन्त्रणे च। परिहासे इति केचित्।
कूण सङ्कोचे।
कैत श्रावणे निमन्त्रणे।
क्षप प्रेरणे।
क्षोट क्षेपे। खोट खोड इत्येके।
खच बन्धने।
खेट भक्षणे। खेट खोट इत्येके।
गण संख्याने।
गर्व माने।
गवेष मार्गणे।
गह गहने।
गृह ग्रहणे।
गोम उपलेपने।
ग्राम आमन्त्रणे।
चह परिकल्कने। (२)
चित्र चित्रीकरणे।
छद अपवारणे।
छिद्र कर्णभेदने। करणभेदने इत्यन्ये। कर्ण इति धात्वन्तरमित्यन्ये।
छेट द्वैधीकरणे।
तुत्थ आवरणे।
टण्ड दण्डनिपातने।
ढेक दर्शने।
ध्वन शब्दे।
निवास आच्छादने।
पट वट ग्रन्थे।
पत गतौ वा। वा णिजन्तः। वा अदन्त इत्येके।
पद गतौ।
पर्ण हरितभावे।
पल्यूल लवनपवनयोः। पल्यूल वल्यूल इत्येके।
पष अनुपसर्गात् गताविति एव। पश इत्येके।
पार तीर कर्मसमाप्तौ।
पुट संसर्गे।
प्रेङ्खोल चापलेऽ।
भाज पृथक्कर्मणि।
भाम क्रोधे।
मह पूजायाम्।
मिश्र सम्पर्के।
मूत्र प्रस्रवणे।
मृग अन्वेषणे।
रच प्रतियत्ने।
रस आस्वादने।
रह त्यागे।
रूक्ष पारुष्ये।
रूप रूपक्रियायाम्। (३) लज प्रकाशने। लजि इत्येके।
लड लाड आक्षेपे।
लाभ प्रेरणे।
वट विभाजने। वटि इत्येके। (४)
वर ईप्सायाम्।
वर्ण वर्णक्रियाविस्तारगुणवचनेषु।
वल्क दर्शने।
वल्क विल्क दर्शने।
वस निवासे।
वात सुखसेवनयोः। गतिसुखसेवनेष्वित्येके।
वास उपसेवायाम्।
विड़म्ब विड़म्बने।
वीज व्यजने।
वेल कालोपदेशे। काल इति पृथक् धातुरित्येके।
व्यय वित्तसमुत्सर्गे। वित्त इति पृथक्धातुरित्येके।
व्रण गात्रविचूर्णने।
शठ शठ सम्यगवभाषणे।
शील उपधारणे। (५)
शूर वीरविक्रान्तौ।
श्रथ श्लथ दौर्बल्ये।
सङ्केत आमन्त्रणे।

(१) शाकटायनस्तु कथादीनां सर्वेषां पकमाह। तन्मते कथापयति गणापयतीत्यादि। (२) परिकल्कनं दम्भः शाठ्यञ्च।

(३) रूपस्य दर्शनं वा रूपक्रिया। (४) वटीत्यस्य अदन्ते पाटवलादद न्तत्वे द्वित्वमित्यन्ये। कटापयति। एवं खजीत्यत्रापि। (५) उपधारणमभ्यासः।

संग्राम युद्धे। अयमात्मनेपदी।
सत्र सन्तानक्रियायाम्।
सभाज प्रीतिदर्शनयोः। प्रीतिसेवनयोरित्यन्ये।
साम सान्त्वप्रयोगे।
सार क्रूप दौर्बल्ये।
सुख दुःख तत्क्रियायाम्।
सूच पैशुन्ये।
सूत्र वेष्टने विमोचने ग्रन्थे च।
स्यन गदौ देवशब्दे।
स्तेन चौर्य्ये।
स्तोम श्लाघायाम्।
स्थूल परिवृंहणे।
स्पृह ईप्सायाम्।
स्फुट विस्फुरणे।
स्वर आक्षेपे।
हिल्लोल दोलने।
बहुलमेतन्निदर्शनम्। बाहुलकादन्येऽपि बोध्याः, अन्ये तु दशगणीपाठो बहुलमित्याहुः। तेनापठिता अपि सौत्रलौकिकवैदिका बोध्याः। अपरे तु नवगणीपाठो बहुलमित्याहुः। तेनापठितेभ्योऽपि क्वचित् स्वार्थे णिच्। रामो राज्यमचीकरदित्याहुः।

इत्यदन्तचुरादयः।
समाप्तोऽयं पाणिनीयो धातुपाठः।

अथ नामधातवः कण्ड्वादयः ।

अगद्यति । अगद नीरोगत्वे ।
अघायति । अघ ।
अध्वरीयति । अध्वर ।
अनुकूलयति । अनकूल, कु ३, ३९ ।
अनुलोमयति । लोमान्यनुमार्ष्टि ।
अभिमनायते । अभिमनस् ।
अभिषेणयति । अभ्यषेणयत् । अभिषिषेणयिषति । सेनयाभिमुखं याति ।
अभ्रायते । अभ्रं करोति ।
अमृतायते । अमृतमिवाचरति ।
अम्बर्यति । अम्बर संभरणे ।
अरर्यति । अरर आराकर्मणि ।
अलीकायते । अलीक ।
अवर्यति । अवर ।
अशनायति । अशन ।
अश्नीतपिबतीयति ।
अश्वयते । अश्वतरमाचष्टे ।
अश्वस्यति वड़वा । अश्व ।
असूयति । ०ते । असुञ उपतापे ।
आविलयति । आविल ।
इरज्यति । इरज् ईर्ष्यायाम् ।
इरस्यति । इरस् ईर्ष्यायाम् ।
इर्यति । ०ते । इरज ईर्ष्यायाम् ।
इषुध्यति । इषुध शरधारणे ।
उत्पुच्छयते । पुच्छमुत्क्षिपति ।
उत्सुकायते । उत्सुक ।
उदन्यति । उदकमिच्छति ।
उन्मनायते । उन्मनस् ।
उपवीणयति । वीणया उपगायति ।
उषस्यति । उषस् प्रभातीभावे ।
उष्मायते । उष्माणमुद्वमति ।
एलायति । एला विलासे ।
ओजायते । ओजस् ।
कण्डूयति । ०ते । कण्डूञ गात्रविघर्षणे
करुणायते । करुण ।
कलहायते । कलह ।
कष्टायते । कष्टाय क्रमते ।
किलकिलायति । किलकिला ।
कुषुभ्यति । कुषुभ क्षेपे ।
कृच्छ्रायते । कृच्छ्र ।
कृपणायते । कृपण ।
कृष्णायते । कृष्ण ।
केलायति । केला विलासे ।
चौरस्यति । चौर ।
खेलायति । खेला विलासे ।
गद्गदयति । गद्गद वाक्स्खलने ।
गव्यति । गो ।
गोमयायते । गोमय ।
चपलायते । चपल ।
चरण्यति । चरण गतौ ।
चरितार्थयति । चरितार्थ ।
चित्रीयते हेममृगः । चित्रङ् आश्चर्ये
चिरयति । चिरम् ।
चिरायति । ०ते । चिर ।
चिह्नयति । चिह्न ।
कलयति । कल ।
तन्त्रस्यति । तन्त्रस् दुःखे ।
तपस्यति । तपः करोति ।

तरण्यति। तरण गतौ।
तिमिरयति। तिमिर गतौ।
तिरस्यति। तिरस् अन्तर्धौ।
तुलयति। तुल।
त्वष्टायते। त्वष्ट।
दवयति। दूर।
दारुणायते। दारुण।
दुःखायते। दुःखं वेदयते।
दुःख्यति। दुःख तत्क्रियायाम्।
दुर्मनायते। दुर्मनस्।
दोलायते। दोल।
द्रवस्यति। द्रवस् परितापपरिचरणयोः।
द्रुमायते। द्रुम।
धनायति। धन।
धूमायते। धूम।
नमस्यति। नमः करोति।
निष्पत्रयति। निष्पत्र।
नेदयति। अन्तिक।
पटपटायति। ०ते।
पण्डितायते। पण्डित।
पतीयति। पति।
पयस्यति। पयस् प्रस्रुतौ। आर्द्रीभावे।
परिकर्मयति। परिकर्मन्।
पल्लवयति। पल्लव।
पिशुनयति। पिशुन।
पुलकयति। पुलक।
प्रतिकूलयति। प्रतिकूल।
प्रतीपायते। प्रतीप।
प्रमाणयति। प्रमाण।
प्रायश्चित्तीयते। प्रायश्चित्त।
फेनायति। ०ते। फेनमुद्गमति।
भिक्षयति। भिक्ष भिक्षायाम्।
भिषज्यति। भिषज् चिकित्सायाम्।
भूमयति। भूमन्।
भृशायते। अभृशो भृशो भवति।
भ्रमायते। भ्रमत्।
मगध्यति। मगध वेष्टने।
मद्रायति। ०ते। मद्र।
मन्तूयति। मन्तु अपराधे। रोषे च।
मन्दायति। ०ते। मन्द।
मन्त्रयते। मन्त्र।
मलिनयति। मलिन।
महीयते। महीङ् पूजायाम्।
मित्रीयते। मित्र।
मुखरयति। मुखर।
मृग्यति। मृग्यन्तः पदवीं मृगः।
मेघायते। मेघ।
मेधायते। मेधा आशुग्रहणे।
योक्त्रयति। योक्त्र।
रणकाम्यति। रणमिच्छति।
रहायते। रहस्।
राजायते। राजेवाचरति।
रेखायते। रेखा श्लाघासादनयोः।
रोमन्थायते। रोमन्थं वर्त्तयति।
लघयति। लघु।
लवणयति। लवण।
लवणस्यति। लवण।
लाट्यति। लाट् जीवने।
लिट्यति। लिट् अल्पकुत्सनयोः।
लेखायति। लेख्यति। लेखा लेख विलासे स्खलने च।
लेट्यति। लोट्यति। लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने च।
लेलायति। लेला दीप्तौ।
लोहितायति। ०ते। लोहित।
वरिवस्यति। वरिवस्।
वर्चायते। वर्चस्।
वल्गूयति। वल्गु पूजामाधुर्ययोः।
वाजयति। वाज।
वाष्पायते। वाष्पमुद्गमति।
विघ्नयति। विघ्न।
वितूस्तयति। तूस्त। केशान् विजटी-

करोति, पा ३, १, २१ ।
विधुरयति । विधुर ।
विपाशयति । पाशं विमोचयति ।
विमलयति । विमल ।
शुभस्यति । शुभ ।
शुभायते । शुभ ।
वेल्लयति । वेल्ल ।
वैरायते । वैरम् ।
वैभवते । विभवं करोति ।
शीघ्रयति अश्वः । शीघ्रार्थं भुङ्क्ते ।
शत्रुयति । शत्रु ।
शब्दायते । शब्दं करोति ।
शिथिलयति । शिथिलं करोति ।
शीघ्रायते । अश्वीव्रः शीघ्रो भवति ।
शुचीयते । शुचिम् ।
श्यामायते । श्याम ।
श्रमणायते । श्रमण ।
श्रद्धायति । श्रद्धा ।
श्रथायते । श्रथ ।
श्वेतयति । श्वेतमाचष्टे ।
सत्यापयति । सत्य ।
सपर्य्यति । सपर् पूजायाम् ।
सफलयति । सफल ।
समानयति । समान ।
समुद्रायते । समुद्र ।
सश्चीवरयते । चीवराण्यर्जयति ।
सम्बर्यति । सम्बर सम्भरणे ।
संभाण्डयते । भाण्डानि समाचिनोति ।
सम्भूयस्यति । संभूयस् प्रभूतभावे ।
संवर्मयति । वर्मणा संनह्यति ।
संवस्त्रयति । वस्त्रेण समाच्छादयति ।
सिंहायते । सिंह इवाचरति ।
सुखायते । सुखमनुभवति ।
सुख्यति । सुख तत्क्रियायाम् । सुख्येयुः प्रकृतयो नृपम् ।
सुमनायते । सुमनस् ।
सुस्थयति । सुस्थ ।
स्रजयति । स्रग्विन् ।
हन्मायते । हन्म ।
हरितायति । ०ते । हरित ।
हृणीयते । हृणीङ् रोषणे लज्जायाञ्च ।

सौवधातवः ।

[illegible] जुगुप्सायामिति बहवः । कृपा [illegible] ऋतीयते । ऋतीयाञ्चक्रे [illegible] पा ३, १, २८ । इयङभावे तु परस्मै [illegible]भम् । आनर्त्त । अर्त्तिष्यति । आर्त्तीत् ।
तु, अदा, प । गतित्वरिहिंसासु ।
ज, तु, दुरुढ, स्वादौ गताः ।
मर्क हासे । कर्कटः । कर्कशः ।
चकि भ्रान्तौ । चङ्करः ।
मर्क गत्याम् । मर्कटः ।
सिक सेचने । सिकता ।
मर्च ग्रहणे । मर्कः ।
कजि जन्मनि । कञ्जरः ।
पजि रोधे । पञ्जरः ।
मजि ध्वनौ । मञ्जरी । मञ्जुलः । मञ्जा ।
मट अवसादने । मटहः ।
वटि स्तेये । वण्टकः ।
कुठ छेदने । कुठारः । कुठेरः । कुठाकुः ।
उडु संहतौ । उडुपम् ।
वड़ आरोहणे । वड़भी । वड़िशः ।
कुत आस्तरणे । कुतपः ।
पुत्त गतौ । पुत्तिका ।
लत आघाते । लता ।
सात सुखे । सातयः, पा ३, १, १३८ ।
उद आधाते । ओदनः । उदकम् ।
चद संवरणे । चत्ता ।
सुदि स्तुतौ । सुन्दरः ।
कप लीब्ये । कपोलः ।
क्षुप अवसादने । क्षुपः ।
रिफ क्षेपे कुत्सने च । रिफः । रेफः ।

रिभ रवे । विरिब्धः पा ७, २, १८ ।
स्कन्भु स्कन्भु स्तन्भु स्तुन्भु गताः ।
डिम हिंसायाम् । डिण्डिमः ।
धम ध्माने । धमनिः ।
पीय प्रीणने । पीयूषम् ।
उर गतौ । उरगः ।
तद्रि मोहावसादयोः । तन्द्रा । तन्द्रिः ।
उल दाहे । उलपः । उल्का ।
लुल विमर्दने । लुलापः ।
शल गमने । शल्की ।
ऋश गतिस्तुत्योः । ऋश्यः ।
पश पश्यति, पा ७, ४, ८६ ।
रश स्वने । रशना ।
नक्ष द्युतौ । नक्षत्रम् ।
भिष रुग्जये । भिषक् । भेषजम् ।
युष भजने । योषित् । युवद् ।
लूष हिंसने । लूषणम् ।
सौत्रधातवः समाप्ताः ।

वैदिकधातवः ।

दीधीङ दीप्तिदेवनयोः ।
वेवीङ वेतिना तुल्ये ।
षस् सस्ति स्वप्ने ।
वश कान्तौ । चकरीतश्च ।
इति अदादिः ।

हृ चरणदीप्तोः ।
हृ प्रसह्यहरणे ।
ऋ सृ गतौ ।
भस भर्त्सनदीप्त्योः ।
कि ज्ञाने ।
तुर त्वरणे ।
धिष शब्दे ।
धन धान्ये ।
जन जनने ।
गा स्तुतौ ।
इति जुहोत्यादयः ।

पॄ प्रीतौ ।
स्पृ प्रीतिपालनयोः । स्मृ इत्येके ।
अह व्याप्तौ ।
दंश घातने पालने च ।
चमु भक्षणे ।
रिचि चिरि जिरि दाश हृ हिंसायाम् ।
इति स्वादिः ।

सूत्रानुसारि-धातुगणः।

द्यत खिता जिमिदा जिष्विदा जिक्ष्विदा रुच घुट रुट लुट लुठ शुभ क्षुभ णभ तुभ स्कुस्नु ध्वन्स भ्रन्श स्वनभु (हृतु हृधु शृधु स्यन्दू क्रपू) इति द्युतादिर्वृतादिश्च। द्युतादिभ्यो लुङि परस्मैपदं वा स्यात्। परस्मैपदेऽङ्च, पा १, ३, ९१। ३, १, ५५। हृतादेरान्तु स्यसनोः परस्मैपदं वा स्यात्, पा १, ३, ९२। परस्मैपदे इट्प्रतिषेधश्च, पा १, २, ५९।

घट व्यथ प्रथ प्रस म्रद स्खद च्यजि दक्ष क्रप कदि क्रदि क्लदि (कद क्रद क्लद) त्रिस्वरा इति घटादयः षितः। तत्फलं क्तस्य अङ्, पा ३, ३, १०४। ज्वर गड़ हेड वट भट णट ष्टक चक कखे रगे लगे झगे ह्लगे षगे ठगे कगे अक अग कण रण चण याण श्रण श्रथ कथ क्रथ क्लथ चन वनु ज्वल ह्वल ह्मल स्मृ दृ नृ श्रा ह्रा च्यप चल क्षद लड सदी ध्वन दल बल स्खल त्रपूष् क्षै स्वन इति घटादयो मितः। तत्फलन्तु णौ ह्रस्वत्वं चिस्मुलोर्वैकल्पिकदीर्घत्वञ्च, पा ६, ४, ९२। जनी जृष् क्नसु रञ्जोऽमान्ताश्च ज्वल ह्वल ह्मल नमामनुपसर्गाद्वा। ग्ला म्ला वनु वमाञ्च। न कम्यमिचमाम्। शमोऽदर्शने। यमोऽपरिवेषणे। खदिरवपरिभ्याञ्च। फण इति घटादिः। घटादीनां णिचि वृद्धिर्न स्यात्, पा ६, ४, ९२।

फण राजृ टुभ्राजृ टुभ्राशृ टुभ्लाशृ स्यमु स्वन इति फणादिः। फणादीनां लिटि एत्वाभ्यासलोपौ वा स्याताम्, पा ६, ४, १२५।

ज्वल जल चल टल टुल स्थल हल गल पल बल पुल कुल शल हुल पत्लृ क्लथे पथे मथे टुवम भ्रसु चर षह रस षदॢ ऌदॢ क्रुश कुच बुध रुह कस इति ज्वलादिः। ज्वलादिभ्यो णः स्याद्वा, पा ३, १, १४०। यज टुवप वह वस वेञ व्येञ ह्वेञ वद टुओखि इति यजादिः। यजादीनां किति सम्प्रसारणम्, पा ६, १, १५।

रुदिर ज्विष्वप श्वस अन जक्ष इति रुदादिः। रुदादिभ्यः सार्वधातुके इट्, पा ७, २, ७६।

जक्ष जाग्र दरिद्रा चकास्र शासु दीधी इति जक्षादिः। तत्फलमभ्यस्तसंज्ञा। झस्य च अदादेः, पा ७, १, ४।

पुष शुष तुष दुष श्लिष शक ष्विदा क्रुध क्षुध शुध षिधु (रध णश लप ट्वप द्रुह मुह ष्णुह ष्णिह इति रधादिः)। एभ्य इट् वा स्यात्, पा ७, २, ४५। (शमु तमु दमु श्रमु भ्रमु क्षमू क्लमु मदी इति शमादिः)। एषां श्यनि दीर्घः, पा ७, ३, ७४। (भ्रस यस जसु तसु दसु पसु वसु व्युष व्युस बुस म्लुष विस क्रुस मुस मसी समी लुठ उच मृष भ्रन्श त्रस क्रश जिदृष क्षष रुष रिष डिप कुप गुप पुप रुप लुप लुभ क्षुभ णभ तुभ क्लिदू जिमिदा जिक्ष्विदा ऋधु ग्रधु इति पुषादिर्दिवाद्यन्तर्गणः। पुषादीनां लुङि अङ् स्यात्, पा ३, १ ५५।

षूङ दूङ दीङ डीङ घीङ मीङ रीङ लीङ व्रीङः इति दिवाद्यन्तर्गणः स्वादिः । तत्फलं निष्ठानत्वम्, पा ८, २, ४५ । कौ १३५ ।

कॄ गॄ इङ घृङ प्रच्छ् इति किरादिसुदाद्यन्तर्गणः, कौ १५ । एभ्य सनि इट् स्यात्, पा ७, २, ७५ । कर्मकर्त्तरि न यक्चिणौ, कौ २७७ ।

कुट पुट कुच गुज गुड डिप छर स्फुट मुट त्रुट तुट चुट कुट जुट लुट कड कुड कुड़ पुड़ घुट तुड थुड स्थुड खुड स्फुर स्फुल (फुल) स्फ ड चुड व्रुड क्रुड भृड (भ्रुड) गुरी णू धू गु ध्रु ध्रुव कुङ कूङ इति कुटादिसुदाद्यन्तर्गणः । तत्फलम् अणिति गुणाभावः, पा १, २, १ ।

मुच्लृ लुप्लृ विद्लृ विप लिप विच क्रृती खिद पिश इति मुचादिसुदाद्यन्तर्गणः । तत्फलं सार्वधातुके नुमागमः, पा ७, १, ५८ ।

पूञ लूञ स्तॄञ कॄञ वॄञ धूञ शॄ पॄ वॄ भॄ मॄ दॄ जॄ भॄ धॄ नॄ कॄ ऋ गॄ ष्या री ली ब्ली म्ली (व्री भ्री क्षीष्) इति पूादिर्ल्वादिश्च । तत्फलन्तु सार्वधातुके ह्रस्वत्वम्, पा ७, ३, ८० । निष्ठानत्वञ्च, पा ८, २, ४४ ।

कण रण भण श्रण लुप हेठ । ह्वायि वाणि लोटि लोपि । चाणि क्षोठि इति काण्वादयः । एषां णौ चङुपधाया ह्रस्वो वा, कौ १८२ ।

ग्रस पुग दल पट पुट लुट तुजि मिजि पिजि लुजि मदि लघि त्रसि पिसि कुसि दशि कुशि घट घटि हृहि बर्ह वल्ह गुप धूप विछ चीव पुथ लोक लोचृ णद कुप तर्क हृतु हृधु रुठ लजि अजि दशि भृशि रुशि रुसि श्लोक नट पुटि जिवि रघि लघि अहि रहि महि लडि तड नल पूरी रुज ष्वद इत्याखदीयाः । एभ्यः सम्भवत्कर्मभ्य एव णिच् कौ १७८ ।

युज पृज अर्च यह ईर ली हृजी हृज जॄ जि रिच शिष तप तृप छृदी चप छृप हृप हृभी हृभ श्रथ मी ग्रन्थ सीक चीक अर्द हि सि अर्ह अङः—षद शब्द छद जुष धूञ प्रीञ श्रन्थ ग्रन्थ आप्लृ तनु चण वद वच मान भू गर्ह मार्ग कठि मृजु भृष हृष इत्याधृषीयाः । एभ्यः णिच् वा स्यात्, कौ १७८ ।

चित दशि दसि दस डप डिप तन्त्रि कुटुम्ब मन्त्रि स्वश तर्ज भर्त्स वस्त गन्ध विष्क हृष्कि निष्क लल कण तूण भ्रूण शठ यत्न स्थम गूर शम लच्च कुत्स त्रट गल भल कूट कुट्ट वनत्तु हृष मद दिवु गृ विद मन यु कुत्स इत्याकुत्सीया आत्मनेपदिनः, कौ १८४ ।

पद गृह मृग कुह शूर वीर स्थूल अर्थ सच गर्व इत्यागर्वीयाः । आगर्वादात्मनेपदं णिज्विकल्पश्च, कौ १८४ ।

इति सूत्रानुसारि-धातुगणः ।
